TRIVANDRUM SANSKRIT SERIES

No. LXXX.

कौटलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिविरचितश्रीमूलाख्य-
व्याख्योपेतम् ।

द्वितीयः संपुटः — तृतीयचतुर्थपञ्चमषष्ठसप्तमाधिकरणानि ।

THE

ARTHAŚASTRA

OF

KAUṬALYA

with the commentary Śrimūla of

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÂSTRÎ,

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF
GREAT BRITAIN AND IRELAND,
Curator of the Department for the Publication of
Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR.

Part II — 3, 4, 5, 6 & 7 Adhikaranas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
192[illegible]

[Inland Price Rs. [illegible]] Foreign [illegible]

TRIVANDRUM SANSKRIT SERIES
No. LXXX.

THE

ARTHAŚĀSTRA

OF

KAUṬALYA

with the commentary Śrîmûla of

MAHĀMAHOPĀDHYĀYA
T. GAṆAPATI ŚĀSTRÎ,

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND,

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR.

Part II — 3, 4, 5, 6 & 7 Adhikaranas.

द्वितीयः

...HED UNDER THE AUTHORITY OF THE GO...
...S HIGHNESS THE MAHARAJAH OF TRAV...

rary

अनन्त... TRIVAND...
...नामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशास...
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९९, क्रैस्ताब्दाः १९२४.

...nam...
...l, on t...
...to the great
...e been built up
...me Pāṭaliputra,
...Jolly.);

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८०.

कौटलीयम्

अर्थशास्त्रं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

...डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

विरचितया श्रीमूलाख्यया व्याख्यया

समुपेतं

तेनैव संशोधितम् ।

द्वितीयः सम्पुटः — तृतीयचतुर्थपञ्चमषष्ठसप्तम...

...e name
...is quite
...of Chā-
...andragupta
...i, held that
...named
...i, on the
...to the great
...been built up
...me Pātaliputra,
Jolly.);

तच्च

अनन्तशयने

...मद्दिमश्रीमूलकरामवर्मकुलशेखरमहाराजशास...

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९९, क्रैस्ताब्दाः १९२४.

PREFACE.

This is the second part of the Arthaśāstra of Kauṭalya, in which are included the next five Adhikaraṇas only, in order that it may be equal in size to the first.

When this volume was about to be published, a copy of Dr. Jolly's edition of the Arthaśāstra published at Lahore, came to hand, the readings of which, as well as of the Mysore edition, as compared with those of the Trivandrum edition, will be given as an appendix to the third part.

Dr. Jolly's introduction deals with many questions connected with the work. We shall consider some of his arguments in support of his theories, as also of others referred to therein.

From the closing verse of the first chapter,

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥

and from the closing verse of the tenth chapter of the second Adhikarana,

सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः ॥

and from the two stanzas at the end of the work,

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम् ।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च ॥

as well as from the fact that quotations cited under the name of Kauṭalya or Kauṭalīya are all found in the work, it is quite proper that it should be regarded as the production of Chāṇakya alias Vishṇugupta, a contemporary of Chandragupta Maurya. But Drs. Winternitz, Jolly and Keith, hold that the Arthaśāstra was not the production of a person named Kauṭalya, a contemporary of Chandragupta Maurya, on the following grounds:—

(i) no reference is made in the work to the great empire of Chandragupta, which is said to have been built up by Chāṇakya (Dr. Winternitz), nor is the name Pāṭaliputra, the capital of the empire, mentioned, (Dr. Jolly.);

(ii) the theories propounded refer rather to the governance of a number of small independent states than of a great empire like that of Chandragupta, (Dr. Winternitz);

(iii) no great person named Kauṭalya did exist during the time of Chandragupta Maurya, as he is not mentioned by Megasthenes, (Dr. Jolly);

(iv) the person referred to frequently, as Kauṭalya, is not the author, because, the opinion of Kauṭalya in the course of the discussion of ministerial usurpation, dealt with in the sixth chapter of the Yogavritta Adhikaraṇa is criticised by Bhāradvāja; and, it is impossible, if Kauṭalya was the author of the work, that his opinion would be criticised by a previous Āchārya, (Dr. Keith);

(v) the word Kauṭilya meaning as it does falsehood and hypocrisy could not possibly have been adopted as the name of the famous minister of Chandragupta (Drs. Keith and Winternitz).

Let us now consider these arguments.

With regard to the first, it may be said that the author could have referred to the empire of his own making, either (*a*) in the course of the work, as an illustration, or (*b*) at the beginning or end of the work, when he makes himself known. Of these two positions, the first is not possible; for, in a general treatise on the science of polity, it is but proper for an author to quote as authority the government of ancient kings well known to Itihāsas, instead of the one of his own making, lest he should be deemed as praising himself. As for the second, the author can be said to refer to the empire of Chandragupta, when he says at the end of the work in the sloka,

'येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥'

that that person is the author of the work, who pulled down the empire of the Nandas. From this it may be inferred that reference is also made to the place where he lived, viz. Pāṭaliputra. It will be noted here that the author never fails to make mention of towns and cities, whenever he finds necessity to do so, as when he speaks of Magadha, Mathura, etc., as the sources of silk, cotton and other goods. If Pāṭaliputra is not mentioned in the course of the work, it is because there is no context for it.

The second argument is not conclusive. The theories of government described are as much applicable to a great empire as to small and independent states. Besides, the author dwells especially on the mutual duties of emperor and subject kings in the fifteenth and sixteenth chapters of the seventh Adhikaraṇa.

The third argument cannot be accepted. How can the record of Megasthenes which is admittedly a mixture of real and imaginary statements, be an authority on a subject which itself is not mentioned therein? Granting that Megasthenes knew of Kauṭalya, it does not necessarily follow that he should have mentioned that name in his records. It is possible that Megasthenes came to India many years after the death of Kauṭalya when Chandragupta was in full liberty and when the events connected with the name of Kauṭalya began to fade away from the memory of the subjects. Again, he might have heard of Kauṭalya from mere hearsay and because he did not know much of him he might not have cared to say anything regarding him.

Thus the probabilities being more for not mentioning the name of Kauṭalya by Megasthenes, how can it be said that the mighty Kauṭalya who is known to fame for thousands of years and whose exploits are recorded in the Vishṇu, Vāyu and other authoritative Purāṇas did not exist during the time of Chandragupta? Dr. Jolly's argument so far as it based on the accounts of Magasthenes is tantamount to saying that, in solving problems concerning Indian antiquities, even the silence of Megasthenes is to be regarded as a piece of evidence. It further implies an utter disregard of such eminent authorities as the Vishṇu Purāṇa, Vāyu Purāṇa, Kāmandakīya Nītisāra etc.

The fourth argument is not correct. For Kauṭalya is not criticised here by Bhāradvāja as said by Dr. Keith. It is usual for writers either to state first the views of others and the reasons therefor and then to criticise and establish their own views, or to state their own views first, and then criticise the views of others. It is the latter method that is resorted to here by the author. The purport of the passages beginning from 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' and ending with 'प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः' is this:" My opinion is that the minister shall make the prince assume the powers of sovereignty, while Bhāradvāja, an ancient Āchārya, thinks quite the contrary (that is, the minister shall take upon himself the powers of sovereignty) which is full

of evils as it excites the anger of the people and is unrighteous and uncertain of success" (Vide Sanskrit introduction for a fuller discussion).

The fifth argument is not convincing. The name Kauṭilya though a bad one might have been derived like the name Kautsa as stated by Prof. K. V. Rangasvami Iyengar in his additional notes on "Considerations on some aspects of Ancient Indian Polity". In fact, the word Kauṭilya (इकारमध्य) is a mistake handed down to us by scribes and readers. All the ancient manuscripts of the text and the commentaries of the Arthaśāstra, available here, read throughout as Kauṭalya (अकारमध्य), and not as Kauṭilya. Kuṭala is the name of a Rishi who founded the Kuṭala Gotra and any descendant of that Gotra may be called Kauṭalya. This is the reason why the author of Jayamangalā, a commentary on the Nītisāra of Kāmandaka observes that Kauṭalya is the name given to the author of the Arthaśāstra after his Gotra, Kuṭala. A few other details regarding the name are given in the introduction to the first volume.

Thus are refuted the contentions that at the time of Chandragupta Maurya a great man named Kauṭalya never existed and that the extant Arthaśāstra could not have been written by a contemporary of Chandragupta. We have now arrived at the conclusion that the Arthasāstra was written by a contemporary of Chandragupta Maurya, which also makes definite the date claimed for it, viz., 4th century B. C.

We shall now turn to a few minor points which in the opinion of Dr. Jolly and others are regarded as inconsistent with the early date assigned to it.

1. The number of chemical substances mentioned in the Arthaśāstra being larger than that in Suśruta and other works of the kind points to a later stage of the development of the science of chemistry at the time of Kauṭalya than at the time of Suśruta and thus testifies to the posteriority of the Arthaśāstra (Winternitz). But this is an unwarranted inference. It is quite possible that at the time the science had attained an advanced stage, Suśruta dealt with only a small number of chemicals, because his was a purely medical work, admitting mention of such substances only as were relevant to the subject. But the Arthaśāstra is not limited in scope. It concerns itself with a variety of subjects such as the manufacture of gold and other precious metals, the preparation

of poison etc., and consequently it refers to a good number of chemical substances. But in the Dhātukautalīya* and similar other works on chemistry one might expect an exhaustive treatment of chemicals. What follows from this is, the extent of the mentioning of chemical substances wherever necessary in a work that deals primarily with other subjects cannot by itself be made the basis for fixing the age of that work.

2. The Arthaśāstra of Kautalya, says Dr. Jolly, has largely borrowed from the Yājnavalkyasmriti, and as the date of the latter is later than the 3rd century A. D., the Arthaśāstra should have come after it. This is not correct. For there is no evidence to show that the Yājnavalkyasmriti is later than the third century A. D. On the contrary, the date of Kautalya having been fixed as 4th century B. C. it naturally follows that Yājṇavalkya, from whom Kauṭalya has borrowed, should be anterior to the latter. What is logically true cannot be contradicted by an apparent argument. Besides, the word Yajṇavalka is mentioned in the Gargādigaṇa (गर्गादिगण) under the sūtra "गर्गादिभ्यो यञ्" of Pāṇini. It is clear from this that Pāṇini knew of a Yājnavalkya born of the Yajṇavalka Gotra. Probably the same Yājnavalkya was the author of the Smriti and therefore earlier than Pāṇini.

3. Dr. Keith is of opinion that the use of correct Trishtup stanzas in regular metre as found in the Arthaśāstra is not in favour of its early date and that the language of the work is not sufficiently archaic. It may be asked which is unsuitable to the antiquity—the use of mere Trishtup stanzas or the correctness and regularity of the four lines? Whatever it is, there is no sort of restriction in the case of a non-vedic work. Though to Dr. Keith, the language does not look archaic, to me it does look decidedly archaic, more archaic than the Mahābhāshya of Patanjali and similar other works. The matter may well be left to the judgment of Sahridayas.

4. Another scholar thinks that the Arthasāstra, covering as it does, several branches of human knowledge could not possibly be the production of a single author, but a composition by several authors. The following statement of Kāmandaka at the beginning of his Nītisāra,

वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥

* Vide introduction to the first part p. 10.

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपातामूलतः श्रीमान् सुपर्वा नन्दपर्वतः ॥
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥

leaves no room for doubt on this matter. Here Kāmandaka ascribes the work to Vishnugupta after likening him to God Brahman in respect of his being a seer and an author of various sciences. The date of Kāmandaka is said to be the 1st century B. C., and he can certainly be credited with more accurate and reliable knowledge about Kautalya than we of the present day. Whatever may be the date of Kāmandaka, it is certain that he was far anterior to the poet Bhavabhūti. It is legitimate to surmise from the Mālatīmādhava that Bhavabhūti was conversant with the Nītitsāra of Kāmandaka, as he thought it fit to give the name Kāmandaka —the traditional sense of which is restricted to the author of Nītisāra—to a female ascetic in his Mālatīmādhava who is described as proficient in the art of diplomacy. Nor is "Kāmandakī" an accidental and unmeaning name given by the poet without any reference to the characteristics of the author of the Nītisāra, as Dr. Jolly thinks, for, all the characters in the Mālatīmādhava are given significant and appropriate names. The names Mālatī and Mādhava which are excitants of Śringārarasa are quite suitable to the heroine and hero. Aghoraghanṭa and Kapālakuṇḍalā stand for the terrible worshippers of Chāmundī, while Buddharakshitā and Avalokitā represent the disciples of the Buddhist nun. Thus when all the names of the characters are significant, it is not reasonable to regard the name Kāmandaka alone as unmeaning and accidental like Dittha (डित्थ). Further no one need doubt whether a mastery in so many fields of knowledge could ever be met with in one individual, because, when it is quite possible that a person gifted with an intellect of a very high order may become सर्वज्ञकल्प, it is not at all a wonder if he attains mastery over a number of subjects such as Kautalya is credited with.

What we have said above disproves the observation of Dr. Jolly, that the "whole work is likely to have been

composed by a single person, probably a Pandit belonging to a school of polity and law, who to render a dry subject interesting, introduced debates in which the Pūrvapaksha is put in the mouth of eminent sages or of deities whose names he got from the Mahābhārata or from tradition, while the Uttarapaksha or Siddhānta is reserved for Kautalya", in as much as the evidences furnished by Kāmandaka and other eminent writers in support of the ascription of the authorship of the Arthasāstra to Kautalya are still extant. Dr. Jolly seems to think that there were really no works composed by the ancient Āchāryas Bhāradvāja, Parāsara, Visālāksha, Brihaspati, etc., which can be regarded as the sources of the several Pakshas ascribed to them in the Arthasāstra. But we have seen in the commentary on the Yājnavalkyasmriti by Visvarūpachārya, the illustrious predecessor of Vijnānesvara long extracts from the Arthasāstra of Brihaspati and Visālāksha (T. S. Series No. 74, pp. 184, 188 and 190), and it is clear therefore that the Arthasāstra of Brihaspati and Visālāksha must have existed during the time of Visvarupachārya. In like manner, it can be inferred that the works of Bhāradvāja and other Āchāryas, who are mentioned in the Arthasāstra along with Brihaspati and Visālāksha must have once existed but disappeared subsequently.

So far we have considered in detail the chief opinions of Dr. Jolly and others. One more statement of Dr. Jolly has to be examined. It is that for the Arthasāstra there was a surname 'Samāna Tantra' (समानतन्त्र) which was hitherto unknown. Medhātithi in his commentary on the 191st sloka in the seventh chapter of the Manusmriti quotes the verse 'द्वे शते धनुषाम्' which is found in the fifth chapter of the tenth Adhikarana of the Arthasāstra of Kautalya and introduces the quotation by saying 'समानतन्त्रेणोक्तम्'. Similarly on the 205th sloka in the same chapter, he quotes 'दैवं . . . . मानुषं कर्म लोकं पालयति' which is an adaptation of the sentence 'दैवमानुषं हि कर्म लोकं यापयति' found in the second chapter of the sixth Adhikarana, and introduces this quotation by saying 'समानतन्त्रेऽपि'. From this Dr. Jolly concludes that the Arthasāstra was surnamed Samānatantra, and also says that since the phrases 'इति समानं पूर्वेण' 'इति समानम्' are found to occur in the first chapter of the fifth Adhikarana and in many other places this name is quite appropriate to the work. But this is obviously wrong. Samāntantra is a Karmadhāraya compound word which should be split as समानं च तत् तन्त्रं च and

means another Sāstra on the same subject. What is conveyed in समानतन्त्रेणोक्तम् is that the topic under reference is also dealt with in another sastra on the same subject. That sastra is, in fact, the Arthasāstra of Kautalya. The word समानतन्त्र is found not only in the Bhāshya of Medhātithi, but also in the Nyāyasūtra of Gautama 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः'. It is an expression commonly used in commentaries on sastras when another sastra is cited as authority. On no ground can it be said that Arthasāstra is meant by that word. It may here be noted that in the sastraic works the transference of a statement from one place to another (अतिदेश) is indicated by various phrases such as 'समानं पूर्वेण' 'समानम्' 'पूर्ववत्' 'प्राग्वत्' 'एतेन व्याख्यातम्'. All these phrases are synonymous and the use of any of them is common to all works.

Trivandrum,
17th May 1924.

T. GAṆAPATI SĀSTRĪ.

उपोद्घातः ।

अयं कौटलीयार्थशास्त्रस्य द्वितीयः सम्पुटः । अत्र धर्मस्थीयं कण्टकशोधनं योगवृत्तं मण्डलयोनिः षाड्गुण्यमिति पञ्चाधिकरणानि निवेशितानि । तद्गतानां प्रमेयानामनुक्रमणी चात्र योजिता । पूर्वस्मात् सम्पुटादेतस्य परिमाणाधिकत्वं परिहर्तुमुत्तराधिकरणमिह न योजितम् ।

यावत् सम्पुटोऽयं प्रकाशनाय सज्जीकृतः, तावत् कौटलीयार्थशास्त्रस्यैकं नूतनं संस्करणं जर्मनिदेशीयपण्डितजालिकृतमिति पाञ्चनदालवपुराद् बहिरवतीर्णं दृष्टं, यदीयान् पाठविशेषान् मैसूरपुस्तकगतैरस्मदीयपुस्तकगतैश्च पाठविशेषैः सहान्योन्यव्यतिरेकावगमार्थमस्मदीयतृतीयसम्पुटस्य परिशिष्टे प्रदर्शयिष्यामः । अस्य तु लवपुरीयस्य पुस्तकस्योपोद्घाते जालिना कौटलीयमर्थशास्त्रमधिकृत्य बहु प्रपञ्चितम् । तत्र दृष्टान् कांश्चित् प्रमाणविकलांस्तदीयान् परकीयांश्चाभिप्रायान् इह विचारयामः ।

"सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥"

इति प्रथमाध्यायान्तिमश्लोकात्,

"सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः ॥"

इति द्वितीयाधिकरणदशमान्तिमश्लोकात्,

"येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम् ।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च ॥"

इति ग्रन्थशेषश्लोकाभ्यां, कौटलीयनाम्ना कौटल्यनाम्ना च ग्रन्थान्तरेषु प्रमाणतयोपात्तानां वाक्यानां ग्रन्थेऽस्मिन्नुपलम्भाच्चास्य प्रणेता स एव चन्द्रगुप्तोपजीवितो विष्णुगुप्तापरनामा साक्षाच्चाणक्य इति हि न्याय्या लोकस्य प्रतीतिः ।

अत्राप्याश्चर्यं त्रित्रा विप्रतिपन्ना उपलभ्यन्ते । तेष्वेक आस्त्रिया-देशीयः पण्डितो विण्टरनिट्झ्नामा, अन्यो जर्मनिदेशीयो जाकिनामा, अपरः कीत्संज्ञ आङ्गलेयपण्डितः । ते ह्येककण्ठ्यादूहन्ते —

चन्द्रगुप्तकालिकः कौटल्यो नाम कश्चिद् अस्यार्थशास्त्रस्य कर्ता नासीदिति । ऊहहेतूंश्चोल्लिखन्ति —

१. चन्द्रगुप्तसाम्राज्यं स्वाधिष्ठितं ग्रन्थे क्वापि न सूचितं, चन्द्रगुप्तस्य स्थानीयं पाटलीपुत्रं च न स्मृतमिति,

२. क्षुद्रक्षुद्रस्वतन्त्रराज्यतन्त्रणरीतेरुपदेशेऽपि साम्राज्यतन्त्रणरीतिस्तत्र नोपदिष्टेति,

३. चन्द्रगुप्तकाले कौटल्यनामा यथाप्रतीतमाहात्म्यशाली कश्चित् पुरुषविशेष एव तावन्न स्थितः मेगास्तनीशनाम्ना यवनेन चन्द्रगुप्तसंस्तविना लिखिते चरितनिबन्धे तन्नामाग्रहणादिति,

४. कौटल्यः कौटल्य इति ग्रन्थे योऽसकृन्नाम्ना निर्दिश्यते स ग्रन्थकाराद् भिन्न एव योगवृत्तषष्ठाध्याये 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्युपक्षिप्तस्य कौटल्यमतस्य 'नैवमिति भारद्वाजः' इति भारद्वाजेन प्रतिक्षेपणात्, कौटल्यस्य प्रकृतार्थशास्त्रकर्तृत्वे पूर्वाचार्येण भारद्वाजेन तन्मतप्रतिक्षेपणायोगादिति,

५. कौटिल्य इति नामधेयमेव तावत् गर्ह्यार्थत्वाद् ग्रन्थकर्ता स्वीयत्वेन नोपाददीतेति च ।

त एतेऽत्यन्तनिःसारा मे प्रतिभान्ति । तथाहि —

न तावत् प्रथमो हेतुः शक्यशङ्कः, चन्द्रगुप्तसाम्राज्यं स्वाधिष्ठितं कौटल्येन किं ग्रन्थमध्येऽर्थवादप्रसङ्गात् स्मर्तव्यम् आहोस्विद् ग्रन्थस्यादावन्ते वा स्वात्मनिवेदनप्रसङ्गात् स्मर्तव्यम् ऊहको मन्यते । नाद्यः पक्षः, सर्वराजसाधारणराज्यतन्त्रोपदेशपरे शास्त्रेऽस्मिन्नितिहासप्रसिद्धान्येव राजवृत्तान्यार्थवादिकतयोदाहर्तुमुचितानि, न तु स्वाधिष्ठितस्य साम्राज्यस्य वृत्तम् । तद्धि वर्ण्यमानं प्रत्युत विकत्थनतामेव वर्णयितुः प्रत्याययेत् । द्वितीयपक्षे तु 'येन

शस्त्रं च शास्त्रं च' इति ग्रन्थान्तश्लोके नन्दराज्योन्मूलयितृत्वमात्मनो वदता ग्रन्थकृता स्वाधिष्ठितं चन्द्रगुप्तसाम्राज्यं सूचितमेव । एतेन पाटलीपुत्रास्मरणमपि समाहितं, नन्दराज्योन्मूलनकर्तृत्वकथनेन स्वाधिष्ठितदेशनगरादेरप्युक्तप्रायत्वात् । ग्रन्थमध्ये तु प्रसङ्गाभावात् पाटलीपुत्रं न स्मृतम् । मगधमथुरादिकं हि पत्रोर्णाकार्पासादिद्रव्यविशेषोत्पत्तिस्थानत्वात् कोशप्रवेश्यरत्नपरीक्षाप्रकरणादौ द्रव्यविशेषोत्पत्तिस्थानप्रस्तावे स्मृतम्; पाटलीपुत्रं तु तदभावात् क स्मर्तव्यम् ।

द्वितीयो हेतुः शशशृङ्गायितः; यतः शास्त्रेऽस्मिन्नुपदिष्टास्तन्त्रणरीतयः क्षुद्रराज्यमहाराज्यसाम्राज्यानां सर्वेषां साधारणा एव । विशेषेण च षाड्गुण्याधिकरणस्य पञ्चदशषोडशाध्याययोर्दण्डोपनमितानां राज्ञामुपनमयितरि वृत्तिम् उपनमयितुस्तेषु वृत्तिं च प्रपञ्चयता सम्राजां तदधश्वराणां राज्ञां च परस्परतन्त्रणमुपदिष्टमेव ।

न तृतीयो हेतुः साधुः । मेगास्तनीसलिखितो हि चरितनिबन्धो भूताभूतार्थसङ्कीर्णः परिलुप्तबहुंशश्च; स कथं स्वानुक्तेऽप्यर्थे निर्णायको भवितुमर्हेत् । किञ्च जानतापि कौटल्यं मेगास्तनीसेन स्वग्रन्थे तदस्मरणं न्याय्यं संभाव्यते । मेगास्तनीसो हि कौटल्यस्वर्गप्राप्तेः परतः बहुषु वर्षेष्वतीतेषु कौटल्यपरतन्त्रत्वव्यपगमनिकामाविष्कृतनिजप्रभावपरमोजिते चन्द्रगुप्तस्य शासने वर्तमाने चन्द्रगुप्तगुणातिशयपरितृप्ताभिस्तन्नेतृचाणक्यगुणेषु प्रकृतिभिरनतिस्मर्यमाणेषु पश्चादेव नूनं भारतमागतः, चन्द्रगुप्तं च राजानमुपाश्रितः । तस्य चन्द्रगुप्तपरमैश्वर्यसाक्षात्कारविस्मितस्य वैदेशिकस्य पूर्ववृत्तजिज्ञासाविरहितस्य किंवदन्तीवशात् सामान्यतः श्रुतमपि कौटल्यवृत्तमनिर्ज्ञातविशेषतया न श्रद्धाया विषयो बभूव; अतस्तत् स्वनिबन्धे स नूनं न लिलेख । अविदितमेव वा सर्वात्मना मेगास्तनीसस्य चन्द्रगुप्तसंस्तवपरायणस्य कौटल्यवृत्तं सम्भाव्यते, पौरजानपदसंस्तवाल्पत्वात् । एवञ्जातीयेषु मेगास्तनीसनिबन्धे कौटल्यनामानाख्यानस्य निमित्तेषु सम्भावयितुं शक्येषु तत् कौटल्यस्य अनेकसहस्रवर्षजगद्गीयमानकीर्तेः विष्णुवायुपुराणाद्युपश्लोकितमाहात्म्यस्यासत्तां चन्द्रगुप्तकाले गमयतीति कः खलु वक्तुं व्यवस्येत् । तथा वदता नाम जालिनार्थादिदमेवोक्तं भवति — 'भरतखण्डपुरावृत्तविशेषनिर्णयविषये वस्तुतस्त्वाज्ञानावज्ञानादिनिमित्तो मेगस्तनीसस्य मूकिमापि प्रमाणं, प्रमाणमेव न

केवलं किन्तु भारतीयैः प्रमाणतया परिगृहीतस्योपपन्नार्थप्रतिपादकस्य विष्णु-वायुपुराणादिपुरातनग्रन्थजातस्य प्रामाण्यमप्युपघ्नन्ति' इति । अत्र वयमुच्चैश्चित्रीयामहे ।

न चतुर्थो हेतुः सङ्गतः, भारद्वाजेन कौटल्यमतस्यात्राप्रतिक्षेपात् । ग्रन्थकारा नाम परमतं ससाधकं प्रथममुपन्यस्य तत्खण्डनपूर्वं स्वमतं स्थापयन्ति, स्वमतं वा प्रथमं निर्दिश्य पश्चात् तद्विरुद्धं परमतमनूद्य दूषयन्ति । अनयोरुभयविधयोः समुदाचारयोर्द्वितीयः प्रकार इह ग्रन्थकारेणाश्रितः । 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यादिना 'प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः' इत्यन्तेन ग्रन्थेनैतदेव हि प्रतिपाद्यते— "अमात्य एकैश्वर्यं कारयेदिति मम मतं, भारद्वाजस्य तु पूर्वाचार्यस्य मतं मन्मतविरुद्धमीदृग्रूपं, तच्च प्रकृतिद्वेषजनकत्वात् पापिष्ठत्वादनियतसिद्धिकत्वाच्च बहुदोषम् इति, अर्थाच्च मन्मतं प्रकृतितोषकत्वाद् धर्मिष्ठत्वाद् नियतसिद्धिकत्वाच्चादोषं बहुगुणम्" इति च ।

अत्र हीदमवधेयम् — इह खल्वनेकाचार्यनामग्राहप्रवर्तितेष्वर्थविमर्शेषु सर्वत्र अनुपपन्नाचार्यमतखण्डनपूर्वमन्ते किमपि मतमुपपन्नं कौटल्यसम्बन्धितया नियमेन स्थाप्यते । कौटल्यश्च वस्तुतो ग्रन्थकार इति कृत्वा 'इति कौटल्यः' इत्युक्तीनां सर्वासाम् 'एवमहं मन्ये' इत्येवार्थः प्रतिपत्तव्यः । 'इत्यहमि'त्यहम्पदेनात्मनि परामर्शनीये कौटल्यपदेन परामर्शः स्वाहङ्कारपरिहारार्थं आचार्यसमुदाचारसिद्धो महाभाष्याकारादीनां महाभाष्यादौ 'गोनर्दीयस्त्वाह' इति गोनर्दीयादिपदेन परामर्शवत् । तथा च 'प्रकृते एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यस्यायं फलितोऽर्थः—'राजव्यसनवशात् स्वायत्तीकर्तव्यतया प्राप्तमपि अखण्डं राज्यममात्यः स्वयमनपहरन् बालं राजकुमारमेवैकैश्वर्येण योजयेदित्यहं मन्ये' इति । 'एवममात्यः कारयेदित्यहं मन्ये' इत्युक्त्या सूचितम् 'एवममात्यो न कारयेदित्यन्यो मन्यते' इत्यमुमर्थम् अन्यनामग्रहणपूर्वं स्पष्टयति — 'नैवमिति भारद्वाजः' इति । केन प्रकारेण तर्ह्यमात्यः कारयेदिति भारद्वाजो मन्यत इत्याकाङ्क्षायामाह — 'प्रम्रियमाणे' इत्यादिना 'कालः कर्म चिकीर्षतः' इत्यन्तेन । एतावता भारद्वाजमतस्य स्वरूपं तत्साधकं च भारद्वाजोक्तं दर्शितं, न तु कौटल्यमतं भारद्वाजेन खण्डितं दर्शितं, साधकयुक्त्युपस्कृतस्य कौटल्यमतस्य कौटल्यप्राचीनेन भारद्वाजेनापरिज्ञाततया खण्डनायोगादिति बोद्धव्यम् । यदिदं भारद्वाजमतं ससा-

धकमुपदर्शितं, तद् भारद्वाजार्वाचीनः कौटल्यः खण्डयति — 'प्रकृतिकोपकमि'त्यादिना। अमात्येन क्रियमाणं स्वयं राज्यहरणं प्रकृतिद्वेषजनकं पापिष्ठम् अनिश्चितसिद्धिकं चेत्यतः कारणाद् भारद्वाजमतं हेयमिति कौटल्योऽभिप्रैतीत्यर्थः। एतेन कुमारराज्याभिषेचनस्य स्वाभिमतस्य प्रकृतिरञ्जकत्वधर्मिष्ठत्वैकान्तिकत्वरूपगुणयोग उपादेयत्वप्रयोजक उक्तप्रायः। एवञ्चात्र भारद्वाजस्य सम्प्रतिपन्नपूर्वाचार्यभावस्य कौटल्यमतखण्डयितृताया लेशतोऽप्यप्रतीतेः प्रत्युत कौटल्यस्यैव भारद्वाजखण्डयितृतायाः संप्रत्ययाच्च कौटल्यस्य प्रकृतग्रन्थकर्तृत्वविघटकं न किञ्चिदस्तीति स्पष्टमेव।

न पञ्चमोऽपि हेतुः समञ्जसः। यतो वाक्रिमार्थतया कुत्सितापि कौटिल्यसंज्ञा कौत्सादिसंज्ञावदुपपद्यत इति प्रवक्तृरङ्गस्वाम्यार्येण समाधानमुक्तमेव। वस्तुतस्तु कौटिल्य इतीकारमध्योऽपपाठ एव पठितृलेखकप्रमादकृतः, सर्वेषु प्राचीनमूलादर्शग्रन्थेषु तद्विवरणादिषु च कौटल्य इत्यकारमध्यस्यैवैकरूप्येण पाठात्। कुटलो नाम गोत्रप्रवर्तक ऋषिविशेषः। तस्य गोत्रापत्यं कौटल्य इति। अत एव कामन्दकनीतिसारव्याख्यायां जयमङ्गलायां 'कौटल्य इति गोत्रनिबन्धना विष्णुगुप्तस्य संज्ञा' इत्युक्तम्। अधिकम् अर्थशास्त्रप्रथमसम्पुटोपोद्घाते द्रष्टव्यम्।

तदित्थं 'मौर्यचन्द्रगुप्तकाले कौटल्यनामा कश्चिद् महापुरुषो नासीदि'ति वादः, 'चन्द्रगुप्तसहचरेण नेदमर्थशास्त्रं प्रणीतं भवितुमर्हती'ति वादश्च दूरतो निरस्तः। चन्द्रगुप्तसहजीविप्रणीतत्वनिर्णयेन चार्थशास्त्रस्य कालोऽपि निर्धारितः क्रैस्तप्राचीनचतुर्थशताब्दीलक्षणः।

यत्तु ग्रन्थस्य तावत्प्राचीनतायां बाधकमिव किमपि किमपि जालिप्रभृतिभिरुपन्यस्तं, तदिदानीमालोचनीयम्। तत्र —

(१) सुश्रुताद्यपेक्षया धातुरसवादप्रकाराणामर्थशास्त्रेऽधिकतया कथनदर्शनेनास्य धातुरसवादविद्याप्रकर्षकालप्रभवत्वप्रतीत्या धातुरसवादविद्याशिशुभावावस्थाविर्भूतसुश्रुताद्युत्तरकालोत्पन्नतावगम्यत इति सुश्रुतात् क्रैस्तप्राचीनप्रथमशताब्दीभवादर्वाचीनमर्थशास्त्रमिति विण्टरनिट्स्। इदमयुक्तं — कामं सुश्रुताद्यपेक्षया धातुरसवादानामधिकाः प्रकाराः अर्थशास्त्रे प्रतिपाद्यन्ताम्। किन्तु तावता धातुरसवादशास्त्रस्य सुश्रुतादिकाले बालभावः अर्थशास्त्रकाले तरुणिमेति विभागो न कल्पयितुं शक्यः। तरुणिमदशायामेव सत्यां सुश्रुतादौ

धातुरसवादप्रकाराणामल्पानाम्, अर्थशास्त्रे बहूनां च कथनौचित्यसम्भवात्। सुश्रुतादितन्त्रं हि नाम चिकित्साशास्त्रम्। तत्र भेषजसाधनोपयोगितया यावद् धातुरसवादप्रमेयमपेक्षितं तावदेवाभिधानीयमित्यल्पमभिहितं स्यात्। अर्थशास्त्रे तु राज्यतन्त्रप्रधाने सुवर्णरजतादिसाधनाय शत्रुनिग्रहार्थौषधविशेषसाधनाय च यावदपेक्षितं तावदभिधानीयमिति पूर्वतः किञ्चिदधिकमभिहितं स्यात्। धातुरसवादप्रधाने तु शास्त्रे धातुकौटलीयादौ तत्सम्बद्धं प्रमेयजातं सर्वमभिधानीयमिति तत् कात्स्न्र्येनाभिहितं स्यात्। तस्माद् धातुरसवादानां प्रमेयान्तरप्रधानेषु तन्त्रेषु मनागमनाग् वा यथापेक्षमानुषङ्गिकतयाभिधानमभिधातृकालानुमानादावाकिञ्चित्करम्।

(२) याज्ञवल्कीयं धर्मशास्त्रमुपजीव्यतेऽर्थशास्त्रेण। तत्तु धर्मशास्त्रं क्रैस्ताब्दीयतृतीयशतकोत्तरकालभवमिति तदर्वाचीनतैव प्रकृतस्यार्थशास्त्रस्येति जालिः। इदं चायुक्तम्। तस्य धर्मशास्त्रस्य क्रैस्ताब्दीयतृतीयशतकोत्तरकालिकत्वे प्रमाणाभावात्। प्रत्युत कौटलीयार्थशास्त्रस्य प्रपञ्चितचरयुक्तिभिः क्रैस्तप्राचीनचतुर्थशताब्दीभवतायां निर्णीततया तदुपजीव्यायाः स्मृतेस्तत्पूर्वकालिकत्वस्यैव न्यायतः प्राप्तत्वात्, न्यायप्राप्तस्य च प्रमाणाभासैर्बाधितुमशक्यत्वात्। किञ्च 'गर्गादिभ्यो यञ्' इति सूत्रे गर्गादिगणे यज्ञवल्कशब्दस्य पाठदर्शनेन पाणिनिर्यज्ञवल्कगोत्रापत्यं याज्ञवल्क्यं विदितवानिति प्रतीत्या तद्विदितस्यैव याज्ञवल्क्यस्य धर्मशास्त्रकारतायाः सम्भावितत्वेन पाणिनितोऽपि धर्मशास्त्रस्य प्रचीनत्वसम्भवाच्च।

(३) यदपि तृष्टुप्छन्दसि वाक्यशैल्यां चार्थशास्त्रस्य प्राचीनत्वं न भासत इति कीत्संज्ञो महाशय आह, तदपि न साधु। किं तृष्टुप्छन्दसः परिग्रह एव प्राचीनत्वानुगुणः आहोस्वित् तत्र पादचतुष्टयेऽपि तुल्यलक्षणयोगः? । वेदादन्यत्रच्छन्दोविशेषपरिग्रहे प्राचीनार्वाचीनयोः कामचारान्नाद्यः पक्षः। पादचतुष्टये तुल्यलक्षणयोगायोगावपि प्रयोक्तुरैच्छिकावव्यवस्थितावव्यवस्थापकौ च। वाक्यशैल्यां प्राचीनत्वं तु कीत्महाशयं प्रति न भासते, मां प्रति तु महाभाष्याद्यतिशायि प्राचीनत्वं स्फुटं भासते। तत्र निर्णयः सहृदयेष्वायत्तः।

यत् पुनः प्रकृतार्थशास्त्रप्रतिपाद्यमानयावत्प्रमेयोपद्रष्टृत्वमेकस्य कर्तुर्न सम्भवतीति मन्यमानः कश्चिदाह — इदमर्थशास्त्रं बहुभिः सम्भूय प्रकरणशः प्रणीतं पश्चादेकीकृतमिति, तदपि नोपादेयं,

"वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥
जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपातामूलतः श्रीमान् सुपर्वा नन्दपर्वतः ॥
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥"

इति **कामन्दकेन विष्णुगुप्तस्य** बहुप्रमेयद्रष्टृतया बहुशास्त्रप्रणेतृतया च वेधस्तुल्यत्वाख्यानपूर्वं प्रकृतमहाशास्त्रकर्तृतायाः संकीर्तनात् । **कामन्दको** हि क्रैस्तप्राचीनप्रथमशताब्दीस्थितत्वाद् **विष्णुगुप्तासन्नकालो विष्णुगुप्तचरितानां** याथात्म्येऽस्मदाद्यपेक्षयाभिज्ञतमः । तस्य क्रैस्तप्राचीनप्रथमशताब्दीभवत्वविवादे वा क्रैस्ताब्दीयसप्तमशतकस्थितभवभूत्यपेक्षया प्राचीनत्वे विवादस्य नावकाशः, यतो **नीतिसारकर्तरि** निरूढेन **कामन्दक**शब्देन नीतिप्रयोगनिपुणां काञ्चित् परिव्राजिकां **मालतीमाधवे** व्यपदिशन् **भवभूति**र्नीतिशास्त्रनिष्णातत्वसाम्यकृतं तस्यां तत्पदव्यपदेशौचित्यं पश्यतीति युक्तिमती कल्पना । न च तस्यां कामन्दकशब्दो निरर्थक एव यदृच्छया निवेशितः कविना न तु प्रसिद्धकामन्दकधर्मारोपेणेति जाल्युक्तं युक्तम्, **मालतीमाधवे** पात्रेष्वनर्थकसंज्ञानिवेशनस्यादर्शनात् । माधवमालत्यादयो हि शब्दाः शृङ्गारोद्दीपकवचनाः शृङ्गारिनायकनायिकादिष्वानुगुण्यमभिसमीक्ष्य संकेतिताः, अघोरघण्ट-कपालकुण्डलादयश्चामुण्ड्युपासकानुगुण्यं **बुद्धरक्षितादयश्च** बौद्धभिक्षुकीशिष्यतानुगुण्यम् । एवं सर्वासु संज्ञासु अर्थवतीषु कामन्दकीशब्दः परं **डित्थादिनामवन्निर्निमित्तं** भिक्षुक्यां संकेतित इत्युक्तिः कथं नाम सङ्गता स्यात् । इत्यादिकं विचारणीयं विद्वद्भिः । किञ्च **बहुप्रमेयद्रष्टा कौटल्य** एको दृष्ट इति नासूया कर्तव्या । नहि पुरुषविशेषे कस्मिंश्चिल्लोकोत्तरप्रज्ञादिगुणयोगिनि सर्वज्ञकल्पत्वमपि वा द्रष्टुमशक्यं, किमुतैवञ्जातीयं बहुज्ञत्वम् ।

एतेन, जाली यदवोचत्—केनापि पण्डितेन महाभारतादिग्रन्थप्रसिद्धमहर्ष्यादिनामधेयैः कांश्चित् पूर्वाचार्यान् कल्पयित्वा तदीयत्वेन पूर्वपक्षाणां कौटल्यसम्बन्धित्वेन सिद्धान्तपक्षाणां च कल्पनभङ्ग्याऽर्थशास्त्रमिदं रचितमिति, तदपि परास्तं, कौटल्यकर्तृत्वस्थापकानां पूर्वोक्तकामन्दकादिवाक्यानां प्रामाण्यस्यानपन्हवनीयत्वात्। किञ्च, तथा वदतो जालेः कौटलीयार्थशास्त्रोद्भावितानां तत्तत्पक्षाणामाकरग्रन्थाः भारद्वाजादिभिः परमार्थतो न प्रणीता इति खल्वभिप्रायो गम्यते। सोऽत्यन्तायुक्तः, यतो याज्ञवल्क्यस्मृतिव्याख्यायां **विज्ञानेश्वरोपजीव्यैर्विश्वरूपाचार्यैः** प्रणीतायां बहूनां **बृहस्पत्यर्थशास्त्रवाक्यानां विशालाक्षार्थशास्त्रवाक्यानां** च प्रमाणतयोदाहरणदर्शनेन **बृहस्पतिविशालाक्षार्थशास्त्रग्रन्थयोर्विश्वरूपाचार्यकाले** सत्तावधारणात् तुल्यन्यायेन तत्सहपठित**भारद्वाजाद्याचार्य**ग्रन्थानामपि स्थितलुप्तत्वानुमानात्।

इत्थमुच्चावचोहैकजीवितेषु जालिमहाशयाद्यभिप्रायेषु प्रधानभूताः **कौटलीयसम्बद्धा** अभिप्राया विचारिताः; असम्यक्त्वं च तेषां विस्तरेण निरूपितम्। न चेहेतोऽधिकमवश्यविचारणीयं पश्यामः। अत इममेकमनन्योद्दङ्कितं जालिमहाशयस्यार्थविशेषाभ्यूहं लेशतो विचार्य प्रकृतमुपसंहरामः। स हि आह—'अस्ति समानतन्त्रमिति **कौटलीयार्थशास्त्रस्य** पर्यायवाचकं पदमद्ययावदविज्ञातमि'ति। स किल तं तत्पर्यायपदविशेषं मेधातिथीयाद् **मनुस्मृतिभाष्या**दूहितवान्। मनुस्मृतिसप्तमाध्यायगतस्य १९१तमश्लोकस्य भाष्ये हि 'समानतन्त्रेणोक्तम्' इति प्रतिज्ञाय 'द्वे शते धनुषाम्' इति कौटलीयार्थशास्त्र (१०अधि. ५. अध्या) श्लोकः प्रदर्शितः। २०५ तमश्लोकभाष्ये च 'समानतन्त्रेऽपि' इत्युक्त्वा 'दैवं.... ....मानुषं कर्म लोकं पालयति' इति वाक्यं कौटलीयार्थशास्त्रषष्ठाधिकरणद्वितीयाध्यायस्थस्य 'दैवमानुषं हि कर्म लोकं यापयति' इति वाक्यस्य कथञ्चिदर्थानुवादकमुदाहृतम्। तेन लिङ्गेन **कौटलीयमर्थशास्त्रं** समानतन्त्रापरपर्यायमित्यूह्यत इति। अपिच स आह—युक्तश्च तस्मिन् समानतन्त्रशब्दव्यपदेशः 'इति समानं पूर्वेण' 'इति समानम्' इति च पञ्चमाधिकरणप्रथमाध्यायादिषु असकृदुक्तेस्तत्र दर्शनादिति। तदेतदखिलमत्यन्तमनुपपन्नम्। समानतन्त्रशब्दो ह्ययं यौगिकः कर्मधारयसमासनिष्पन्नः—समानं च तत् तन्त्रं चेति। समानतन्त्रं प्रमेयतस्तुल्यं शास्त्रान्तरं, 'समानतन्त्रेणोक्तम्' इत्यस्य प्रकृतं प्रमेयं तत्प्रतिपादकेन शास्त्रा-

न्तरेण वर्णितमित्यर्थः । तच्च शास्त्रान्तरं प्रकृते कौटलीयं भवति, तदीयतयोदाहृताया वाक्यानुपूर्व्याः कौटलीये समुपलम्भात् । न चायं समानतन्त्रशब्दप्रयोगो मेधातिथिभाष्य एवापूर्वो दृष्टः, 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्त' इति न्यायदर्शनसूत्रेऽपि तद्दर्शनात् । एवं शास्त्रव्याख्यानादिग्रन्थेष्वपि शास्त्रान्तरप्रमाणीकरणावसरे समानतन्त्रशब्दप्रयोगो बहुलो दृष्टः । न हि तत्र समानतन्त्रपदं कौटलीयबोधकम् । एतेन कौटलीयस्य समानतन्त्रव्यपदेशौचित्यसमर्थनं जालिकृतं प्रत्युक्तम् । किञ्च, शास्त्रग्रन्थेषु क्वचिदुक्तस्यान्यत्रातिदेशो बहुभिः प्रकारैः क्रियते- क्वचित् 'समानं पूर्वेणे'ति, क्वचित् 'समानम्' इति, क्वचित् 'पूर्ववदि'ति, क्वचित् 'प्राग्वदि'ति, क्वचिद् 'एतेन व्याख्यातमि'त्येवमादिभिः । सर्वे चैते प्रकाराः समानार्थाः; तत्रान्यतमस्यासकृदाश्रयणमप्यविशिष्टमेव सर्वग्रन्थेषु ॥

संग्रहश्लोकाश्चात्रैते —

आदिमध्यान्तिमाध्यायश्लोकप्रामाण्ययोगतः ।
कौटल्यनाम्ना वाक्यानां स्मृतानामाकरत्वतः ॥
वाक्यशैलीसमुन्नेयपुराणत्वानुगुण्यतः ।
कामन्दकोपजीव्यत्वात् तद्गीतमहिमत्वतः ॥
यश्चन्द्रगुप्तसचिवो विष्णुगुप्तादिविश्रुतः ।
सोऽस्य कर्तार्थशास्त्रस्य कौटल्य इति निर्णयः ॥

अनन्तशयनम् । त. गणपतिशास्त्री.
१७-५-१९२४।

द्वितीयसम्पुटस्य विषयानुक्रमणी ।

धर्मस्थीयं तृतीयमधिकरणम् ।

कण्टकशोधनं चतुर्थमधिकरणम् ।

योगवृत्तं पञ्चममधिकरणम् ।

मण्डलयोनिः षष्ठमधिकरणम् ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कौटलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिविरचितव्याख्योपेतम् ।

(द्वितीयः सम्पुटः ।)

धर्मस्थीयं—तृतीयमधिकरणम् ।

५७, ५८. प्रक. व्यवहारस्थापना, विवादपदनिबन्धः ।

धर्मस्थास्त्रयस्त्रयोऽमात्या जनपदसन्धिसङ्ग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान् कुर्युः ।

अथ धर्मस्थीयं नाम तृतीयमधिकरणम् । धर्मेषु वर्णाश्रमजातिसम्बन्धिषु तिष्ठन्ति तान् विदन्ति अनुवर्तन्ते चेति धर्मस्थाः तानधिकृत्य प्रवृत्तं धर्मस्थीयम् । 'धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेदि'ति प्रथमाधिकरणस्य दशमाध्याये, 'द्वितीये भागे पौरजानपदानां कार्याणि पश्येद्' इति एकोनविंशाध्याये चोक्तम् । के कति वा कार्यद्रष्टारः कुत्र स्थित्वा कार्यं पश्येयुरित्यादिकं वक्तुमिदमधिकरणमारभ्यते ।

तत्र **व्यवहारस्थापना** इति प्रथमं सूत्रम् । **विवादपदनिबन्धः** इति द्वितीयम् । तदुभयमेकस्मिन्नध्याये प्रतिपाद्यते । व्यवहारा नाम विवाहसंयुक्तं दायभागः इत्यादयो द्वादश वक्ष्यमाणाः, तेषां स्थापना ग्राह्याग्राह्यत्वनिरूपणमिति पूर्वसूत्रस्यार्थः । विवादपदानां पूर्ववाद्युत्तरवादिवचनानां निबन्धः व्युष्टदेशजात्यादिक्रमेण पत्रलेखनमित्युत्तरसूत्रस्य ।

प्रथमसूत्रं व्याचष्टे—**धर्मस्था** इत्यादि । धर्मस्थास्त्रयस्त्रयः, अमात्याः सहावस्थिताः, जनपदसन्ध्यादिषु जनपदसन्धावन्तपालदुर्गे संग्रहणे दशग्रामीप्रधानाधिष्ठाने चतुश्शतग्रामीप्रधाने द्रोणमुखेऽष्टशतग्रामीप्रधानाधिष्ठाने स्थानीये चेत्येतेषु, व्यावहारिकान्, अर्थान् कार्याणि, कुर्युः ।

G. P. T. 3559. 1000. 22-11-98. B

तिरोहितान्तरगारनक्तारण्योपध्युपह्वरकृतांश्च व्यवहारान् प्रतिषेधयेयुः। कर्तुः कारयितुश्च पूर्वः साहसदण्डः। श्रोतॄणामेकैकं प्रत्यर्धदण्डाः। श्रद्धेयानां तु द्रव्यव्यपनयः।

परोक्षेणाधिकर्णग्रहणमवक्तव्यकरा वा तिरोहिताः सिध्येयुः।

दायनिक्षेपोपनिधिविवाहसंयुक्ताः स्त्रीणामनिष्कासिनीनां व्याधितानां चामूढसंज्ञानामन्तरगारकृताः सिध्येयुः।

अग्राह्यव्यवहारानाह — तिरोहितेत्यादि। तिरोहितादीन् षड् व्यवहारान् आरप्स्यमानान् आरब्धांश्च, प्रतिषेधयेयुः। तत्र तिरोहितः प्रच्छन्नदत्तविषयः प्रच्छन्नात्तविषयश्च। स च स्वामिदेशकालक्रियाद्रव्यादिभेदेन बहुविधः। तत्र स्वामितिरोहितः स्वाम्यनुज्ञां विनैवान्येन तद्धनं यद् विनियुज्यते, देशतिरोहितः परोक्षिसाक्षिकः, कालतिरोहितः शतवर्षोपेक्षितऋणादिविषयः, क्रियातिरोहितः देशान्तरस्थे प्रमाणलेख्ये ऋणार्थनाविषयः, द्रव्यतिरोहितः द्विपाच्चतुष्पात्स्थावरेषु दृष्टचगोचरेषु तद्विक्रयः। अन्तरगारकृतः गर्भागारकृतः, नक्तकृतः रात्रिकृतः, अरण्यकृतः, उपधिकृतः छद्मकृतः, उपह्वरकृतः रहस्यकृतो दातृप्रतिग्रहीतृमात्रविदितः। कर्तुः प्रतिषिद्धव्यवहारप्रयोक्तुः, कारयितुस्तत्प्रयोजकस्य च, पूर्वः साहसदण्डः। श्रोतॄणां धर्मस्थानाम्, एकैकं प्रति प्रत्येकम्, अर्धदण्डाः पूर्वसाहसस्यार्धानि। श्रद्धेयानां तु निष्कपटानां तु प्रतिषिद्धव्यवहारस्पर्शिनां, द्रव्यव्यपनयः साध्यद्रव्यहानिः, न तु दण्ड इत्यर्थः।

प्रतिषिद्धापवादमाह — परोक्षेणेति। परोक्षेण आधिकर्णग्रहणम् अप्रत्यक्षं गृहारामादिकमाधिं कृत्वा ऋणग्रहणं, सिध्येत् तिरोहितमपि। अवक्तव्यकरा वा अमुकधनममुकेन व्यवह्रियमाणं न दुष्यतीति लोकसम्प्रतिपन्ना व्यवहारा वा, तिरोहिताः स्वामितिरोहिता अपि, सिध्येयुः।

अन्तरगारकृतानुपादेयानाह — दायेत्यादि। दायो दायविभागस्तत्सम्बद्धः, निक्षेपः आभरणाद्यर्थं स्वर्णाद्यर्पणम् अथवा अन्तस्स्थद्रव्यरूपसंख्याप्रदर्शनपूर्वं वासनस्यार्पणं तत्सम्बद्धः, उपनिधिः अनाख्यातवस्तुगर्भसमुद्रवासनोपनिधानसम्बद्धः, विवाहसंयुक्तः स्त्रीधनविषयः इत्येतेऽन्तरगारकृताः, स्त्रीणाम्, अनिष्कासिनीनां गृहबहिरनिर्गत्वरीणां, व्याधितानां चामूढसंज्ञानां रोगिणां चानष्टचेतनानाम्, अन्तरगारकृताः सिध्येयुः।

साहसानुप्रवेशकलहविवाहराजनियोगयुक्ताः पूर्वरात्रव्यवहारिणां च रात्रिकृताः सिध्येयुः।

सार्थव्रजाश्रमव्याधचारणमध्येष्वरण्यचराणामरण्यकृताः सिध्येयुः।

गूढाजीविषु चोपधिकृताः सिध्येयुः।

मिथस्समवाये चोपह्वरकृताः सिध्येयुः।

अतोऽन्यथा न सिध्येयुः। अपाश्रयवद्भिश्च कृताः, पितृमता पुत्रेण, पित्रा पुत्रवता, निष्कुलेन भ्रात्रा, कनिष्ठेनाविभक्तांशेन, पतिमत्या पुत्रवत्या च स्त्रिया, दासाहितकाभ्याम्, अप्राप्तातीतव्यवहाराभ्याम्,

---

रात्रिकृतव्यवहारेष्वदुष्टानाह— साहसेत्यादि। साहसयुक्तः परधनप्रसभलुण्टनसम्बद्धः अनुप्रवेशयुक्तः परधनस्वगृहानुप्रवेशनविषयः कलहयुक्तः वाक्पारुष्यादिसम्बद्धः विवाहयुक्तः प्रसिद्धः राजनियोगयुक्तः राजनियोगो राजाज्ञाप्रयुक्तो नगररक्षाधिकृतव्यापारः तद्युक्तस्तत्सम्बद्धः इति पञ्चैते व्यवहाराः, पूर्वरात्रव्यवहारिणां च वेश्याशौण्डिकादीनां च व्यवहाराः, रात्रिकृताः सिध्येयुः।

अरण्यकृतव्यवहारेष्वदुष्टानाह — सार्थेत्यादि। सार्थो वणिक्सङ्घः व्रजा गोष्ठवृत्तयो गोपालाः आश्रमो वनकुटुम्बिनः व्याधाः किराताः चारणाः लङ्घनप्लवनादिजीविनः इत्येषां मध्येषु, अरण्यचराणां वनचराणां, व्यवहाराः, अरण्यकृताः सिध्येयुः।

उपधिकृतव्यवहारानुपादेयानाह—गूढाजीविषु चेति। कूटहिरण्यादिव्यवहारिषु च, उपधिकृताः छलकृता व्यवहाराः सिध्येयुः।

उपह्वरकृतव्यवहारान् उपादेयानाह — मिथःसमवाये चेति। रहःसंप्रयोगे स्त्रीपुंसयोर्गान्धर्वविवाहनिमित्ते, उपह्वरकृताः सिध्येयुः।

अतोऽन्यथा न सिध्येयुरिति। उक्तातिरिक्तप्रकारास्तिरोहितादयो नोपादेयाः। अपाश्रयवद्भिश्चेति। अपाश्रयवन्तः परतन्त्राः तैश्च, कृताः व्यवहाराः, न सिध्येयुः। परतन्त्रान् प्रपञ्चयति — पितृमता पुत्रेण पितरि व्यवहारनिपुणे विद्यमाने पुत्रेण कृताः, पित्रा पुत्रवता पुत्रे कुटुम्बभरणक्षमे विद्यमाने पित्रा निवृत्तव्यवहारेण कृताः, निष्कुलेन भ्रात्रा कुलनिष्पतितेन भ्रात्रा कृताः, कनिष्ठेनाविभक्तांशेन कनिष्ठेन दायभागात् प्राक् कृताः, पतिमत्या पुत्रवत्या च स्त्रिया भर्तरि पुत्रे च कुटुम्बभरणक्षमे विद्यमाने स्त्रिया कृताः, दासाहितकाभ्यां दासेन स्वाम्यधीनेन आहितकेन आधीकृतेन चाधि-

अभिशस्तप्रव्रजितव्यङ्गव्यसनिभिश्चान्यत्र निसृष्टव्यवहारेभ्यः ।

तत्रापि क्रुद्धेनार्तेन मत्तेनोन्मत्तेनावगृहीतेन वा कृता व्यवहारा न सिध्येयुः । कर्तृकारयितृश्रोतृणां पृथग् यथोक्ता दण्डाः ।

स्वे स्वे तु वर्गे देशे काले च स्वकरणकृताः सम्पूर्णचाराः शुद्धदेशा दृष्टरूपलक्षणप्रमाणगुणाः सर्वव्यवहाराः सिध्येयुः ।

ग्राहकाधीनेन कृताः, अप्राप्तातीतव्यवहाराभ्याम् अप्राप्तव्यवहारेण ऊनषोडशवयस्केन अतीतव्यवहारेण अतिक्रान्तसप्ततिवयस्केन च कृताः, अभिशस्तादिभिश्चतुर्भिश्च अभिशस्तैर्महापातकदूषितैः प्रव्रजितैः संन्यासिभिः व्यङ्गैः मूकबधिरादिभिः व्यसनिभिः स्त्रीद्यूतपानासक्तैश्च कृताः । तत्रापवादमाह — **अन्यत्र निसृष्टव्यवहारेभ्य** इति । निसृष्टव्यवहारव्यतिरेकेण, ते चेत् पितृमत्पुत्र-पुत्रवत्पित्रादयः प्रधानैरर्पितव्यवहाराधिकारास्तदा तत्कृता व्यवहाराः सिध्येयुरेवेत्यर्थः ।

निसृष्टव्यवहारेष्वपि तेषु विशेषमाह — **तत्रापीति** । निसृष्टव्यवहारेष्वपि मध्ये, क्रुद्धेन जिघांसुना, आर्तेन दुःखिना, मत्तेन हर्षवता, उन्मत्तेन विभ्रान्तचित्तेन, अवगृहीतेन वा दण्डितेन वा, कृताः व्यवहाराः न सिध्येयुः । **कर्तृकारयितृश्रोतृणां पृथग् यथोक्ता दण्डा** इति । ये प्रतिषिद्धान् व्यवहारान् कुर्वन्ति कारयन्ति शृण्वन्तश्च साक्षीभवन्ति, तेषां प्रत्येकं यथाविहिताः दण्डा भवन्ति ।

सर्वापवादमाह — **स्वे स्वे** इति । स्वे स्वे वर्गे स्वकरणकृताः स्वस्वजातौ स्वक्रियाक्रमकृताः, स्वे स्वे देशे अरण्यादौ अरण्यादिचरैः स्वकरणकृताः,-स्वे स्वे काले च रात्रौ रात्रिव्यवहारिभिः दिवा दिवाव्यवहारिभिश्च स्वकरणकृताश्च, सर्वव्यवहाराः सिध्येयुः । संपूर्णचाराः राजमार्गो दिवा अर्थिप्रत्यर्थिसान्निध्यमित्येवमाद्यपेक्षितदेशकालादिसमुदाचारश्चारः, क्वचिदाचार इत्येव पाठः । स संपूर्णः अविकलनिर्वृत्तः येषु ते तथाभूताः, व्यवहाराः, शुद्धदेशाः दिशन्ति उपदिशन्ति स्वोपलब्धमर्थं प्राड्विवाकाय ज्ञापयन्तीति देशाः साक्षिणः ते शुद्धाः परोक्षित्वादिदोषरहिताः येषु ते तथाभूताः, दृष्टरूपलक्षणप्रमाणगुणाः दृष्टं साक्षात्कृतं रूपमाकृतिः लक्षणं व्यावृत्तिचिह्नं प्रमाणं माषगुञ्जादि आढकद्रोणादि वितस्तिहस्तादि च गुणः शुक्लनीलभ्राजिष्णुत्वादिश्च येषु ते तथाविधाः, सर्वव्यवहाराः, सिध्येयुः ।

पश्चिमं चैषां करणमादेशाधिवर्जं श्रद्धेयम् ।

संवत्सरमृतुं मासं पक्षं दिवसं करणमधिकरणमृणं वेदकावेदकयोः कृतसमर्थावस्थयोर्देशग्रामजातिगोत्रनामकर्माणि चाभिलिख्य वादिप्रतिवादिप्रश्नानर्थानुपूर्व्या निवेशयेत् । निविष्टांश्चावेक्षेत ।

त एते व्यवहारा उपादेया लेख्यप्रमाणकाः प्रवर्तन्ते । तच्च लेख्यं पूर्वकालकृतमेकमुत्तरकालकृतं चापरमित्येवं द्वयोरेकार्थगोचरयोर्लेख्यकरणयोः पूर्वोत्तरकालजन्मनोर्यदि कदाचिदुपलब्धिस्तदा किं प्रतिपत्तव्यमित्याह —**पश्चिमं चैषां करणमिति** । एतत्सम्बन्धि उत्तरकालकृतं लेख्यकरणं, श्रद्धेयं विश्वसनीयं पूर्वकरणपरीक्षापुरस्सरप्रवृत्तिकत्वादुत्तरकरणस्येत्यभिप्रायः । **आदेशाधिवर्जमित्यपवादः** । आदेशं बन्धं च वर्जयित्वा, आदेशः आदानम् अर्थस्य स्वत्वेन स्वीकरणं क्रयः प्रतिग्रहो वेति यावत् आधिस्तु बन्धो भोग्यरूपः । आदेशाध्योस्तु विषये पूर्वकरणमेव श्रद्धेयं, यतोऽर्थस्य परसंस्थत्वेन तद्भुक्त्युपोद्बलितस्य पूर्वलेख्यस्य प्राधान्यं न हीयते । तथाच याज्ञवल्क्यः —

"सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥" इति ॥

इति व्यवहारस्थापना समाप्ता ।

अथ **विवादपदनिबन्ध** इति सूत्रम् । तदर्थादिकं तु वर्णितं प्रागेव ।

संवत्सरमित्यादि । संवत्सरं राजवर्षोपलक्षितं कलिशकादिवर्षम्, ऋतुं वसन्तादिं, मासं चैत्रादिं, पक्षं मासार्धं, दिवसं तिथिं, करणं बवादिकं तिथ्यर्धम्, अधिकरणं स्थानीयद्रोणमुखादि, ऋणं वृद्ध्यर्थप्रयुक्तं धनं, वेदकावेदकयोः वेदकः परोत्पादितपीडानुभवितृत्वात् तन्निवेदयितृत्वाद् वा अभियोक्ता अवेदको वेदकविपरीतोऽभियोज्यः तयोः, कीदृशयोः, कृतसमर्थावस्थयोः समर्थावस्था सम्बद्धावस्था अधमर्णोत्तमर्णभावलक्षणः सम्बन्धः स कृतो याभ्यां तथाभूतयोः समर्था क्षमा उत्तमाधमर्णभावावस्था कृता याभ्यां तथाभूतयोर्वा, कृतसमस्थावस्थयोरिति पाठे समस्थशब्दस्य समानस्थितिकार्थतया कृतसमानस्थितिकसम्बन्धयोरित्यर्थः । देशग्रामादीनि षट् च, अभिलिख्य, वादिप्रतिवादिप्रश्नान् अभियोक्त्रभियोज्यविषयाणि चोद्यानि अर्थानुपूर्व्या अर्थगुरुलघुभावक्रमेण, निवेशयेत् अभिलिखेत् । निविष्टांश्च, अवेक्षेत शोधयेद् अधिकोद्धापार्थं न्यूनप्रतिपूरणार्थं च ।

निबद्धं पादमुत्सृज्यान्यं पादं सङ्क्रामति। पूर्वोक्तं पश्चिमेनार्थेन नाभिसन्धत्ते। परवाक्यमनभिग्राह्यमभिग्राह्यावतिष्ठते। प्रतिज्ञाय देशं निर्दिशेत्युक्ते न निर्दिशति। हीनदेशमदेशं वा निर्दिशति। निर्दिष्टाद् देशादन्यं देशमुपस्थापयति। उपस्थिते देशेऽर्थवचने नैवम् इत्यपव्ययते। साक्षिभिरवधृतं नेच्छति। असम्भाष्ये देशे साक्षिभिर्मिथः सम्भाषते। इति परोक्तहेतवः।

परोक्तदण्डः पञ्चबन्धः। स्वयंवादिदण्डो दशबन्धः। पुरुष-

पराजयहेतूनाह — **निबद्धमित्यादि**। निबद्धं पूर्वलिखितं पादमुत्सृज्यान्यं पादं संक्रामति। तद्यथा — वाक्पारुष्यमिति पूर्वं विलिख्य पश्चाद् दण्डपारुष्यं वक्ति। **पूर्वोक्तं पश्चिमेनार्थेन नाभिसन्धत्ते** इति। यथा — पूर्वं पशुहिरण्यधान्यानि देयान्युक्त्वा पश्चाद् हिरण्यमात्रं देयमिति वक्ति, न तु सर्वं निर्दिशति। **परवाक्यमिति**। प्रत्यर्थ्युक्तम्, अनभिग्राह्यम् अदूषणीयमेव, अभिग्राह्य दूषयित्वा, अवतिष्ठते तूष्णीमास्ते दुष्टत्वं न समर्थयते। **प्रतिज्ञाय देशमित्यादि**। त्रयो मे साक्षिणः सन्तीत्येवमादिना संख्याविशेषेण साक्षिणं प्रतिश्रुत्य, निर्दिशेत्युक्ते न निर्दिशति तान् नामादितो निर्दिशेति कथिते नोद्दिशति। हीनदेशम् अदेशं वा निर्दिशति प्रतिज्ञातसंख्यान्यूनसंख्यान् साक्षिण उद्दिशति स्यालमातुलादीन् वा साक्षित्वानर्हान् उद्दिशति। **निर्दिष्टाद् देशादिति**। नामत उद्दिष्टात् साक्षिणः, अन्यं, देशं साक्षिणम्, उपस्थापयति संनिधापयति। **उपस्थिते देश इति**। संनिहिते साक्षिणि, अर्थवचने स्वदृष्टमर्थं ब्रुवाणे, नैवमिति अपव्ययते नैवंविधोऽर्थ इति वदन्नपसरति। अपपूर्वो व्ययतिरनभ्युपगमार्थक आत्मनेपदी मृग्यः। **साक्षिभिरिति**। साक्षिवाक्यैः, अवधृतं नेच्छति निर्णीतं नानुमन्यते। **असम्भाष्ये देश इति**। सम्भाषणानर्हे देशे, साक्षिभिः सह, मिथः सम्भाषते रहसि मन्त्रयते। इति एवम् एतेऽन्यपादसंक्रमादयः साक्षिमिथस्सम्भाषान्ताः, परोक्तहेतवः उक्तं वचनं समर्थनं तद्विपरीतं परोक्तम् असमर्थनं तेन च तन्मूलः पराजय इह लक्ष्यते पराजयस्य हेतव इत्यर्थः। पराशब्दोपसृष्टस्य वचेः पराजिवत् स्वार्थविपरीते वृत्तिरिह द्रष्टव्या।

पराजितदण्डमाह— **परोक्तदण्डः पञ्चबन्ध इति**। साक्षिनिमित्तस्वपक्षासिद्धिमूलस्य पराजयस्य दण्डः पराजितदेयस्यार्थस्य पञ्चमांशो भवति।

भृतिरष्टांशः । पथिभक्तमर्घविशेषतः । तदुभयं नियम्यो दद्यात् ।

अभियुक्तो न प्रत्यभियुञ्जीत, अन्यत्र कलहसाहससार्थसमवायेभ्यः । न चाभियुक्तेऽभियोगोऽस्ति ।

अभियोक्ता चेत् प्रत्युक्तस्तदहरेव न प्रतिब्रूयात्, परोक्तः स्यात् । कृतकार्यविनिश्चयो ह्यभियोक्ता, नाभियुक्तः ।

तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति । अत ऊर्ध्वं त्रिपणा-

---

स्वयंवादिदण्डो दशबन्ध इति । विनैव साक्षिणं स्वयं वादं कृतवतः पराजितस्य दण्डः पराजितदेयस्य दशभागः । पुरुषभृतिरष्टांशः व्यवहारद्रष्टृकर्मकरपुरुषवेतनमष्टभागः, स च सामर्थ्यात् कार्षापणस्यैव ग्राह्यः । **पथिभक्त**मिति । साक्ष्यानेतॄणां मार्गगतागतभोजनार्थदेयम् अर्घविशेषतः तण्डुलादिमूल्यभेदमनुसृत्य, कल्पनीयमिति शेषः । **तदुभय**मिति । पुरुषभृतिं पथिभक्तं च, नियम्यः पराजितः, दद्यात् ।

अभियुक्त इति । केनचित् कृताभियोगः, न प्रत्यभियुञ्जीत अर्थादभियोक्तारम् अनिस्तीर्णे स्वाभियोगे । तत्रापवादः— **अन्यत्र कलहसाहससार्थसमवायेभ्य** इति । कलहसाहसादिषु तु विषये प्रत्यभियुञ्जीतैव । अभियुक्तमपि केनचित् तदन्यो नाभियुञ्जीतेत्याह— **न चाभियुक्त** इत्यादि । यदाह योगीश्वरः—

"अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।
न चाभियुक्तमन्येन नोक्तं विप्रकृतिं नयेत् ॥" इति ।

अभियोक्तेति । सः, प्रत्युक्तः अभियुक्तदत्तोत्तरः, तदहरेव न प्रतिब्रूयाच्चेत् यस्मिन् दिने प्रत्युक्तस्तस्मिन्नेव दिने प्रत्युत्तरमभियुक्तोक्त्युपमर्देन स्वपक्षसमर्थनक्षमं न दद्याच्चेत्, परोक्तः स्यात् सद्यः प्रतिवचनाभावमात्रेण स पराजितो मन्तव्य इत्यर्थः । कुत इत्याह— **कृतकार्यविनिश्चयो ह्यभियोक्ता नाभियुक्त** इति । इदमीदृशमेवं साधनीयमिति प्रागेव संप्रधार्य कार्यं प्रवृत्त इत्यभियोक्ता सपदिप्रत्युत्तरदानप्रतिबद्धः, अन्यस्तु संप्रधारणीयकार्यगतित्वान्न तथेत्यर्थः ।

अभियुक्तप्रतिवचनकालावधिमाह— **तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति** । तस्य अभियुक्तस्य श्रुतार्थस्य प्रतिवचनदानकालावधिस्त्रिरात्रात् प्रभृति आ सप्तरात्राद् अनुमन्तव्यः । **अत ऊर्ध्व**मिति । सप्तरात्रात् परतः,

वरार्ध्यं द्वादशपणपरं दण्डं कुर्यात् । त्रिपक्षादूर्ध्वमप्रतिब्रुवतः परोक्त-दण्डं कृत्वा यान्यस्य द्रव्याणि स्युस्ततोऽभियोक्तारं प्रतिपादयेदन्यत्र वृत्त्युपकरणेभ्यः । तदेव निष्पततोऽभियुक्तस्य कुर्यात् । अभियोक्तु-र्निष्पातसमकालः परोक्तभावः । प्रेतस्य व्यसनिनो वा साक्षिवचनाः सारम् । अभियोक्ता दण्डं दत्त्वा कर्म कारयेत् । आधिं वा स कामं प्रवेशयेत् । रक्षोघ्नरक्षितं वा कर्मणा प्रतिपादयेद् अन्यत्र ब्राह्मणादिति ।

त्रिपणावरार्ध्यं त्रिपणोऽवरार्ध्यः अवरो यस्मिंस्तं तथाभूतं, द्वादशपणपरं द्वादशपणोत्तमं, दण्डं कुर्यात् । त्रिपक्षात् पक्षत्रयाद्, ऊर्ध्वम्, अप्रतिब्रुवतः अभियुक्तस्य, परोक्तदण्डं पराजितदण्डं पञ्चबन्धरूपं, कृत्वा, यानि अस्य अभियुक्तस्य, द्रव्याणि धान्यहिरण्यलोहदारुभाण्डादीनि स्युः, ततः तैर्द्रव्यैस्त-दुद्धृतद्रव्यैर्वा, अभियोक्तारं प्रतिपादयेत् यथाप्रार्थितधनभाजं कुर्यादित्यर्थः । किं सर्वैरेवाभियुक्तद्रव्यैः, नेत्याह— **अन्यत्र वृत्त्युपकरणेभ्य** इति । कृष्यादि-जीविकार्थानि हलखनित्रकुद्दालानि वर्जयित्वा । **तदेवेति** । अप्रतिब्रुवतोऽभि-युक्तस्य यदुक्तं विधानं तदेव, निष्पततोऽभियोक्तृसन्निधानेऽपसरतः अभियु-क्तस्य, कुर्यात् । अभियोक्तुः, निष्पातसमकालः निष्पातोऽभियुक्तसन्निधाने-ऽपसरणं तत्समानकालः, परोक्तभावः पराजितत्वं मन्तव्यम् । **प्रेतस्य व्यस-निनो वा साक्षिवचनाः सारमिति** । प्रमीतस्य विपद्गतस्य वाभियोक्तुरथवा-भियुक्तस्य धनं साक्षिभिर्विभाव्यमानाः तत्पुत्रादयो दद्युर्गृह्णीयुर्वा । अभियुक्ते पराजिते निरुपाये किमभियोक्ता कुर्यादित्यत्राह— **अभियोक्तेति** । सः, दण्डं पराजयदण्डं, दत्त्वा स्वयं राज्ञे, कर्म कारयेत्, अर्थादभियुक्तम् । **आधिं वा स कामं प्रवेशयेदिति** । अथवा, सः अभियोक्ता अभियुक्तबन्धवन्यत-ममाधित्वेन कर्मकरणार्थं गृह्णीयाद् यथेच्छम् । **रक्षोघ्नेत्यादि** । वाशब्दश्चार्थे । रक्षोघ्नरक्षितम् अकुशलपरिहारार्थः शिरसि सितसर्षपप्रक्षेपो रक्षोघ्नरक्षा तद्युक्तं यथा भवति तथा, कर्मणा प्रतिपादयेत् योजयेत्, अर्थात् पराजितं तदर्पित-माधिपुरुषं वा । एतेन, कर्म कारयितुरात्मरक्षणे प्रयत्नः कर्तव्यतयोपदिष्टो द्र-ष्टव्यः । इतरथा हि पराजित आधिपुरुषो वा कर्म कुर्वन्नवेतनकर्मकरणनिर्बन्ध-मात्मनोऽसहमानः कारयितारं कदाचिज्जिघांसेदिति । 'कर्म कारयेदि'त्यस्य विधेः संकोचमाह— **अन्यत्र ब्राह्मणादितीति** । इतिशब्दात् क्षत्रियादिरपि तपस्वी ब्राह्मणप्रकारो ग्राह्यः ।

चतुर्वर्णाश्रमस्यायं लोकस्याचाररक्षणात् ।
नश्यतां सर्वधर्माणां राजधर्मः प्रवर्तकः ॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः ॥
अत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ।
चरित्रं सङ्ग्रहे पुंसां राज्ञामाज्ञा तु शासनम् ॥
राज्ञः स्वधर्मः स्वर्गाय प्रजा धर्मेण रक्षितुः ।
अरक्षितुर्वा क्षेप्तुर्वा मिथ्यादण्डमतोऽन्यथा ॥
दण्डो हि केवलो लोकं परं चेमं च रक्षति ।
राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः ॥

सम्यग्व्यवहारदर्शनस्य सर्वलोकयोगक्षेमसाधकतां श्लोकैराह—**चतुर्वर्णेत्यादि** । अयं राजधर्मः सम्यग्व्यवहारदर्शनरूपः, चतुर्वर्णाश्रमस्य चत्वारो वर्णा ब्राह्मणादयः आश्रमाश्च ब्रह्मचर्यादयो यस्मिंस्तथाभूतस्य, लोकस्य, आचाररक्षणात् स्वस्वसमुदाचारपरिरक्षणाद्धेतोः, नश्यतां सर्वधर्माणां स्वतः क्षीयमाणानां सर्वेषां धर्माणां, प्रवर्तकः प्रोज्जीवकः ॥

व्यवहारस्तावच्चतुष्पादः । तत्पादानां स्वरूपं बलाबलं चाह—**धर्मश्चेति** । धर्मो व्यवहारः चरित्रं राजशासनमिति चतुर्भिः पादैर्युक्तो, विवादार्थः विवादविषयोऽर्थः । पश्चिमः एषु पादेषु पश्चिमः चरमः पादः, पूर्वबाधकः पूर्वान् पादान् बाधते सर्वपादापेक्षया प्रबल इत्यर्थः ॥

धर्मादीनां स्वरूपमाह—**अत्रेति** । अत्र धर्मादिषु मध्ये, सत्ये स्थितः प्रतिष्ठितः धर्मः अर्थयाथात्म्यं धर्मपदार्थ इत्यर्थः। व्यवहारस्तु साक्षिषु स्थितः साक्षिवाक्यविभावनीयो व्यवहारपदार्थ इत्यर्थः । चरित्रं लोकाचारः, संग्रहे ग्रामसमूहे दशग्राम्यादौ, पुंसां प्रतिष्ठितम् । राज्ञाम् आज्ञा तु इदमित्थमेवेति न्यायोपपत्तियुक्तो यथार्हदण्डप्रणयनादिर्नियोगस्तु, शासनं राजशासनपदार्थः ॥

राज्ञ इति । राज्ञः, स्वधर्मः शस्त्राजीवो भूतरक्षणं च, स्वर्गाय भवति । कथम्भूतस्य, प्रजा धर्मेण रक्षितुः । अरक्षितुर्वा अरक्षकस्य वा, क्षेप्तुर्वा मिथ्यादण्डम् अयथार्हदण्डं प्रणेतुर्वा, राज्ञः, अतोऽन्यथा उक्तादन्यः प्रकारः अर्थान्तरकः भवति । एवमदृष्टसाधकता सम्यग्व्यवहारदर्शनस्य दर्शिता ॥

दण्डं प्रशंसति—**दण्डो हीति**। दण्डो हि, केवल एकोऽनितरसहायः,

अनुशासद्धि धर्मेण व्यवहारेण संस्थया ।
न्यायेन च चतुर्थेन चतुरन्तां महीं जयेत् ॥
संस्थया धर्मशास्त्रेण शास्त्रं वा व्यावहारिकम् ।
यस्मिन्नर्थे विरुध्येत धर्मेणार्थं विनिर्णयेत् ॥
शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित् ।
न्यायस्तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति ॥

लोकं परं च इमं च रक्षति उभयलोकसुखभोगसौभाग्यं प्रयोक्तुः प्रयच्छति। कथम्भूतोऽसौ, राज्ञा प्रयोक्त्रा, पुत्रे च शत्रौ च, यथादोषम् अपराधानुरूप्येण, समं धृतः अविशेषेण प्रयुक्तः ॥

सम्यग्व्यवहारदर्शनस्य परमं दृष्टफलमाह—**अनुशासद्धीति**। अनुशासत् लोकं न्याय्ये पथि स्थापयन्, कथं, धर्मेण धर्मानुसारेण, व्यवहारेण साक्षिवाक्यानुसारेण, संस्थया लोकाचारेण, न्यायेन च चतुर्थेन न्यायोपपन्न राजकीयनिर्णयलक्षणेन चतुर्थपादरूपेण, चतुरन्तां चतुस्सागरपर्यन्तां, महीं जयेत् । यथोक्तप्रकारानुशासनमहिम्ना सार्वभौमत्वं राजा प्राप्नुयादित्यर्थः॥

धर्मादिषु 'पश्चिमः पूर्वबाधकः' इति यत् पूर्वमुक्तं, तस्यापवादमाह—**संस्थयेति**। संस्थया महाजनाचारेण, धर्मशास्त्रेण मानवादिना च सह, शास्त्रं वा व्यावहारिकं शास्त्रं राजशासनं वा व्यावहारिकं साक्षिवचनं वा, यस्मिन्नर्थे विरुध्येत, यच्छब्देन तच्छब्दाक्षेपात् तमर्थं, धर्मेण विनिर्णयेत् धर्मशास्त्रानुसारेण विनिश्चिनुयात् । न तु तथाविधे विषये राजवचनसाक्षिवचनयोः प्रामाण्यमित्यर्थः ॥

कचिद् धर्मशास्त्रमपि न्यायेन बाध्यत इत्याह—**शास्त्रमिति**। शास्त्रं मानवादिधर्मशास्त्रं, केनचिद् धर्मन्यायेन सर्वप्रकारोपपन्नेन धर्मयुक्तेन लोकाचारेण, विप्रतिपद्येत अत्यन्तबाधितार्थविषयतया विरुध्येत, यत्रेति शेषः तत्र, न्यायः, प्रमाणम् अर्थनिर्णयहेतुः स्यात् । कुतः, तत्र पाठो हि नश्यति यस्मात् तादृशे विषये धर्मशास्त्रवचनम् अदर्शनं प्राप्नोति, न प्रवर्तत इत्यर्थः।

"कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः ।"

इति सत्यपि स्मृतिवचने सेतोर्भिन्नस्य समीपे कुद्दालहस्तं कमपि शिशुं तिष्ठन्तं दृष्ट्वा न कोऽप्यध्यवस्यति—अनेन शिशुना सेतुर्भिन्न इति ॥

दृष्टदोषः स्वयंवादः स्वपक्षपरपक्षयोः ।
अनुयोगार्जवं हेतुः शपथश्चार्थसाधकः ॥
पूर्वोत्तरार्थव्याघाते साक्षिवक्तव्यकारणे ।
चारहस्ताच्च निष्पाते प्रदेष्टव्यः पराजयः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
प्रथमोऽध्यायः विवादपदनिबन्धः,
आदितोऽष्टपञ्चाशः ॥

उक्तसाक्ष्याद्यतिरेकेण पञ्च व्यवहारसाधनान्याह—दृष्टेत्यादि । दृष्टदोषोऽर्थसाधकः दृष्टदोषः उपलब्धापराधचिह्नः दह्यमाने गृहे ज्वलितालातपाणिस्तदन्तस्तिष्ठन् जनः स्वाग्निदत्वानुमापकः, काद्यगतनवव्रणक्षरत्क्षतजोक्ष्यमाणभूमेर्वा कस्यचिद् रुधिरार्द्रशस्त्रपाणिः पार्श्वे तिष्ठन् स्वात्मनस्तच्छेत्तृत्वानुमापकः । स्वयंवादः मयैवेदं कृतमिति वादः, अर्थसाधकः अर्थनिर्णायकः । स्वपक्षपरपक्षयोरनुयोगार्जवं वादिप्रतिवादिनोरजिह्मप्रश्नोत्तरकरणम्, अर्थसाधकम् । यथा—पथि शकटचक्रारोपणेन पादो मे भग्नः शाकटिकेनेति तं प्रति कस्यचिदभियोगे 'कुत एवं कृतवानसी'ति धर्मस्थेन पृष्टं शाकटिकं भयवशात् क्षणं तूष्णीम्भूतं दृष्ट्वा 'किमयं मूक' इति शङ्कमाने प्राड्विवाके 'बहुवारमेष मां शकटनिकटादपसरेति शृण्वत्सु शकटगजनेषु तदोक्तवान्, इदानीं तु मूक इव लक्ष्यते' इत्यभियोक्तुः प्रश्नोत्तरवचनमृजुभावेन प्रवृत्तम् अभियोक्तुर्निरपराधत्वसमर्थकं सद् व्यवहारनिर्णयाय कल्पत इत्येवञ्जातीयं द्रष्टव्यम् । हेतुरर्थसाधकः उपपन्नकारणप्रदर्शनमर्थनिर्णायकं, यथा—पारदारिकत्वविषयेऽभियोगेऽभियुक्तेनात्मनः क्लीबत्वनिवेदनम् । शपथः पुत्रादिभिः शपनम् उपलक्षणाद् दिव्यक्रिया च, सोऽर्थसाधकः ॥

पराजयनिमित्तान्याह—पूर्वोत्तरेत्यादि । पूर्वोत्तरार्थव्याघाते चोरोऽयमिति शङ्क्यमानस्य 'क भुक्तं क शयितं त्वये'त्यादि पृष्टस्य प्रत्युक्तौ पूर्वोत्तरविरोधे, साक्षिवक्तव्यकारणे साक्षिणां वक्तव्यस्याप्रामाण्यदोषस्य कारणे बन्धुत्वोपकार्यत्वादिरूपे निमित्ते, चारहस्ताच्च निष्पाते बन्धनागारिकहस्तात् प्रच्छन्नपलायने च सति, पराजयः, प्रदेष्टव्यः स्थापयितव्यः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
प्रथमोऽध्यायः विवादपदनिबन्धः,
आदितोऽष्टपञ्चाशः ॥

---

५९. प्रक. विवाहसंयुक्तं — विवाहधर्मः स्त्रीधनकल्प आधिवेदनिकम्।

विवाहपूर्वो व्यवहारः।
कन्यादानं कन्यामलङ्कृत्य ब्राह्मो विवाहः।
सहधर्मचर्या प्राजापत्यः।
गोमिथुनादानादार्षः।

विवाहसंयुक्तमिति सूत्रम्। विवाहा अष्टविधाः ब्राह्म प्राजापत्यार्ष-दैवगान्धर्वासुरराक्षसपैशाचाख्याः तत्संयुक्तं तत्सम्बद्धं स्त्रीधनकल्पादि, तदिहाभिधीयत इति सूत्रार्थः। व्यावहारिकाणामर्थानामनुष्ठानप्रकार उक्तः, व्यवहाराणां प्रतिपादनमधुना प्रस्तूयते। तेषु च ऋणादानादिषु कतमः पूर्वनिरूपणार्ह इति चिन्तायाम्, ऋणादानपूर्वो व्यवहार इति मनुः। वास्तुकपूर्वो व्यवहार इति भार्गवः। निक्षेपपूर्वो व्यवहार इति बृहस्पतिः। कौटल्यस्तु—गृहस्थस्यैव व्यवहारेष्वधिकाराद् गार्हस्थ्यं प्रति च विवाहस्यैव हेतुत्वाद् विवाहसंयुक्तव्यवहार एव व्यवहारेषु मुख्य इति विवाहसंयुक्तप्रकरणमेवादौ निरूपणीयं मन्यते। यदाहुः—

"ऋणमादौ मनुर्ब्रूते वास्तुकं भार्गवो मुनिः।
बृहस्पतिस्तु निक्षेपं विवाहं कुटलान्वयः॥" इति।

इदं प्रकरणं त्रिभिरध्यायैर्वितन्यते। तत्रादिमे विवाहधर्मः स्त्रीधनकल्पः आधिवेदनिकमिति त्रिकं प्रतिपाद्यते, द्वितीये शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाः, तृतीये निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो दीर्घप्रवासश्चेति।

विवाहसंयुक्तस्य प्रथमं निरूपणे हेतुं निर्दिशति—**विवाहपूर्वो व्यवहार** इति। व्यवहार इति जातावेकवचनं, सर्वे व्यवहाराः विवाहमूलाः। विवाहपूर्वत्वं चोपपादितम्।

विवाहभेदांस्तल्लक्षणप्रदर्शनपूर्वमाह— **कन्यादानमिति**। कन्यामलङ्कृत्य यत् तस्याः प्रदानं, स विवाहो ब्राह्म इत्युच्यते।

सहधर्मचर्येति। 'सहधर्मश्चर्यतामि'त्येतावदुक्त्वा समन्त्रकं यत् कन्या दीयते, स प्राजापत्याख्यः।

गोमिथुनादानादिति। वरसकाशाद् गोद्वयं गृहीत्वा यत् कन्या दीयते, स आर्षः।

अन्तर्वेद्यामृत्विजे दानाद् दैवः ।

मिथस्समवायाद् गान्धर्वः ।

शुल्कादानादासुरः ।

प्रसह्यादानाद् राक्षसः ।

सुप्तादानात् पैशाचः ।

पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः । मातापितृप्रमाणाः शेषाः । तौ हि शुल्कहरौ दुहितुः । अन्यतराभावेऽन्यतरो वा ।

द्वितीयं शुल्कं स्त्री हरेत । सर्वेषां प्रीत्यारोपणमप्रतिषिद्धम् ।

अन्तर्वेद्यामिति । यज्ञवेदिमध्ये स्थिताय ऋत्विजे यद् दीयते, स दैवः ।

मिथस्समवायादिति । कन्यावरयोर्निजेच्छयान्योन्यसंयोगाद् गान्धर्वो विवाहो भवति ।

शुल्कादानादिति । आत्मार्थे कन्यार्थे च वराच्छुल्कं गृहीत्वा यत् कन्यादानं, स आसुराख्यः ।

प्रसह्यादानादिति । बलात्कारेण कन्याहरणाद् राक्षसविवाहो भवति ।

सुप्तादानादिति । सुप्ताया हरणात् पैशाचाख्यो विवाहः ।

पितृप्रमाणा इति । एतेष्वष्टसु विवाहेषु पूर्वे ब्राह्मादयश्चत्वारः, पितृप्रमाणाः धर्म्याः पितृप्रमाणत्वाद् धर्मयुक्ताः । अन्ये त्वधर्म्या इत्यर्थसिद्धम् । मातापितृप्रमाणा इति । माता पिता चेत्युभौ प्रमाणभूतौ येषां ते तथाभूताः, शेषाः गान्धर्वादयः । कस्मान्मातापितृप्रमाणकत्वमित्याह — तौ हीत्यादि । मातापितरौ हि, शुल्कहरौ दुहितुः कन्याशुल्कं गृहीतः । अन्यतराभावे अन्यतरो वा माता पिता वा शुल्कं हरति । एवं विवाहधर्म उक्तः ।

स्त्रीधनं प्रस्तौति — द्वितीयमिति । द्वितीयं शुल्कं वरसकाशग्राह्यपरिभाषितशुल्कव्यतिरिक्तं शुल्कं प्रीतिवशाद् दत्तं, स्त्री कन्यैव हरेत, न तु पितरौ । सर्वेषां प्रीत्यारोपणमप्रतिषिद्धमिति । वरेण न केवलं वरबन्ध्वादिभिः सर्वैरपि कन्याया देहे भूषणादिनिवेशनम् अप्रतिषिद्धम् अनिवारितम् । अर्थात् तदपि कन्यैव हरेत ।

वृत्तिराबन्ध्यं वा स्त्रीधनम् । परद्विसाहस्रा स्थाप्या वृत्तिः । आबन्ध्यानियमः ।

तदात्मपुत्रस्नुषाभर्मणि प्रवासाप्रतिविधाने च भार्याया भोक्तुमदोषः । प्रतिरोधकव्याधिदुर्भिक्षभयप्रतीकारे धर्मकार्ये च पत्युः । सम्भूय वा दम्पत्योर्मिथुनं प्रजातयोस्त्रिवर्षोपभुक्तं च धर्मिष्ठेषु विवाहेषु नानुयुञ्जीत । गान्धर्वासुरोपभुक्तं सवृद्धिकमुभयं दाप्येत । राक्षसपैशाचोपभुक्तं स्तेयं दद्यात् ।

इति विवाहधर्मः ।

मृते भर्तरि धर्मकामा तदानीमेवास्थाप्याभरणं शुल्कशेषं च

तदिदं कन्याहरणीयं स्त्रीधनशब्दितं द्विरूपमित्याह — **वृत्तिराबन्ध्यं वा स्त्रीधनमिति** । वृत्तिर्भूमिहिरण्यादिर्जीविकार्था, आबन्ध्यं भूषणादि । परद्विसाहस्रा कार्षापणसहस्रद्वयपरमावधिः, वृत्तिः, स्थाप्या कल्पयितुमर्हा । आबन्ध्यानियमः आभरणस्य सङ्ख्यानियमाभावः ।

तदिति । तत् स्त्रीधनम्, आत्मपुत्रस्नुषाभर्मणि स्वस्य पुत्राणां तद्भार्यायाश्च पोषणे, प्रवासाप्रतिविधाने च भर्तृविदेशगमननिमित्ते जीविकोपायविरहसंकटे च, भार्याया, भोक्तुम्, अदोषः दोषाभावः । **प्रतिरोधकेत्यादि** । 'साम्प्रतमेवादत्त्वा मा याही'त्येवं रोधेन हरणं प्रतिरोधकं तत्प्रतीकारे व्याधिप्रतीकारे दुर्भिक्षप्रतीकारे भयप्रतीकारे च, धर्मकार्ये च विषये, पत्युः स्त्रीधनव्ययकारिणः, अदोष इत्यनुवर्तते । इतोऽपि स्त्रीधनस्य व्ययाद् भर्तुरदोष इत्याह — **सम्भूय वेति** । दम्पत्योः, मिथुनं प्रजातयोः अपत्यद्वयं यद्वा पुमपत्यमेकं स्त्र्यपत्यं चैकं जनितवतोः, सम्भूय मिलित्वा, त्रिवर्षोपभुक्तं च स्त्रीधनं, धर्मिष्ठेषु विवाहेषु ब्राह्मादिषु चतुर्षु, नानुयुञ्जीत नार्थयेत प्रत्यर्पयेति । **गान्धर्वेत्यादि** । गान्धर्वासुरोपभुक्तम् , उभयं धर्मकार्यादिविनियुक्तं सम्भूयत्रिवर्षोपभुक्तं च समनन्तरोक्तं द्विरूपं स्त्रीधनं, सवृद्धिकं, दाप्येत निर्यात्येत । **राक्षसेत्यादि** । राक्षसपैशाचोपभुक्तं स्त्रीधनं, स्तेयं दद्यात् स्तेयं चौर्यं चोरितद्रव्यं तदिव दद्यात् चोरदण्डयुक्तं दद्यादित्यर्थः ।

इति विवाहधर्म इति । व्याख्यात इति शेषः ।

स्त्रीधनकल्पमाह — **मृत इति** । मृते भर्तरि, धर्मकामा भर्तुरात्मनश्च परलोकहितं धर्मं कामयमाना, तदानीमेव सद्य एव, आस्थाप्याभरणं देहधृतं

लभेत । लब्ध्वा वा विन्दमाना सवृद्धिकमुभयं दाप्येत । कुटुम्बकामा तु श्वशुरपतिदत्तं निवेशकाले लभेत । निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः ।

श्वशुरप्रातिलोम्येन वा निविष्टा श्वशुरपतिदत्तं जीयेत । ज्ञातिहस्तादभिमृष्टाया ज्ञातयो यथागृहीतं दद्युः ।

न्यायोपगतायाः प्रतिपत्ता स्त्रीधनं गोपायेत् ।

पतिदायं विन्दमाना जीयेत । धर्मकामा भुञ्जीत ।

पुत्रवती विन्दमाना स्त्रीधनं जीयेत । तत्तु स्त्रीधनं पुत्रा हरेयुः ।

पुत्रभरणार्थं वा विन्दमाना पुत्रार्थं स्फातीकुर्यात् ।

भूषणमवतार्य, शुल्कशेषं च सहभुक्तावशिष्टं शुल्कं चकारादाभरणं च, लभेत। लब्ध्वा वेति । आभरणं शुल्कशेषं चाधिगम्य, विन्दमाना भर्त्रन्तरं परिगृह्णती, सवृद्धिकम्, उभयं दाप्येत । कुटुम्बकामा तु सन्तानकामनया देवरं भजमाना तु, श्वशुरपतिदत्तं स्त्रीधनं, निवेशकाले लभेत । कोऽसौ निवेशकालः तत्राह—निवेशकालं हीत्यादि । दीर्घप्रवासे उत्तरतराध्यायव्युत्पादिते ।

श्वशुरप्रातिलोम्येन वेति । श्वशुरशासनातिक्रमेण, निविष्टा भर्त्रन्तरं गता, श्वशुरपतिदत्तं जीयेत श्वशुरेण पत्या च दत्तं दाप्येत । ज्ञातिहस्तादभिमृष्टाया इति । विद्यमान एव पत्यौ पत्यन्तरपरिगृहीतायाः, ज्ञातयः नवपतयः, यथागृहीतं गृहीतान्यूनं श्वशुरपतिदत्तं, दद्युः अर्थाच्छ्वशुराय पत्ये च ।

न्यायोपगताया इति । न्यायेन देवरादिमुपगतायाः, प्रतिपत्ता परिग्रहीता, स्त्रीधनं गोपायेत् रक्षेत् न तु स्वयमुपयुञ्जीत ।

पतिदायमिति । पत्या दत्तं वस्त्राभरणादिकं, विन्दमाना भर्त्रन्तरपरिग्राहिणी, जीयेत दाप्येत, श्वशुरकुलाय। धर्मकामा भुञ्जीतेति। अविन्दमाना संयता चेत् पतिदायं भुञ्जीत ।

पुत्रवतीति । पुत्रयुक्ता, भर्त्रन्तरगामिनी, जीयेत दाप्येत स्त्रीधनं न स्वयं भुञ्जीतेत्यर्थः । के तद्धोक्तारः, तत्राह — तत्तु स्त्रीधनमित्यादि ।

पुत्रभरणार्थं वेति । पुत्रपोषणार्थं, विन्दमाना, पुत्रार्थं पुत्रनिमित्ते, स्फातीकुर्यात् वर्धयेत् स्त्रीधनम् ।

बहुपुरुषप्रजानां पुत्राणां यथापितृदत्तं स्त्रीधनमवस्थापयेत् ।

कामकारणीयमपि स्त्रीधनं विन्दमाना पुत्रसंस्थं कुर्यात् ।

अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनम् आ आयुः-क्षयाद् भुञ्जीत, आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् ।

जीवति भर्तरि मृतायाः पुत्रा दुहितरश्च स्त्रीधनं विभजेरन् । अपुत्रायाः दुहितरः । तदभावे भर्ता ।

शुल्कमन्वाधेयमन्यद् वा बन्धुभिर्दत्तं बान्धवा हरेयुः ।

इति स्त्रीधनकल्पः ।

वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्यां चाकाङ्क्षेत, दश विन्दुं, द्वादश कन्याप्रसविनीम् ।

बहुपुरुषप्रजानामित्यादि । यासां बहवो भर्तारः पुत्राश्च तासां, स्त्रीधनं, यथापितृदत्तं पुत्राणामवस्थापयेत् तत्तद्भर्तृदत्तं तत्तद्भर्तृजनितपुत्रार्थे दद्यात् ।

कामकारणीयमपीति । यथेच्छविनियोज्यमपि, स्त्रीधनं, विन्दमाना भर्त्रन्तरगामिनी, पुत्रसंस्थं कुर्यात् पुत्राय दद्यात् ।

अपुत्रेति । पुत्रहीना, पतिशयनं पालयन्ती पतिव्रता, गुरुसमीपे, स्त्रीधनम्, आ आयुःक्षयाद् यावज्जीवं, भुञ्जीत मूलमविनाशयन्ती वृद्ध्यादिकं संजातमात्रमुपयुञ्जीतेत्यर्थः । कुतः, आपदर्थं हि स्त्रीधनं वृत्तिकृच्छ्रपरिहार-मात्रविनियोज्यं हि स्त्रीधनं नाम न पुनः कामचारव्ययार्थम् । **ऊर्ध्वं दायादं गच्छेदिति** । तया तथा रक्षितं स्त्रीधनं तस्यामुपरतायां भर्तृसापिण्डं गच्छेत् ।

म्रियमाणे पत्यौ प्रमीतायाः स्त्रीधनं पुत्रा दुहितरश्चाविशेषाद् विभजेयुः, पुत्राभावे दुहितरः तदुभयाभावे तु पतिर्गृह्णीयादित्याह—**जीवतीत्यादि** ।

आसुराद्यधर्म्यविवाहविषये तु स्त्रीधनं न भर्तृगामि, किन्तु स्त्रीबन्धु-गामीत्याह—**शुल्कमित्यादि** । शुल्कं प्रतीतम्, अन्वाधेयं पितृगृहानीतम्, अन्यद् वा, बन्धुभिर्भ्रात्रादिभिः, दत्तं स्त्रीधनं, बान्धवाः पित्रादयः, हरेयुः ।

इति स्त्रीधनकल्प इति । अनेन प्रकारेण स्त्रीधनविनियोगविधिर्व्या-ख्यातः ।

अथाधिवेदनिकमाह — **वर्षाणीति** । अप्रजायमानां सकृत् प्रसूय पुनर्गर्भमगृह्णतीम्, अपुत्रां व्याध्यादिवशात् पुत्ररहितां, वन्ध्यां च गर्भधरणा-

ततः पुत्रार्थी द्वितीयां विन्देत । तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात् । चतुर्विंशतिपणपरं च दण्डम् ।

शुल्कं स्त्रीधनमशुल्कस्त्रीधनायास्तत्प्रमाणमाधिवेदनिकमनुरूपां च वृत्तिं दत्त्वा बह्वीरपि विन्देत । पुत्रार्था हि स्त्रियः ।

तीर्थसमवाये चासां यथाविवाहं पूर्वोढां जीवत्पुत्रां वा पूर्वं गच्छेत् ।

तीर्थगूहनागमने पण्णवतिर्दण्डः । पुत्रवतीं धर्मकामां वन्ध्यां बिन्दुं नीरजस्कां वा नाकामामुपेयात्, न चाकामः पुरुषः । कुष्ठिनीमुन्मत्तां वा न गच्छेत् । स्त्री तु पुत्रार्थमेवंभूतं वोपगच्छेत् ।

योग्यां च, अष्टौ वर्षाणि, आकाङ्क्षेत प्रतिपालयेत् पुत्रं प्रसूते नवेति परीक्षार्थम् । दश बिन्दुं दश वर्षाणि नश्यत्प्रसूतिं, प्रतिपालयेत् । द्वादश कन्याप्रसविनीं स्त्र्यपत्यप्रसवशीलां द्वादश वर्षाणि आकाङ्क्षेत । काङ्क्षेतेरात्मनेपदमार्षम् ।

तत इति । यथोक्तकालप्रतीक्षानन्तरं पुत्रप्रसवाभावे, पुत्रार्थी पुत्रकामश्चेद्, द्वितीयां विन्देत अन्यामुद्वहेत् । तस्येति । यथोक्तकालनियमस्य, अतिक्रमे अननुवर्तने, शुल्कं, स्त्रीधनम्, अर्धं चाधिवेदनिकं परिणीताया उपरि अन्यस्याः परिणयनमधिवेदनं तन्निमित्तं यद् द्रव्यं गतं तस्यार्धं च, दद्याद् अधिविन्नायै । **चतुर्विंशतिपणपरं च दण्डमिति** । चतुर्विंशतिपणोत्तमं नियमातिक्रमदण्डं च, राज्ञे दद्यात् ।

नवं शुल्कं स्त्रीधनम् आधिवेदनिकतुल्यमानं द्रव्यं तत्तद्विवाहोचितशरीरयात्रोपायं च प्रतिपाद्य बह्वीनामप्याधिवेदनं न दुष्यतीत्याह — **शुल्कमित्यादि** । तत्र हेतुवचनं — **पुत्रार्था हि स्त्रिय इति** । अनेन पूर्वपरिणीनानाम् अपुत्रवतीनां निष्फलजन्मत्वादुपेक्षणं न्याय्यमिति दर्शयति ।

बह्वीनाम् ऋतुयौगपद्येऽभिगमनविधिमाह — **तीर्थसमवाये चासामिति** । तीर्थं स्त्रीपुष्पं तत्समवाये बह्वीनां पत्नीनां युगपदृतुप्राप्तौ, यथाविवाहं ब्राह्मादिविवाहक्रममनपहाय, पूर्वं गच्छेत् । विवाहतुल्यतायामाह — पूर्वोढां पूर्वकालपरिणीतां, जीवत्पुत्रां वा अपूर्वोढामपि, पूर्वं गच्छेत् ।

तीर्थेत्यादि । तीर्थगूहनागमने तीर्थस्याप्रकाशने भर्त्रनभिगमने च, षण्णवतिः षण्णवतिपणः, दण्डः । **पुत्रवतीमिति** । पुत्रवतीं, धर्मकामां वन्ध्यां

नीचत्वं परदेशं वा प्रस्थितो राजकिल्बिषी ।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽपि वा पतिः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे द्वितीयोऽध्यायः
विवाहसंयुक्ते विवाहधर्मः स्त्रीधनकल्प आधिवेदनिकम्,
आदित एकोनषष्टितमः ॥

पुत्रार्थव्रतोपवासिनीं वन्ध्यां, विन्दुं नश्यत्प्रसूतिं, नीरजस्कां वा निवृत्तार्तवां वा, अकामाम् अनिच्छन्तीं, नोपेयात् न गच्छेत्, अर्थात् पुरुषः सकामोऽपि । न चाकामः पुरुषः, उपेयात्, अर्थात् सकामामपि । कुष्ठिनीम् , उन्मत्तां वा, न गच्छेत् , पुरुषः । स्त्री तु, पुत्रार्थं पुत्रोत्पत्त्यर्थम् , एवम्भूतं वा कुष्ठिनमुन्मत्तं वा, उपगच्छेत् ।

अध्यायप्रान्ते श्लोकमाह — **नीचत्वमित्यादि** । नीचत्वं परदेशं वा प्रस्थितः नीचत्वं गतो वा विदेशं गतो वा, राजकिल्बिषी राजदुष्पुरोहितो राजदुष्प्रतिग्रही राजयक्ष्मवांश्च इति त्रिरूपः, प्राणाभिहन्ता नरमारकः, पतितः महापातकदूषितः, क्लीबोऽपि वा षण्डो वा, पतिः, त्याज्यः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे द्वितीयोऽध्यायः
विवाहसंयुक्ते विवाहधर्मः स्त्रीधनकल्पः आधिवेदनिकम् ,
आदित एकोनषष्टितमः ॥

---

५९. प्रक. विवाहसंयुक्तं—शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च।

द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति षोडशवर्षः पुमान् । अत ऊर्ध्वमशुश्रूषायां द्वादशपणः स्त्रिया दण्डः पुंसो द्विगुणः ।

भर्मण्यायामनिर्दिष्टकालायां ग्रासाच्छादनं वाधिकं यथापुरुषपरिवापं सविशेषं दद्यात् । निर्दिष्टकालायां तदेव सङ्ख्याय । बन्धं च दद्यात् । शुल्कस्त्रीधनाधिवेदनिकानामनादाने च ।

श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः । इति भर्म ।

पूर्वाध्याये विवाहधर्मादिकमुक्तम् । इह तु शुश्रूषादय उच्यन्ते । तत्र शुश्रूषा परिचरणं, भर्म कुटुम्बभरणनियोगः, पारुष्यं वाक्पारुष्यं दण्डपारुष्यं च, द्वेषः अप्रीतिः, अतिचारः प्रतिषिद्धाचरणम्, उपकारव्यवहारप्रतिषेधः जनविशेषविषयोपकाराचरणनिषेधः ।

द्वादशवर्षेति । अतिक्रान्तद्वादशवयस्का स्त्री, प्राप्तव्यवहारा व्यवहारयोग्या परिचरणकर्मनियोजनार्हा भवति । षोडशवर्षः पुमान्, प्राप्तव्यवहारः भवति । अत ऊर्ध्वम्, अशुश्रूषायाम् अपरिचर्यायां, द्वादशपणः स्त्रियाः दण्डः, पुंसो द्विगुणः चतुर्विंशतिपणो दण्डः ।

भर्मण्यायामिति । गृहभरणनियुक्तायाम्, अनिर्दिष्टकालायाम् अद्यैतावद् गृहीतमेतावद् विनियुक्तमित्यकृतकालनिर्देशायां, ग्रासाच्छादनं वाधिकं ग्रासमाच्छादनं च पर्याप्तं किञ्चिदधिकं वा, यथापुरुषपरिवापं गृहभरणीयजनोपकरणानतिक्रमणेन, सविशेषं सातिशयं दद्याद् असंख्यायैव । निर्दिष्टकालायां, तदेव ग्रासाच्छादनमेव न तु ततोऽधिकं, संख्याय एकस्याहोरात्रस्यैतावदितीयत्तामाकलय्य, दद्यादित्यनुषज्यते । बन्धं च दद्यात् विवदमानायां तस्यां साध्यद्रव्यस्य पञ्चभागं दशभागं च दद्यात् । शुल्कादीनामनादाने च शुल्कस्त्रीधने प्रतीते आधिवेदनिकम् अधिवेदननिमित्तं पत्या दत्तम् एतेषामग्रहणेऽपि, बन्धं दद्यात्, ग्रहणे तु का कथेत्यर्थः ।

श्वशुरेत्यादि । श्वशुरकुलप्रविष्टायां विभक्तायां वा श्वशुरगृहप्राप्तायां वा भर्तृकृतविभागायां वा स्त्रियां, नाभियोज्यः पतिः भर्ता तया अभियोक्तुं न योग्यो ग्रासाच्छादनार्थे । **इति भर्मेति** । व्याख्यातमिति शेषः ।

नग्ने! विनग्ने! न्यङ्गे! अपितृके! अमातृके! इत्यनिर्देशेन विनयग्राहणम्। वेणुदलरज्जुहस्तानामन्यतमेन वा पृष्ठे त्रिराघातः। तस्यातिक्रमे वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः।

तदेव स्त्रिया भर्तरि प्रसिद्धमदोषाया ईर्ष्याया बाह्यविहारेषु द्वारेषु। अत्ययो यथानिर्दिष्टः। इति पारुष्यम्।

भर्तारं द्विषती स्त्री सप्तार्तवान्यमण्डयमाना तदानीमेव स्थाप्याभरणं निधाय भर्तारम् अन्यया सह शयानमनुशयीत।

पारुष्यमाह — नग्ने इत्यादि। नग्ने! असंस्कृतबुद्धित्वात् कोट्टवीतुल्ये!, विनग्ने! विशेषेण नग्ने!। नष्टे! विनष्टे! इति पाठे स्फुट एवार्थः। न्यङ्गे! निन्द्ये! अङ्गहीने! वा, अपितृके! अमातृके! कुत्सितपितृके! कुत्सितमातृके!, इत्यनिर्देशेन एवम्प्रकारेण साक्रोशसम्बोधनेन, विनयग्राहणं सदाचारस्योपदेशना कर्तव्या। अनिर्देशेन विनयासिद्धावाह — वेणुदलेत्यादि। वेणुदलादीनां त्रयाणाम् अन्यतमेन वा, पृष्ठे, त्रिराघातः त्रीणि ताडनानि, कर्तव्यानि। तस्यातिक्रमे उक्तस्य द्विविधस्य पारुष्यस्य अतिक्रमे विहितविजातीयारुन्तुदाक्रोशकरणे अवेण्वादिना अपृष्ठे सकृदपि वाघाते वेण्वाद्यन्यतमेन पृष्ठ एव चतुराघाते चेत्यर्थः, वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः वाक्पारुष्यदण्डाद् दण्डपारुष्यदण्डाच्च वक्ष्यमाणादर्धदण्डाः, भवन्ति।

गणिकाद्यासक्तिनिमित्तकेर्ष्यावशाद् भर्तरि विषये स्त्रियाः पतिव्रतायाः पारुष्यस्य प्रसक्तस्य मात्रामाह — तदेवेत्यादि। तदेव भर्तुर्यादृशमुक्तं तादृशमेव। द्वारेषु पारुष्यप्रयोगस्थानेषु। अत्ययो यथानिर्दिष्ट इति, उक्तविध्यतिक्रमनिमित्तः स्त्रियाः दण्डः वाक्पारुष्यदण्डपारुष्योक्त एव न त्वर्धदण्डः पुंस इव। इति पारुष्यं, व्याख्यातम्।

द्वेषमाह — भर्तारमिति। भर्तारं द्विषती अरोचयमाना, स्त्री, सप्तार्तवानि सप्त ऋतुकालान् अमण्डयमाना शयनार्थमनुपतिष्ठमाना प्रतीक्ष्येतेति शेषः। ततो मण्डयमाना किं कुर्यादित्याह — तदानीमेव सद्य एव, स्थाप्याभरणं निधाय स्थाप्यशब्दो न्यासवाची स्वीयं भूषणम् अपुनर्द्वेषप्रत्ययार्थे भर्तुर्न्यासं कृत्वा, अन्यया सह शयानं भर्तारम् अनुशयीत सपश्चात्तापमुपतिष्ठेत। स्त्रियाः स एष भर्तृद्वेषदण्डो बोद्धव्यः।

भिक्षुक्यन्वाधिज्ञातिकुलानामन्यतमे वा भर्ता द्विषन् स्त्रियमेकामनुशयीत ।

दृष्टलिङ्गे मैथुनापहारे सवर्णापसर्पोपगमे वा मिथ्यावादी द्वादशपणं दद्यात् ।

अमोक्ष्या भर्तुरकामस्य द्विषती भार्या भार्यायाश्च भर्ता । परस्परं द्वेषान्मोक्षः ।

स्त्रीविप्रकाराद् वा पुरुषश्चेन्मोक्षमिच्छेद् यथागृहीतमस्यै दद्यात् । पुरुषविप्रकाराद् वा स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् । अमोक्षो धर्मविवाहानाम् । इति द्वेषः ।

स्त्रियं द्विषतो भर्तुर्विधिमाह— **भिक्षुकीत्यादि** । भर्ता, द्विषन् स्त्रियं, भिक्षुक्यादिकुलानां भिक्षुकी शान्तशुद्धव्यवहारिणी श्रमणी अन्वाधिः स्त्रीधनाधिष्ठाता ज्ञातिर्बन्धुः एषां कुलानि गृहाणि तेषाम्, अन्यतमे न त्वन्यकुले वसन्तीमिति शेषः, एकां पुरुषान्तरमस्पृशन्तीं ताम्, अनुशयीत अनुतपन् स्वयमुपतिष्ठेत । एकामित्युक्त्या पुरुषान्तरसहशयने स्त्रियास्त्यागः सूचितः । पुरुषस्य तु अन्यसहशयनेऽप्यदोषः प्रागुक्तः ।

दृष्टेत्यादि । दृष्टलिङ्गे साक्षादुपलब्धेऽन्यस्त्रीमैथुनचिह्ने सति, मैथुनापहारे मैथुनस्यापलापे, द्वादशपणं दण्डं, दद्याद्, अपलपिता । सवर्णापसर्पोपगमे वा मिथ्यावादी सवर्णा सखी तद्रूपापसर्पसङ्गमे सति वा तदपलापकर्ता, द्वादशपणं दद्यात् ।

दम्पत्योरन्यतरद्वेषात् तदन्यमोक्षो न भवति, किन्तु परस्परं द्वेषान्मोक्ष इत्याह— **अमोक्ष्येति** । अकामस्य मोक्षमनिच्छतः । भार्यायाश्च अकामाया इति लिङ्गविपरिणामेनात्र सम्बन्धः ।

स्त्रीविप्रकाराद्वेति । स्त्रिया अपराधात्, पुरुषश्चेद्, मोक्षमिच्छेद् यथागृहीतम् अस्यै दद्यात् स्त्रीसकाशाद् गृहीतं सर्वविधं द्रव्यं स्त्रियै दत्त्वा मुच्येत । **पुरुषविप्रकाराद्वेति** । पुरुषापराधात्, स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् अदत्त्वैव स्त्रियै स्त्रीधनं तत्सकाशात् मुच्येत । स एष स्त्रीपुंसान्योन्यमोक्षविधिरधर्म्यविवाहानामासुरादीनाम् । ब्राह्मादीनां तु मोक्षणं नास्तीत्याह — **अमोक्षो धर्मविवाहानामिति** । इति द्वेषो व्याख्यातः ।

प्रतिषिद्धा स्त्री दर्पमद्यक्रीडायां त्रिपणं दण्डं दद्यात् । दिवा स्त्रीप्रेक्षाविहारगमने षट्पणो दण्डः । पुरुषप्रेक्षाविहारगमने द्वादशपणः । रात्रौ द्विगुणः ।

सुप्तमत्तप्रव्रजने भर्तुरदाने च द्वारस्य द्वादशपणः । रात्रौ निष्कासने द्विगुणः ।

स्त्रीपुंसयोर्मैथुनार्थेऽनङ्गविचेष्टायां रहोऽश्लीलसम्भाषायां वा चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसो द्विगुणः ।

केशनीवीदन्तनखावलम्बनेषु पूर्वः साहसदण्डः, पुंसो द्विगुणः ।

शङ्कितस्थाने सम्भाषायां च पणस्थाने शिफादण्डः । स्त्रीणां ग्राममध्ये चण्डालः पक्षान्तरे पञ्चशिफा दद्यात् । पणिकं वा प्रहारं मोक्षयेत् । इत्यतिचारः ।

अतिचारविधिमाह — **प्रतिषिद्धे**त्यादि । प्रतिषिद्धा भर्त्रा वारिता, स्त्री, दर्पमद्यक्रीडायां दर्पक्रीडायां मद्यक्रीडायां च प्रवर्तमानेति शेषः, त्रिपणं दण्डं दद्यात् । **दिवे**ति । अह्नि, स्त्रीप्रेक्षाविहारगमने स्त्रीप्रयुज्यमाननाट्यदर्शनार्थम् उद्यानक्रीडार्थं च गमने, षट्पणो दण्डः, अर्थात् स्त्रियाः प्रतिषिद्धायाः । पुरुषप्रेक्षाविहारगमने पुरुषप्रयुज्यमानप्रेक्षाविहारगमने, द्वादशपणः । रात्रौ द्विगुणः स्त्रैणप्रेक्षाविषये द्वादशपणः पौंस्नप्रेक्षाविषये चतुर्विंशतिपणः ।

सुप्तेत्यादि । सुप्तमत्तप्रव्रजने सुप्ते मत्ते च भर्तरि स्वगृहं विहाय गमने, भर्तुरदाने च द्वारस्य आगतस्य भर्तुर्गृहद्वारकवाटानुद्घाटने च, द्वादशपणः दण्डः । रात्रौ निष्कासने गृहाद् बहिर्भर्तुर्निरसने, द्विगुणः चतुर्विंशतिपणः ।

स्त्रीपुंसयोरिति । तयोः, मैथुनार्थे अनङ्गविचेष्टायां मैथुनमावां गमिष्याव इत्याकूतसूचककामचेष्टितकरणे, रहोऽश्लीलसम्भाषायां वा रहसि असभ्यवृत्तसम्भाषणे च, चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसः द्विगुणः अष्टाचत्वारिंशत्पणः ।

केशेत्यादि । केशग्रहणे नीवीग्रहणे दन्तक्षतकरणे नखक्षतकरणे च, पूर्वः प्रथमः, साहसदण्डः स्त्रियाः, पुंसः द्विगुणः पञ्चशतपणात्मको मध्यमसाहसदण्डः ।

शङ्कितेत्यादि । शङ्कितस्थाने सम्भाषायां च शङ्कास्पदे प्रदेशे सम्भाषणमात्रेऽपि कृते, पणस्थाने शिफादण्डः एकैकस्य पणस्य स्थाने एकैकशिफा-

प्रतिषिद्धयोः स्त्रीपुंसयोरन्योन्योपकारे क्षुद्रकद्रव्याणां द्वादशपणो दण्डः, स्थूलकद्रव्यणां चतुर्विंशतिपणः, हिरण्यसुवर्णयोश्चतुष्पञ्चाशत्पणः स्त्रियाः। दण्डः पुंसो द्विगुणः। त एवागम्ययोरर्धदण्डाः।
तथा प्रतिषिद्धपुरुषव्यवहारेषु च। इति प्रतिषेधः।

राजद्विष्टातिचाराभ्यामात्मापक्रमणेन च।
स्त्रीधनानीतशुल्कानामस्वाम्यं जायते स्त्रियाः॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे तृतीयोऽध्यायः
विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकार-
व्यवहारप्रतिषेधाश्च,
आदितः षष्टितमः॥

ताडनं दण्डः। स्त्रीणामिति। तासां, ग्राममध्ये पश्यत्सु ग्रामजनेषु, चण्डालः वधताडननियुक्तः पुरुषः, पक्षान्तरे एकैकपार्श्वावकाशे, पञ्चशिफाः पञ्च शिफाप्रहारान्, दद्यात्। पणिकं वा पणोऽस्य शुल्को दीयते पणिकः तथाभूतं वा प्रहारं मोक्षयेत् एकैकस्य प्रहारस्यैकैकं पणं निष्क्रयं दत्त्वा प्रहारदण्डं मोचयेदित्यर्थः। इत्यतिचारः, व्याख्यातः।

अथ प्रतिषेधमाह — **प्रतिषिद्धयोरिति**। वारितपरस्परव्यवहारयोः, स्त्रीपुंसयोः, अन्योन्योपकारे क्षुद्रकद्रव्याणां स्रक्चन्दनाद्यल्पद्रव्याणां परस्परदानेनोपकारे, द्वादशपणो दण्डः, स्त्रियाः। स्थूलकद्रव्याणां वस्त्राभरणादीनाम्, अन्योन्योपकारे चतुर्विंशतिपणः। हिरण्यसुवर्णयोः, अन्योन्योपकारे, चतुष्पञ्चाशत्पणः। पुंसो विशेषमाह — **दण्ड** इति। उक्तो द्वादशपणादिः सर्वो दण्डः, पुंसो द्विगुणः। **त एवेति**। उक्ता एव दण्डाः, अगम्ययोः अर्धदण्डाः भ्रातृभगिन्यादिरूपयोः स्त्रीपुंसयोर्विषये अर्धहीना भवन्ति। ननु च भ्रातृभगिन्यादीनामन्योन्योपकारो निसर्गसिद्धवात्सल्यप्रयुक्तो न त्वन्येषां स्त्रीपुंसानामिव सम्भावितदुरभिसन्धिप्रयुक्तः इति कथमसौ दण्डार्ह इति चेत्, सत्यं, किन्तु ऋजुबुद्ध्यारब्धोऽसावनुष्ठानप्रबन्धवशात् क्रमेण दुरभिसन्धिं जनयेदिति दण्डार्ह एवासौ।

य एते स्त्रीपुंसयोः प्रतिषिद्धव्यवहारयोः परस्परोपकारे दण्डास्त एव पुरुषयोरपि प्रतिषिद्धव्यवहारयोरित्याह — **तथेत्यादि**। **इति प्रतिषेध** इति। एवम् उपकारव्यवहारप्रतिषेधो व्याख्यातः।

राजद्विष्टातिचाराभ्यामिति । राजद्विष्टकथनेन दर्पमद्यक्रीडादिगमनेन च, आत्मापक्रमणेन च स्वयं भर्तृसकाशान्निष्पतनेन च, स्त्रीधनानीतशुल्कानाम् अस्वाम्यं स्त्रिया जायते स्त्रीधने पितृगृहोपाहृते शुल्के च स्त्रियाः स्वामित्वं हीयते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे तृतीयोऽध्यायः
विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकार-
व्यवहारप्रतिषेधाः,
आदितः षष्टितमः ॥

५९ प्रक. विवाहसंयुक्तं—निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासः दीर्घप्रवासश्च।

पतिकुलान्निष्पतितायाः स्त्रियाः षट्पणो दण्डोऽन्यत्र विप्रकारात्। प्रतिषिद्धायां द्वादशपणः। प्रतिवेशगृहातिगतायाः षट्पणः।

प्रातिवेशिकभिक्षुकवैदेहकानामवकाशभिक्षापण्यादाने द्वादशपणो दण्डः, प्रतिषिद्धानां पूर्वः साहसदण्डः। परगृहातिगतायाश्चतुर्विंशतिपणः।

परभार्यावकाशदाने शत्यो दण्डोऽन्यत्रापद्भ्यः। वारणाज्ञानयोर्निर्दोषः।

पतिविप्रकारात् पतिज्ञातिसुखावस्थग्रामिकान्वाधिभिक्षुकीज्ञातिकुलानामन्यतममपुरुषं गन्तुमदोष इत्याचार्याः।

पूर्वाध्यायशेषोक्तमपक्रमणं 'निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः' इत्युक्तं निवेशकालं च वर्णयितुमयमध्याय आरभ्यते।

पतिकुलादिति। पतिगृहात्, निष्पतिताया निर्गतायाः, स्त्रियाः प्राप्तव्यवहारायाः, षट्पणो दण्डः, अन्यत्र विप्रकाराद् पुरुषकृतापराधाभावे। प्रतिषिद्धायां 'मा कुरु निष्पतनमि'ति वारितायां सत्यां तस्या निष्पतने, द्वादशपणः। प्रतिवेशगृहातिगतायाः इतीदं वाक्यं क्वचिन्न पठ्यते।

प्रातिवेशिकभिक्षुकवैदेहकानामिति। प्रातिवेशिकः प्रतिगृही भिक्षुको वृत्तच्युतः पाषण्डादिः वैदेहकः कुवणिक् इत्येतेषाम्, अवकाशभिक्षापण्यादाने अवकाशभिक्षाशब्दौ तद्दानपरौ अवकाशदाने भिक्षादाने पण्यग्रहणे च, द्वादशपणो दण्डः। प्रतिषिद्धानां, पूर्वः प्रथमः, साहसदण्डः पञ्चाशदुत्तरद्विशतपणात्मकः। परगृहातिगतायाः भर्तृगृहसमनन्तरगृहमतिक्रम्य व्यवहितं गृहं गतायाः, चतुर्विंशतिपणः दण्डः।

परेत्यादि। परभार्यावकाशदाने परभार्याया वासभूमिदाने, शत्यो दण्डः पणशतपरिमाणो दण्डः। अपवादमाह — **अन्यत्रापद्भ्य** इति। आपत्सु तु न दोषः। **वारणाज्ञानयोर्निर्दोष** इति, 'मा मम गृहं प्रविशे'ति वार्यमाणापि वा अज्ञायमानैव वा यदि प्रविशेत्, तदा निरपराधः, कः, अर्थाद् गृहस्वामी।

पतिधिक्कारवशादन्यत्रापसरणस्यावश्यं प्राप्तौ साध्वीजनः कमाश्रयं गच्छेदित्याकाङ्क्षायामाह—**पतिविप्रकारादिति**। भर्तृकृतधिक्कारदोषात्, पतिज्ञात्यादिकुलानां पतिज्ञातिर्भर्तृबान्धवः सुखावस्थः विवाहस्थेयः ग्रामिको ग्राम-

सपुरुषं वा ज्ञातिकुलम् । कुतो हि साध्वीजनस्यच्छलं, सुखमेतदवबोद्धुम् इति कौटल्यः ।

प्रेतव्याधिव्यसनगर्भनिमित्तमप्रतिषिद्धमेव ज्ञातिकुलगमनम् ।

तन्निमित्तं वारयतो द्वादशपणो दण्डः । तत्रापि गूहमाना स्त्रीधनं जीयेत, ज्ञातयो वा छादयन्तः शुल्कशेषम् । इति निष्पतनम् ।

पतिकुलान्निष्पत्य ग्रामान्तरगमने द्वादशपणो दण्डः स्थाप्याभरणलोपश्च । गम्येन वा पुंसा सहप्रस्थाने चतुर्विंशतिपणः, सर्वधर्मलोप-

---

महत्तरः अन्वाधिः स्त्रीधनस्थेयः भिक्षुकी तपस्विनी भैक्षजीविनी ज्ञातिः स्वबान्धवः एतत्सम्बन्धिनां गृहाणाम्, अन्यतमम्, अपुरुषम् अविद्यमानपुरुषं, गन्तुं गत्वाधिवस्तुम्, अदोषः दोषाभावः स्त्रियाः । इत्याचार्याः मन्यन्त इति शेषः ।

आचार्यमतमभ्युपगम्यैव ज्ञातिकुले विशेषं स्वमतेनाह—**सपुरुषं** वेति विद्यमानपुरुषमपि वा, ज्ञातिकुलं पतिबन्धुगृहं स्वबन्धुगृहं च, गन्तुमदोष इति वर्तते । तत्र हेतुमाह— कुतो हि साध्वीजनस्य, छलं व्यभिचरणं, निष्कल्मषहृदयतया न कुतोऽपि भवतीत्यर्थः । प्रकाशभयाच्च छलं न जायत इत्याह —**सुखमेतदवबोद्धुमिति** । छलं स्त्रीकृतं भर्तुरन्यस्य वा सद्यः सुज्ञानं न तु गोपयितुं शक्यमित्यर्थः ।

पतिकुलादन्यत्रगमनं यत् सामान्यतः प्रतिषिद्धं तस्यापवादमाह — **प्रेतव्याधीत्यादि** । सुबोधम् ।

तन्निमित्तमिति । उक्तनिमित्तकं ज्ञातिकुलगमनं, वारयतः पुरुषस्य, द्वादशपणो दण्डः । **तत्रापीति** । ज्ञातिकुलेऽपि, गूहमाना केनापि छलेन गूढं वसन्ती, स्त्रीधनं, जीयेत हाप्येत अर्थाद् भर्त्रा स्वयं हरता । ज्ञातयो वा छादयन्तः स्त्रियं छलेन गूढं स्वगृहे वासयन्तः, शुल्कशेषं, जीयेरन्निति विपरिणतानुषङ्गः । **इति निष्पतनमिति** । व्याख्यातमिति शेषः ।

अथ पथ्यनुसरणमाह—**पतिकुलादिति** । पतिगृहात्, निष्पत्य पत्यननुज्ञया निर्गम्य, ग्रामान्तरगमने, द्वादशपणो दण्डः, स्थाप्याभरणलोपश्च अपुनर्गमनप्रत्ययार्थन्यस्तभूषणहानिश्च, भवति । गम्येन वा पुंसा, सहप्रस्थाने प्रस्थाय ग्रामान्तरगमने, चतुर्विंशतिपणो दण्डः, सर्वधर्मलोपश्च भर्त्रनुष्ठीयमान-

अन्यत्र भर्मदानतीर्थगमनाभ्याम् । पुंसः पूर्वः साहसदण्डः तुल्यश्रेयसः, पापीयसो मध्यमः । बन्धुरदण्ड्यः । प्रतिषेधेऽर्धदण्डः ।

पथि व्यन्तरे गूढदेशाभिगमने मैथुनार्थेन शङ्कितप्रतिषिद्धाभ्यां वा पथ्यनुसारेण सङ्ग्रहणं विद्यात् ।

तालावचरचारणमत्स्यबन्धकलुब्धकगोपालकशौण्डिकानामन्येषां च प्रसृष्टस्त्रीकाणां पथ्यनुसरणमदोषः । प्रतिषिद्धे वा नयतः पुंसः स्त्रिया वा गच्छन्त्यास्त एवार्धदण्डाः । इति पथ्यनुसरणम् ।

यज्ञादिसर्वधर्मसहचरणहानिश्च । तत्रापवादः — अन्यत्र भर्मदानतीर्थगमनाभ्यामिति । भर्मदानं गृहभरणं तदर्थं वा तीर्थगमनम् ऋतुगमनं तदर्थं वा भर्त्रन्तिकगमने न दोष इत्यर्थः । पुंसो दण्डमाह — पुंस इति । स्त्रियं ग्रामान्तरं नेतुः पुरुषस्य, पूर्वः साहसदण्डः पञ्चाशदधिकद्विशतपणात्मकः, कीदृशस्य, तुल्यश्रेयसः स्त्रीसमानजातिश्रेष्ठयस्य । पापीयसो मध्यमः स्त्रीनिहीनजातीयस्य मध्यमः साहसदण्डः पञ्चशतपणात्मकः । बन्धुरदण्ड्यः बन्धुर्नेता दण्डार्हो न भवति । प्रतिषेधेऽर्धदण्ड इति । बन्धोरपि भर्त्रा प्रतिषिद्धस्य नेतुरुक्तसमांशो दण्डः ।

पथीति । मार्गेऽपि, व्यन्तरे मार्गविदूरावकाशे, गूढदेशाभिगमने छन्नप्रदेशगमने च सति, मैथुनार्थेन विद्यात् मैथुनमभिसन्धाय तद् गमनमिति जानीयात् । शङ्कितप्रतिषिद्धाभ्यां वेति । मैथुनार्थित्वशङ्काविषयीभूतेन, भर्तृप्रतिषिद्धेन चेत्याभ्यां सह, पथ्यनुसारेण पथ्यनुगमनेन, संग्रहणं विद्यात् स्त्रीसंग्रहणोक्तो दण्डविधिः स्त्रीपुंसयोर्वेदितव्य इत्यर्थः । स तूत्तराधिकरणे कन्याप्रकर्मणि वक्ष्यते ।

तालावचरेत्यादि । तालावचरो नटः चारणः कुशीलवः मत्स्यबन्धको बलिशजीवी लुब्धको व्याधः गोपालक आभीरः शौण्डिकः सुरासन्धानजीवी इत्येतेषाम्, अन्येषां च प्रसृष्टस्त्रीकाणां तदितरेषां चानुज्ञातस्त्रीकाणां ताम्बूलिकमालाकारादीनां, पथ्यनुसरणं प्रकरणात् स्त्रियाः पथि पुरुषान्तरानुगमनम्, अदोषः दोषो न भवति । तालावचरादिस्त्रियमपि भर्तृप्रतिषिद्धां पथि नयतः पुरुषस्य नीयमानायाश्च पूर्वोक्तदण्डार्धदण्डा भवन्तीत्याह — प्रतिषिद्धे वेत्यादि । इति पथ्यनुसरणं व्याख्यातम् ।

ह्रस्वप्रवासिनां शूद्रवैश्यक्षत्रियब्राह्मणानां भार्याः संवत्सरोत्तरं कालमाकाङ्क्षेरन् अप्रजाताः, संवत्सराधिकं प्रजाताः, प्रतिविहिताः द्विगुणं कालम् । अप्रतिविहिताः सुखावस्था बिभृयुः, परं चत्वारि वर्षाण्यष्टौ वा ज्ञातयः । ततो यथादत्तमादाय प्रमुञ्चेयुः ।

ब्राह्मणमधीयानं दश वर्षाण्यप्रजाता, द्वादश प्रजाता । राजपुरुषम् आ आयुःक्षयादाकाङ्क्षेत । सवर्णतश्च प्रजाता नापवादं लभेत । कुटुम्बर्द्धिलोपे वा सुखावस्थैर्विमुक्ता यथेष्टं विन्देत जीवितार्थमापद्गता वा ।

धर्मविवाहात् कुमारी परिग्रहीतारमनाख्याय प्रोषितमश्रूयमाणं

ह्रस्वप्रवासमाह — **ह्रस्वप्रवासिनामिति** । क्षिप्रं प्रत्यागमिष्यामीत्युक्त्वा देशान्तरं गतानां, शूद्रवैश्यक्षत्रियब्राह्मणानां, भार्याः, संवत्सरोत्तरं कालम् आकाङ्क्षेरन् एकं वत्सरं शूद्री द्वौ वैश्यी त्रीन् क्षत्रियी चतुरो ब्राह्मणीत्येवं क्रमेण प्रत्यागमनकालम् अतिक्रान्तावधेर्भर्तुः प्रतीक्षेरन्, कथम्भूताः, अप्रजाताः अनुपजातप्रसवाः । संवत्सराधिकं प्रजाताः उपजातप्रसवाः अधिकमेकं संवत्सरम्, आकाङ्क्षेरन् । प्रतिविहिताः भर्तृसुविहितवृत्तिव्ययाः स्त्रियो, द्विगुणं कालं शूद्र्याद्युक्तक्रमेण द्विवर्षचतुर्वर्षषड्वर्षाष्टवर्षात्मकम्, आकाङ्क्षेरन् । अप्रतिविहिताः स्त्रीः, सुखावस्था बिभृयुः विवाहव्यवस्थास्थेयपुरुषाः पोषयेयुः । परं द्विगुणकालादूर्ध्वं, चत्वारि वर्षाणि, अष्टौ वा वर्षाणि, ज्ञातयः पतिबान्धवाः, बिभृयुः । ततः तदूर्ध्वं, भर्तुरनागमने, यथादत्तम् आदाय, प्रमुञ्चेयुः स्त्रीज्ञातिगृहं प्रति विसृजेयुः, तासामिच्छा चेदित्यर्थम् ।

ब्राह्मणमिति । ब्राह्मणम्, अधीयानं विद्याध्ययनाय देशान्तरं गतं, दश वर्षाणि, अप्रजाता अप्रसूतिः स्त्री, आकाङ्क्षेत । द्वादश वर्षाणि, प्रजाता प्रसूता, आकाङ्क्षेत । राजपुरुषं प्रोषितम्, आ आयुःक्षयाद् आकाङ्क्षेत । **सवर्णत इति** । यथोक्तप्रतीक्षाकालादूर्ध्वं समानवर्णात्, चकारात् स्वोत्कृष्टवर्णादपि प्रजाता प्राप्तगर्भा स्त्री, नापवादं लभेत दण्डनीया न भवेत् । **कुटुम्बर्द्धिलोपे वेति** । बन्धुकुटुम्बे दारिद्र्यादात्मभरणासमर्थे सति, सुखावस्थैर्विमुक्ता विवाहव्यवस्थास्थेयैर्यथोचितकालं भृत्वा विसृष्टा स्त्री, यथेष्टं विन्देत ईप्सितमन्यं पुरुषं वरयेत्, जीवितार्थं देहयात्रार्थम् । आपद्गता वा आपन्निवारणार्थं वा ।

धर्मविवाहादिति । ब्राह्मादिं धर्मविवाहमधिगम्य स्थिता, कुमारी अक्षतयोनिः, परिग्रहीतारम्, अनाख्याय प्रोषितम् अनापृच्छ्य देशान्तरगतम्

सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं श्रूयमाणम् । आख्याय प्रोषितमश्रूयमाणं पञ्च तीर्थान्याकाङ्क्षेत, दश श्रूयमाणम् । एकदेशदत्तशुल्कं त्रीणि तीर्थान्यश्रूयमाणं, श्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत । दत्तशुल्कं पञ्च तीर्थान्यश्रूयमाणं, दश श्रूयमाणम् । ततः परं धर्मस्थैर्विसृष्टा यथेष्टं विन्देत । तीर्थोपरोधो हि धर्मवध इति कौटल्यः ।

दीर्घप्रवासिनः प्रव्रजितस्य प्रेतस्य वा भार्या सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं प्रजाता । ततः पतिसोदर्यं गच्छेत् । बहुषु प्रत्यासन्नं धार्मिकं भर्मसमर्थं कनिष्ठमभार्यं वा । तदभावेऽप्यसोदर्यं सपिण्डं कुल्यं वा । आसन्नमेतेषाम् । एष एव क्रमः ।

अश्रूयमाणम् अज्ञायमानवृत्तान्तं, सप्त तीर्थानि, आर्तवानि, आकाङ्क्षेत । श्रूयमाणं तं, संवत्सरम् आकाङ्क्षेत । आख्याय प्रोषितमित्यादि । एकदेशदत्तशुल्कम् सावशेषार्पितशुल्कम् । दत्तशुल्कं निरवशेषार्पितशुल्कम् । शेषं सुबोधम् । ततः परमिति । यथोक्तकालादूर्ध्वं, धर्मस्थैः विसृष्टा पत्यन्तरवरणायाभ्यनुज्ञाता, यथेष्टं विन्देत यथाकामितं पतिं परिगृह्णीयात् । तत्र हेतुमाह— तीर्थोपरोधो हीति । तीर्थस्य ऋतुकालस्य प्रजननयोग्यस्य उपरोधः पुरुषानभिगमनेन विफलीकरणं, धर्मवधः धर्मस्य पुत्रोत्पत्तिलभ्यस्य सुकृतस्य वधो घातः, भवति । इति कौटल्यः मन्यत इति शेषः । यत् स्मर्यते —

"पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण नाकपृष्ठे महीयते ॥" इति ।

दीर्घप्रवासिन इति । महाप्रस्थानं गतस्य, प्रव्रजितस्य सन्न्यस्तस्य, प्रेतस्य वा, भार्या, सप्त तीर्थानि आकाङ्क्षेत, अप्रजाता । संवत्सरं प्रजाता सा, आकाङ्क्षेत । ततः, पतिसोदर्यं पत्युर्भ्रातरं, गच्छेद् उपतिष्ठेत पुत्रार्थम् । बहुषु अनेकेषु पतिसोदर्येषु सत्सु, प्रत्यासन्नं समनन्तरं, गच्छेत् । स यद्यधार्मिकः तदा धार्मिकं गच्छेत् । सर्वेषु धार्मिकेषु भर्मसमर्थं भरणशक्तं गच्छेत् । सर्वेषु भरणसमर्थेषु कनिष्ठं गच्छेत् , अभार्यं वा गच्छेत् । तदभावेऽपीति । पतिसोदर्याभावेऽपि, असोदर्यं वैमात्रेयं गच्छेत् । तदभावे सपिण्डं गच्छेत् । कुल्यं वा सपिण्डाभावे पतिकुलोत्पन्नं, गच्छेत् । आसन्नमेतेषामिति । कुल्यानां बहूनां मध्ये पुरुषगणनायामासन्नं गच्छेत् । एष एव क्रमः यथोक्त एव पुरुषपरिग्रहविषयो न्यायः ।

एतानुत्क्रम्य दायादान् वेदने जारकर्मणि ।
जारस्त्रीदातृवेत्तारः संप्राप्ताः सङ्ग्रहात्ययम् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे चतुर्थोऽध्यायः
विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासः
दीर्घप्रवासश्च । विवाहसंयुक्तं समाप्तम् ।
आदित एकषष्टितमः ॥

एतानिति । एतान् दायादान् पतिसोदर्यादीन्, उत्क्रम्य, वेदने पुरुषान्तरपरिणयने, जारकर्मणि जारपुरुषगमने वा, जारस्त्रीदातृवेत्तारः जारः स्त्रीभोक्ता स्त्री व्यभिचारिणी दाता स्त्रीदायकः स्त्रीधनस्थेयश्च वेत्ता स्त्रियं विन्दमानः इत्येते, संग्रहात्ययं संप्राप्ताः स्त्रीसंग्रहणविहितेन दण्डेन दण्डनीयाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे चतुर्थोऽध्यायः
विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो
दीर्घप्रवासश्च । विवाहसंयुक्तं समाप्तम् ।
आदित एकषष्टितमोऽध्यायः ॥

६०. प्रक. दायविभागः—दायक्रमः ।

अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः । तेषाम् ऊर्ध्वं पितृतो दायविभागः पितृद्रव्याणाम् । स्वयमार्जितमविभाज्यम् अन्यत्र पितृद्रव्यादुत्थितेभ्यः ।

पितृद्रव्यादविभक्तोपगतानां पुत्राः पौत्रा वा आ चतुर्थादित्यंश-भाजः । तावदविच्छिन्नः पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे समं विभजेरन् ।

अपितृद्रव्या विभक्तापितृद्रव्या वा सहजीवन्तः पुनर्विभजेरन् । यतश्चोत्तिष्ठेत स द्व्यंशं लभेत ।

दायविभाग इति सूत्रम् । दायः कुलसाधारणं द्रव्यं तस्य विभाग उच्यत इति सूत्रार्थः । पूर्वाध्यायान्ते 'एतानुत्क्रम्य दायादान्' इत्यासूत्रितो दायः कैः कथं विभाज्य इत्येतदस्मिन् प्रकरणेऽभिधीयते । त्रिभिश्चाध्यायैरिदं वितन्यते । तत्र प्रथमे दायक्रमः, द्वितीयेंऽशविभागः, तृतीये पुत्रविभाग इति ।

अनीश्वरा इति । पितृमन्तः प्रशस्तमातापितृकाः, स्थितपितृमातृकाः जीवन्मातापितृकाः, पुत्राः, अनीश्वराः कुलधने स्वामिनो न भवन्ति । तेषां पुत्राणाम् , ऊर्ध्वं पितृतः पित्रोरनन्तरं, दायविभागः, पितृद्रव्याणां पित्रुपार्जितद्रव्याणां, कर्तव्यः । स्वयमार्जितम् , अविभाज्यं भ्रातृविभागानर्हं भवति । तत्रापवादः— **अन्यत्र पितृद्रव्यादुत्थितेभ्य** इति । पितृद्रव्योपाश्रयार्जित-द्रव्यव्यतिरेकेण । पितृद्रव्योत्थितानि तु पितृद्रव्यवद् विभाज्यान्येव ।

पितृद्रव्यादविभक्तोपगतानामिति । अविभज्य पितृद्रव्यमुपरतानां, पुत्राः पौत्रा वा, आ **चतुर्था**दिति अनेन प्रकारेण आ चतुर्थपुरुषावधेः, अंश-भाजः पितृक्रमप्रकृतविषमांशभाजो भवन्ति । तत्र हेतुः— तावत् चतुर्थपुरुषान्तरं यावत्, **अविच्छिन्नः** पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे चतुर्थपुरुषात् परतो ये तत्कालजीविनस्ते सर्वे, समं विभजेरन् ।

अपितृद्रव्या इति । अविद्यमानपितृद्रव्याः, विभक्तपितृद्रव्या वा, सहजीवन्तः संसृज्य जीवन्तः, पुनर्विभजेरन् पुनरपि विभागं कुर्युः । तत्र विशेषमाह—**यतश्चे**ति । यत्प्रयत्नाद् , उत्तिष्ठेत धनं वर्धेत, सः, द्व्यंशं द्विरावृत्तमंशं, लभेत । अन्ये तु व्याचक्षते— **धनपिण्डस्यैकमर्धमुत्थापको लभेत, अन्यदर्धमितरे सर्वे विभजेरन्निति ।**

द्रव्यमपुत्रस्य सोदर्या भ्रातरः सहजीविनो वा हरेयुः कन्याश्च ।

रिक्थं पुत्रवतः पुत्रा दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः । तदभावे पिता धरमाणः, पित्रभावे भ्रातरो भ्रातृपुत्राश्च ।

अपितृका बहवोऽपि च भ्रातरो भ्रातृपुत्राश्च पितुरेकमंशं हरेयुः ।

सोदर्याणामनेकपितृकाणां पितृतो दायविभागः ।

द्रव्यमिति । अपुत्रस्य प्रमीतस्य द्रव्यं, सोदर्या भ्रातरः सहजीविनः एकोदरजा भ्रातरः संसृष्टिनः, हरेयुः । वेति वाक्यभूषणम् । कन्यानामपि सत्त्वे प्रतिपत्तिमाह — **कन्याश्चेति** । तास्तु विवाहाद्यपेक्षितं द्रव्यं हरेयुः ।

रिक्थमिति । रिक्थं दायं, पुत्रवतः प्रमीतस्य, पुत्राः, हरेयुरिति वर्तते । दुहितरो वा, धर्मिष्ठेषु ब्राह्मादिषु चतुर्षु विवाहेषु जाताः, हरेयुः पुत्राभावे । तदभावे दुहित्रभावे, पिता, धरमाणो जीवन्, हरेत् । पित्रभावे भ्रातरः, भ्रातृपुत्राश्च भ्रात्रभावे, हरेयुः ।

अपितृका इति । अपितृकाः प्रमीतपितृकाः, ते च बहवः, तेऽपि च भ्रातरः सोदर्यभ्रातरोऽसोदर्यभ्रातरश्च, सर्वे ते भ्रातृपुत्राश्च भ्रातॄणां पुत्राश्च, एवम्भूताः, पितुरेकमंशं हरेयुः । अयमर्थः— त्रयो भ्रातरः प्रमीता अविभक्ताः । तेषु ज्येष्ठस्य त्रयः पुत्राः मध्यमस्य द्वौ पुत्रौ कनिष्ठस्यैकः पुत्रः इत्याहत्य षण्णां सोदर्यासोदर्यभ्रातॄणां विभागे करणीये पिण्डधनस्य न षोढा विभागः किन्तु तत्तत्पितृतस्त्रेधा विभागं कृत्वा एकं त्रिभागं ज्येष्ठस्य पुत्रास्त्रयो गृह्णीयुः, द्वितीयं त्रिभागं मध्यमस्य द्वौ पुत्रौ गृह्णीयातां, तृतीयं त्रिभागं कनिष्ठस्य य एकः पुत्रः स गृह्णीयादिति । अथवा भ्रातर इत्येतदन्तस्यैव खण्डस्य यथोक्तोऽर्थ उदाहरणं च । भ्रातृपुत्राश्चेति त्वन्यविषयं — **भ्रातृपुत्राश्च पितुरेकमंशं हरेयुरिति** । तद्यथा — द्वयोर्भ्रात्रोरविभक्तयोरन्यतरस्य मृतस्य पुत्रास्त्रयोऽवशिष्टश्चैको भ्रातेति चतुर्णां विभागप्रसङ्गे पिण्डधनं द्व्यंशीकृत्यैकं द्व्यंशं भ्राता गृह्णीयादपरं द्व्यंशं भ्रातृपुत्रा विभज्य गृह्णीयुरिति ।

यदि समानोदरा भ्रातरो बहवः तेषां पितरस्तु भिन्नाः, तदा कीदृशी दायव्यवस्थेत्यपेक्षायामाह — **सोदर्याणामित्यादि** । पितृतो दायविभागः तत्तत्पुत्राः स्वस्वपितृधनं गृह्णीयुः ।

पितृभ्रातृपुत्राणां पूर्वे विद्यमाने नापरमवलम्बन्ते, ज्येष्ठे च कनिष्ठमर्थग्राहिणः ।

जीवद्विभागे पिता नैकं विशेषयेत् । न चैकमकारणान्निर्विभजेत । पितुरसत्यर्थे ज्येष्ठाः कनिष्ठाननुगृह्णीयुः, अन्यत्र मिथ्यावृत्तेभ्यः ।

प्राप्तव्यवहाराणां विभागः । अप्राप्तव्यवहाराणां देयविशुद्धं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुर्व्यवहारप्रापणात् । प्रोषितस्य वा ।

सन्निविष्टसममसन्निविष्टेभ्यो नैवेशनिकं दद्युः । कन्याभ्यश्च प्रादानिकम् ।

पितरि तत्पुत्रेषु च सहजीविषु पुत्रान्यतमो बहुपुत्रः कुटुम्बार्थे यदि ऋणं कृत्वा म्रियेत, तदा ऋणदातॄणां प्रतिपत्तिमाह — पितृभ्रातृपुत्राणामित्यादि । अयमर्थः — अर्थग्राहिणः ऋणकर्तुः पितृभ्रातृपुत्राणां मध्ये पितरि विद्यमाने भ्रात्रादीन् ऋणदातारो नाभियुञ्जीरन् किन्तु पितरमेवाभियुञ्जीरन्, पित्रभावे भ्रातॄन् । भ्रातृषु विद्यमानेषु पुत्रं नाभियुञ्जीरन् किन्तु भ्रातॄनेवाभियुञ्जीरन् भ्रात्रभावे पुत्रम् । पुत्रे च ज्येष्ठे विद्यमाने न कनिष्ठमभियुञ्जीरन् किन्तु ज्येष्ठमिति । इहार्थग्राहिणमित्यपपाठः प्रतिभाति ।

'तेषामूर्ध्वं पितृतो दायविभाग' इत्युक्तम् । जीवति पितरि दायविभागमाह — जीवद्विभाग इति । जीवद्विभागविषये, पिता, नैकं विशेषयेत् पुत्रेष्वेकतममधिकांशेन वा न्यूनांशेन वा न योजयेत्, किन्तु समेनैवांशेन सर्वान् योजयेत् । एकं पुत्रम्, अकारणात् विना निमित्तं, न निर्विभजेत निरंशं न कुर्यात् । पितुरसत्यर्थे पितृधनाभावे, ज्येष्ठाः पुत्राः, कनिष्ठान्, अनुगृह्णीयुः बिभृयुः, अन्यत्र मिथ्यावृत्तेभ्यः कनिष्ठाश्चेन्मिथ्यावृत्ता न भवन्ति ।

प्राप्तव्यवहाराणां विभाग इति । अतीतषोडशवर्षाः स्वयं विभागं भजन्ते । अप्राप्तव्यवहाराणां देयविशुद्धम् ऋणादिदेयव्ययविशोधितं भागम्, मातृबन्धुषु मातुलादिषु, ग्रामवृद्धेषु वा, स्थापयेयुः न्यस्येयुः । आ कुतः, व्यवहारप्रापणात् व्यवहारप्रापकं षोडशं वयोऽभिव्याप्य । प्रोषितस्य वेति । देशान्तरगतस्य च भागं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुरिति वर्तते ।

सन्निविष्टेत्यादि । असन्निविष्टेभ्यः अनुरूपस्त्रीपरिणयेन प्राप्तगार्हस्थ्याः सन्निविष्टाः अतथाभूता असन्निविष्टा अविवाहिताः तेभ्यः, नैवेशनिकं निवेशनं परिणयनं तत्प्रयोजनकं द्रव्यं, सन्निविष्टसमं सन्निविष्टभ्रात्रर्थे यावद्

ऋणरिक्थयोः समो विभागः ।

उदपात्राण्यपि निष्किञ्चना विभजेरन् इत्याचार्याः । छलमेतदिति कौटल्यः । सतोऽर्थस्य विभागो नासतः ।

एतावानर्थः सामान्यस्तस्यैतावान् प्रत्यंशः इत्यनुभाष्य ब्रुवन् साक्षिषु विभागं कारयेत् । दुर्विभक्तमन्योन्यापहृतमन्तर्हितमविज्ञातोत्पन्नं वा पुनर्विभजेरन् ।

अदायादकं राजा हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जमन्यत्र श्रोत्रियद्रव्यात् । तत् त्रैविद्येभ्यः प्रयच्छेत् ।

व्ययितं विवाहार्थं तत्तुल्यप्रमाणं, दद्युः । कन्याभ्यश्च, प्रादानिकं प्रदानं विवाहः तत्पर्याप्तं द्रव्यं, दद्युः ।

ऋणरिक्थयोः समो विभाग इति । ऋणं 'सवृद्धिकं प्रत्यर्पयामी'ति परिभाष्योत्तमर्णाद् गृहीतं रिक्थम् अधमर्णाय वृद्ध्यर्थं प्रयुक्तं तयोरुभयोः पितृकृतयोस्तुल्यो विभागः कार्यः ।

उदपात्राण्यपीति । जलाहरणार्थानि पात्राण्यपि, निष्किञ्चनाः अर्थहीनाः विभजेरन् । इत्याचार्याः आहुरिति शेषः । इदमाचार्यवचनं छलदुष्टमित्याह — **छलमेतदिति कौटल्य इति** । तदुपपादयति — **सतोऽर्थस्य विभागो नासत इति** । यद्युदपात्ररूपैरर्थैर्विभागयोग्यैरुपेताः न तर्हि ते निष्किञ्चनव्यपदेशमर्हन्ति, यदि निष्किञ्चनास्तदा न सोदपात्रा भवितुमर्हन्ति । निष्किञ्चनाश्च सोदपात्राश्चेति व्याहतमित्यर्थः । एवञ्च वदतः आचार्यकौटल्यस्यायमभिप्रायः — सारस्य फल्गुनो वार्थमात्रस्य विभागे न्यायप्राप्ते उदपात्राणामविभाज्यत्वशङ्कैव कुतस्त्येति व्यर्थस्तद्विभागोपदेशः, प्रत्युत महाधनान् प्रति तद्विभागस्य तदिच्छया प्राप्नुवतोऽशक्यप्रतिषेधस्य प्रतिषेधोऽपि ततः प्रतीयत इत्यनिष्टं चेति ।

अपुत्रादिकधनस्य दायादविभागमाह — **एतावानित्यादि** । एतावद् धनं सामान्यमस्ति तत्रैतावत् प्रतिव्यक्ति अंश उत्पद्यत इति अनुभाष्यानूद्य ब्रुवन् प्रकटं कीर्तयन्, साक्षिसन्निधौ विभागं कारयेत् । **दुर्विभक्तमिति** । विषमविभक्तम्, अन्योन्यापहृतं परस्परगुप्तम्, अन्तर्हितं देशकालान्तरितम्, अविज्ञातोत्पन्नं वा धनं, पुनर्विभजेरन् ।

दायादस्याप्यभावे धनस्य गतिमाह — **अदायादकमिति** । दायादरहितं धनं, राजा हरेत्, कथं हरेत् **स्त्रीवृत्तिप्रेतकार्यवर्जं** स्त्रीदेहयात्रार्थं प्रमी-

पतितः पतिताज्जातः क्लीबश्चानंशाः । जडोन्मत्तान्धकुष्ठिनश्च । सति भार्यार्थे तेषामपत्यमतद्विधं भागं हरेत् । ग्रासाच्छादनमितरे पतितवर्जाः ।

तेषां च कृतदाराणां लुप्ते प्रजनने सति ।
सृजेयुर्बान्धवाः पुत्रांस्तेषामंशान् प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
पञ्चमोऽध्यायः दायविभागे दायक्रमः,
आदितो द्विषष्टितमः ॥

तौर्ध्वदैहिकार्थं च धनमपेक्षितं वर्जयित्वा । तत्रापवादमाह — **अन्यत्र श्रोत्रियद्रव्यादिति** । छन्दोध्यायिधनं तु न हरेत् । क तर्हि तद् विनियुञ्जीतेत्याह — **तत् त्रैविद्येभ्यः प्रयच्छेदिति** । तिस्रो विद्या अधीयते त्रैविद्यास्तेभ्यो, दद्यात् ।

निरंशानाह — **पतित इत्यादि** । सुबोधम् । **सतीति** । तेषां जडादीनां, भार्यार्थे विवाहे सति, अतद्विधम् अजडमनुन्मत्तमनन्धमकुष्ठि च, अपत्यं, भागं हरेत् । इतरे अजडापत्याद्यतिरिक्ताः, पतितवर्जाः, ग्रासाच्छादनं, हरेयुरिति विपरिणतानुषङ्गः ।

अध्यायप्रान्ते श्लोकमाह—**तेषां चेति** । जडोन्मत्तादीनां, कृतदाराणां, प्रजनने लुप्ते बीजशक्तिविरहे, बान्धवाः पुत्रान् सृजेयुः अर्थाज्जडादीनां क्षेत्रेषु । तेषां पुत्राणाम्, अंशान् प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चमोऽध्यायः दायविभागे दायक्रमः,
आदितो द्विषष्टितमः ॥

६०. प्रक. दायविभागः—अंशविभागः ।

एकस्त्रीपुत्राणां ज्येष्ठांशः ब्राह्मणानामजाः, क्षत्रियाणामश्वाः, वैश्यानां गावः, शूद्राणामवयः ।

काणलिङ्गास्तेषां मध्यमांशः, भिन्नवर्णाः कनिष्ठांशः ।

चतुष्पदाभावे रत्नवर्जानां दशानां भागं द्रव्याणामेकं ज्येष्ठो हरेत् । प्रतिमुक्तस्वधापाशो हि भवति इत्यौशनसो विभागः ।

पितुः परिवापाद् यानमाभरणं च ज्येष्ठांशः, शयनासनं भुक्तकांस्यं च मध्यमांशः, कृष्णधान्यायसं गृहपरिवापो गोशकटं च कनिष्ठांशः । शेषद्रव्याणामेकद्रव्यस्य वा समो विभागः ।

अथ ज्येष्ठांशादिक्रमोऽस्मिन्नध्यायेऽभिधीयते । तत्र ज्येष्ठांशमाह — **एकस्त्रीपुत्राणामिति** । एकस्याः स्त्रियाः पुत्राणां बहूनां मध्ये, ब्राह्मणानाम्, अजाः ज्येष्ठांशः ज्येष्ठांशत्वेन कल्पनीया भवन्ति, यज्ञार्थत्वेनोत्कृष्टत्वात् । क्षत्रियाणाम् अश्वाः ज्येष्ठांशः युद्धार्थत्वेन तथात्वात् । वैश्यानां गावः ज्येष्ठांशः वाणिज्यार्थत्वेन तत्त्वात् । शूद्राणाम् अवयो मेषाः ज्येष्ठांशः कृष्याद्यर्थत्वेन तथात्वात् ।

काणलिङ्गा इति । काण एकदृक् तल्लिङ्गास्तज्जातीयाः पङ्ग्वादयः अजा अश्वा गावोऽवयश्च, तेषां ब्राह्मणादीनां चतुर्णां यथाक्रमं, मध्यमांशः । भिन्नवर्णा अनेकवर्णा अजादयः, तेषां कनिष्ठांशः ।

चतुष्पदेत्यादि । चतुष्पदाभावे, रत्नवर्जानां, द्रव्याणाम्, एकं दशानां भागं दशभागमेकं, ज्येष्ठो हरेत् । कुतो ज्येष्ठोऽधिकमंशं हरेदित्याह—**प्रतिमुक्तस्वधापाशो हि भवतीति** । यस्माद् ज्येष्ठः कण्ठनिवेशितपितृकर्मपाशो भवति तस्मादित्यर्थः । **इति औशनसो विभाग इति** । यथोक्तप्रकारो विभाग उशनसा विहितः । अप्रतिषेधाच्चायं कौटल्यस्याभिमतो द्रष्टव्यः ।

प्रकारान्तरमाह—**पितुरिति** । पितुः, परिवापात् परिच्छदात्, यानम् आभरणं च ज्येष्ठांशः । शयनासनं, भुक्तकांस्यं भोजनस्थालं च, मध्यमांशः । कृष्णधान्यायसं कृष्णधान्यं तिलवरकादि आयसम् अयोविकारश्च, गृहपरिवापो मुसलादिर्गृहपरिच्छदः, गोशकटं च गोयुक्तं शकटं च, कनिष्ठांशः । शेषद्रव्याणाम् उक्तातिरिक्तद्रव्याणाम्, एकद्रव्यस्य वा द्रव्यस्यैकस्यापि वा, समः सर्वपुत्रसाधारणो विभागः ।

अदायादा भगिन्यः । मातुः परिवापाद् भुक्तकांस्याभरणभागिन्यः ।

मानुषहीनो ज्येष्ठस्तृतीयमंशं ज्येष्ठांशाल्लभेत । चतुर्थमन्यायवृत्तिर्निवृत्तधर्मकार्यो वा । कामाचारः सर्वं जीयेत ।

तेन मध्यमकनिष्ठौ व्याख्यातौ । तयोर्मानुषोपेतो ज्येष्ठांशादर्धं लभेत ।

नानास्त्रीपुत्राणां तु संस्कृतासंस्कृतयोः कन्याकृतक्रिययोरभावे च, एकस्याः पुत्रयोर्यमयोर्वा पूर्वजन्मना ज्येष्ठभावः ।

भगिन्यो दायहीनाः, किन्तु मातृपरिच्छदेभ्यो भुक्तकांस्याभरणानि हरेयुरित्याह — अदायादा इत्यादि ।

मानुषहीन इति । मानुषशब्देन मनुष्यसामान्यस्यापेक्षितः पुरुषकारगुणो गृह्यते तद्रहितो, ज्येष्ठः ज्येष्ठांशात् तृतीयमंशं लभेत, न तु कृत्स्नं ज्येष्ठांशम् । अन्यायवृत्तिः, निवृत्तधर्मकार्यो वा, चतुर्थं ज्येष्ठांशचतुर्भागं लभेत । कामाचारः इत्वरः, सर्वं जीयेत ज्येष्ठांशमखिलं हाप्येत ।

तेन मध्यमकनिष्ठौ व्याख्याताविति । तयोरप्येष न्यायः सञ्चारयितव्य इत्यर्थः । तयोः मध्यमकनिष्ठयोः, मानुषोपेतः पुरुषकारयुक्तो मध्यमः कनिष्ठो वा, ज्येष्ठांशादर्धं लभेत यथाप्राप्तस्वांशानपहानेन । इत्थमेकस्त्रीपुत्रविभागोऽभिहितः ।

नानास्त्रीपुत्राणामिति । एकस्य पुरुषस्य बह्व्यो याः स्त्रियः तासां पुत्राणां, पूर्वजन्मना ज्येष्ठभावः, व्यवस्थाप्य इति शेषः, कदा, संस्कृतासंस्कृतयोरभावे संस्कृता ब्राह्मादिविधिपरिगृहीता असंस्कृता गान्धर्वादिविवाहपरिगृहीता तयोरभावे तथाभूतमातृभेदाभावे, कन्याकृतक्रिययोरभावे च कन्या विवाहात् पूर्वमक्षतयोनिः कृतक्रिया विवाहात् पूर्वं क्षतयोनिः तयोरभावे च तथाभूतमातृभेदाभावे च । उक्तविधयोर्मातृभेदयोः सत्त्वे पूर्वजन्मना न ज्येष्ठभावः किन्तु मातृवशादेव व्यवस्थाप्यः । तद्यथा — संस्कृतापुत्र उत्तरकालजातोऽप्यसंस्कृतापुत्रापेक्षया ज्येष्ठः, कन्यापुत्रश्च तथाविधः क्षतयोनिपुत्रापेक्षया ज्येष्ठ इति । एकस्याः पुत्रयोर्यमयोर्वा युग्मजातयोर्वा, पूर्वजन्मना ज्येष्ठभावः ।

सूतमागधव्रात्यरथकाराणामैश्वर्यतो विभागः शेषास्तमुपजीवेयुः। अनीश्वराः समविभागा इति।

चातुर्वर्ण्यपुत्राणां ब्राह्मणीपुत्रश्चतुरोंऽशान् हरेत्, क्षत्रियापुत्रस्त्रीनंशान्, वैश्यापुत्रो द्वावंशौ, एकं शूद्रापुत्रः।

तेन त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोर्व्याख्यातः।

ब्राह्मणस्यानन्तरापुत्रस्तुल्यांशः। क्षत्रियवैश्ययोरर्धांशः। तुल्यांशो वा मानुषोपेतः।

सूतमागधव्रात्यरथकाराणामिति। सूतो ब्राह्मण्यां क्षत्रियादुत्पन्नः मागधः क्षत्रियायां वैश्यादुत्पन्नः व्रात्योऽनुपनीतविवाहिताद् ब्राह्मणात् सवर्णायां जातः रथकारो वास्तुवृत्तिरिज्याधानोपनीतिमान् वैण्यभेदः एतेषां, नानास्त्रीपुत्राणामिति वर्तते, नानास्त्रीषु जातानां पुत्राणाम्, ऐश्वर्यतो विभागः प्रभविष्णुत्वानुसारेण विभागः तेष्वेक एव चेदैश्वर्यवान् स एव कृत्स्नं पितृधनं हरेत्। शेषाः पुत्राः, तम् ईश्वरम्, उपजीवेयुः। अनीश्वराः समविभागाः तेष्वेकश्चेदीश्वरो न भवेत् सर्वे समं विभजेरन्। इतिशब्दः प्रकारार्थः। अनेन प्रकारेण सङ्करजातीयस्यान्यस्यापि नानास्त्रीपुत्राणां यथोचितं विभाग उन्नेय इत्यर्थः।

चातुर्वर्ण्यपुत्राणामित्यादि। अयमर्थः—ब्राह्मणस्य चतुर्ष्वपि वर्णेषु यदि पुत्राः स्युः, तदा पितृधनं ज्येष्ठांशवर्जं शिष्टं दशधा विभज्य तेषां मध्ये ब्राह्मणीपुत्रः चतुरोंऽशान् हरेत्, क्षत्रियापुत्रः त्रीन् अंशान्, वैश्यापुत्रो द्वावंशौ, शूद्रापुत्र एकमंशमिति।

तेनेति। तेन ब्राह्मणविषयोक्तचतुर्वर्णपुत्रविभागविधिना, त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोः, व्याख्यातः उक्तप्रायः। तद् यथा — क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेषु त्रिषु विद्यमानेषु ज्येष्ठांशवर्जं पितृधनं षोढा विभज्य त्रीनंशान् क्षत्रियापुत्रो हरेत्, द्वावपरौ वैश्यापुत्रः, एकमंशं शूद्रापुत्रः। तथा वैश्यस्य वैश्याशूद्रापुत्रयोर्विद्यमानयोर्ज्येष्ठांशवर्जं पितृधनं त्रेधा विभज्य द्वावंशौ वैश्या[पु]त्रो हरेद्, एकमंशं शूद्रापुत्र इति।

ब्राह्मणस्यानन्तरापुत्रस्तुल्यांश इत्यादि। अयमर्थः— ब्राह्मणस्य सवर्णायां क्षत्रियायां चैकैकः पुत्रोऽस्ति, वैश्याशूद्रयोस्तु पुत्राभावः, तदा क्षत्रियापुत्रो ज्येष्ठांशवर्जं ब्राह्मणीपुत्रतुल्यं भागं भजेत। क्षत्रियस्य सवर्णायां वैश्यायां चैकैकः पुत्रः शूद्रायां पुत्राभावः, तदा वैश्यापुत्रो ज्येष्ठांशवर्जं क्षत्रि-

तुल्यातुल्ययोरेकपुत्रः सर्वं हरेद् बन्धूंश्च बिभृयात् ।
ब्राह्मणानां तु पारशवस्तृतीयमंशं लभेत । द्वावंशौ सपिण्डः
कुल्यो वासन्नः स्वधादानहेतोः । तदभावे पितुराचार्योऽन्तेवासी वा ।
क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतम् ।
मातृबन्धुः सगोत्रो वा तस्मै तत् प्रदिशेद् धनम् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
षष्ठोऽध्यायः दायविभागेंऽशविभागः,
आदितस्त्रिषष्टितमः ॥

यापुत्रभागस्यार्धं भजेत । तथा वैश्यस्य सवर्णायामेकः पुत्रः शूद्रायामेकः पुत्रः तदा शूद्रापुत्रो ज्येष्ठांशवर्जं वैश्यापुत्रभागस्यार्धं भजेत । यदुक्तं क्षत्रियवैश्ययोरर्धांश इति, तस्यापवादमाह — **तुल्यांशो वा मानुषोपेत** इति । वैश्यापुत्रः पुरुषगुणोपेतः क्षत्रियापुत्रतुल्यभागः स्यात् । शूद्रापुत्रः पुरुषगुणोपेतो वैश्यापुत्रतुल्यभागः स्यादित्यर्थः ।

तुल्यातुल्ययोरिति । सवर्णासवर्णयोः स्त्रियोः, एकपुत्रः एक एव अद्वितीय एव यः पुत्रः सः, सर्वं पितृधनं हरेत्, बन्धूंश्च पितृभरणीयान्, बिभृयात् ।

असवर्णापुत्रस्यैकाकिनो यत् सर्वधनभाक्त्वमुक्तं, तस्यापवादमाह — **ब्राह्मणानां त्विति** । विप्राणां, पारशवः शूद्रायामुत्पन्नः पुत्रस्तु, तृतीयमंशं लभेत एकाकी सन्नपि, न तु सर्वं पितृधनम् । अवशिष्टयोस्तृतीयांशयोः क विनियोगस्तत्राह — **द्वावंशाविति** । अवशिष्टौ त्र्यंशौ, सपिण्डः पितृसपिण्डः, तदभावे कुल्यो वा पितृकुलोत्पन्नः समानोदको वा, आसन्नः अन्तरङ्गः, लभेत । कुतः, स्वधादानहेतोः सपिण्डकुल्यौ हि पितृनिवापकरणसमर्थौ, न तु शूद्रापुत्र इति कृत्वा । **तदभाव इति** । सपिण्डकुल्ययोरभावे, पितुराचार्यः, लभेत, तौ द्वावंशौ । पितुः, अन्तेवासी वा शिष्यो वा, लभेत ।

सर्वस्याप्यभावे आह — **क्षेत्रे वेति** । अस्य क्षेत्रे वा पितुः सवर्णक्षेत्रे वा, नियुक्तः नियोगविधिना प्रयुक्तः, मातृबन्धुः सगोत्रो वा, क्षेत्रजं सुतं जनयेत । तस्मै क्षेत्रजाय, तद् धनं, प्रदिशेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
षष्ठोऽध्यायः दायविभागेंऽशविभागः,
आदितस्त्रिषष्टितमः ॥

---

६०. प्रक. दायविभागः— पुत्रविभागः।

परपरिग्रहे बीजमुत्सृष्टं क्षेत्रिण इत्याचार्याः।

माता भस्त्रा यस्य रेतस्तस्यापत्यम् इत्यपरे।

विद्यमानमुभयम् इति कौटल्यः।

स्वयंजातः कृतक्रियायामौरसः। तेन तुल्यः पुत्रिकापुत्रः। सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः। जनयितुरसत्यन्यस्मिन् पुत्रे स एव द्विपितृको द्विगोत्रो वा द्वयोरपि स्वधारिक्थभाग्

दायस्यांशक्रम उक्तः। दायादविशेषपरिज्ञानार्थं पुत्रभेदोऽभिधीयते। अथवा पूर्वाध्यायान्ते 'क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतमि'ति क्षेत्रजः पुत्रः प्रस्तुतः। तत्प्रसङ्गात् पुत्राणां भेदास्तेषु मुख्यामुख्यभावश्चास्मिन्नध्याये प्रतिपाद्यन्ते।

परपरिग्रह इति। अन्यस्य स्त्रियां, बीजमुत्सृष्टम् अन्येन रेत उत्सृज्योत्पादितः पुत्रः, क्षेत्रिणः तस्या भर्तुरेव पुत्रः न तु बीजोत्स्रष्टुः। इत्याचार्या आहुः।

माता चर्मप्रसेविकावद् बीजाधारमात्रमप्रधानमिति तत्सम्बन्धस्याकिञ्चित्करत्वाद् बीजोत्पन्नो न तत्परिणेतुरपत्यं भवितुमर्हति, किन्तु बीजिन एवेत्यन्येषां मतमित्याह — माता भस्त्रेत्यादि।

बीजं क्षेत्रं चोभयं समवेतं विद्यमानं कार्यायेति क्षेत्रजो बीजक्षेत्रिणोरुभयोरपि पुत्र इत्यात्मनो मतमित्याह — विद्यमानमित्यादि।

पुत्रभेदानाह — स्वयंजातः कृतक्रियायामित्यादि। परिणीतायां स्वयमुत्पादितः पुत्रः औरसाख्यः। तेन औरसेन तुल्यः पुत्रिकापुत्रः 'अस्यां यो जायते गर्भः स मे पुत्रो भविष्यति' इति परिभाष्य वराय दत्ता कन्या पुत्रिका तस्याः पुत्रः। सगोत्रेणेत्यादि। सुबोधम्। जनयितुरिति। रेतस्सेक्तुः, असत्यन्यस्मिन् पुत्रे, अविद्यमाने औरसपुत्रे, स एव क्षेत्रज एव, द्विपितृकः बीजिक्षेत्र्युभयपितृकः, द्विगोत्रो वा बीजिक्षेत्र्युभयगोत्रकश्च भवन्, द्वयोरपि स्वधारिक्थभाक् स्वधादायी दायहरश्च, भवति। तथा चाहुः —

> "क्षेत्रीयानुमतं बीजं यस्य क्षेत्रे प्ररोहति।
> तदपत्यं तयोरेव बीजक्षेत्रीययोर्मतम्॥"

भवति । तत्सधर्मा बन्धूनां गृहे गूढजातस्तु गूढजः । बन्धुनोत्सृष्टोऽपविद्धः संस्कर्तुः पुत्रः । कन्यागर्भः कानीनः । सगर्भोढायाः सहोढः । पुनर्भूतायाः पौनर्भवः ।

स्वयंजातः पितृबन्धूनां च दायादः । परजातः संस्कर्तुरेव न बन्धूनाम् ।

तत्सधर्मा मातापितृभ्यामद्भिर्दत्तो दत्तः ।

स्वयं बन्धुभिर्वा पुत्रभावोपगत उपगतः ।

पुत्रत्वेऽधिकृतः कृतकः । परिक्रीतः क्रीत इति ।

इति । तत्सधर्मेति । बन्धूनां गृहे, गूढजातस्तु भर्तृनियोगं विनैव गूढमन्यस्योत्पन्नः, गूढजः । सः, तत्सधर्मा क्षेत्रजतुल्यः । बन्धुनेति । बन्धुनोत्सृष्टः मातापितृभ्यां परित्यक्तः, अपविद्धः तदाख्यः, संस्कर्तुः पुत्रः येन स संस्कृतस्तस्य पुत्रः । कन्यागर्भ इति । कन्याभावे प्रसूतः, कानीनः । सगर्भोढाया इति । गर्भेण सहितैव या व्यूढा सा सगर्भोढा तस्याः, पुत्रः, सहोढः तदाख्यः । पुनर्भूतायाः पौनर्भव इति । पुनर्विवाहिताया दिधिषूशब्दितायाः पुत्रः पौनर्भवाख्यः । स च त्रिविधो मातृत्रैविध्याद्—या ह्यक्षतयोनिरेव सती भर्तृमरणादन्यस्मै ससंस्कारं दत्ता सैका पुनर्भूः, स्वभर्तारमुपेक्ष्यैवान्यमाश्रिता द्वितीया, मृते भर्तरि भर्तृबन्ध्वभावात् सपिण्डाय सवर्णाय वा दत्ता तृतीयेति ।

स्वयञ्जातः पितृबन्धूनामिति । स्वयञ्जात औरसः पुत्रः, सः पितृबन्धूनां च दायादः पितुः संस्कर्तुस्तद्बन्धूनां च दायहारी भवेत् । परजातः क्षेत्रजातादिः परोत्पन्नः, संस्कर्तुरेव दायादः, न बन्धूनां न पितृबन्धूनां दायादः ।

तत्सधर्मेति । स्वयञ्जाततुल्यः, मातापितृभ्याम् अद्भिर्दत्तः समन्त्रकोदकपूर्वं दत्तः, दत्तः तत्संज्ञः ।

'अयमहं युवयोः पुत्र' इति यः स्वयमात्मानं पुत्रत्वेनार्पयति स एकः उपगताख्यः । बन्धुभिर्वा 'युवयोरयं पुत्र' इति दत्तोऽपर उपगताख्य इत्याह — स्वयं बन्धुभिर्वेत्यादि ।

पुत्रत्वेऽधिकृतः कृतकः परिक्रीतः क्रीत इति । त्वमावयोः पुत्र इति पुत्रत्वे कल्पितः कृतकाख्यः । मूल्यं दत्त्वा मातापितृसकाशात् पुत्रत्वेन गृहीतः क्रीताख्यः । इतिशब्दः पुत्रविभागसमाप्तौ ।

औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः । असवर्णा ग्रासाच्छादनभागिनः ।

ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णाः, एकान्तरा असवर्णाः ।

ब्राह्मणस्य वैश्यायामम्बष्ठः, शूद्रायां निषादः पारशवो वा । क्षत्रियस्य शूद्रायामुग्रः ।

शूद्र एव वैश्यस्य ।

सवर्णासु चैषामचरितव्रतेभ्यो जाता व्रात्याः । इत्यनुलोमाः ।

शूद्रादायोगवक्षत्तचण्डालाः ।

वैश्यान्मागधवैदेहकौ ।

क्षत्रियात् सूतः ।

उक्तविधेषु पुत्रेषु विद्यमानेषु पश्चादौरसस्योत्पत्तौ तेषां का प्रतिपत्तिरित्याकाङ्क्षायां पितृधनं त्रेधा विभज्य तत एकं त्रिभागं सवर्णाः गृह्णीयुः अन्यौ द्वौ त्रिभागावौरसो गृह्णीयात्, असवर्णास्तु ग्रासाच्छादनमात्रं लभेरन्नित्याह — **औरसे तूत्पन्न** इत्यादि ।

सवर्णासवर्णविषयमाह — **ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णा** इति । ब्राह्मणस्य क्षत्रियापुत्राः सवर्णाः क्षत्रियस्य वैश्यापुत्राः सवर्णाः । **एकान्तरा असवर्णा** इति । ब्राह्मणस्य वैश्यापुत्रा असवर्णाः, क्षत्रियस्य शूद्रापुत्रा असवर्णाः ।

अनुलोमानाह— **ब्राह्मणस्य वैश्यायामि**त्यादि । सुबोधम् ।

शूद्र एव वैश्यस्येति । वैश्यस्य शूद्रायामुत्पन्नः शूद्र एव, न जात्यन्तरम् ।

सवर्णासु चेति । एषां ब्राह्मणक्षत्रियवैश्यानाम्, अचरितव्रतेभ्यः अनुपनीय कृतविवाहेभ्यः, सवर्णासु जाताः, व्रात्याः व्रात्यसंज्ञाः । इत्यनुलोमाः जातयो व्याख्याता इति शेषः ।

प्रतिलोमानाह — **शूद्रादि**त्यादि । शूद्राद् वैश्यायामुत्पन्न आयोगवो नाम, क्षत्रियायां क्षत्तः, ब्राह्मण्यां चण्डालः । क्षत्तशब्द इहाकारान्तः प्रयुक्तः, अत एव स्त्रियाम् आकारान्तोऽनुपदं प्रयोक्ष्यते ।

वैश्यान्मागधवैदेहकाविति । वैश्यात् क्षत्रियायां जातो मागधः, ब्राह्मण्यां वैदेहकः ।

क्षत्रियात् सूत इति । क्षत्रियाद् ब्राह्मण्यां जातः सूतः ।

पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः ।
त एते प्रतिलोमाः स्वधर्मातिक्रमाद् राज्ञः सम्भवन्ति ।

पृथुचक्रवर्तियज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तोत्रविधायिनः प्रतिलोमजत्वशङ्काप्राप्तिं मनसि कुर्वंस्तां परिहरति—**पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः** इति । अस्यार्थः— पुराणप्रवक्ता रोमहर्षणापरनामा यः सूतः सः, अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः । ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्ट उत्कृष्टः मागधः क्षत्रियाद् विशिष्ट इति । एतच्च तथ्यम् । यतः,

> "हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः ।
> विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ॥
> तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे ।
> सूतः सूत्यां (यज्ञाभिषवभूमौ) समुत्पन्नः सौत्येऽहनि महामतिः ॥
> तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥"

इति विष्णुपुराणप्रथमांशतृतीयाध्याये,

> "ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
> पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥
> वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित् ।"

इत्यग्निपुराणप्रथमाध्याये,

> "त्वया सूत! महाबुद्धे! भगवान् ब्रह्मवित्तमः ।
> इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
> त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
> सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥"

इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते, तथा द्विजत्वं विष्ण्वंशसम्भूतत्वं च । तथैव मागधस्यापि तत्सहपठितस्यायोनिजत्वम् ।

त एते इति । त एते पूर्वोक्ता आयोगवादयः, प्रतिलोमाः, राज्ञः स्वधर्मातिक्रमात् सम्भवन्ति स्वधर्मो वर्णाश्रमरक्षा तस्यातिक्रमाद् यथावदकरणदोषात् जायन्ते ।

उग्रान्नैषाद्यां कुक्कुटकः, विपर्यये पुल्कसः । वैदेहिकायामम्बष्ठाद् वैणः, विपर्यये कुशीलवः । क्षत्तायामुग्राच्छ्वपाकः । इत्येतेऽन्ये चान्तरालाः । कर्मणा वैण्यो रथकारः ।

तेषां स्वयोनौ विवाहः । पूर्वापरगामित्वं वृत्तानुवृत्तं च स्वधर्मान् स्थापयेत् । शूद्रसधर्माणो वा अन्यत्र चण्डालेभ्यः ।

केवलमेवं वर्तमानः स्वर्गमाप्नोति राजा नरकमन्यथा ।

सर्वेषामन्तरालानां समो विभागः ।

अथान्तरालानाह—**उग्रादिति** । उग्रात् क्षत्रियशूद्रापुत्रात्, नैषाद्यां ब्राह्मणशूद्रापुत्र्यां, जातः, कुक्कुटकः तदाख्यः । **विपर्यये पुल्कस इति** । निषादादुग्रकन्यायां जातः पुल्कसाख्यः । वैदेहिकायां वैदेहकन्यायाम्, अम्बष्ठात्, जातः, वैणः तदाख्यः । विपर्यये कुशीलवः अम्बष्ठ्यां वैदेहकाज्जातः कुशीलवाख्यः । क्षत्तायाम् उग्राद्, जातः, श्वपाकः तदाख्यः । इति एते उक्ताः, अन्ये च एवञ्जातीयाः सङ्करजाश्च, अन्तरालाः वर्णजात्यन्तरालभवाः विज्ञेयाः । **कर्मणेति** । वैण्यः वेणजातिरेव, कर्मणा लङ्घनप्लवनादिस्ववृत्तित्यागपूर्वकवास्तुवृत्तिस्वीकारेण, रथकारः तदाख्ययोच्यते, न तु रथकारो नामान्तरालोऽन्य इत्यर्थः ।

तेषामिति । तेषाम् अन्तरालानां, स्वयोनौ विवाहः अम्बष्ठस्याम्बष्ठीविवाहो निषादस्य निषादीविवाह इत्येवं समानजातीयविवाहः कार्यः । पूर्वापरगामित्वं पूर्वस्याम्बष्ठादेरुत्कृष्टस्य अवरगामित्वम् अपकृष्टनिषाद्यादिगामित्वं न तु निषादादेरम्बष्ठ्यादिगामित्वं, वृत्तानुवृत्तं च पूर्वाचारानुवृत्तिं च, स्वधर्मान् स्थापयेत् स्वधर्मतया कल्पयेत् । **शूद्रसधर्माणो वेति** । तेषामित्यनुवर्त्य प्रथमान्ततया विपरिणमयितव्यम्, अन्तरालाः शूद्रधर्मेण वा धर्मवन्तः कर्तव्याः । ते च न सर्वे किन्तु चण्डालवर्जा इत्याह — **अन्यत्र चण्डालेभ्य इति** ।

केवलमिति । केवलमेवं वर्तमानः उक्तप्रकाराव्यभिचारेण व्याप्रियमाणः, राजा स्वर्गम् आप्नोति । अन्यथा उक्तप्रकारव्यभिचारेण वर्तमानः, नरकम् आप्नोति ।

सर्वेषामिति । अन्तरालानां, समो ज्येष्ठांशरहितः, विभागः । स च सर्वेषां स्त्रीणां पुरुषाणां चाविशेषेण भवति ।

देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे सप्तमोऽध्यायः
दायविभागे पुत्रविभागः, दायविभागः समाप्तः ।
आदितः चतुष्षष्टितमोऽध्यायः ॥

प्रान्ते श्लोकमाह — देशस्येति । देशस्य जनपदादेः, जात्याः ब्राह्मणादेः, सङ्घस्य समुदायस्य, ग्रामस्यापि वा, यो धर्मः उचितः पारम्पर्यसिद्धः, तस्य ग्रामादेः, तेनैव तद्धर्मानुसारेणैव, दायधर्मं दायभागं, प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे सप्तमोऽध्यायः
दायविभागे पुत्रविभागः, दायविभागः समाप्तः ।
आदितश्चतुष्षष्टितमोऽध्यायः ॥

६१. प्रक. वास्तुकं—गृहवास्तुकम्।

सामन्तप्रत्यया वास्तुविवादाः।

गृहं क्षेत्रमारामः सेतुबन्धस्तटाकमाधारो वा वास्तुः।

कर्णकीलायससम्बन्धोऽनुगृहं सेतुः। यथासेतुभोगं वेश्म कारयेत्।

अभूतं वा परकुड्यादपक्रम्य द्वावरत्नी त्रिपदीं पादे बन्धं कारयेत्।

अवस्करं भ्रममुदपानं वा न गृहोचितमन्यत्र अन्यत्र सूतिकाकूपादा निर्दशाहादिति। तस्यातिक्रमे पूर्वः साहसदण्डः।

वास्तुकमिति सूत्रम्। गृहारामक्षेत्रादि स्थावरजातं वास्तु तत्सम्बद्धं वास्तुकम्। तदुच्यत इति सूत्रार्थः। गृहारामक्षेत्रादीनां विभक्तानामपि नित्यसमुपश्लिष्टावस्थायित्वात् तत्र विवादाः सम्भवन्तीति तन्निर्णयार्थमिदं प्रकरणमध्यायैस्त्रिभिर्वितन्यते। तत्र प्रथमे गृहवास्तुकं, द्वितीये वास्तुविक्रयः, तृतीये विवीतक्षेत्रपथहिंसा।

सामन्तप्रत्यया वास्तुविवादा इति। वास्तुर्गृहारामादिर्वक्ष्यमाणः तद्विवादाः, सामन्तप्रत्ययाः सामन्तोऽनन्तरवास्तुः तत्प्रमाणकाः।

वास्तुपदार्थमाह — गृहमिति। गृहं, क्षेत्रं केदारादि, आराम उपवनं, सेतुबन्धः सीमाबन्धः पुष्पफलवाटषण्डमूलवापादिर्वा, तटाकं पद्माकरः, आधारो वा उदकबन्धो वा, वास्तुः।

कर्णेत्यादि। कर्णेषु कोटिषु कीलाः निखाताः स्थूणाः कर्णकीलास्तेषु आयससम्बन्धः आयसानाम् अयोमयसूत्राणां सम्बन्धः सम्यगाबन्धनं कर्णकीलायससम्बन्धः तल्लक्षणः, अनुगृहं, सेतुः सीमाबन्धः, स्थायिद्रव्यान्तपालैः कार्य इति शेषः। यथासेतुभोगं सेत्वन्तर्गतभूविस्तारानतिक्रमेण, वेश्म सद्म, कारयेत्।

पूर्वकृततथाविधसेत्वभावे आह — अभूतं वेति। अपूर्वं, परकुड्यात् परकीयगृहकुड्याद्, अपक्रम्य अपसृत्य, द्वौ अरत्नी त्रिपदीं वा पादे बन्धं कारयेत् द्विहस्तमानं पदत्रयमानं वा कुड्यमूले नेमिबन्धं कारयेत्, स्वभूमौ।

अवस्करमिति। मलमूत्रविसर्गस्थानं, भ्रमं जलनिर्गमद्वारम्, उदपानं वा कूपं वा, गृहोचितम्, अन्यत्र तद्योग्यप्रदेशादन्यस्मिन् प्रदेशे परगृह-

तेनेन्धनावघातनकृतं कल्याणकृत्येष्वाचामोदकमार्गाश्च व्याख्याताः ।

त्रिपदीमतिक्रान्तमध्यर्धमरत्निं वा प्रवेश्य गाढप्रसृतमुदकमार्गं प्रस्रवणप्रपातं वा कारयेत् । तस्यातिक्रमे चतुष्पञ्चाशत्पणो दण्डः ।

एकपदीमतिक्रान्तमरत्निं वा चक्रिचतुष्पदस्थानमग्निष्ठम् उदञ्जरस्थानं रोचनीं कुट्टनीं वा कारयेत् । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः ।

सर्ववास्तुकयोः प्राक्षिप्तकयोर्वा शालयोः किष्कुरन्तरिका त्रि-

---

बाधोत्पादहेतौ, न कारयेत् । तत्रापवादः—अन्यत्र सूतिकाकूपात्, सूतिकास्नानोदकपतनार्थो गर्तः सूतिकाकूपः तं तु यथेष्टे देशे कारयेदित्यर्थः आ कुतः, आ निर्देशाहाद् आ दशाहातिक्रमात् । तदनन्तरं तं शोधयित्वा शुद्धमृदा पूरयेत् । तस्यातिक्रम इति । उक्तावस्करादिविध्युल्लङ्घने, पूर्वः साहसदण्डः ।

तेनेति । तेन सूतिकोक्तकल्पेन, कल्याणकृत्येषु उपनयनविवाहादिमङ्गलकार्येषु, इन्धनावघातनकृतम्, एधःकाष्ठविदारणप्रयुक्तं विधानम्, आचामोदकमार्गाश्च निस्स्रावजलमार्गाश्च, व्याख्याता उक्तप्रायाः । आकल्याणकृत्यसमाप्ति यथेष्टे देशे तेषां करणमनुमतमित्यर्थः ।

क्रमविधिमाह—त्रिपदीत्यादि । त्रिपदीप्रतिक्रान्तं परकीयकुड्यात् पदत्रयदूरापक्रान्तम्, अध्यर्धमरत्निं वा प्रवेश्य सार्धहस्तं वा परकुड्यादपक्रम्य स्वभूम्यन्तःप्रवेशितं, गाढप्रसृतं निरर्गलमलोदकप्रसरम, उदकमार्गं दीर्घिकाकारं, कारयेत् । प्रस्रवणप्रपातं वा कारयेत् सर्वमलिनजलप्रवाहपतनस्थानं च तथाभूतं कारयेत् । तस्यातिक्रम इति । उक्तविधिलङ्घने चतुष्पञ्चाशत्पणो दण्डः ।

एकपदीत्यादि । एकपदीप्रतिक्रान्तं परकुड्यादेकपददूरापक्रान्तम्, अरत्निं वा एकहस्तदूरं वा प्रतिक्रान्तमित्यार्थ, चक्रिचतुष्पदस्थानं चक्रिस्थानम् अजबलीवर्दस्थानं चतुष्पदस्थानं गजादिस्थानं च, अग्निष्ठं चुल्लीम्, उदञ्जरस्थानम् उदञ्जरं महज्जलपात्रं तन्निवेशस्थानं, रोचनीं रोचनकर्मयन्त्रं, कुट्टनीं वा उलूखलं च, कारयेत् । तस्य चक्रिस्थानादिविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः ।

सर्ववास्तुकयोरिति । उक्तेषु सर्वेषु वास्तुषु गृहचक्रिचतुष्पदस्थानादिषु मध्ये वास्तुकयोर्द्वयोः शालयोः, प्राक्षिप्तकयोः परस्परसन्निकृष्टयोः प्रासयोः,

पदी वा। तयोश्चतुरङ्गुलं नीप्रान्तरं समारूढकं वा। किष्कुमात्रमाणिद्वारमन्तरिकायां खण्डफुल्लार्थमसम्पातं कारयेत्। प्रकाशार्थमल्पमूर्ध्वं वातायनं कारयेत्। सम्भूय वा गृहस्वामिनो यथेष्टं कारयेयुरनिष्टं वारयेयुः।

वानलट्याश्चोर्ध्वमावार्यभागं कटप्रच्छन्नमवमर्शभित्तिं वा कारयेद् वर्षबाधभयात्। तस्यातिक्रमे पूर्वः साहसदण्डः।

प्रतिलोमद्वारवातायनबाधायां च, अन्यत्र राजमार्गरथ्याभ्यः।

खातसोपानप्रणालीनिश्रेण्यवस्करभागैर्बहिर्बाधायां भोगनिग्रहे च।

किष्कुत्रिपदी वा अन्तरिका साष्टाङ्गुलहस्तमानं पदत्रयमानं वा अन्तरालं कर्तव्यम्। तयोः शालयोः, चतुरङ्गुलं, नीप्रान्तरं पटलप्रान्तान्तरालं, कार्यम्। समारूढकं वा परस्परोपर्यारूढं वा तत् कार्यं गृहपत्योरनुज्ञायाम्। किष्कुमात्रमिति। साष्टाङ्गुलहस्तपरिमाणम्, आणिद्वारं क्षुद्रद्वारम्, अन्तरिकायां कारयेत्, किमर्थं, खण्डफुल्लार्थं स्फुटितसंस्कारार्थं, कथम्भूतम्, असम्पातम् अक्षुकरजनगतागतम्। प्रकाशार्थमिति। प्रकाशलाभाय, अल्पम्, ऊर्ध्वं, वातायनं गवाक्षं, कारयेत्। सम्भूय वेति। समानच्छन्दीभूय वा, गृहस्वामिनः, यथेष्टं स्वाभिरुचितप्रकारं, कारयेयुः, अर्थाद् अन्तरिकादिवातायनान्तमुक्तमनुक्तं च यत्किञ्चित्। अनिष्टम् अनभिमतं, वारयेयुः।

वानलट्याश्चोर्ध्वमिति। वानलटी गृहवरण्डकः तस्या ऊर्ध्वम्, आवार्यभागम् अवच्छादनीयं भागं, कटप्रच्छन्नं कटैस्तृणविशेषैराच्छादितं, कारयेत्। अवमर्शभित्तिं वा अल्पभित्तिं च, कटप्रच्छन्नां कारयेत्। कस्मात्, वर्षबाधभयात् वृष्टिपीडापरिहारार्थम्। तस्यातिक्रमे उक्तविधेरननुष्ठाने, पूर्वः साहसदण्डः।

प्रतिलोमद्वारवातायनबाधायां चेति। प्रतिलोमेन द्वारेण परगृहजनप्रतिकूलेन द्वारेण वातायनेन च परोपद्रवोत्पादने, पूर्वः साहसदण्ड इति वर्तते। तत्रापवादः — अन्यत्र राजमार्गरथ्याभ्य इति। राजमार्गरथ्याभिमुख्येन द्वारवातायनयोः करणे तु सत्यामपि परबाधायां न दोष इत्यर्थः।

खातेत्यादि। खातं गर्तादि, सोपानम् आरोहणं, प्रणाली जलनिर्गमपथः, निश्रेणिरधिरोहणी, अवस्करः मलमूत्रविसर्गस्थानम् एतेषां भागैः एतत्करणार्थमपहृतैः भूमिभागैः, बहिर्बाधायां बहिर्जनपीडने, भोगनिग्रहे च परस्य भूम्युपभोगप्रतिबन्धे च, पूर्वः साहसदण्ड इत्येव।

परकुड्यमुदकेनोपघ्नतो द्वादशपणो दण्डः । मूत्रपुरीषोपघाते द्विगुणः ।

प्रणालीमोक्षो वर्षति, अन्यथा द्वादशपणो दण्डः ।

प्रतिषिद्धस्य च वसतः । निरस्यतश्चावक्रयणम्, अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्यः । स्वयमभिप्रस्थितो वर्षावक्रयशेषं दद्यात् ।

सामान्ये वेश्मनि साहाय्यमप्रयच्छतः सामान्यमुपरुन्धतो भोगं च गृहे द्वादशपणो दण्डः । विनाशयतस्तद्द्विगुणः ।

कोष्ठकाङ्गणवर्चानामग्निकुट्टनशालयोः ।
विवृतानां च सर्वेषां सामान्यो भोग इष्यते ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे,
अष्टमोऽध्यायः वास्तुके गृहवास्तुकम् ।
आदितः पञ्चषष्टितमोऽध्यायः ॥

परकुड्यमिति । परकीयां भित्तिम्, उदकेन जलावसेकेन, उपघ्नतः, द्वादशपणो दण्डः । मूत्रपुरीषोपघाते परकुड्यस्य मूत्रपुरीषाभ्यामुपघाते, द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रणालीमोक्षो वर्षतीति । पर्जन्ये वर्षति सति प्रणालीद्वारेणोदकमोक्षः कर्तव्यः । अन्यथा अमोक्षणे अवृष्टिषु प्रणालीमोक्षणे वा, द्वादशपणो दण्डः ।

अवक्रीतविषयमाह — **प्रतिषिद्धस्य च वसत इति** । 'इयन्तं कालं त्वया शुश्रूषमाणेन मदन्तिके वस्तव्यमि'ति स्वामिपरिभाषिते कालेऽतीते सति 'इत ऊर्ध्वं मा वसे'ति निषिद्धस्यापि वासममुञ्चतोऽवक्रीतस्य, द्वादशपणो दण्ड इति वर्तते । **निरस्यतश्चावक्रयणमिति** । मूल्यदानपूर्वं शुश्रूषुस्वीकरणं यावत्परिभाषितकालाननुवर्तनेन मध्ये त्यजतोऽवक्रेतुश्च, द्वादशपणो दण्डः । तत्रापवादः — **अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्य इति** । पारुष्यं वाग्दण्डपारुष्यं, स्तेयं चौर्यं, साहसं प्रसभकर्म, सङ्ग्रहणं स्त्रीसङ्ग्रहणं, मिथ्याभोगः देहसंस्काराद्यकरणम् एषां सम्भवे क्लृप्तकालपूर्तेः प्राक् त्यजतो न दोष इत्यर्थः । **स्वयमभिप्रस्थित इति** । क्लृप्तकालमखिलमनुषित्वा यथेच्छमपसृतोऽवक्रीतः, वर्षावक्रयशेषं क्लृप्तवत्सरशेषमूल्यं, दद्यात् ।

सामान्य इति । उभयसाधारणे, वेश्मनि, साहाय्यम्, अप्रयच्छतः अकुर्वतः, सामान्यं, गृहे भोगम्, उपभोगम् उपरुन्धतो निगृह्णतश्च, द्वादशपणो दण्डः । विनाशयतः, तद्द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रान्ते श्लोकमाह — **कोष्ठकाङ्गणवर्जानामिति** । कोष्ठकं गृहद्वारम्, अङ्गणम् अजिरं, वर्जम् अवस्करस्थानं, वर्चानामिति क्वचित् पाठः इत्येतेषाम्, अग्निकुट्टनशालयोः अग्निशाला महानसः कुट्टनशाला उलूखलशाला तयोः, सर्वेषां च, विवृतानाम् अनावृतदेशानां, भोगः, सामान्यः साधारणः, इष्यते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
अष्टमोऽध्यायः वास्तुके गृहवास्तुकम् ।
आदितः पञ्चषष्टितमोऽध्यायः ॥

---

६१. प्रक. वास्तुकं — वास्तुविक्रयः ।

ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुमभ्याभवेयुः । ततोऽन्ये बाह्याः ।

सामन्तचत्वारिंशत्कुल्या गृहप्रतिमुखे वेश्म श्रावयेयुः । सामन्तग्रामवृद्धेषु क्षेत्रमारामं सेतुबन्धं तटाकमाधारं वा मर्यादासु यथासेतुभोगम् । 'अनेनार्घेण कः क्रेता' इति त्रिराघुषितमव्याहतं क्रेता क्रेतुं लभेत ।

स्पर्धया वा मूल्यवर्धने मूल्यवृद्धिः सशुल्का कोशं गच्छेत् । विक्रयप्रतिक्रोष्टा शुल्कं दद्यात् ।

गताध्याये वास्तोः षट् प्रकारा उक्ताः । तत्र प्राधान्येन नेमिबन्धप्रस्रवणप्रपातपरस्परान्तरालानि चक्रिचतुष्पदस्थानादिकं चाभिहितम् । गृहादीनां विक्रयादिकं त्वस्मिन्नध्यायेऽभिधीयते ।

ज्ञातीत्यादि । ज्ञातिसामन्तधनिकाः ज्ञातिर्दायादः सामन्तो निकटगृहवासी धनिकः ऋणप्रयोक्ता एते, क्रमेण पूर्वाभावे पर इति परिपाट्या, भूमिपरिग्रहान् गृहादीन्, क्रेतुम्, अभ्याभवेयुः अर्हेयुः, अभ्यावहेयुरिति वा पाठः लभेरन्नित्यर्थः । ततः तेषामभावे, अन्ये बाह्याः, अभ्याभवेयुः ।

सामन्तेत्यादि । सामन्तचत्वारिंशत्कुल्याः नैकटिकैश्चत्वारिंशता गृहिभिः समेताः, गृहप्रतिमुखे गृहस्याग्रे, वेश्म श्रावयेयुः 'विक्रेष्यामहे' इति प्रतिक्रोशेयुः । **सामन्तग्रामवृद्धेष्विति** । तेषु शृण्वत्सु, क्षेत्रम्, आरामं, सेतुबन्धं, तटाकम्, आधारं वा अल्पसरश्च, मर्यादासु तत्तत्सीमासु स्थित्वा, यथासेतुभोगम् 'इमेऽस्य सीमाबन्धाः एतावान् भोग' इति च यथास्थितसेतुभोगनिर्देशयुक्तं, श्रावयेयुरित्यनुषज्यते । **अनेनेति** । 'अनेनार्घेण कः क्रेता' इति, त्रिः वारत्रयम्, आघुषितम् उद्घुष्य श्रावितं, गृहादिकम्, अव्याहतं ज्ञात्याद्यप्रतिषिद्धं, क्रेता, क्रेतुं लभेत मूल्यदानेन स्वीकर्तुमर्हेत् ।

स्पर्धया वा मूल्यवर्धन इति । क्रेतृसङ्घर्षेण निमित्तेन मूल्यस्य विक्रेतृनिर्दिष्टापेक्षयाधिक्यसम्भवे, मूल्यवृद्धिः सशुल्का कोशं गच्छेत् मूल्यवृद्ध्यंशः शुल्कसहितः राजभाण्डागारं प्राप्नुयात् । विक्रयप्रतिक्रोष्टा विक्रये मूल्यवर्धयिता, शुल्कं दद्यात् ।

अस्वामिप्रतिक्रोशे चतुर्विंशतिपणो दण्डः । सप्तरात्रादूर्ध्वमनभिसरतः प्रतिक्रुष्टो विक्रीणीत । प्रतिक्रुष्टातिक्रमे वास्तुनि द्विशतो दण्डः अन्यत्र चतुर्विंशतिपणो दण्डः । इति वास्तुविक्रयः ।

सीमविवादं ग्रामयोरुभयोः सामन्ता पञ्चग्रामी दशग्रामी वा सेतुभिः स्थावरैः कृत्रिमैर्वा कुर्यात् ।

कर्षकगोपालवृद्धकाः पूर्वभुक्तिका वा, अबाह्याः सेतूनामभिज्ञा बहव एको वा निर्दिश्य सीमसेतून् विपरीतवेषाः सीमानं नयेयुः । उद्दिष्टानां सेतूनामदर्शने सहस्रदण्डः । तदेव नीते सीमापहारिणां सेतुच्छिदां च कुर्यात् ।

अस्वामिप्रतिक्रोश इत्यादि । भूम्यनधिकारिणः प्रतिक्रोशतश्चतुर्विंशतिपणो दण्डः । सप्तरात्रादूर्ध्वमिति । प्रतिक्रुश्य क्रयव्यवहारशुद्ध्यर्थं व्यवहारस्थानमनभिगच्छन् प्रतिक्रोष्टा आसप्तरात्रं प्रतीक्षणीयः । तत ऊर्ध्वं, प्रतिक्रुष्टो विक्रीणीत, अन्यस्मै । प्रतिक्रुष्टातिक्रमे प्रतिक्रुष्टकृतेऽतिक्रमे प्रतिक्रोष्टारमनादृत्य तदन्यस्मै विक्रये क्रियमाणे इति यावत्, वास्तुनि द्विशतः वास्तुविषये द्विशतपणः, दण्डः । अन्यत्र चतुष्पदादिविषये, चतुर्विंशतिपणो दण्डः । इति वास्तुविक्रयः व्याख्यात इति शेषः ।

सीमाविवादमाह — सीमविवादमित्यादि । द्वयोर्ग्रामयोः सीमाव्यतिक्रमविवादे प्रसक्ते, सामन्ता समीपवर्तिनी, पञ्चग्रामी दशग्रामी वा अर्थात् तत्स्था व्यवहारज्ञाः समुदेत्य गिरिनदीविपिनादिभिः स्थावरैः सेतुभिस्तुषाङ्गारभस्मादिभिश्च कृत्रिमैः कुर्यात् निर्णयेत् ।

कर्षकगोपालवृद्धका इत्यादि । सामन्तग्रामाभावे कृषिकर्मिणो वृद्धगोपालकाः, पूर्वभोक्तारो वा सीमानं निर्णयेयुः । अबाह्यास्तदन्तर्देशवासिनः नष्टसीमासेतुविषयाविसंवादिज्ञानशालिनो बहवो लुब्धकादयः तेष्वेक एव वा, सीमासेतून् निर्दिश्य अमुकप्रदेशः पूर्वसीमेत्यङ्गुल्यापदिश्य सीमानं नयेयुः समर्थयेयुः दर्शयेयुः । विपरीतवेषा इत्यबाह्यानां विशेषणं, सीमानयनकाले विपरीतं वेषं रक्तवस्त्रमाल्यादिधारणरूपं स्त्र्यादिवेषं ते धारयेयुरित्यर्थः । सीमाख्यातॄणां स्त्र्यादिवेषधारणं तत्समुदाचारसिद्धं द्रष्टव्यम् । उद्दिष्टानामिति । निर्दिष्टानां सेतूनाम्, अदर्शने प्रदर्शनाभावे, सहस्रदण्डः सहस्रपणो दण्डः, निर्देष्टुः । तदेवेति । नीते सेतौ यथानिर्दिष्टे प्रदर्शनेन निर्णीते सति, सीमाप-

प्रनष्टसेतुभोगं वा सीमानं राजा यथोपकारं विभजेत् ।

क्षेत्रविवादं सामन्तग्रामवृद्धाः कुर्युः । तेषां द्वैधीभावे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः । मध्यं वा गृह्णीयुः । तदुभयं परोक्तं वास्तु राजा हरेत् प्रनष्टस्वामिकं च । यथोपकारं वा विभजेत् ।

प्रसह्यादाने वास्तुनि स्तेयदण्डः । कारणादाने प्रयासमाजीवं च परिसङ्ख्याय बन्धं दद्यात् । मर्यादापहरणे पूर्वः साहसदण्डः । मर्यादाभेदे चतुर्विंशतिपणः ।

तेन तपोवनविवीतमहापथश्मशानदेवकुलयजनपुण्यस्थानविवादा व्याख्याताः । इति मर्यादास्थापनम् ।

हारिणां, सेतुच्छिदां च सीमास्थितवृक्षभञ्जकानां च, तदेव दण्डविधानं सह-स्नपणलक्षणं कुर्यात् ।

प्रनष्टसेतुभोगं वेत्यादि । अत्यन्ताविज्ञातसेतुम् अत्यन्ताविज्ञातभुक्तिं च, सीमानं क्षेत्रादिप्रदेशं, राजा, यथोपकारम् उपकारानुगुण्येन, विभजेत् ।

क्षेत्रविवादमाह — **क्षेत्रे**त्यादि । क्षेत्रविवादं, सामन्तग्रामवृद्धाः, कुर्युः निर्णयेयुः । तेषां द्वैधीभावे पक्षभेदे सति, यतो बहवः शुचयोऽनुमता वा यस्मिन् पक्षे बहवः प्रविष्टास्ते च बाह्याभ्यन्तरशौचसम्पन्नाः लोकसंमताश्च, ततो नियच्छेयुः तेन पक्षेण निर्णयेयुः । मध्यं वा गृह्णीयुः समं पक्षं वा गृहीत्वा विभज्य निर्णयेयुः । **तदुभयं परोक्तमिति** । चेदित्यध्याहर्तव्यं बहुपक्षानुसारनिर्णयः समपक्षानुसारनिर्णयश्चेत्युभयं विवादिभ्यां प्रतिषिद्धं चेत्, वास्तु विवादविषयभूतं क्षेत्रं, राजा हरेत् स्वयं गृह्णीयात् । प्रनष्टस्वामिकं च अपगतस्वामिकं च वास्तु राजा हरेत् । यथोपकारं वा, विभजेत् अपगतस्वामिदायग्रहणार्हेभ्यो विभज्य वा दद्यात् ।

प्रसह्यादान इति । बलाद् गृहीते सति वास्तुनि, स्तेयदण्डः चौर्यविहितो दण्डो ग्रहीतुः । **कारणादाने प्रयासमि**त्यादि । ऋणादिकारणवशाद् गृहीते वास्तुनि क्षेत्रसंस्कारार्थं प्रयुक्तं कायाद्यायासं क्षेत्रसमुत्थं फलं च मूल्यतः परिगणय्य; बन्धं दद्यात् तद्धने ऋणधनादुद्रिच्यमाने दृष्टे तमधिकमंशं भूस्वामिने प्रयच्छेत् । मर्यादापहरणे उभयभूम्योः सीमापहारे, पूर्वः साहसदण्डः । मर्यादाभेदे सीमाया एकदेशापहारेण भेदकरणे, चतुर्विंशतिपणः ।

उक्तं गृहादिसीमाविवादविधानं तपोवनादिसप्तकविषयेष्वपि विवादेषु योजनीयमित्याह — **तेने**त्यादि । **इति मर्यादास्थापनमि**ति । व्याख्यातम् ।

सर्व एव विवादाः सामन्तप्रत्ययाः। विवीतस्थलकेदारषण्डखल-वेश्मवाहनकोष्ठानां पूर्वं पूर्वमाबाधं सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जाः स्थलप्रदेशाः।

आधारपरिवाहकेदारोपभोगैः परक्षेत्रकृष्टबीजहिंसायां यथोपघातं मूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां हिंसाद्विगुणो दण्डः।

पश्चान्निविष्टमधरतटाकं नोपरितटाकस्य केदारमुदकेनाप्लावयेत्। उपरि निविष्टं नाधरतटाकस्य पूरास्रावं वारयेद् अन्यत्र त्रिवर्षोपरतकर्मणः। तस्यातिक्रमे पूर्वः साहसदण्डस्तटाकवामनं च।

सर्व एवेति। सर्व एव विवादाः, सामन्तप्रत्ययाः अनन्तरवास्तुनिमित्ताः। तत्त्वं च वास्तुषु परस्परेण परस्परस्य यदा पीडोत्पादस्तदैव तन्निवारणाय विवादानां प्रवर्तनात्। तत्र द्वयोरन्यतरस्यावश्यपीडनीयत्वप्राप्तौ नियममाह — विवीतस्थलेत्यादि। विवीतं प्रवृद्धतृणस्तम्बो गवादिप्रचारदेशः स्थलं लूनापनीततृणस्तम्बा परिष्कृता भूमिः केदारः क्षेत्रं षण्डः कदल्यादिवनं खलं धान्यपवनस्थानं वेश्म प्रसिद्धं वाहनकोष्ठः गवाश्वादिस्थानम् एषां सप्तानां मध्ये, पूर्वं पूर्वं कर्तृ, आबाधम् उत्तरोत्तरनिमित्तां पीडां, सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जा इति। ब्रह्मारण्यं सोमारण्यं देवस्थानं यजनस्थानं पुण्यस्थानं च वर्जयित्वा सर्वे भूभागाः स्थलप्रदेशाः क्षेत्रयोग्याः प्रदेशाः वेदितव्याः।

आधारपरिवाहकेदारोपभोगैरित्यादि। जलाधारखातेन ततो जलपरिवहनदीर्घिकारचनया स्थलीकेदारीकरणेन च परकीयकेदारोप्तधान्यबीजोपघाते उपघातानुसारेण धान्यमूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां, हिंसाद्विगुण उपहतफलद्विगुणः, दण्डः।

पश्चान्निविष्टमिति। उत्तरकालोत्पन्नम् अधरतटाकम्, उपरितटाकस्य पूर्वोत्पन्नस्य, केदारम्, उदकेन नाप्लावयेत् नापूरयेत्। उपरिनिविष्टमिति। उपरितटाके पश्चान्निविष्टम् अधरतटाकस्य पूर्वसिद्धस्य, पूरास्रावं प्रवाहस्रुतिं, न वारयेत्। अन्यत्र त्रिवर्षोपरतकर्मण इति। तच्चेदधरतटाकं वर्षत्रयपरित्यक्तजलपायनसाध्यकृषिकर्म भवेत्, तदा पूरास्राववारणे न दोष इत्यर्थः। तस्यातिक्रमे उक्तविधेर्लङ्घने, पूर्वः साहसदण्डः, तटाकवामनं च जलनिर्गमनेन तटाकशून्यीकरणं च दण्डः।

पञ्चवर्षोपरतकर्मणः सेतुबन्धस्य स्वाम्यं लुप्येतान्यत्रापद्भ्यः ।

तटाकसेतुबन्धानां नवप्रवर्तने पाञ्चवार्षिकः परिहारः । भग्नोत्सृष्टानां चातुर्वार्षिकः । समुपारूढानां त्रैवार्षिकः । स्थलस्य द्वैवार्षिकः । स्वात्माधाने विक्रये च ।

खातप्रावृत्तिमनदीनिबन्धायतनतटाककेदारारामषण्डवापानां सस्यवर्णभागोत्तरिकम्, अन्येभ्यो वा यथोपकारं दद्युः ।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तारश्चैषां प्रतिकुर्युः । अप्रतीकारे हीनद्विगुणो दण्डः ।

पञ्चवर्षोपरतकर्मण इति । पञ्चवर्षोपेक्षितस्य, सेतुबन्धस्य, स्वाम्यं स्वामित्वं, स्वामिनो लुप्येत नश्येत्, **अन्यत्रापद्भ्य** इति । परचक्राद्यापत्सु तूपेक्षितस्य स्वामित्वं न हीयेत ।

तटाकसेतुबन्धानामिति । तेषां, नवप्रवर्तने नूतननिर्माणे, पाञ्चवार्षिकः पञ्चवर्षव्यापी, परिहारः करमोक्षः, कार्यः । **भग्नोत्सृष्टानामिति** । महाजलप्रवाहाद्युपहतोपरतकर्मणां, नवप्रवर्तने नूतनकृषिप्रवर्तने, चातुर्वार्षिकः परिहारः । **समुपारूढानामिति** । तृणस्तम्बवनादिच्छेदनोन्मूलनादिना नवक्षेत्रीकृतानां स्थलानां नवप्रवर्तने, त्रैवार्षिकः परिहारः । **स्थलस्येति** । स्वत एव तृणस्तम्बादिशून्यतया सुकरसंस्कारस्य भूप्रदेशस्य, नवप्रवर्तने, द्वैवार्षिकः, परिहारः । **स्वात्माधाने विक्रये चेति** । आधीकरणे विक्रयणे चैषां स्वात्मा नवप्रवर्तक एव, प्रभुरिति शेषः । स्वाम्याधान इति वा पाठः ।

खातप्रावृत्तिमेत्यादि । खातप्रावृत्तिमं खनननिर्वृत्तकूपपेयजलम्, नद्यायतनं नद्याश्रयं नदीपेयजलं, निबन्धायतनं नदीसेतुबन्धाश्रयं तत्प्रवर्तितकुल्योपनेयजलं, तटाकं लक्षणया तटाकोपनेयजलं, केदारारामौ प्रतीतौ, षण्डवापः कदल्यादिवापस्थानम् इत्येतेषां मध्ये, अन्यतममिति शेषः, सस्यवर्णभागोत्तरिकं दद्युः सस्यवर्णोत्तरिकं सस्यवर्णाधिक्ययुक्तं भागोत्तरिकं भागाधिक्ययुक्तं च यथा भवति तथा दद्युः, अर्थात् अधिकसस्यवर्णनिष्पादकायाधिकभागदायकाय च कृष्यर्थे । अन्येभ्यो वा अव्यसनिभ्यः कर्मण्येभ्यः, यथोपकारं दद्युः यथाफलोदयभागदानपरिभाषया दद्युः ।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तार इति । प्रक्रयोपभोक्तारः क्षेत्रादिकं क्रीत्वा भोक्तारः, अवक्रयोपभोक्तारः 'फलितेऽफलिते वा क्षेत्रादौ

सेतुभ्यो मुञ्चतस्तोयमवारे षट्पणो दमः ।
वारे वा तोयमन्येषां प्रमादेनोपरुन्धतः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे नवमोऽध्यायः
वास्तुके वास्तुविक्रयः सीमाविवादः क्षेत्रविवादः
मर्यादास्थापनं बाधाबाधिकम् ।
आदितः षट्षष्टितमोऽध्यायः ॥

फलमेतावत् प्रतिनियतं स्वामिने दास्यामी'ति संविदा क्षेत्रादिस्वीकारोऽवक्रयस्तदुपभोक्तारः, आध्युपभोक्तारः पणयगृहीतभोक्तारः, भागभोगोपभोक्तारः उपलब्धस्य फलस्यैतावान् भागो देय इति संविदा भोक्तारः, निसृष्टोपभोक्तारः यथादत्तभागग्रहणपरिभाषयोपभोक्तारश्च, एषां तटाकादीनां, प्रतिकुर्युः उपघातप्रतिविधानं कुर्युः । अप्रतीकारे प्रतीकाराकरणे, हीनद्विगुणो दण्डः ।

अध्यायप्रान्ते श्लोकमाह — **सेतुभ्य** इति । अवारे आत्मनोऽपर्याये, सेतुभ्यस्तटाकादिभ्यः, तोयं मुञ्चतः क्षेत्रादिकं पाययतः, षट्पणो दमः दण्डः । अन्येषां वारे पर्याये, प्रमादेन अज्ञानेन, तोयम् उपरुन्धतो वा अन्यक्षेत्रजलपायनं प्रतिबध्नतश्च, षट्पणो दमः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे नवमोऽध्यायः
वास्तुके वास्तुविक्रयः सीमाविवादः क्षेत्रविवादः
मर्यादास्थापनं बाधाबाधिकम् ।
आदितः षट्षष्टितमोऽध्यायः ॥

६१, ६२. प्रक. वास्तुकं— विवीतक्षेत्रपथहिंसा समयस्यानपाकर्म च।

कर्मोदकमार्गमुचितं रुन्धतः कुर्वतोऽनुचितं वा पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि च परभूमौ निवेशयतः पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा मध्यमः साहसदण्डः श्रोतृणामुत्तमः अन्यत्र भग्नोत्सृष्टात्।

स्वाम्यभावे ग्रामाः पुण्यशीला वा प्रतिकुर्युः।

पथिप्रमाणं दुर्गनिवेशे व्याख्यातम्। क्षुद्रपशुमनुष्यपथं रुन्धतो द्वादशपणो दण्डः। महापशुपथं चतुर्विंशतिपणः। हस्तिक्षेत्रपथं चतुष्पञ्चाशत्पणः। सेतुवनपथं षट्छतः। श्मशानग्रामपथं द्विशतः। द्रोणमुखपथं पञ्चशतः। स्थानीयराष्ट्रविवीतपथं साहस्रः। अतिकर्षणे चैषां दण्डचतुर्था दण्डाः। कर्षणे पूर्वोक्ताः।

अथ वास्तुकस्य तृतीयाध्याय आरभ्यते। पूर्वाध्याये सीमादिनिर्णयः क्षेत्रादीनामुक्तः। उदकमार्गनिरोधे सस्यादिहिंसने च दण्डविधिरिहोच्यते।

कर्मोदकमार्गमिति। कृष्यर्थजलमार्गम्, उचितं पूर्वानुवृत्तं, रुन्धतः, अनुचितं कुर्वतो वा नवं प्रवर्तयतो वा, पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि चेति। सेत्वादीनि पञ्च, परभूमौ, निवेशयतः सृजतः, पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा पूर्वपुरुषैर्धर्मार्थं विसृष्टं सेतुकूपतटाकादिकम् आधीकुर्वतो विक्रीणानस्य तत्पुत्रादेस्तत्प्रयोजकस्य वा, मध्यमः साहसदण्डः। श्रोतृणां तत्साक्षिणाम् उत्तमः साहसः। तत्रापवादः—अन्यत्र भग्नोत्सृष्टात्, उपहतासंस्कृतोपेक्षितसेत्वादिव्यतिरेकेण।

स्वाम्यभाव इति। प्रवर्तकतत्पुत्राद्यभावे, ग्रामाः ग्रामवास्तव्याः, पुण्यशीला वा ग्रामावास्तव्या अपि, प्रतिकुर्युः संस्कुर्युः, अर्थाद् भग्नं सेत्वादिकम्।

पथिहिंसां वक्तुं तत्प्रमाणं दुर्गनिवेशोक्तं स्मारयति—**पथिप्रमाणमित्यादि। क्षुद्रपशुमनुष्यपथमिति।** क्षुद्रपशुमार्गं मनुष्यमार्गं च दुर्गनिवेशोक्तं, रुन्धतः, द्वादशपणो दण्डः। महापशुपथं गवाश्वादिमार्गं, रुन्धतः, चतुर्विंशतिपणः। हस्तिक्षेत्रपथं रुन्धतः चतुष्पञ्चाशत्पणः। सेतुवनपथं रुन्धतः षट्छतः। श्मशानग्रामपथं रुन्धतो द्विशतः। द्रोणमुखपथं रुन्धतः पञ्चशतः।

क्षेत्रिकस्याक्षिपतः क्षेत्रमुपवासस्य वा त्यजतो बीजकाले द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः ।

करदाः करदेष्वाधानं विक्रयं वा कुर्युः, ब्रह्मदेयिका ब्रह्मदेयिकेषु । अन्यथा पूर्वः साहसदण्डः, करदस्य वाकरदग्रामं प्रविशतः ।

करदं तु प्रविशतः सर्वद्रव्येषु प्राकाम्यं स्याद्, अन्यत्रागारात् । तदप्यस्मै दद्यात् ।

अनादेयमकृषतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात् ।

स्थानीयराष्ट्रविवीतपथं स्थानीयं प्रसिद्धं राष्ट्रविवीते समाहर्तृसमुदयप्रस्थापनोक्ते तेषां पन्थानं, रुन्धतः, साहस्रः । **अतिकर्षणे चैषामिति** । अतिकर्षणमपकर्षणं न्यूनीकरणम् उक्तानां पथामेकदेशापहरणेन प्रमाणतो न्यूनीकरणे, दण्डचतुर्थाः पूर्वोक्तदण्डचतुर्भागाः, दण्डाः । कर्षणे पथिषु कृषिकरणे, पूर्वोक्ताः दण्डाः ।

क्षेत्रिकस्येति । बीजकाले, क्षेत्रम् अक्षिपतः कर्षकायानर्पयतः, क्षेत्रिकस्य क्षेत्रस्वामिनः, त्यजत उपवासस्य वा कृषिमभ्युपेत्य बीजवापकाले क्षेत्रं मुञ्चतः कर्षकस्य वा, द्वादशपणो दण्डः । **अन्यत्र दोषोपनिपाताविषह्येभ्य इति** । दोषः क्षेत्रदोषः उपनिपातो राजचोराद्युपद्रवः अविषह्यं महारोगादि एतेषु निमित्तेषु क्षेत्रत्यागो न दोषाय ।

करदा इति । करदायकाः, करदेषु आधानं विक्रयं वा कुर्युः, न त्वकरदेष्वित्यर्थः । ब्रह्मदेयिकाः, ब्रह्मदायिका इत्यपि पाठः, ब्रह्मदेयं ब्रह्मदायो वा करमोक्षितं ब्राह्मणभोग्यं क्षेत्रादिकमुच्यते तथाविधभूमिस्वामिनः, ब्रह्मदेयिकेषु आधानं विक्रयं वा कुर्युः, न त्वतथाभूतेषु । अन्यथा उक्तविध्यतिक्रमेणाधानविक्रयकरणे, पूर्वः साहसदण्डः । आहितविक्रीतक्षेत्रस्वीकर्तुर्दण्डमाह — **करदस्य वेत्यादि** ।

करदं त्विति । करदं ग्रामं, प्रविशतः करदस्य, सर्वद्रव्येषु धान्यचतुष्पदादिषु, प्राकाम्यं स्वाच्छन्द्यं स्वामित्वं, स्यात्, अन्यत्रागारात् विक्रेतृगृहवर्जम् । तदपि अस्मै दद्यात् क्षेत्रविक्रेता यदि गृहमपि विक्रेतुमिच्छेत् तदा क्षेत्रक्रेत्रे एव तद् विक्रीणीयात् ।

अनादेयमिति । संस्कृतं ग्राह्यफलत्वादादेयं तद्भिन्नमनादेयमसंस्कृतं क्षेत्रम्, अकृषतः संस्करणाशक्तत्वादकर्षयतः स्वामिनः, अन्यः स्वामिनि-

अकरदाः परत्र वसन्तो भोगमुपजीवयेयुः ।

ग्रामार्थेन ग्रामिकं व्रजन्तम् उपवासाः पर्यायेणानुगच्छेयुः । अननुगच्छन्तः पणार्धपणिकं योजनं दद्युः ।

ग्रामिकस्य ग्रामादस्तेनपारदारिकं निरस्यतश्चतुर्विंशतिपणो दण्डः ग्रामस्योत्तमः ।

निरस्तस्य प्रवेशो ह्यधिगमेन व्याख्यातः ।

स्तम्भैः समन्ततो ग्रामाद् धनुश्शतापकृष्टमुपसालं कारयेत् ।

पशुप्रचारार्थं विवीतमालवनेनोपजीवयेयुः ।

युक्तः, पञ्चवर्षाणि उपभुज्य, प्रयासनिष्क्रयेण दद्यात् कूपतटाकादिखननार्थं व्ययमात्मकृतं गृहीत्वा प्रत्यर्पयेत् क्षेत्रम् ।

अकरदा इति । अकरदा ब्रह्मदेयिकादयः, परत्र ग्रामान्तरे, वसन्तः भोगम् उपजीवेयुः क्षेत्रभोगमात्रं गृह्णीयुः, हिरण्यकरदण्डं तु राजा गृह्णीयादिति भाषाटीका ।

ग्रामार्थेनेति । ग्रामकार्यवशेन, ग्रामिकं ग्राममुख्यं, व्रजन्तं देशान्तरं गच्छन्तम्, उपवासाः उपजीव्य ग्रामं वसन्तः कर्षकाः, पर्यायेण वारव्यवस्थया, अनुगच्छेयुः । अननुगच्छन्तः, पणार्धपणिकं योजनं दद्युः एकैकस्य गन्तव्याध्वयोजनस्यैतावदिति व्यवस्थया देयं द्रव्यमिह योजनं तत् सार्धपणात्मकं ग्रामिकाय दद्युः ।

ग्रामिकस्येति । ग्राममुख्यस्य, ग्रामाद्, अस्तेनपारदारिकं स्तेयेन परदाररतत्वेन वा दोषेणायुक्तं, निरस्यतः बहिष्कुर्वतः, चतुर्विंशतिपणो दण्डः । ग्रामस्य ग्रामवासिसमुदायस्य बहिष्कुर्वतः, उत्तमः साहसदण्डः ।

निरस्तस्येति । ग्रामान्निष्कासितस्य, चोरपारदारिकादेः, प्रवेशः पुनर्ग्रामाभिगमनं, हिशब्दस्तुशब्दार्थे, अधिगमेन व्याख्यातः परगृहाभिगमनोक्तेन दण्डेन समानदण्ड इत्यर्थः ।

स्तम्भैरिति । स्तम्भैः शिलामयैर्दारुमयैर्वा, समन्ततः समन्तात्, ग्रामात्, समन्तग्रामादिति पाठे ग्रामपर्यन्तदेशादित्यर्थः, धनुश्शतापकृष्टं धनुश्शतविप्रकृष्टम्, उपसालम् उपप्राकारं, कारयेत् ।

पश्वित्यादि । पशुप्रचारार्थं, पशुसञ्चारखादनार्थं, विवीतमालवनेन विवीतं तृणस्तम्बजलयुक्तं स्थलं मालमुन्नतभूतलं वनं प्रसिद्धम् एतैर्विसृष्टैः, उपजीवयेयुः अर्थाद् ग्रामजनान् ।

विवीतं भक्षयित्वापसृतानामुष्ट्रमहिषाणां पादिकं रूपं गृह्णीयुः। गवाश्वखराणां चार्धपादिकम्। क्षुद्रपशूनां षोडशभागिकम्।

भक्षयित्वा निषण्णानामेत एव द्विगुणा दण्डाः। परिवसतां चतुर्गुणाः। ग्रामदेववृषा वा अनिर्दशाहा वा धेनुरुक्षाणो गोवृषाश्चादण्ड्याः।

सस्यभक्षणे सस्योपघातं निष्पत्तितः परिसङ्ख्याय द्विगुणं दापयेत्।

स्वामिनश्चानिवेद्य चारयतो द्वादशपणो दण्डः। प्रमुञ्चतश्चतुर्विंशतिपणः। पालिनामर्धदण्डः। तदेव षण्डभक्षणे कुर्यात्। वाटभेदे

विवीतमिति। तद् भक्षयित्वा अपसृतानाम् उष्ट्रमहिषाणां, पादिकं रूपं पादपणं, गृह्णीयुः विवीताध्यक्षाः। गवाश्वखराणां च, अर्धपादिकं रूपं पणाष्टांशं, गृह्णीयुः। क्षुद्रपशूनां, षोडशभागिकं रूपं पणषोडशभागं, गृह्णीयुः।

भक्षयित्वा निषण्णानामिति। भक्षयित्वा अनपसृत्य विवीत एवोपविष्टानाम् उष्ट्रादीनाम्, एत एव द्विगुणा दण्डाः यथोक्ता एव पादपणादयो द्विगुणीभूता दण्डाः भवन्ति। परिवसतां रात्रौ तत्रैव संविशतां, चतुर्गुणाः दण्डाः। भक्षणादौ केषाञ्चित् पशूनामदण्डमाह— ग्रामदेववृषा वेति। ग्रामवृषभाः देववृषभाश्च, अनिर्दशाहा धेनुर्वा अनतिक्रान्तदशाहा प्रसूता गौश्च, उक्षाणः वृद्धवृषभाः, गोवृषाश्च सेक्तारश्च, अदण्ड्याः।

सस्यभक्षण इत्यादि। उष्ट्रमहिषादिभिः सस्ये भक्षिते सति, सस्योपघातं भक्षितक्षेत्रैकदेशसञ्जातं सस्यविनाशं, निष्पत्तितः परिसंख्याय कृत्स्नक्षेत्रनिष्पद्यमानफलपर्यालोचनया परिच्छेद्य, द्विगुणं तद्द्विगुणं दण्डं, दापयेत् स्वामिने।

स्वामिनश्चानिवेद्य चारयत इति। विवीताध्यक्षमविज्ञाप्य पशून् विबीते चारयतः तत्स्वामिनः, द्वादशपणो दण्डः। अथवा अविज्ञाप्यैव स्वामिने प्रचारणं पशून् उपक्षेत्रं नियन्त्र्य चारयतः, द्वादशपणो दण्डः नाशितसस्यफलद्विगुणदण्डातिरेकेण। प्रमुञ्चतः निर्यन्त्रणं पशून् विसृज्य चारयतः, चतुर्विंशतिपणः दण्डः भक्षितद्विगुणदण्डातिरेकेण। पालिनां क्षेत्रपालकानाम्, अर्धदण्डः प्रमोक्तृदण्डस्यार्धं दण्डो भवति। 'उष्ट्रमहिषादीनां बालत्वे' इति भाषोक्त्यनुरोधे तु बालानामिति पठनीयम्। तदेव षण्डभक्षणे कुर्यादिति। सस्यभक्षणोक्तमेव दण्डविधानं कदलीवार्ताकोर्वारुकादिवनभक्षणेऽनुतिष्ठेत्। वाटभेदे द्विगुण इति। वृतिं भित्त्वा क्षेत्रादिप्रवेशे पूर्वोक्तद्विगुणो दण्डः।

द्विगुणः। वेश्मखलवलयगतानां च धान्यानां भक्षणे। हिंसाप्रतीकारं कुर्यात्।

अभयवनमृगाः परिगृहीता वा भक्षयन्तः स्वामिनो निवेद्य यथावध्यास्तथा प्रतिषेद्धव्याः।

पशवो रश्मिप्रतोदाभ्यां वारयितव्याः। तेषामन्यथा हिंसायां दण्डपारुष्यदण्डाः। प्रार्थयमाना दृष्टापराधा वा सर्वोपायैर्नियन्तव्याः। इति क्षेत्रपथहिंसा।

कर्षकस्य ग्राममभ्युपेत्याकुर्वतो ग्राम एवात्ययं हरेत्। कर्माकरणे कर्मवेतनाद् द्विगुणं, हिरण्यादाने प्रत्यंशद्विगुणं, भक्ष्यपेयादाने च प्रहवणेषु द्विगुणमंशं दद्यात्।

वेश्मेत्यादि। वेश्मखलवलयगतानां. वेश्म गृहं खलं धान्यपवनस्थानं वलयं राशिः तद्गतानां, धान्यानां, भक्षणे च, द्विगुणो दण्डः। हिंसाप्रतीकारं कुर्यादिति। भक्षणनिमित्तस्य धान्यादिनाशस्य निष्क्रयं, कुर्यात्, सर्वत्र।

अभयवनमृगाः परिगृहीता वेत्यादि। अभयवनचारिणो मृगाः, गृह्यमृगाश्च, भक्षयन्तः स्वामिनो निवेद्य, यथा अवध्यास्तथा प्रतिषेद्धव्याः अवधेन वारणीया इत्यर्थः।

पशव इति। ते, रश्मिप्रतोदाभ्यां वारयितव्याः रज्जुतोत्राभ्यां देहे ताडनेन प्रतिषेद्धव्याः। तेषां पशूनाम्, अन्यथा प्रकारान्तरेण, हिंसायां, दण्डपारुष्यदण्डाः दण्डपारुष्यस्य ये दण्डा वक्ष्यन्ते त एव दण्डा भवन्ति। प्रार्थयमानाः वारकं प्रतियुध्यमानाः, दृष्टापराधा वा पूर्वहिंसितजना वा, पशवः, सर्वोपायैः बन्धनावरोधनादिभिः, नियन्तव्याः दमयित्वा वारयितव्याः। इति क्षेत्रपथहिंसेति। व्याख्यातेति शेषः। तदेवं वास्तुकं परिसमापितम्॥

समयस्यानपाकर्मेति सूत्रम्। बहुभिः सम्भूय कल्प्यमाना व्यवस्था समयः तस्य अनपाकर्म अत्यागः तदिहोच्यत इति सूत्रार्थः। उद्देशक्रमेणास्य प्रकरणस्य व्याख्यानसङ्गतिः।

कर्षकस्येति। कृषीवलस्य, ग्राममभ्युपेत्याकुर्वतः ग्रामजनसमुदायकार्यमङ्गीकृत्याननुतिष्ठतः, ग्राम एव, अत्ययं दण्डं, हरेत्, नतु राजा। दण्डविधिमाह — कर्माकरण इति। कर्मणः समुदायकार्यस्य अकरणे, कर्मवेतनाद् आत्मलभ्याद् वेतनभागाद्, द्विगुणं दण्डं, दद्यात्। हिरण्यादाने समुदाय-

प्रेक्षायामनंशदः सस्वजनो न प्रेक्षेत । प्रच्छन्नश्रवणेक्षणे च सर्वहिते च कर्मणि निग्रहेण द्विगुणमंशं दद्यात् ।

सर्वहितमेकस्य ब्रुवतः कुर्युराज्ञाम् । अकरणे द्वादशपणो दण्डः । तं चेत् सम्भूय वा हन्युः पृथगेषामपराधद्विगुणो दण्डः । उपहन्तृषु विशिष्टः ।

ब्राह्मणतश्चैषां ज्यैष्ठ्यं नियम्येत । प्रवहणेषु चैषां ब्राह्मणे नाकामाः कुर्युः । अंशं च लभेरन् ।

तेन देशजातिकुलसङ्घानां समयस्यानपाकर्म व्याख्यातम् ।

कार्यार्थं सर्वैर्हिरण्ये दीयमाने सति स्वयं हिरण्यस्य अदाने, प्रत्यंशाद्विगुणम् एकैकदेयस्य हिरण्यांशस्य द्विगुणं दण्डं, दद्यात् । भक्ष्यपेयादाने च प्रवहणेषु गोष्ठीभोजनादिषु भक्ष्यपेययोरात्मदेययोरदाने च, द्विगुणमंशं दण्डं, दद्यात् ।

प्रेक्षायामिति । कुशीलवनटनर्तकादिकर्मणि, अनंशदः स्वदेयमंशमददानः, सस्वजनो न प्रेक्षेत स्वयं नेक्षेत स्वजनमपि नेक्षयेत् । प्रच्छन्नश्रवणेक्षणे च प्रच्छन्नं स्थित्वा गीताद्याकर्णने नाट्याद्यवलोकने च, द्विगुणमंशं स्वदेयांशद्विगुणं दण्डं, दद्यात् । सर्वहिते च कर्मणि, निग्रहेण प्रतिबन्धाचरणेन, द्विगुणमंशं स्वदेयांशद्विगुणं दण्डं, दद्यात् ।

सर्वहितमिति । सर्वजनानुकूलं, ब्रुवतः, एकस्य आज्ञाम् एकस्यापि नियोगवचनं, कुर्युः अनुतिष्ठेयुः अर्थादन्ये सामयिकाः । अकरणे द्वादशपणो दण्डः । तं **चेदि**ति । वेति पक्षान्तरे । तं सर्वहितवक्तारं, सम्भूय हन्युश्चेद्, मत्सरवशादन्ये सामयिका इत्यार्थम् । पृथक् प्रत्येकम्, एषां हन्तॄणाम् अपराधद्विगुणः अकरणापराधोक्तदण्डद्विगुणश्चतुर्विंशतिपणात्मकः, दण्डः । उपहन्तृषु विशिष्टः साक्षाद् घातकेषु पूर्वोक्त एव दण्डः सातिशयः ।

ब्राह्मणतश्चेति । एषां सामयिकानां, ब्राह्मणतो ब्राह्मणात् प्रभृति, ज्यैष्ठ्यं नियम्येत अलङ्घ्यवचनत्वलक्षणं ज्येष्ठत्वं व्यवस्थाप्येत । **प्रवहणेष्वि**ति । प्रीतिभोजनादिषु, एषां सामयिकानां मध्ये, ब्राह्मणे विषये, नाकामाः कुर्युः अंशं च लभेरन् अविज्ञाततदभिप्राया अंशं न कल्पयेयुः अंशं च लभेरन् सत्यां तदिच्छायामित्यर्थः ।

तेनेति । तेन यथोक्तेन समयानपाकर्मन्यायेन, देशजातिकुलसङ्घानां देशीयजनसङ्घस्य जातीयजनसङ्घस्य कुलीयजनसङ्घस्य चेत्येतेषां, समयस्यानपाकर्म, व्याख्यातम् उक्तप्रायम् ।

राजा देशहितान् सेतून् कुर्वतां पथि सङ्क्रमान् ।
ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे दशमोऽध्यायः

वास्तुके विवीतक्षेत्रपथहिंसा, वास्तुकं समाप्तं समयस्यानपाकर्म च ।

आदितः सप्तषष्टितमोऽध्यायः ॥

अध्यायान्ते श्लोकमाह — राजेति । नृपतिः, देशहितान्, सेतून् सीमबन्धान्, पथि मार्गे, संक्रमान् दुर्गसञ्चरान्, ग्रामशोभाश्च रक्षाश्च कुर्वतां, तेषां सामयिकानां, प्रियहितं चरेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे दशमोऽध्यायः

वास्तुके विवीतक्षेत्रपथहिंसा, वास्तुकं समाप्तं समयस्यानपाकर्म च ।

आदितः सप्तषष्टितमोऽध्यायः ॥

६३. प्रक. ऋणादानम् ।

सपादपणा धर्म्या मासवृद्धिः पणशतस्य । पञ्चपणा व्यावहारिकी । दशपणा कान्तारगाणाम् । विंशतिपणा सामुद्राणाम् ।

ततः परं कर्तुः कारयितुश्च पूर्वः साहसदण्डः । श्रोतॄणामेकैकं प्रत्यर्धदण्डः ।

राजन्ययोगक्षेमवहे तु धनिकधारणिकयोश्चरित्रमवेक्षेत ।

धान्यवृद्धिः सस्यनिष्पत्तावुपार्धा, परं मूल्यकृता वर्धेत । प्रक्षेपवृद्धिरुदयादर्धम् । सन्निधानसन्ना वार्षिकी देया ।

ऋणादानमिति सूत्रम् । ऋणं वृद्ध्यर्थं प्रयुक्तं धनं तस्य आदानं ग्रहणमिति सूत्रार्थः । 'ऋणरिक्थयोः समो विभागः' इति दायविभागप्रकरणे ऋणं प्रस्तुतम् । तत् कियता कालेन कियद् वर्धत इत्येतत् तु अनुक्तमिहाभिधीयते ।

सपादेत्यादि । पणशतस्य, सपादपणा पादाधिकपणात्मिका, धर्म्या धर्मानपेता, मासवृद्धिः । सेयं बन्धकाधानपूर्वा । बन्धकरहितामाह — पञ्चपणेति । पणशतस्य पञ्चपणात्मिका मासवृद्धिर्व्यावहारिकी पण्यक्रयविक्रयव्यवहारप्रयोजना । दशपणा, मासवृद्धिः, कान्तारगाणां दुर्गमगार्गपण्यवाहिनां वणिजाम् । विंशतिपणा मासवृद्धिः, सामुद्राणां समुद्रवणिजां सम्भावितसर्वपण्यापायानाम् ।

तत इति । ततः परं पणविंशतेरूर्ध्वं, कर्तुः कारयितुश्च वृद्धिं कुर्वतः कारयतश्च, पूर्वः साहसदण्डः । श्रोतॄणां साक्षिणां मध्ये, एकैकं प्रति, अर्धदण्डः प्रथमसाहसस्यार्धं दण्डः ।

राजनीति । तु किंतु, राजनि धनिकधारणिकयोरुत्तमर्णाधमर्णयोः, अयोगक्षेमवहे सति व्यसनपरचक्राद्युपद्रववशाद् योगक्षेमौ अवहमाने सति । अदण्डक्षेमवह इति क्वचित् पाठः । चरित्रमवेक्षेत परस्परवृत्तमवेक्ष्य ऋणव्यवहारं कुर्यात्, अर्थाद् धनिको धारणिकश्च ।

अथ धान्यवृद्धिमाह — धान्येत्यादि । धान्यवृद्धिः वृद्ध्यर्थं प्रयुक्तं धान्यं, सस्यनिष्पत्तौ सस्यफलनिष्पत्तिकाले, उपार्धा अध्यर्धगुणा, वर्धेत । परं तत ऊर्ध्वं, मूल्यकृता वर्धेत । अयमर्थः — वृद्ध्यर्थं प्रयुक्तं धान्यम् आ सस्यनिष्पत्तिकालात् सार्धगुणं वर्धेत । ततोऽप्यधिकवृद्ध्यपेक्षायां तावत्पर्यन्तवृद्धियुक्तस्य तस्य मूलधान्यस्य सार्धगुणितस्य मूल्यं हिरण्यं किमपि परिकल्प्य

चिरप्रवासः संस्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात्। अकृत्वा वृद्धिं साधयतो वर्धयतो वा मूल्यं वा वृद्धिमारोप्य श्रावयतो बन्धचतुर्गुणो दण्डः। तुच्छश्रावणायामभूतचतुर्गुणः। तस्य त्रिभागमादाता दद्यात्, शेषं प्रदाता।

दीर्घसत्रव्याधिगुरुकुलोपरुद्धं बालमसारं वा नर्णमनु वर्धेत। मुच्यमानमृणमप्रतिगृह्णतो द्वादशपणो दण्डः। कारणापदेशेन निवृत्तवृद्धिकमन्यत्र तिष्ठेत्।

तस्य वृद्धिरेतावतीति व्यवस्थापयेत्, न तु धान्यस्य स्वरूपतो भूयोवृद्धिरिति। तत्रापि विशेषमाह — प्रक्षेपेत्यादि। प्रक्षेपवृद्धिः येयं मूलधान्यमूल्येन सह प्रक्षिप्ता वृद्धिः, अर्थाद् वृद्धिधान्यमूल्यं सापि, उदयाद् मूलधान्यमूल्यवृद्ध्यपेक्षया, अर्धं वर्धेत, न तु तत्समम्। सन्निधानेत्यादि। सन्निधानसन्ना ग्रहणयोग्येऽपि काले तूष्णींस्थापनेनानुपयुक्ता, अर्थाद् धान्यवृद्धिः, वार्षिकी देया एकवर्षभवैव दातव्या, बहुवर्षपूगापगमेऽपीत्यार्थम्।

चिरप्रवास इति। चिरप्रोषितः, संस्तम्भप्रविष्टो वा संस्तम्भो जडीभावः तं गतो वा, मूल्यद्विगुणं धान्यमूल्यस्य द्विगुणमेव दद्यात्, बहुवर्षात्ययेऽपि द्वैगुण्यप्राप्तेः परतो वृद्ध्यभावादित्यभिप्रायः। अकृत्वा वृद्धिमित्यादि। वृद्धिमपरिभाष्यैव पूर्वं पश्चात् तां, साधयतो वा, अल्पां वृद्धिं पूर्वं परिभाषितां पश्चाद् वर्धयतो वा अधिकां वदतो वा, मूल्यं, वृद्धिमपरिभाषितामेव सतीम् आरोप्य, श्रावयतो वा अर्थात् साक्षिणः, बन्धचतुर्गुणः मूलधनचतुर्गुणो दण्डः। तुच्छश्रावणायामित्यादि। अल्पं दत्त्वा बहु दत्तमिति साक्षिषु श्राव्यमाणेषु, अभूतचतुर्गुणः श्राव्यमाणधनचतुर्गुणो दण्डः। तस्य दण्डस्य, त्रिभागम्, आदाता ऋणग्राही, दद्यात्, शेषं त्रिभागद्वयं, प्रदाता धनिकः, दद्यात्।

दीर्घसत्रेत्यादि। दीर्घसत्रव्याधिगुरुकुलोपरुद्धं दीर्घसत्रेण द्वादशवार्षिकादिना यज्ञविशेषेण व्याधिना गुरुकुलवासेन चोपरुद्धं, बालम् अप्राप्तव्यवहारम्, असारं वा अबालमप्यशिक्षितलोकयात्रं वा जनम्, अनु, ऋणं न वर्धेत। मुच्यमानमिति। मोक्ष्यमाणम् ऋणम्, अप्रतिगृह्णतः धनिकस्य, द्वादशपणो दण्डः। कारणापदेशेनेत्यादि। यदि कारणं युक्तमपदिश्य धनिको न प्रतिगृह्णीयाद् ऋणं, तदा निवृत्तवृद्धिकं वृद्धिहीनम्, अन्यत्र स्थेयपुरुषे, तिष्ठेद्, ऋणम्।

दशवर्षोपेक्षितमृणमप्रतिग्राह्यमन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः ।

प्रेतस्य पुत्राः कुसीदं दद्युः । दायादा वा रिक्थहराः सहग्राहिणः प्रतिभुवो वा । न प्रातिभाव्यमन्यत् । असारं बालप्रातिभाव्यम् । असङ्ख्यातदेशकालं तु पुत्राः पौत्रा दायादा वा रिक्थं हरमाणा दद्युः ।

जीवितविवाहभूमिप्रातिभाव्यमसङ्ख्यातदेशकालं तु पुत्राः पौत्रा वा वहेयुः ।

नानर्णसमवाये तु नैकं द्वौ युगपदभिवदेयाताम् अन्यत्र प्रतिष्ठमानात् । तत्रापि गृहीतानुपूर्व्या राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत् ।

दशवर्षेत्यादि । दशवर्षोपेक्षितम् ऋणम्, अप्रतिग्राह्यं धनिकेन । तत्रापवादः — **अन्यत्रेत्यादि** । बाल्यवृद्धभावव्याधितत्वादिभिः सप्तभिर्निमित्तैर्दशवर्षोपेक्षितं तु ऋणं प्रतिग्राह्यं भवत्येवेत्यर्थः ।

प्रेतस्येति । मृतस्य, पुत्राः, कुसीदम् ऋणं, दद्युः । दायादा वा रिक्थहराः मृतधनग्राहिणः, ऋणं दद्युः । सहग्राहिणः सहर्णग्राहिणः, प्रतिभुवो वा धनप्रतिभुवो वा, ऋणं दद्युः । **न प्रातिभाव्यमन्यदिति** । धनप्रातिभाव्यातिरिक्तं दर्शनादिप्रातिभाव्यं कर्तृ, न ऋणं दद्यादिति सम्बन्धनीयम् । असारम् अकिञ्चित्करं, बालप्रातिभाव्यम् । पुत्रपौत्रदायादा रिक्थहारिणः सर्वत्र सर्वदा ऋणं रिक्थिनो मृतस्य दद्युरित्याह—**असंख्यातदेशकालमित्यादि** ।

जीवितविवाहभूमिप्रातिभाव्यमित्यादि । जीवितप्रातिभाव्यं जीवितविषयं प्रातिभाव्यं विवाहप्रातिभाव्यं स्त्रीधनादिप्रातिभाव्यं भूमिप्रातिभाव्यं भूक्रयणादिविषयं प्रातिभाव्यम् इत्येतानि प्रातिभाव्यानि पित्राङ्गीकृतानि तस्मिन्नतीते पुत्राः पौत्रा वा सर्वत्र सर्वदा परिरक्षेयुः ।

नानर्णसमवाये त्वित्यादि । नानाभूतानामृणानां समवाये, एकं धारणिकं, द्वौ धनिकौ, युगपत् एककाले, नाभिवदेयातां नाभियुञ्जीयातां, धारणिकश्चेत् स्वदेशमपहाय विदेशं न प्रतिष्ठते । **तत्रापीति** । बहुऋणसमवायेऽपि, गृहीतर्णक्रमेण प्रतिपादयेद् ऋणमृणिकः । राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत् पश्चाद्गृहीतमपि ।

दम्पत्योः पितापुत्रयोः भ्रातॄणां चाविभक्तानां परस्परकृतमृणमसाध्यम्।

अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च। स्त्री चाप्रतिश्राविणी पतिकृतम् ऋणम् अन्यत्र गोपालकार्धसीतिकेभ्यः।

पतिस्तु ग्राह्यः स्त्रीकृतम् ऋणमप्रतिविधाय प्रोषित इति।

सम्प्रतिपत्तावुत्तमः। असम्प्रतिपत्तौ तु साक्षिणः प्रमाणं प्रात्ययिकाः शुचयोऽनुमता वा त्रयोऽवरार्ध्याः। पक्षानुमतौ वा द्वौ ऋणं प्रति, न त्वेवैकः।

प्रतिषिद्धाः स्यालसहायान्वर्थिधनिकधारणिकवैरिन्यङ्गधृत-

दम्पत्योरिति। जायापत्योः, परस्परकृतम् ऋणम्, असाध्यं व्यवहारेण साधयितुं न योग्यम्। तथा पितापुत्रयोः अविभक्तानां भ्रातॄणां च, परस्परकृतमृणमसाध्यम्।

धनिकैरभियुक्तानाम् ऋणिनां ग्रहणे विशेषमाह — अग्राह्या इति। कर्षकाः राजपुरुषाश्च, कर्मकालेषु स्वस्वकर्मानुष्ठानकालेषु, अग्राह्याः। स्त्री चेति। स्त्री च, अग्राह्या, कीदृशी, पतिकृतम् ऋणम् अप्रतिश्राविणी अहं दास्यामीत्यनङ्गीकारिणी। अङ्गीकारिणी तु ग्राह्यैव। तत्रापवादः — अन्यत्र गोपालकार्धसीतिकेभ्य इति। गोपालकाः प्रसिद्धाः अर्धसीतिकाः कृषिकर्मसिद्धसीताफलार्धभागिनः तेषां स्त्रीप्रधानानां स्त्रियं विना। सा तु अप्रतिश्राविण्यपि ग्राह्यैवेत्यर्थः।

पतिस्त्विति। पतिः पुनः अप्रतिश्राव्यपि ग्राह्य एव, स्त्रीकृतमृणमप्रतिविधाय प्रोषित इति कृत्वा।

ऋणसाधनप्रकारमाह—संप्रतिपत्ताविति। धनिकनिवेद्यमानार्थाभ्युपगमे ऋणिकेन क्रियमाणे, उत्तमः निर्णयोपायः सिद्ध इत्यर्थः। असम्प्रतिपत्तौ तु, साक्षिणः, प्रमाणं विवादनिर्णयसाधनम्। साक्षिण इति लिखितस्याप्युपलक्षणम्। कथम्भूताः साक्षिणः कार्याः, प्रात्ययिकाः विश्वासार्हाः, शुचयः बाह्याभ्यन्तरशौचयुक्ताः, अनुमता वा वादिप्रतिवादिसंमताश्च, ते च त्रयोऽवरार्ध्याः त्र्यवराः। पक्षानुमतौ वा द्वौ उभयपक्षसंमतौ द्वौ वा साक्षिणौ, ऋणं प्रति ऋणविषये, न त्वेवैकः एकस्तु साक्षी नैव कार्यः।

साक्षिभावानर्हानाह —प्रतिषिद्धा इति। स्यालादयोऽष्टौ साक्षिभावे प्रतिषिद्धाः। तत्र अन्वर्थी अर्थिनमनुगतः तदनुजीवी, न्यङ्गो विहीनाङ्गः, धृत-

दण्डाः । पूर्वे चाव्यवहार्याः राजश्रोत्रियग्रामभृतककुष्ठिव्रणिनः पतित-चण्डालकुत्सितकर्माणोऽन्धबधिरमूकाहंवादिनः स्त्रीराजपुरुषाश्च । अन्यत्र स्ववर्ग्येभ्यः ।

पारुष्यस्तेयसङ्ग्रहणेषु तु वैरिस्यालसहायवर्जाः । रहस्यव्यवहारेष्वेका स्त्री पुरुष उपश्रोता उपद्रष्टा वा साक्षी स्याद् राजतापसवर्जम् ।

स्वामिनो भृत्यानामृत्विगाचार्याः शिष्याणां मातापितरौ पुत्राणां चानिग्रहेण साक्ष्यं कुर्युः । तेषामितरे वा । परस्पराभियोगे चैषामुत्तमाः परोक्ता दशबन्धं दद्युरवराः पञ्चबन्धम् । इति साक्ष्यधिकारः ।

ब्राह्मणोदकुम्भाग्निसकाशे साक्षिणः परिगृह्णीयात् । तत्र ब्राह्मणं

दण्डः राजदण्डितः । शेषाः प्रतीताः । **पूर्वे चाव्यवहार्या** इत्यादि । पूर्वे अव्यवहार्याः पितापुत्राविभक्तभ्रात्रादयो व्यवहारानर्हाः पूर्वोक्ताः । अहंवादी साक्षी भवामीति स्वयमागतः । शेषाः प्रतीताः । सर्व एते साक्षित्वे निषिद्धाः । **अन्यत्र स्ववर्ग्येभ्य** इति । स्वस्ववर्ग्यातिरिक्ताः प्रतिषिद्धातिरेकिणः सामान्यतः साक्षिणो भवेयुः ।

पारुष्यस्तेयसंग्रहणेष्वित्यादि । तुशब्दो विशेषे । पारुष्यादिषु, वैरिस्यालसहायवर्जाः, सर्वे साक्षिणः स्युः । रहस्यव्यवहारेषु, एका स्त्री, एकः पुरुषः, एक उपश्रोता साक्षादश्रावितोऽपि समीपस्थितिवशात् श्रुतार्थः, उपद्रष्टा वा समीपस्थितिवशाद् यदृच्छादृष्टार्थो वा, साक्षी स्यात्, राजतापसवर्जं राजानं तापसं च वर्जयित्वा ।

स्वामिन इति । ते, भृत्यानाम्, ऋत्विगाचार्याः शिष्याणां, मातापितरौ पुत्राणां च, अनिग्रहेण अबलात्कारेण आत्मेच्छयेत्यर्थः, साक्ष्यं साक्षिकर्म कुर्युः । **तेषामितरे वेति** । तेषां स्वामिनाम् ऋत्विगाचार्याणां मातापित्रोश्च, इतरे भृत्याः शिष्याः पुत्राश्च, अनिग्रहेण साक्ष्यं कुर्युः । **परस्परेत्यादि** । एषां स्वामिभृत्यादीनां परस्पराभियोगे, उत्तमाः परोक्ताः स्वामिऋत्विगादयः पराजिताश्चेद्, दशबन्धं पराजितधनदशभागं, दद्युः, अवरेभ्यः । अवराः भृत्यादयः, परोक्ताः, पञ्चबन्धं पराजितधनपञ्चभागं, दद्युः, उत्तमेभ्यः । **इति साक्ष्यधिकार** इति । व्याख्यात इति शेषः ।

अथ साक्ष्यनुयोगविधिमाह — **ब्राह्मणोदकुम्भाग्निसकाश** इति । ब्राह्मणान् उदकुम्भम् अग्निं चाग्रे कृत्वा, साक्षिणः, परिगृह्णीयाद् विभावयेत्

ब्रूयात् — सत्यं ब्रूहीति । राजन्यं वैश्यं वा — मा तवेष्टापूर्तफलं, कपालहस्तः शत्रुकुलं भिक्षार्थी गच्छेरिति । शूद्रं — जन्ममरणान्तरे यद् वः पुण्यफलं तद् राजानं गच्छेत् । राज्ञश्च किल्बिषं युष्मान् अन्यथावादे । दण्डश्चानुबन्धः । पश्चादपि ज्ञायेत यथादृष्टश्रुतम् । एकमन्त्राः सत्यमवहरतेति ।

अनवहरतां सप्तरात्रादूर्ध्वं द्वादशपणो दण्डः त्रिपक्षादूर्ध्वमभियोगं दद्युः ।

साक्षिभेदे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः । मध्यं वा गृह्णीयुः । तद् वा द्रव्यं राजा हरेत् । साक्षिणश्चेदभियोगा-

---

ब्राह्मणानुयोगमाह — तत्र ब्राह्मणमित्यादि । राजन्यं वैश्यं वेति । ब्रूयादिति सम्बध्यते । वचनप्रकारः — मा तवेष्टापूर्तफलमिति । तव यज्ञफलं खातादिकर्मफलं च न सिध्येत् । कपालहस्तः भिक्षापात्रपाणिः, शत्रुकुलं शत्रुगृहं, भिक्षार्थी सन्, गच्छेः, यद्यनृतं ब्रूया इति शेषः । शूद्रानुयोगमाह — शूद्रमिति । ब्रूयादितीहापि सम्बध्यते । वचनप्रकारः — जन्ममरणान्तर इति । जन्ममरणयोर्मध्ये, यद् वः, पुण्यफलं कृतानां पुण्यकर्मणां फलं, तद् राजानं गच्छेत्, राज्ञश्च, यद् जन्ममरणान्तरे किल्बिषं पापं, तद् युष्मान् गच्छेत्, अन्यथावादे असत्यकथने । दण्डश्च अन्यथावादनिमित्तः, अनुबन्धः अनुयायी कालान्तरभावी । न चान्यथावादनिश्चयो निरुपाय इत्याह — पश्चादपीति । यथादृष्टश्रुतं सत्यं तदात्वे गूहितं, पश्चादपि कालान्तरेऽपि, ज्ञायेत अस्मद्यत्नादिति शेषः । एकमन्त्राः यूयं सर्वे सम्भूय कृतसमन्त्रणाः भूत्वा, सत्यं परमार्थम्, अवहरत उपनयत इति ।

अनवहरतामित्यादि । सत्यावहरणार्थं सप्तरात्रावधिर्देयः । तत ऊर्ध्वम् अनवहरतां, द्वादशपणो दण्डः अर्थादेकैकदिवसस्य । त्रिपक्षादूर्ध्वम्, अभियोगम् अभियोगद्रव्यं, दद्युः, अर्थाद् दण्डसहितम् । इदं च विधानं मानान्तरेण परमार्थे विज्ञाते सति द्रष्टव्यम् ।

साक्षिभेद इति । साक्षिणामन्योन्यवचनविसंवादे, यतः यस्मिन् पक्षे, बहवः शुचयः अनुमता वा, तिष्ठन्तीति शेषः, ततो नियच्छेयुः तं पक्षमाश्रित्य व्यवहारं निर्णयेयुः । मध्यं वा गृह्णीयुः उभयोः पक्षयोः साक्षिगुणसाम्ये उभयसमं कमपि प्रकारं गृह्णीयुः । तदसम्भवे विसंवादितमर्थं राजा गृह्णीयादि-

दूनं ब्रूयुरतिरिक्तस्याभियोक्ता बन्धं दद्यात् । अतिरिक्तं वा ब्रूयुस्तद्-तिरिक्तं राजा हरेत् । बालिश्यादभियोक्तुर्वा दुःश्रुतं दुर्लिखितं प्रेता-भिनिवेशं वा समीक्ष्य साक्षिप्रत्ययमेव स्यात् ।

साक्षिबालिश्येष्वेव पृथगनुयोगे देशकालकार्याणां पूर्वमध्यमो-त्तमा दण्डा इत्यौशनसाः ।

कूटसाक्षिणो यमर्थमभूतं वा कुर्युर्भूतं वा नाशयेयुस्तद्दशगुणं दण्डं दद्युरिति मानवाः ।

बालिश्याद् वा विसंवादयतां चित्रो घात इति बार्हस्पत्याः ।

नेति कौटल्यः । ध्रुवा हि साक्षिणः श्रोतव्याः । अशृण्वतां चतु-र्विंशतिपणो दण्डः, ततोऽर्धमब्रुवाणाम् ।

त्याह — तद्वा द्रव्यं राजा हरेदिति । साक्षिण इति । ते चेदभियुक्त-द्रव्याद् ऊनं ब्रूयुः, तर्हि अभियोक्ता, अतिरिक्तस्य स्वार्थितस्य, बन्धं पञ्चभागं, दद्याद्, राज्ञे । अतिरिक्तं वा ब्रूयुः अभियोक्त्रर्थितादधिकं वा साक्षिणश्चेद् ब्रूयुः, तर्हि, तद् अतिरिक्तं राजा हरेत् । अत्रापवादमाह — बालिश्यादभि-योक्तुर्वेति । अभियोक्तृमौर्ख्याद् वा, दुःश्रुतं लेखकेनान्यथाश्रुतं, दुर्लिखितम् अन्यथा लिखितं च, समीक्ष्य पर्यालोच्य, प्रेताभिनिवेशं वा बन्धुमरणशोक-निमित्तं लेखकचित्तविक्षेपं च, समीक्ष्य, साक्षिप्रत्ययमेव स्यात् साक्षिवाक्याधि-निर्णयमेव ऋणादानं स्यात् ।

साक्षिबालिश्येष्वेव पृथगनुयोग इति । प्रत्येकं प्रश्ने साक्षिणां मौर्ख्यकृतेषु वचनविसंवादेषु, देशकालकार्याणां विसंवादे इति शेषः, पूर्वमध्य-मोत्तमा दण्डाः यथासंख्यं पूर्वादिसाहसदण्डाः । इति औशनसाः ।

कूटसाक्षिण इति । कपटसाक्षिणः, यमर्थम्, अभूतं वा कुर्युः असत्य-मेव कल्पयित्वा ब्रूयुः, भूतं वा नाशयेयुः यमर्थं सत्यमेव हीनं कथयेयुः, तद्दश-गुणं कल्पितनाशितदशगुणं, दण्डं दद्युः । इति मानवाः ।

बालिश्याद्वेति । मौर्ख्याद्, विसंवादयतां विसंवादं कथयतां, चित्रो, घातः वधः । इति बार्हस्पत्याः ।

नेति कौटल्य इति । एतच्च विशेषपरं न तु प्रतिषेधपरम् । विशेष-श्चायं — यद् ध्रुवसाक्षिण एव साक्षिपदे कर्तव्या इति । तदाह — ध्रुवा हि साक्षिणः श्रोतव्या इति । अशृण्वतां श्रवणार्थमाहूतानामनागतानां ध्रुवाणां,

देशकालाविदूरस्थान् साक्षिणः प्रतिपादयेत् ।
दूरस्थानप्रसारान् वा स्वामिवाक्येन साधयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
एकादशोऽध्यायः ऋणादानम्,
आदितोऽष्टषष्टितमः ॥

चतुर्विंशतिपणो दण्डः । ततोऽर्धं द्वादशपणः, अध्रुवाणाम् । तत्र ध्रुवाश्चत्वारिंशत्कुलिकाः, तदनन्तर्गता अध्रुवाः ।

अध्यायान्ते श्लोकमाह — **देशकालाविदूरस्थानिति** । देशतः कालतश्चादूरस्थितान्, साक्षिणः, प्रतिपादयेद् अर्थी स्वयमेवानीय वादयेत् । दूरस्थान्, अप्रसारान् वा समीपस्थानेवाहूतानागतान् वा, स्वामिवाक्येन प्राड्विवाकाज्ञया, साधयेत् आनाययेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
एकादशोऽध्यायः ऋणादानम्,
आदितोऽष्टषष्टितमः ॥

६४. प्रक. औपनिधिकम्।

उपनिधिः ऋणेन व्याख्यातः। परचक्राटविकाभ्यां दुर्गराष्ट्रविलोपे वा, प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे, चक्रयुक्ते नाशे वा, ग्राममध्याग्न्युदकाबाधे वा, किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वा, ज्वालावेगोपरुद्धे वा, नावि निमग्नायां मुषितायां वा स्वयमुपरूढो नोपनिधिमभ्याभवेत्।

औपनिधिकमिति सूत्रम्। उपनिधिर्न्यासो निक्षेप इति पर्यायाः। तत्संबद्धमभिधीयते इति सूत्रार्थः। उपनिधिर्विप्रतिपत्तावृणवद् व्यवहार्य इत्यतस्तदनन्तरमस्याभिधानसङ्गतिः।

उपनिधिर्ऋणेन व्याख्यात इति। ऋणं यथाधमर्णेन तत्पुत्रादिना च प्रत्यर्पणीयं, विप्रतिपत्तौ तु साक्ष्यनुयोगादिना विभावनीयं, तथैवोपनिधिरित्यतिदेशार्थः। उपनिधिरिति च आध्यादेशान्वाधीनामप्युपलक्षणम्। प्रत्यर्पणापवादमाह — **परचक्राटविकाभ्या**मिति। शत्रुसैन्येनाटविकेन च, दुर्गराष्ट्रविलोपे वा नोपनिधिमभ्यावहेत् उपनिधिं न प्रत्यर्पयेत्। प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे चोरैर्ग्रामस्य सार्थस्य वणिक्सङ्घस्य व्रजस्य गवाश्वादिस्थानस्य च विलोपे, नोपनिधिमभ्यावहेत्। चक्रयुक्ते नाशे वा चक्रं छद्मविशेषः तत्प्रयुक्ते, नाशे वा, नोपनिधिमभ्यावहेत्। ग्राममध्याग्न्युदकाबाधे वा ग्राममध्येऽग्निदाहजलप्रवाहबाधायां वा, नोपनिधिमभ्यावहेत्। **किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये** वेति। अयमर्थः — अग्न्युदकबाधे कुप्यद्रव्यं निर्हार्यमेकदेशतो मोचयित्वा किञ्चिदवशिष्टं कुप्यांशममोचयमानः कुप्यं नाभ्यावहेत्। अनिर्हार्यवर्जमिति च निर्हार्यद्रव्य एवैकदेशतो विमोक्षणस्य सम्भवो न त्वनिर्हार्यद्रव्य इति वस्तुस्थितिमात्रं कथ्यते। तेनानिर्हार्यकुप्यविषये तूष्णीमवस्थानमप्यग्न्युदकबाधे नापराधायेत्युक्तप्रायम्। **ज्वालावेगोपरुद्धे** वेति। ज्वालावेगोपरोधवशादुपनिधिमोचनासमर्थे वा सति, नोपनिधिमभ्यावहेत्। नावि निमग्नायां, मुषितायां वा चोरितायां वा सत्यां, स्वयमुपरूढः कृतात्मत्राणः, नोपनिधिमभ्यावहेत्। इह चोत्तरत्र च 'अभ्याभवेदि'ति मातृकासु पाठो दृश्यते, स तु 'अभ्यावहेद्' इत्यस्मिन्नेव पदे केरलीयलिपिलिखिते हकारे भकारभ्रान्तिं कृत्वा वकारस्य तदुत्तरस्थानास्थितियोग्यतां मन्यमानेन लेखकेन कल्पितो नूनम्। अभ्याङ्पूर्वस्य भवतेर्वा प्रत्यर्पणार्थत्वमदृष्टश्रुतस्यापि लिपिलेखनप्रामाण्याभिमाने कल्पनीयम्।

उपनिधिभोक्ता देशकालानुरूपं भोगवेतनं दद्यात् । द्वादशपणं च दण्डम् । उपभोगनिमित्तं नष्टं विनष्टं वाभ्यावहेत्, चतुर्विंशतिपणश्च दण्डः। अन्यथा वा निष्पतने । प्रेतं व्यसनगतं वा नोपनिधिमभ्यावहेत् ।

आधानविक्रयापव्ययनेषु चास्य चतुर्गुणपञ्चबन्धो दण्डः । परिवर्तने निष्पातने वा मूल्यसमः ।

तेन आधिप्रणाशोपभोगविक्रयाधानापहारा व्याख्याताः ।

नाधिः सोपकारः सीदेत् । न चास्य मूल्यं वर्धेत । निरुपकारः सीदेन्मूल्यं चास्य वर्धेतान्यत्र निसर्गात् ।

उपनिधिभोक्तेति । विना स्वाम्यनुज्ञामुपनिधिं भुञ्जानः, देशकालानुरूपं भोगवेतनं, दद्यात् स्वामिने । द्वादशपणं दण्डं च दद्याद् राज्ञे । उपभोगनिमित्तम् उपभोगाय गृहीतं द्रव्यं, नष्टम् अन्यापहृतं, विनष्टं वा स्वरूपहानिं प्राप्तं वा अभ्यावहेत् प्रतिदद्यात् । चतुर्विंशतिपणश्च दण्डः नाशकस्य । अन्यथा वा निष्पतने उपभोगं विनैवोपनिधेरन्यत्र गमने च, चतुर्विंशतिपणो दण्ड इति वर्तते । प्रेतं, व्यसनगतं वा उपनिधिग्राहिणम्, उपनिधिं, नाभ्यावहेत् न दापयेत् ।

आधानेत्यादि । अस्य उपनिधेः, आधानविक्रयापव्ययनेषु च आधीकरणपरस्वीकरणापलापेषु च, चतुर्गुणपञ्चबन्धो दण्डः उपनिहितं चतुर्गुणं देयम् उपनिधात्रे चतुर्गुणस्य पञ्चभागो दण्डश्च राज्ञे । **परिवर्तन इति** । उपनिहितविनिमये, निष्पातने वा अन्यत्र संक्रामणे वा, मूल्यसमः, दण्ड इति वर्तते ।

तेनेति । उक्तेन विधानेन, आधिप्रणाशोपभोगविक्रयाधानापहाराः व्याख्याताः आधिप्रणाशोपभोगादिविषयं विधानम् उपनिधिप्रणाशोपभोगादिविधानेन यथोक्तेन तुल्यमित्यर्थः ।

नाधिरिति । सोपकारः आधिः वाहदोहादियुक्तो गवादिरूपः, न सीदेत् न नश्येत्, धनं गृहीत्वा प्रत्यर्पणीयमित्यर्थः । कुत इत्याकाङ्क्षायां प्रणाशनिमित्तं धनद्वैगुण्यं प्रति हेतुभूताया वृद्धेस्तत्राभावादित्याह — **न चास्य मूल्यं वर्धेतेति** । अस्य सोपकारस्याधेः । **निरुपकार इति** । उपभोगरहितः आधिः, सीदेत्, अस्य मूल्यं च धनं च, वर्धेत । कदा, अन्यत्र निसर्गात् । निसर्ग उपभोगानुज्ञा सा चेन्न दत्ता तदा । सति तु निसर्गेऽनुपभोगो धनिकस्यैवापराध इति धनं नैव वर्धेतेत्यभिप्रायः ।

उपस्थितस्याधिममयच्छतो द्वादशपणो दण्डः । प्रयोजकासान्निधाने वा ग्रामवृद्धेषु स्थापयित्वा निष्क्रयमाधिं प्रतिपद्येत । निवृत्तवृद्धिको वाधिस्तत्कालकृतमूल्यस्तत्रैवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा । धारणकसन्निधाने वा विनाशभयादुद्गतार्घं धर्मस्थानुज्ञातो विक्रीणीत । आधिपालप्रत्ययो वा ।

स्थावरस्तु प्रयासभोग्यः फलभोग्यो वा । प्रक्षेपवृद्धिमूल्यशुद्धमाजीवममूल्यक्षयेणोपनयेत् ।

उपस्थितस्येति । सधनस्याधिग्रहणाय गृहमुपगतस्याधमर्णस्य, आधिम्, अप्रयच्छतः अप्रत्यर्पयतो धनिकस्य, द्वादशपणो दण्डः । **प्रयोजकासान्निधाने वेति** । धनप्रयोक्तुर्देशान्तरगमनादिना सान्निध्याभावे, ग्रामवृद्धेषु निष्क्रयं देयं मूल्यं, स्थापयित्वा, आधिं, प्रतिपद्येत प्रतिगृह्णीयात् । आधिग्रहणासौकर्ये त्वाह — **निवृत्तेत्यादि** । आधिः, निवृत्तवृद्धिकः निष्क्रयस्थापनकालात् प्रभृति वृद्धिरहितः, तत्कालकृतमूल्यः कालान्तरविनाशशङ्कायां धारणकोपस्थानकाल एव व्यवस्थापितमूल्यः, तत्रैव प्रयोजककुल एव, अवतिष्ठेत । धारणकासन्निधाने विनाशशङ्कायामाह — **अनाशविनाशकरणाधिष्ठितो वेति** । अनाशस्याविनाशस्य च यत् करणं साधनं तद्युक्तो वा, कार्य इति शेषः । रक्षणाशक्तावाह — **धारणकसन्निधाने वेति** । अधमर्णस्य सन्निधाने वा, विनाशभयाद्, उद्गतार्घम् उद्रिक्तमूल्यं यथा भवति तथा, धर्मस्थानुज्ञातो विक्रीणीत । **आधिपालप्रत्ययो वेति** । आधिपाल आधिस्थेयः प्रत्ययः प्रमाणं यस्य स तथाभूतो वा भवेद्, आधिपालवचनानुरोधेन रक्षणं विक्रयणं वाधेः कुर्यादित्यर्थः ।

स्थावरास्त्विति । स्थावरः अचरः आधिर्भूमिवृक्षादिः; **प्रयासभोग्यः** आधिग्राहकेण स्वयं कर्षणादिना परिश्रमेण भोक्तव्य इत्येकः, **फलभोग्यः** फलम् आधातृश्रमनिष्पन्नं भोग्यम् अधिग्राहकेण भोक्तव्यं यस्य स तथाभूत इत्यपरः इत्येवं द्विप्रकारः । भोग्यत्वोक्त्या च भोगातिरेकेण स्थावरस्य वृद्ध्यभावो विक्रयाभावश्चोक्तप्रायः । **प्रक्षेपवृद्धिमूल्यशुद्धमिति** । वाणिज्याधिगतस्यैतावतो लाभस्यैतावद् देयमिति परिभाषिता वृद्धिः प्रक्षेपवृद्धिः तस्या मूल्यतः शुद्धं विशोधितं कृत्वेति शेषः, आजीवम् उपभुज्यमानमाधिम्, उपनयेत् प्रत्यर्पयेत्, कथम्, अमूल्यक्षयेण मूल्यक्षयाभावेन प्रयुक्तयावन्मूल्यग्रहणेनेत्यर्थः ।

अनिसृष्टोपभोक्ता मूल्यशुद्धमाजीवं बन्धं च दद्यात् । शेषमुपनिधिना व्याख्यातम् ।

एतेनादेशोऽन्वाधिश्च व्याख्यातौ । सार्थेनान्वाधिहस्तो वा प्रदिष्टां भूमिमप्राप्तश्चोरैर्भग्नोत्सृष्टो वा नान्वाधिमभ्यावहेत् । अन्तरे वा मृतस्य दायादोऽपि नाभ्यावहेत् । शेषमुपनिधिना व्याख्यातम् ।

याचितकमवक्रीतकं वा यथाविधं गृह्णीयुस्तथाविधमेव अर्पयेयुः । भ्रेषोपनिपाताभ्यां देशकालोपरोधि दत्तं नष्टं विनष्टं वा नाभ्याभवेयुः । शेषमुपनिधिना व्याख्यातम् ।

वैयापृत्यविक्रयस्तु — वैयापृत्यकरा यथादेशकालं विक्रीणानाः

अनिसृष्टोपभोक्तेति । अननुज्ञाताधिभोक्ता, मूल्यशुद्धं मूल्याच्छुद्धम्, आजीवं बन्धं च दद्याद् आधातुर्भोगमूल्यं राज्ञो दण्डं च दद्यात् स्वप्रयुक्तं मूल्यं भोगमूल्यदण्डलष्टावशिष्टमेव लभेत न तु सर्वमित्यर्थः । **शेषमुपनिधिना व्याख्यातमिति** । अनुक्तं विधानमुपनिधिविधानेन समानमित्यर्थः ।

आधिकल्पमादेशान्वाध्योरतिदिशति — **एतेनेत्यादि** । अन्यस्मै दीयतामित्युक्त्वा तदन्यस्य हस्तेऽर्पितं द्रव्यमादेश । एतावदध्वान्तरं रक्षित्वा देहीत्यर्पितमन्वाधिः । **सार्थेनेति** । अन्वाधिहस्तः अन्वाधिमध्वनि नयन्, वाशब्दो वाक्यभूषणम् । प्रदिष्टां निर्दिष्टां, भूमिम् अध्वोत्तरावधिम्, अप्राप्तः, चोरैः, सार्थेन अध्वगसङ्घेन सह, भग्नोत्सृष्टो वा मुषितविसृष्टश्च, अन्वाधिं, नाभ्यावहेत् न निष्क्रीणीयात् । अन्तरे वा अध्वमध्ये वा, मृतस्य अन्वाधिहस्तस्य, दायादोऽपि, नाभ्यावहेत् । शेषं विधानम्, उपनिधिना व्याख्यातम् उपनिधिविधानवद् द्रष्टव्यम् ।

याचितकमिति । याच्ञयोपयोगाय गृहीतम्, अवक्रीतकं वा भाटकगृहीतं वा, यथाविधं गृह्णीयुस्तथाविधमेवार्पयेयुः । **भ्रेषोपनिपाताभ्यामिति** । भ्रेषो हस्त्यादिदुष्टसत्त्वजनितं भयम् उपनिपातश्चोरादिभयं ताभ्यां, नष्टं विनष्टं वा, देशकालोपरोधि अमुकदेशान्न प्रस्थातव्यमिति वा एतावतः कालस्य न प्रस्थातव्यमिति वा देशकालोपरोधान्नष्टं विनष्टं वा, दत्तं नाभ्यावहेयुः । **शेषमित्यादि** सुबोधम् ।

वैयापृत्यविक्रयस्त्विति । अभिधीयत इति शेषः । वैयापृत्यकराः इह पृशब्दः पठ्यते न तु वृशब्दः । व्यापृतो व्याप्रियमाणस्तस्य कर्म वैयापृत्यं

पण्यं यथाजातं मूल्यमुदयं च दद्युः । शेषमुपनिधिना व्याख्यातम् ।

देशकालातिपातने वा परिहीणं सम्प्रदानकालिकेन अर्घेण मूल्यमुदयं च दद्युः ।

यथासम्भाषितं वा विक्रीणाना नोभयमधिगच्छेयुः । मूल्यमेव दद्युः । अर्घपतने वा परिहीणं यथापरिहीणं मूल्यमूनं दद्युः ।

सांव्यवहारिकेषु वा प्रात्ययिकेष्वराजवाच्येषु भ्रेषोपनिपाताभ्यां नष्टं विनष्टं वा मूल्यमपि न दद्युः । देशकालान्तरितानां तु पण्यानां क्षयव्ययविशुद्धं मूल्यमुदयं च दद्युः । पण्यसमवायानां च प्रत्यंशम् । शेषमुपनिधिना व्याख्यातम् । एतेन वैयापृत्यविक्रयो व्याख्यातः ।

कर्मणि ष्यञ् तत्कराः कर्मकरा इत्यर्थः । वैयावृत्यकरा इति वृशब्दपाठे यथा कर्मकरार्थता, तथा व्याख्यातमधस्तात् । यथादेशकालं स्वस्वक्लृप्तदेशकालाननतिक्रम्य, पण्यं विक्रीणानाः, यथाजातं यथोत्पन्नं, मूल्यम्, उदयं लाभं च, दद्युः, पण्यस्वामिने । शेषमित्यादि स्पष्टम् ।

देशकालातिपातने वेति । देशातिक्रमणे कालातिक्रमणे वा स्वकृते सति, परिहीणं लाभच्छेदं, सम्प्रदानकालिकेनार्घेण क्लृप्तकालप्रसिद्धमूल्यकल्पनेन, मूल्यं पण्यमूल्यम्, उदयं च दद्युः ।

यथासम्भाषितं वेति । अमुकेनार्घेण विक्रेतव्यमिति स्वामिपरिभाषानुसारेण, कर्मकराः विक्रीणानाश्चेद्, उभयं मूल्यं लाभं च, नाधिगच्छेयुः, अर्थात् पण्यस्वामिनः । मूल्यमेव दद्युः मूल्यं केवलं पण्यस्वामिने दद्युः कर्मकराः, लाभं तु स्वयं हरेयुरित्यर्थः । अर्घपतने वा परिहीणमिति । अर्घपतनवशात् किञ्चित् परिहीणं यदि भवेत्, यथापरिहीणं मूल्यमूनं दद्युः परिहीणानुरोधेन पण्यमूल्यमूनं पूरयित्वार्पयेयुः ।

सांव्यवहारिकेषु वेति । परपण्यक्रयविक्रयजीविषु, प्रात्ययिकेषु प्रत्ययार्हेषु, अराजवाच्येषु राजप्रतिषिद्धेषु सत्सु, भ्रेषोपनिपाताभ्यां, नष्टं विनष्टं वा पण्यं, यदि भवेदिति शेषः, मूल्यमपि न दद्युः अर्थात् ते । देशकालान्तरितानां देशान्तरे कालान्तरे च विक्रेतुमर्पितानां पण्यानां, क्षयव्ययविशुद्धं क्षयः कालपरिवासनिमित्तः पण्यक्षयः व्ययः कर्मकरादिभक्तपरिव्ययस्ताभ्यां परिशुद्धं, मूल्यम्, उदयं च लाभं च, दद्युः । पण्यसमवायानां च प्रत्यंश-

निक्षेपश्चोपनिधिना। तमन्येन निक्षिप्तमन्यस्यार्पयतो हीयेत। निक्षेपापहारे पूर्वापदानं निक्षेप्तारश्च प्रमाणम्। अशुचयो हि कारवः, नैषां करणपूर्वो निक्षेपधर्मः। करणहीनं निक्षेपमपव्ययमानं गूढभित्तिन्यस्तान् साक्षिणो निक्षेप्ता रहस्यप्रणिपातेन प्रज्ञापयेत्, वनान्ते वा मद्यप्रहवणविश्वासेन।

रहसि वृद्धो व्याधितो वा वैदेहकः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्यापगच्छेत्। तस्य प्रतिदेशेन पुत्रो भ्राता वाभिगम्य निक्षेपं याचेत। दाने शुद्धिः। अन्यथा निक्षेपं स्तेयदण्डं च दद्यात्।

मिति। वणिजः स्वदत्तपण्यानि देशान्तरे विक्रीय ततः समानीतानां नानापण्यान्तराणां विषये प्रतिलाभांशं सांव्यवहारिकेभ्यो दद्युः। शेषमित्यादि गतार्थम्। सांव्यवहारिकोक्तमेतद् विधानं वैयापृत्यविक्रयेऽप्यतिदिशति — एतेनेत्यादि।

निक्षेपश्चेति। भूषणादिनिर्माणार्थं कारुषु निक्षिप्यमाणं स्वर्णादिकं निक्षेपः, सः, उपनिधिना, व्याख्यात इत्यनुवर्तते। तमिति। तं निक्षेपम्, अन्येन निक्षिप्तम्, अन्यस्यार्पयतः तदन्यस्मै ददानस्य कारोः, हीयेत द्रव्यहानिर्भवति साक्षान्निक्षेप्तृहस्ते स पुनर्देय एवेत्यर्थः। निक्षेपापहारे, पूर्वापदानं निक्षेप्तारश्च प्रमाणं कारुपूर्वचरितं निक्षेप्तृसुजनतां च पर्यालोच्य निर्णयः कर्तव्य इत्यर्थः। कुत एवं, तत्राह — अशुचयो हीति। हि यतः, कारवः अशुचयः सत्त्वहीनाः। एषां, निक्षेपधर्मः निक्षेपव्यवहारः, करणपूर्वो न साक्षिलेख्यपूर्वो न क्रियते विश्वासादेव केवलात् क्रियते। करणहीनमिति। साक्ष्यादिरहितं, निक्षेपम्, अपव्ययमानम् अपलपन्तं कारुं, गूढभित्तिन्यस्तान्, साक्षिणः, निक्षेप्ता, रहस्यप्रणिपातेन रहस्ये प्रार्थनपूर्वकश्रावणेन, प्रज्ञापयेत् प्रबोधयेत्। वनान्ते वा, मद्यप्रहवणविश्वासेन मद्यगोष्ठीरचनविस्रम्भेण, रहसि साक्षिणः प्रज्ञापयेदिति वर्तते। इह मद्यप्रहवणेति प्रहवणशब्द एव मातृकाग्रन्थेषु सर्वेषु पठ्यते। स च प्रपूर्वाज्जुहोतेरधिकरणे ल्युटि साध्यः। प्रकर्षेण हूयते दीयते पानभोजनादिकमस्मिन्निति प्रहवणं गोष्ठीरचनमुच्यते। प्रवहणशब्दस्य यथेहशोऽर्थस्तथोक्तं प्राक्।

रहसीति। विजने, वृद्धो व्याधितो वा, वैदेहको भूषणवणिक्, कश्चित्, कृतलक्षणं चिह्नविशेषयुक्तं, द्रव्यम्, अस्य कारोः, हस्ते, निक्षिप्य, अपगच्छेत्

प्रव्रज्याभिमुखो वा श्रद्धेयः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्य प्रतिष्ठेत । ततः कालान्तरागतो याचेत । दाने शुचिरन्यथा निक्षेपं स्तेयदण्डं च दद्यात् । कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनम् । बालिशजातीयो वा रात्रौ राजदायिकाङ्क्षणभीतः सारमस्य हस्ते निक्षिप्यापगच्छेत् । स एनं बन्धनागारगतो याचेत । दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

अभिज्ञानेन चास्य गृहे जनमुभयं याचेत । अन्यतरादाने यथोक्तं पुरस्तात् ।

द्रव्यभोगानामागमं चास्यानुयुञ्जीत । तस्य चार्थस्य व्यवहारोपलिङ्गनमभियोक्तुश्चार्थसामर्थ्यम् ।

म्रियेत । तस्य, प्रतिदेशेन वचनेन, पुत्रो भ्राता वा अभिगम्य निक्षेपं याचेत, चेदिति शेषः, दाने शुद्धिः तदा तदर्पणे कारोरानृण्यं भवति । अन्यथा तदपलापे, निक्षेपं स्वामिने, स्तेयदण्डं च राज्ञे, दद्यात् ।

प्रव्रज्याभिमुख इत्यादि । सुबोधम् । **कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनमिति** । स्वनिक्षेपद्रव्यस्य यल्लक्षणं पूर्वकृतं तद्दर्शनेन वा तदुपलम्भेन वा कारुगृहान्निक्षेपं प्रत्याहरेत् । **बालिशजातीयो** वेति । मूर्खप्रायो जनः, रात्रौ, राजदायिकाङ्क्षणभीतः राजदायिना राज्ञेऽर्पयिष्यता राजामात्यादिना यत् काङ्क्षणमभिलषणं तेन हेतुना भीतः, सारं रत्नादि प्रशस्तं वस्तु, अस्य कारोः, हस्ते निक्षिप्य अपगच्छेत् । सः निक्षेप्ता, बन्धनागारगतः राजदाय्याकाङ्क्षितसारद्रव्यानुपहरणात् कारणान्तराद् वा कारागारं प्राप्तः, एनं सारं याचेत । चेदिति शेषः । दाने तदा प्रत्यर्पणे शुचिः कारुः । अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

अप्रत्यर्पितनिक्षेपादिकस्य कारोर्मरणे त्वाह — **अभिज्ञानेन** चेति । निक्षेपतद्ग्राहिकारुलक्षणाद्यभिज्ञानकथनेन, अस्य कारोः, गृहे, जनं तत्पुत्रादिम्, उभयं निक्षेपं सारं च, याचेत । अन्यतरादाने अन्यतरानर्पणे, यथोक्तं पुरस्तात् पूर्वं यथोक्तं तथा कुर्यात् निक्षेपं स्तेयदण्डं च दद्यादित्यर्थः ।

सत्यासत्यनिश्चयार्थं धर्मस्थकरणीयमाह—**द्रव्यभोगानामिति** । तद्गृहोपभुज्यमानद्रव्याणाम्, आगमं च, अस्य निक्षेपाद्यपलापकस्य, अनुयुञ्जीत धर्मस्थः । तस्य चार्थस्य अनुयुक्तनिवेदितस्य चार्थस्य, व्यवहारोपलिङ्गनं व्यव-

एतेन मिथस्समवायो व्याख्यातः ।

तस्मात् साक्षिमदच्छन्नं कुर्यात् सम्यग्विभाषितम् ।
स्वे परे वा जने कार्यं देशकालाग्रवर्णतः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
द्वादशोऽध्यायः औपनिधिकम्,
आदितः एकोनसप्ततितमः ॥

हारैर्न्यायैः सत्यासत्यत्वानुमानं, कर्तव्यमिति शेषः । अभियोक्तुश्चार्थसामर्थ्यम् अमुकद्रव्यनिक्षेप्ताहमिति वदितुस्तथाविधद्रव्यनिक्षेपणयोग्यत्वं च, विभावनीयमिति शेषः ।

निक्षेपापलापोक्तविधानदिशा रहस्यऋणदानगान्धर्वविवाहाद्यपलापेष्वपि सत्यासत्यनिर्णयोपाया ऊहनीया इत्याह—**एतेने**त्यादि ।

अध्यायप्रान्ते श्लोकमाह — **तस्मादि**ति । तस्माद् वस्त्वपलापसम्भवात् सत्यासत्यनिर्णयस्य दुस्साधत्वाच्च, कार्यं, साक्षिमद्, अच्छन्नं, स्वे परे वा स्वजने परजने च, देशकालाग्रवर्णतः देशतः कालतः संख्यातो रूपतश्च, सम्यग्, विभाषितं विविच्य कथितं कुर्याद् वस्त्वपलापस्य परिहारार्थं परिज्ञानार्थं च ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
द्वादशोऽध्यायः, औपनिधिकम्,
आदितः एकोनसप्ततितमः ॥

६५. प्रक. दासकर्मकरकल्पः ।

उदरदासवर्जमार्यप्राणमप्राप्तव्यवहारं शूद्रं विक्रयाधानं नयतः स्वजनस्य द्वादशपणो दण्डः । वैश्यं द्विगुणः । क्षत्रियं त्रिगुणः । ब्राह्मणं चतुर्गुणः । परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतॄणां च ।

म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा । न त्वेवार्यस्य दासभावः ।

अथवार्यमाधाय कुलबन्धन आर्याणामापदि निष्क्रयं चाधिगम्य बालं साहाय्यदातारं वा पूर्वं निष्क्रीणीरन् ।

दासकर्मकरकल्प इति सूत्रम् । दासाः गर्भदासाः कर्मकराः कर्षकगोपालादयः तेषां कल्पः आधानविक्रयादिविधानम् उच्यत इति सूत्रार्थः । 'पतिमत्या पुत्रवत्या च स्त्रिया दासाहितकाभ्याम्' इति विवादपदनिबन्धे मनुष्याणामाधानमुक्तम् । विक्रीतक्रीतानुशये च विक्रय उक्तः । तत्र क आधातव्यो विक्रेतव्यो वेत्येतदधुनाभिधीयते ।

उदरेत्यादि । उदरदासवर्जम् अशननिरुपायोऽन्नाच्छादनदानेन रक्ष्यमाण उदरदासः तद्वर्जम्, आर्यप्राणम् आर्यजीवितम्, अप्राप्तव्यवहारं, शूद्रं, विक्रयाधानं नयतः विक्रीणानस्यादधानस्य च, स्वजनस्य, द्वादशपणो दण्डः, वैश्यं द्विगुणः वैश्यं विक्रयाधानं नयतः स्वजनस्य चतुर्विंशतिपणः । क्षत्रियं त्रिगुणः क्षत्रियं विक्रयाधानं नयतः षट्त्रिंशत्पणः । ब्राह्मणं चतुर्गुणः विक्रयाधानं नयतोऽष्टाचत्वारिंशत्पणः । परजनस्य अस्वजनस्य यथोक्तं कुर्वतः, पूर्वमध्यमोत्तमवधाः यथाक्रमं प्रथमसाहसो मध्यमसाहस उत्तमसाहसो घातश्च, दण्डाः । क्रेतृश्रोतॄणां च क्रेतॄणां शूद्रादिं मूल्यदानेन स्वीकुर्वतां तत्साक्षिणां च, पूर्वमध्यमोत्तमवधा दण्डाः ।

म्लेच्छानामिति । म्लेच्छाः अनार्याः कृषिशस्त्रजीविनो वन्याः तेषां विषये, अदोषः प्रजां विक्रेतुमाधातुं वा स्वीयप्रजाविक्रयाधानं न दोषाय । आर्यस्य जनस्य, दासभावः नत्वेव नैवापादनीयः ।

आपत्कल्पमाह—अथवेति । कुलबन्धने कुलस्य कृच्छ्रप्राप्तौ, आर्याणामापदि बहूनामार्याणां विपत्प्राप्तौ च, आर्यम् आधाय आपन्निवृत्त्यपेक्षितधनग्रहणेन धनिके आहितं कृत्वा नतु विक्रीय, निष्क्रयं चाधिगम्य धनिकप्रत्यर्पणीये धने हस्तप्राप्ते सति, बालम् आहितपूर्वं कुमारं, साहाय्यदातारं वा स्वयमाधीभावेन कृतोपकारमबालमपि वा, पूर्वं निष्क्रीणीरन् प्रथमं धनं दत्वा प्रत्यानयेयुः शान्तविपदां तन्निष्क्रयणमेव प्रथमानुष्ठेयं कृत्यमित्यर्थः ।

सकृदात्माधाता निष्पतितः सीदेत् । द्विरन्येनाहितकः । सकृदुभौ परविषयाभिमुखौ ।

वित्तापहारिणो वा दासस्यार्यभावमपहरतोऽर्धदण्डः । निष्पतितप्रेतव्यसनिनामाधाता मूल्यं भजेत ।

प्रेतविण्मूत्रोच्छिष्टग्राहणमाहितस्य नग्नस्नापनं दण्डप्रेषणमतिक्रमणं च स्त्रीणां मूल्यनाशकरम् । धात्रीपरिचारिकार्धसीतिकोपचारिकाणां च मोक्षकरम् । सिद्धमुपचारकस्याभिप्रजातस्य अपक्रमणम् ।

धात्रीमाहितिकां वाकामां स्ववशामधिगच्छतः पूर्वः साहसदण्डः, परवशां मध्यमः । कन्यामाहितिकां वा स्वयमन्येन वा दूषयतः मूल्यनाशः शुल्कं तद्द्विगुणश्च दण्डः ।

सकृदात्माधाता निष्पतितः सीदेदिति । धनग्रहणेन स्वयमेवात्मानमाधिं कृत्वा धनिकसकाशात् सकृदपसृतश्चेत् पुनर्धनिकमुपगन्तुं नार्हेत्, सद्य एव तदृणं निर्यातयेच्चेत्यर्थः । **द्विरिति** । अन्येनाहितकः, द्विः, निष्पतितः सीदेत् । **सकृदिति** । उभौ आत्माधातान्याहितकश्च, सकृत् परविषयाभिमुखौ परविषयगामिनौ, सीदेतामिति विपरिणतसम्बन्धः ।

वित्तापहारिणो वेति । स्वामिवित्तमपहरतो, दासस्य गर्भदासस्य, आर्यभावमपहरतोऽर्धदण्डः आर्यद्रव्यहारिस्तेनदण्डस्यार्धं दण्डो भवति । आर्यद्रव्यमपहरत इति क्वचित् पाठः । निष्पतितप्रेतव्यसनिनाम् आधिग्राहकदोषान्निष्पतितस्य देशान्तरगतस्य प्रेतस्य मृतस्य व्यसनिनो मद्यद्यूतादिव्यसनप्राप्तस्य च दासस्य, मूल्यम्, आधाता भजेत ।

प्रेतविण्मूत्रोच्छिष्टग्राहणमिति । आहितस्य प्रेतादिग्राहणं, स्त्रीणाम् आहितानां, नग्नस्नापनं विवस्त्रपुरुषस्नापनं, दण्डप्रेषणं लगुडताडनम्, अतिक्रमणं च उपभोगश्च, मूल्यनाशकरम् । **धात्रीत्यादि** । धात्री उपमाता परिचारिका शुश्रूषिका अर्धसीतिका कर्षकस्त्री उपचारिका आस्तरणवीजनाद्युपचारकर्त्री एतासामाहितानां, च मोक्षकरम् अर्थात् प्रेतविण्मूत्रादिग्राहणादिकम् । **सिद्धमिति** । दास्याः भक्तदायी भर्ता भवंस्तेनैव वेतनेन दासीस्वामिनः कर्म कुर्वाण उपचारकः उपचारकस्य, अभिप्रजातस्य दास्यां प्रजामुत्पादितवतः, अपक्रमणम् अपूर्णेऽपि कालेऽपसरणं सिद्धम् ।

धात्रीमाहितिकां वेति । ताम्, अकामां, स्ववशाम् अभर्तृवशाम्, अधिगच्छतः, पूर्वः साहसदण्डः । परवशां भर्तृवशाम् अधिगच्छतः, मध्यमः

आत्मविक्रयिणः प्रजामार्यां विद्यात्। आत्माधिगतं स्वामिककर्माविरुद्धं लभेत, पित्र्यं च दायम्। मूल्येन चार्यत्वं गच्छेत्। तेनोदरदासाहितकौ व्याख्यातौ।

प्रक्षेपानुरूपश्चास्य निष्क्रयः।

दण्डप्रणीतः कर्मणा दण्डमुपनयेत्।

आर्यप्राणो ध्वजाहृतः कर्मकालानुरूपेण मूल्यार्धेन वा विमुच्येत।

गृहजातदायागतलब्धक्रीतानामन्यतमं दासमूनाष्टवर्षं विबन्धुमकामं नीचे कर्मणि विदेशे दासीं वा सगर्भामप्रतिविहितगर्भभर्मण्यां विक्रयाधानं नयतः पूर्वः साहसदण्डः, क्रेतृश्रोतॄणां च।

कन्यामाहितिकां चेत्यादि। तां, स्वयमतिक्रामतोऽन्येनातिक्रामयतो वा, मूल्यं नश्यति। शुल्कं कन्यायै तेन दातव्यं भवति, शुल्कद्विगुणश्च दण्डो राज्ञे दातव्यः।

आत्मविक्रयिण इति। तस्य, प्रजाम् आत्मविक्रयात् प्रागुत्पन्नमपत्यम्, आर्यां विद्याद् अदासीं जानीयात्। **आत्माधिगतमि**त्यादि। आत्मविक्रयी स्वामिकर्माविरोधेनात्मनार्जितं धनं पितृदायं च लभेत। मूल्यदानेन दासभावमोक्षं च प्रतिपद्येत। **तेनोदरदासाहितकौ** व्याख्याताविति। तयोरप्यात्माधिगतलाभः पितृदायलाभ आर्यत्वप्रत्यापत्तिश्च भवतीत्यर्थः।

प्रक्षेपेत्यादि। अस्य आत्मविक्रयिणः, निष्क्रयः प्रक्षेपानुरूपः आत्ममोक्षणार्थं देयद्रव्यं विक्रयकालकृतपरिभाषानुरोधि भवेत्।

दण्डप्रणीत इति। यस्य दण्डः प्रणीतः सः, कर्मणा दण्डमुपनयेत् धनदानाशक्तौ कर्मकरणेन दण्डं निर्यातयेत्।

आर्यप्राण इति। अभिजातः, ध्वजाहृतः युद्धप्रगृहीतः, कर्मकालानुरूपेण मूल्यार्धेन विमुच्येत कर्मणः कालस्य चानुरूप्येण मूल्यं किमपि परिकल्प्य तदर्धदानेन मोक्षं लभेत।

गृहजातेत्यादि। गृहजातो दायागतः लब्धः क्रीत इति चतुर्णाम् अन्यतमं दासम्, ऊनाष्टवर्षम् अपूर्णाष्टवयसं, विबन्धुं बन्धुहीनम्, अकामं, नीचे कर्मणि, नयतो नियोजयतः, विदेशे विक्रयाधानं नयतश्च, दासीं वा सगर्भाम्, अप्रतिविहितगर्भभर्मण्याम् असंविहितप्रसवशुश्रूषापेक्षितद्रव्यां, विक-

दासमनुरूपेण निष्क्रयेणार्यमकुर्वतो द्वादशपणो दण्डः। संरोधश्चाकारणात्। दासद्रव्यस्य ज्ञातयो दायादाः। तेषाम् अभावे स्वामी।

स्वामिनः स्वस्यां दास्यां जातं समातृकम् अदासं विद्यात्। गृह्या चेत् कुटुम्बार्थचिन्तनी, माता भ्राता भगिनी चास्याः अदासाः स्युः।

दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्डः अन्यत्र स्वयंवादिभ्यः। इति दासकल्पः।

कर्मकरस्य कर्मसम्बन्धमासन्ना विद्युः। यथासम्भाषितं वेतनं लभेत। कर्मकालानुरूपमसम्भाषितवेतनम्। कर्षकः सस्यानां, गोपालकः सर्पिषां, वैदेहकः पण्यानामात्मना व्यवहृतानां, दशभागमसम्भाषितवेतनो लभेत। सम्भाषितवेतनस्तु यथासम्भाषितम्।

याधानं नयतः, पूर्वः साहसदण्डः। क्रेतृश्रोतॄणां च, पूर्वः साहसदण्ड इति संबध्यते।

दासमिति। तम्, अनुरूपेण निष्क्रयेण, आर्यमकुर्वतः दास्यादमोचयतः, द्वादशपणो दण्डः। **संरोधश्चाकारणादिति**। आकारणमाह्वानं कृत्वा बन्धुभिस्तस्य सम्भूयरोधनेनोपालम्भश्च कार्यः। **दासद्रव्यस्येति**। दासधनस्य, ज्ञातयो दासबन्धवो, दायादाः दायहराः। तेषामभावे स्वामी दायहरः।

स्वामिनः स्वस्यां दास्यामित्यादि। स्वामी यदि स्वीयायां दास्यां पुत्रं जनयेत्, तर्हि स पुत्रो दासो न भवति, सा च दासी दास्यान्मुच्येत। **गृह्या चेत् कुटुम्बार्थचिन्तनीति**। सा दासी गृहासक्ता कुटुम्बमर्थं च यदि चिन्तयेद्, अस्याः माता भ्राता भगिनी च, अदासाः स्युः दास्यनिर्मुक्ताः स्युः।

दासं दासीं वा निष्क्रीयेत्यादि। सकृद् विक्रीतमाहितं वा दासं तथाविधां दासीं वा निष्क्रयदानेन प्रत्यापद्य पुनस्तौ विक्रीणानस्यादधानस्य च द्वादशपणो दण्डः। **अन्यत्र स्वयंवादिभ्य इति**। यदि निष्क्रीताः स्वात्मानं पुनर्विक्रेतव्यमाधातव्यं च स्वयं वदेयुस्तदा तद्विक्रयाधानयोर्न दोषः। **इति दासकल्प इति**। व्याख्यात इति शेषः।

कर्मकरकल्पमाह — **कर्मकरस्येति**। कर्षकगोपालकादेः कर्मकरस्य, कर्मसम्बन्धं कर्मस्वभियोगम्, आसन्ना विद्युः तदन्तिकस्था भूत्वा उपलभेरन्। यथासंभाषितं परिभाषितप्रकारं वेतनं लभेत, कर्मकरः। असंभाषितवेतनं, कर्मकालानुरूपं कर्मणः तत्कालस्य चानुगुणं, लभेत। तच्च कियदित्याकाङ्क्षाया-

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिराशाकारिकवर्गस्तु यथान्यस्तद्विधः कुर्यात्। यथा वा कुशलाः कल्पयेयुः तथा वेतनं लभेत। साक्षिप्रत्ययमेव स्यात्। साक्षिणामभावे यतः कर्म ततोऽनुयुञ्जीत।

वेतनादाने दशबन्धो दण्डः, षट्पणो वा। अपव्ययमाने द्वादशपणो दण्डः पञ्चबन्धो वा।

नदीवेगज्वालास्तेनव्यालोपरुद्धः सर्वस्वपुत्रदारात्मदानेनार्तस्त्रातारमाहूय निस्तीर्णः कुशलप्रदिष्टं वेतनं दद्यात्। तेन सर्वत्रार्तदानानुशया व्याख्याताः।

माह — कर्षक इति। असंभाषितवेतनः, कर्षकः, आत्मना, व्यवहृतानां साधितानां, सस्यानां, दशभागं, लभेत। गोपालकः सर्पिषां दशभागं, लभेत। वैदेहकः पण्यानां दशभागं लभेत। संभाषितवेतनस्तु कर्षकादिः, यथासंभाषितं दशभागान्न्यूनमधिकं वा लभेत।

कारुशिल्पीत्यादि। कार्वादयः षट् प्रतीताः तदादिः, आशाकारिकवर्गः आशया कारिका क्रिया येषां त आशाकारिकाः तेषां वर्गः, यथान्यस्तद्विधः तज्जातीयोऽपर इव कुर्यात्, कर्म। यथा वा कुशलाः तत्कर्मगुणविशेषज्ञाः कल्पयेयुः स्थापयेयुरेतावद् देयमिति, तथा वेतनं लभेत। **साक्षिप्रत्ययमेव स्यादिति**, अन्योन्यविप्रतिपत्तौ साक्षिप्रमाणकमेव वेतनं देयम्। सांक्षिणामभावे, यतः कर्म ततोऽनुयुञ्जीत यत्र तादृशं कर्म कृतं तत्र कियद् दत्तमिति पृष्ट्वा जानीयात्।

वेतनादाने इति। वेतनस्याप्रदाने, दशबन्धः न्याय्यवेतनदशभागः, षट्पणो वा, दण्डः। अपव्ययमाने गृहीत्वा वेतनमगृहीतं वदति कर्मकरे, द्वादशपणो दण्डः, पञ्चबन्धो वा वेतनपञ्चभागो वा, दण्डः।

नदीवेगेत्यादि। नदीवेगादिभिश्चतुर्भिरापत्स्थानैरुपरुद्धः, आर्त्तः, सर्वस्वपुत्रदारात्मदानेन त्रातारमाहूय 'यो मां रक्षति तस्मै सर्वस्वादिकं दास्यामि' इति प्रतिज्ञया रक्षकमाहूय, निस्तीर्णः आहूतेन रक्षितः, कुशलप्रदिष्टं निपुणनिर्दिष्टं वेतनं दद्याद्, रक्षकाय। यथाप्रतिज्ञातं दानं निस्तरणोत्तरकालेऽनुशयानस्य कर्तुमनिच्छतोऽयं विधिः। एवमन्येष्वपि आर्तदानानुशयेषु विधिर्द्रष्टव्य इत्याह — **तेनेत्यादि**।

लभेत पुंश्चली भोगं सङ्गमस्योपलिङ्गनात् ।
अतियाच्ञा तु जीयेत दौर्मत्याविनयेन वा ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे त्रयोदशोऽध्यायः
दासकर्मकरकल्पो दासकल्पः कर्मकरकल्पे स्वाम्यधिकारः,
आदितः सप्ततितमोऽध्यायः ॥

अध्यायान्ते श्लोकमाह — लभेतेति । पुंश्चली बन्धकी, भोगं मैथुनभृतिं, लभेत, सङ्गमस्य उपलिङ्गनात् चिह्नेन विभावनात् । अतियाच्ञा तु अतिमात्रभृतिप्रार्थिनी तु पुंश्चली, जीयेत दण्ड्येत । दौर्मत्याविनयेन वा जीयेत दुर्बुद्धित्वप्रयुक्तेन पुरुषकामप्रातिकूल्याचरणेन च दण्ड्येत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे त्रयोदशोऽध्यायः
दासकर्मकरकल्पो दासकल्पः कर्मकरकल्पे स्वाम्यधिकारः,
आदितः सप्ततितमोऽध्यायः ॥

६६. प्रक. कर्मकरकल्पः, सम्भूयसमुत्थानम्।

गृहीत्वा वेतनं कर्म अकुर्वतो भृतकस्य द्वादशपणो दण्डः। संरोधश्चाकारणात्।

अशक्तः कुत्सिते कर्मणि व्याधौ व्यसने वा अनुशयं लभेत, परेण वा कारयितुम्। तस्य व्ययकर्मणा लभेत भर्ता वा कारयितुम्।

नान्यस्त्वया कारयितव्यो मया वा नान्यस्य कर्तव्यम् इत्यवरोधे भर्तुरकारयतो भृतकस्याकुर्वतो वा द्वादशपणो दण्डः। कर्मनिष्ठापने भर्तुरन्यत्र गृहीतवेतनो नासकामः कुर्यात्।

उपस्थितमकारयतः कृतमेव विद्याद् इत्याचार्याः।

अथ दासकर्मकरकल्पस्य शेषोऽस्मिन्नध्याय आदावुच्यते। भक्तवेतनमन्वहमगृहीत्वा कर्म कुर्वतो विधिरुक्तः पूर्वाध्याये। इह तु गृहीतभक्तवेतनस्य कर्माभिधीयते।

गृहीत्वेत्यादि। सुबोधम्। **संरोधश्चाकारणादिति**। आहूय बलादुपरुध्य वा तं कर्म कारयेत्।

यत्कर्मकरणाय वेतनं गृहीतं तत्कर्मकरणासामर्थ्ये, कुत्सिते वा सति तस्मिन् कर्मणि व्याध्युद्भवे वा पुत्रविपत्त्यादिव्यसनसम्भवे वा कर्म कर्तव्यं त्यजन् परेण वा कारयन् कर्मकरो न दुष्यतीत्याह — **अशक्त** इत्यादि। **तस्येति**। तस्य व्ययकर्मणा अनुशयिहस्ताद् भृतिव्ययक्रियया, भर्ता वा कारयितुं लभेत परेण तत्कर्मानुष्ठापयितुमर्हेत्।

'मदन्यस्त्वया कर्म न कारयितव्यः, त्वदन्यस्य च मया कर्म न कर्तव्यम्' इति भर्तृभृतकयोः समयनिर्बन्धे सति भर्तुः कर्माकारयतो भृतकस्य चाकुर्वतो द्वादशपणो दण्ड इत्याह — **नान्यस्त्वया कारयितव्यः** इत्यादि। **कर्मेत्यादि**। कर्मनिष्ठापन इत्यपपाठः कर्मानिष्ठापन इत्येव युक्तः पाठः। गृहीतवेतनः, भर्तुः कर्मानिष्ठापने कर्मणोऽपरिसमापने, असकामोऽन्यत्र न कुर्याद् भर्त्रनिच्छयान्यत्र कर्म नानुतिष्ठेत्।

उपस्थितमिति। अवरोधानुरोधेन कर्म कर्तुमुपस्थितं कर्मकरम्, अकारयतः भर्तुः, कृतमेव विद्याद् अकृतमपि कर्म कृतं जानीयात्, कर्मार्थं पूर्वदत्तं वेतनमपैतीत्यर्थः। इत्याचार्या वदन्तीति शेषः।

नेति कौटल्यः। कृतस्य वेतनं, नाकृतस्यास्ति। स चेदल्पमपि कारयित्वा न कारयेत्, कृतमेव अस्य विद्यात्। देशकालातिपातनेन कर्मणामन्यथाकरणे वा नासकामः कृतमनुमन्येत। सम्भाषितादधिकक्रियायां प्रयासं न मोघं कुर्यात्।

तेन सङ्घभृता व्याख्याताः। तेषामाधिः सप्तरात्रमासीत। ततोऽन्यमुपस्थापयेत्। कर्मनिष्पाकं च। नचानिवेद्य भर्तुः सङ्घः कञ्चित् परिहरेद्, उपनयेद् वा। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः। सङ्घेन परिहृतस्यार्धदण्डः। इति भृतकाधिकारः।

स्वमतमाह — नेति कौटल्य इति। कुत इत्याह — कृतस्येति। कृतस्य वेतनमस्ति, अकृतस्य वेतनं नास्ति। सः भर्ता, अल्पमपि किञ्चिदपि कर्म कारयित्वा, न कारयेच्चेद् अर्थाच्छेषम्, अस्य भर्तुः कर्मेति शेषः, कृतमेव विद्यात्। देशकालातिपातनेनेति। क्लृप्तदेशकालातिक्रामणेन करणे, कर्मणाम् अन्यथाकरणे वा, असकामः अनिच्छन्, कृतं नानुमन्येत। सम्भाषितादधिकक्रियायां, प्रयासं तद्विषयं श्रमं, मोघं वन्ध्यं, न कुर्याद् यत्किञ्चिदधिकं तदर्थे वेतनं दद्यादित्यर्थः। 'प्रयासं मोघं कुर्यादि'ति पाठे तु स्पष्ट एवार्थः।

तेनेति। उक्तेन भृतकस्य विधिना, सङ्घभृताः संहत्य भृतिग्रहणेन परकीयकर्मकारिणो भृतकाः, व्याख्याताः, तेष्वपि स एव विधिर्योज्य इत्यर्थः। तेषामाधिरिति। सङ्घभृतानाम्, आधिः अधिष्ठानं बन्धो वा, सप्तरात्रम् आसीत। ततः तदनन्तरम्, अन्यं भृतकसङ्घम्, उपस्थापयेत् सन्निधापयेत्। कर्मनिष्पाकं च पूर्वसङ्घकृतकर्मपरिणामं च, उपस्थापयेद् अवगच्छेत्। नचानिवेद्येति। सङ्घः, भर्तुरनिवेद्य, कञ्चित् सङ्घावयवं, नच परिहरेत् नैव वर्जयेद् नचोपनयेद् वा। अपनयेदित्यपपाठो नूनम्। तस्य उक्तविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः, सङ्घस्य। सङ्घेन परिहृतस्य अनिवेद्य भर्तुरितीहानुवर्तते भर्तारमनिवेद्य गतस्येत्यर्थः, अर्धदण्डः द्वादशपणो दण्डः। अथवा परिहारप्रयोजकापराधनिमित्तोऽयं दण्डो बोद्धव्यः। इति भृतकाधिकार इति। व्याख्यात इति शेषः।

सम्भूयसमुत्थानमिति सूत्रम्। बहूनां सम्भूय कचित् कर्मणि प्रवृत्तिरिति सूत्रार्थः। तत्कर्तारश्च द्विप्रकाराः परकर्मकराः स्वकर्मकराश्चेति। तत्रोक्ताः पूर्वे। परास्त्विहाभिधीयन्ते।

सङ्घभृताः सम्भूयसमुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन् ।

कर्षकवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः । पुरुषोपस्थाने समग्रमंशं दद्युः । संसिद्धे तूद्धृतपण्ये सन्नस्य तदानीमेव प्रत्यंशं दद्युः । सामान्या हि पथि सिद्धिश्चासिद्धिश्च ।

प्रक्रान्ते तु कर्मणि स्वस्थस्यापक्रामतो द्वादशपणो दण्डः । न च प्राकाम्यमपक्रमणे ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेद्, दद्यात् प्रत्यंशमभयं च । पुनस्स्तेये प्रवासनमन्यत्र गमने च । महापराधे तु दूष्यवदाचरेत् ।

सङ्घभृता इति । समुदेत्य कर्मकराः, सम्भूयसमुत्थातारो वा समुदेत्य वाणिज्यादिकारिणो वा, यथासम्भाषितं वेतनं, विभजेरन्, समं वा विभजेरन्, सम्भाषणाभावे ।

कर्षकवैदेहका वेति । कृषीवला वणिजश्च, सस्यपण्यारम्भपर्यवसानान्तरे सस्यानां पण्यानां च आरम्भपर्यवसानयोरन्तरे मध्यकाले, सन्नस्य व्याधितस्य सङ्घिनः, यथाकृतस्य कर्मणः प्रत्यंशं यावत् कृतं कर्म तावतः प्रविभागं, दद्युः । पुरुषोपस्थाने कर्मकरणाय व्याधितप्रतिपुरुषोपस्थितौ, समग्रं पूर्णम्, अंशं दद्युः । **संसिद्धे त्विति** । उद्धृतपण्ये संसिद्धे देशान्तरविक्रयणाय समारोपितपण्ये शकटादौ प्रस्थानसज्जे सति, सन्नस्य व्याधितस्य सम्भूयवाणिज्यकारिणामन्यतमस्य, तदानीमेव प्रत्यंशं तदीयं पण्यभागं, दद्युः । कुतः, **सामान्या हि पथि सिद्धिश्चासिद्धिश्चेति** । मार्गे पण्यानां रक्षा चापायश्चानियतौ यतः ।

प्रक्रान्ते त्विति । कर्मणि सम्भूयसमुत्थानलक्षणे, प्रक्रान्ते सति, स्वस्थस्य, अपक्रामतः अपसरतः, द्वादशपणो दण्डः । दण्डं दत्त्वापि नापक्रमणे स्वाच्छन्द्यमित्याह — **नच प्राकाम्यमपक्रमण** इति ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेदिति । चोरान्तरैः सह चौर्यकर्मकरणविषये संभाषितप्रत्यंशं कमपि चोरं पूर्वदत्ताभयं कृत्वा तेनैव तत्सहचरांश्चोरान् ग्राहयेत् । **दद्यात् प्रत्यंशमभयं चेति** । तस्य ग्राहितचोरस्य प्रतिश्रुतमभयं प्रत्यंशं च यथासंभाषितं दद्यात् । पुनःस्तेये दत्ताभयचोरेण

याजकाः स्वप्रचारद्रव्यवर्जं यथासम्भाषितं वेतनं समं विभजेरन् ।

अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्ध्वं याजकः सन्नः पञ्चममंशं लभेत । सोमविक्रयादूर्ध्वं चतुर्थमंशम् । मध्यमोपसदः प्रवर्ग्योद्वासनादूर्ध्वं तृतीयमंशम् । मध्यादूर्ध्वमर्धमंशम् । सुत्ये प्रातस्सवनादूर्ध्वं पादोनमंशम् । माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । नीता हि दक्षिणा भवन्ति । बृहस्पतिसवनवर्जं प्रतिसवनं हि दक्षिणा दीयन्ते । तेनाहर्गणदक्षिणा व्याख्याताः ।

सन्नानामा दशाहोरात्राच्छेषभृताः कर्म कुर्युः । अन्ये वा स्वप्रत्ययाः ।

पुनश्चौर्ये कृते, अन्यत्र गमने च देशान्तरं गत्वा चौर्यकरणे च, प्रवासनं कार्यमिति शेषः । महापराधे दूष्यवदाचरेत्, महापराधं तं दूष्यवदुपांशु हन्यात् ।

याजका इति । ऋत्विजः, स्वप्रचारद्रव्यवर्जं स्वस्वव्यापारप्रातिस्विकदक्षिणाद्रव्यमपहाय, यथासंभाषितं वेतनं सामुदायिकं, समं तुल्यं विभजेरन् ।

ऋत्विजोऽग्निष्टोमादिक्रतुकर्मारम्भपर्यवसानान्तरे व्याधितस्यावान्तरतत्कर्मानुष्ठानावधिभेदेनांशभेदानाह — **अग्निष्टोमादिषु च क्रतुष्वित्यादि** । तत्र याजको दीक्षणाद् दीक्षाकर्मणः, ऊर्ध्वं सन्नः, स्वांशस्य पञ्चममंशं लभेत । सोमविक्रयाद् ऊर्ध्वं, चतुर्थमंशं लभेत । मध्यमोपसदः प्रवर्ग्योद्वासनात् मध्योपसत्सम्बन्धिनः प्रवर्ग्योत्सादनकर्मण ऊर्ध्वं, तृतीयमंशं लभेत । प्रवर्ग्योपासनादिति मातृकयोः पाठः । मध्यात् मध्योपसदनकर्मण ऊर्ध्वम्, अर्धमंशं लभेत । द्वितीयमंशमिति पाठे द्वितीयांशोऽर्धमेव । सुत्ये सुत्याहे, प्रातस्सवनादूर्ध्वं पादोनमंशं लभेत । माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत । **नीता हि दक्षिणा भवन्तीति** । माध्यन्दिनसवनकर्मणि निर्वृत्ते हि दक्षिणाः सर्वाः प्राप्ता भवन्ति । बृहस्पतिसवनवर्जं बृहस्पतिसवनमपहाय, प्रतिसवनं सवने सवने, दक्षिणा दीयन्ते हि । **तेनाहर्गणदक्षिणा व्याख्याता** इति । उक्तरीत्या याजककार्येष्वहीनयज्ञेष्वपि दक्षिणानयनानुरोधेन याजकांशाः कल्प्याः ।

सन्नानामिति । व्याधितानां भृतकानां कर्म, आ दशाहोरात्रात्, शेषभृताः अवशिष्टा भृतकाः, कुर्युः । अन्ये वा स्वप्रत्ययाः स्वामिप्रत्ययाः, कुर्युः ।

कर्मण्यसमाप्ते तु यजमानः सीदेत्, ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः ।

असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वः साहसदण्डः ।

अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः ॥
असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।
अदोषस्त्यक्तुमन्योन्यं कर्मसङ्करनिश्चयात् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे चतुर्दशोऽध्यायः
दासकर्मकरकल्पे भृतकाधिकारः सम्भूयसमुत्थानम्,
आदित एकसप्ततितमः ॥

कर्मणीति । यज्ञकर्मणि, असमाप्ते तु, यजमानः सीदेद् व्याधितो भवेच्चेत्, ऋत्विजः, कर्म समापय्य, दक्षिणां तदर्थां हरेयुः ।

असमाप्ते त्विति । कर्मणि असमाप्ते, याज्यं यजमानं त्यजतः याजकस्य, याजकं त्यजतः याज्यस्य वा, पूर्वः साहसदण्डः ।

विधिशेषं श्लोकाभ्यां वदन्नध्यायमुपसंहरति — **अनाहिताग्निरिति** । शतं गावो यस्य स शतगुः । शतगुरनाहिताग्निः शतगवधनः सन्नप्यकृताग्न्याधानः, सहस्रगुरयज्वा च सहस्रगवधनः सन्नप्यकृतयज्ञः, सुरापः मद्यपः, वृषलीभर्ता, ब्रह्महा, गुरुतल्पगः गुरुपत्नीगामी, असत्प्रतिग्रहे युक्तः असतः पापिष्ठजनात् प्रतिषिद्धद्रव्यस्य वा प्रतिग्रहे युक्तः आसक्तः, स्तेनः, कुत्सितयाजकः निन्दितान् यो याजयति स च, त्यक्तुमदोषः त्यागे दोषानुत्पादकः संसर्गानर्ह इत्यर्थः । कस्माद्, अन्योन्यं कर्मसङ्करनिश्चयात् कर्मदोषनिश्चयात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे चतुर्दशोऽध्यायः
दासकर्मकरकल्पे भृतकाधिकारः सम्भूयसमुत्थानम्,
आदित एकसप्ततितमः ॥

६७. प्रक. विक्रीतक्रीतानुशयः ।

विक्रीय पण्यमप्रयच्छतो द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः ।

पण्यदोषो दोषः । राजचोराग्न्युदकबाध उपनिपातः । बहुगुणहीनमार्तकृतं वाविषह्यम् ।

वैदेहकानामेकरात्रमनुशयः । कर्षकाणां त्रिरात्रम् । गोरक्षकाणां पञ्चरात्रम् । व्यामिश्राणाम् उत्तमानां च वर्णानां वृत्तिविक्रये सप्तरात्रम् ।

आतिपातिकानां पण्यानामन्यत्राविक्रेयमित्यविरोधेनानुशयो देयः । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः, पण्यदशभागो वा ।

क्रीत्वा पण्यमप्रतिगृह्णतो द्वादशपणो दण्डः, अन्यत्र दोषोपनिपाताविषह्येभ्यः । समानश्चानुशयः विक्रेतुरनुशयेन ।

विक्रीतक्रीतानुशय इति सूत्रम् । मूल्यग्रहणेन दत्तं विक्रीतं मूल्यदानेन गृहीतं क्रीतं तयोरनुशयो विसंवादोऽभिधीयत इति सूत्रार्थः । क्रयविक्रयविधिरध्यक्षप्रचारे प्रतिपादितः । तद्विषयोऽनुशयोऽनुशयदण्डश्चानुक्ताविहाभिधीयेते ।

विक्रीयेत्यादि । सुगमम् ।

दोषादीन् व्याचष्टे — **पण्यदोषो दोष** इत्यादि । बहुगुणहीनं बहुगुणां मूल्यहानिं प्राप्तम् । आर्तकृतम् अस्वस्थमानसकृतम् । शेषं सुगमम् ।

अनुशयकालेयत्तामाह — **वैदेहकानामि**त्यादि । वृत्तिविक्रये स्वजीविकाहेतुभूतभूमिविक्रये । शेषं सुबोधम् ।

आतिपातिकानामिति । कालपरिवासासहानां सद्योविक्रेयाणां, पण्यानां पुष्पक्षीरादीनाम्, अन्यत्राविक्रेयमिति परिवासदोषात् तथाविधं पण्यमन्यत्र विक्रेतुमर्हं न भवेदित्येतत् पर्यालोच्य, अविरोधेन तत्तत्पण्यरक्षानुकूल्येन, अनुशयो देयः । **तस्यातिक्रम** इत्यादि सुबोधम् ।

क्रीतानुशयमाह — **क्रीत्वा पण्यमि**त्यादि । सुबोधम् । विक्रेत्रनुशयं क्रेतुरतिदिशति — **समानश्चे**त्यादि ।

विवाहानां तु त्रयाणां पूर्वेषां वर्णानां पाणिग्रहणासिद्धमुपावर्तनम् । शूद्राणां च प्रकर्मणः । वृत्तपाणिग्रहणयोरपि दोषमौपशायिकं दृष्ट्वा सिद्धमुपावर्तनम् । न त्वेवाभिप्रजातयोः ।

कन्यादोषमौपशायिकमनाख्याय प्रयच्छतः षण्णवतिर्दण्डः शुल्कस्त्रीधनप्रतिदानं च ।

वरयितुर्वा वरदोषमनाख्याय विन्दतो द्विगुणः शुल्कस्त्रीधननाशश्च ।

द्विपदचतुष्पदानां तु कुष्ठव्याधिताशुचीनामुत्साहस्वास्थ्यशुचीनामाख्याने द्वादशपणो दण्डः ।

आ त्रिपक्षादिति चतुष्पदानामुपावर्तनम्, आ संवत्सरादिति मनुष्याणाम् । तावता हि कालेन शक्यं शौचाशौचे ज्ञातुमिति ।

विवाहानां त्विति । त्रयाणां पूर्वेषां वर्णानां ब्राह्मणक्षत्रियवैश्यानां, विवाहानां विवाहविषये, पाणिग्रहणासिद्धमुपावर्तनं पाणिग्रहणेनावरुद्धं पाणिग्रहणावधिकं कन्याप्रत्याहरणं भवति । पाणिग्रहणात् सिद्धमिति पाठे पाणिग्रहणमवधीकृत्येति ल्यब्लोपे पञ्चमी । शूद्राणां च, प्रकर्मणः योनिक्षतिमवधीकृत्य, उपावर्तनं भवति । **वृत्तपाणिग्रहणयोरपीति** । तथाभूतयोरपि स्त्रीपुंसयोः, दोषमौपशायिकम् उपशायिकासंबद्धं दोषं योनिक्षतिक्लैब्यादिरूपं दृष्ट्वा साक्षात्कृत्य, सिद्धमुपावर्तनम् । **न त्वेवाभिप्रजातयोरिति** । जनितप्रजयोरुपावर्तनं नास्त्येव ।

कन्यादोषमित्यादि । षण्णवतिः षण्णवतिपणः । शुल्कस्त्रीधनप्रतिदानं च शुल्कस्त्रीधनयोर्गृहीतयोः प्रत्यर्पणं च ।

वरयितुर्वेत्यादि । विन्दतः परिणयतः ।

द्विपदचतुष्पदानां त्विति । तेषां, कुष्ठव्याधिताशुचीनाम्, उत्साहस्वास्थ्यशुचीनामाख्याने उत्साहस्वस्थत्वशुचित्वकथने, द्वादशपणो दण्डः ।

आ त्रिपक्षादितीति । पक्षत्रयावधिकमित्येवं चतुष्पदानामुपावर्तनम् । आ संवत्सरादिति संवत्सरावधिकमित्येवं, मनुष्याणामुपावर्तनम् । **तावता हीत्यादि** । शौचाशौचे दुष्टत्वमदुष्टत्वं च ।

दाता प्रतिग्रहीता च स्यातां नोपहतौ यथा ।
दाने क्रये वानुशयं तथा कुर्युः सभासदः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
पञ्चदशोऽध्यायः विक्रीतक्रीतानुशयः,
आदितो द्विसप्ततितमः ॥

अध्यायप्रान्ते श्लोकमाह — दातेत्यादि । कुर्युः व्यवस्थापयेयुः । सभासदः धर्मस्थाः । शेषं सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चदशोऽध्यायः विक्रीतक्रीतानुशयः,
आदितो द्विसप्ततितमः ॥

६८—७०. प्रक. दत्तस्यानपाकर्म, अस्वामिविक्रयः, स्वस्वामिसम्बन्धः ।

दत्तस्याप्रदानमृणादानेन व्याख्यातम् ।

दत्तमव्यवहार्यमेकत्रानुशये वर्तेत । सर्वस्वं पुत्रदारम् आत्मानं प्रदायानुशयिनः प्रयच्छेत् । धर्मदानमसाधुषु, कर्मसु चौपघातिकेषु वा । अर्थदानमनुपकारिषु अपकारिषु वा । कामदानमनर्हेषु च । यथा च दाता प्रतिग्रहीता च नोपहतौ स्यातां, तथानुशयं कुशलाः कल्पयेयुः ।

दण्डभयादाक्रोशभयादनर्थभयाद् वा भयदानं प्रतिगृह्णतः स्तेयदण्डः प्रयच्छतश्च । रोषदानं परहिंसायाम् । राज्ञामुपरि दर्पदानं च । तत्रोत्तमो दण्डः ।

दत्तस्यानपाकर्मेति सूत्रम् । 'तुभ्यमहं संप्रददे' इति प्रतिज्ञादि-पूर्वं वाचा दत्तस्य अप्रदानमिति सूत्रार्थः । क्रयविक्रयविषयस्तावदनुशय उक्तः, धर्मादिदानविषयस्त्वधुनाभिधीयते ।

दत्तस्याप्रदानमिति । तद्, ऋणादानेन व्याख्यातम् ऋणादानवद् द्रष्टव्यम् । दत्तमनपाकृतम् ऋणमिव साक्ष्यादिभिर्विभाव्य ग्राह्यमित्यर्थः ।

अनुशयविषयं दत्तमाह— दत्तमव्यवहार्यमित्यादि । वाग्दत्तं व्यव-हारायोग्यं चेद्, एकत्र अनुशये वर्तेत अनुशये एव केवले वर्तेत । न त्वनु-शयात् कदापि मुच्येतेत्यर्थः । सर्वस्वं पुत्रदारम् आत्मानं प्रदाय, अनुश-यिनः, प्रयच्छेत् पुनर्दद्यात् सर्वस्वादिकम् । धर्मदानमसाधुष्विति । अनु-शये वर्तेतेत्यनुवर्तते । साधव इति बुद्ध्या धर्मदानं तेषु प्रतिज्ञातम् असाधु-त्वज्ञानानन्तरमनुशये वर्तेत । कर्मसु चौपघातिकेषु वेति । गोरक्षादिप्रशस्त-कर्मार्थं धार्मिकत्वबुद्ध्या चोरपारदारिकादिषु कृतं धर्मदानम्, अनुशये वर्तेत । अर्थदानमनुपकारिष्वपकारिषु वेति, उपकारित्वबुद्ध्यानुपकारिषु अपकारिषु वा कृतमर्थदानम्, अनुशये वर्तेत । कामदानमनर्हेषु चेति, कामनिमित्तं दान-मनर्हेष्वर्हत्वबुद्ध्या कृतम् अनुशये वर्तेत । यथा चेत्यादि सुगमम् ।

दण्डभयादिति । ताडनभयाद्, आक्रोशभयात् निन्दनभयाद्, अन-र्थभयाद् वा रोगोन्मादाद्युत्पत्तिभयाद् वा, क्रियमाणं भयदानं, प्रतिगृह्णतः कृत्याभिचारादिनिवृत्तेः, प्रयच्छतश्च भीरोः, स्तेयदण्डः । रोषदानं परहिंसायामिति । कोपदानं परमारणार्थं, प्रतिगृह्णतः प्रयच्छतश्च स्तेयदण्डः इति संबध्यते । राज्ञामुपरि दर्पदानं चेति, नृत्तगीतादिकलाकुशलेभ्यो राजभिः

प्रातिभाव्यं दण्डशुल्कशेषमाक्षिकं सौरिकं कामदानं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् । इति दत्तस्यानपाकर्म ।

अस्वामिविक्रयस्तु । नष्टापहृतमासाद्य स्वामी धर्मस्थेन ग्राहयेत् । देशकालातिपत्तौ वा स्वयं गृहीत्वोपहरेत् । धर्मस्थश्च स्वामिनमनुयुञ्जीत — कुतस्ते लब्धमिति । स चेदाचारक्रमं दर्शयेत, न विक्रेतारं, तस्य द्रव्यस्यातिसर्गेण मुच्येत । विक्रेता चेद् दृश्येत, मूल्यं स्तेयदण्डं च । स चेदपसारमधिगच्छेदपसरेदापसारक्षयादिति । क्षये मूल्यं स्तेयदण्डं च दद्यात् ।

कृतात् पारितोषिकदानादधिकतरं पारितोषिकदानं च, कश्चित् कुर्याच्चेदिति शेषः । तत्र विषये उत्तमः उत्तमसाहसो दण्डः ।

प्रातिभाव्यमित्यादि । प्रातिभाव्यं वृथादानोपलक्षणं तद्, दण्डशुल्कशेषं दण्डशेषं शुल्कशेषं च, आक्षिकम् अक्षदेवनकृतमृणं, सौरिकं सुरापानकृतमृणं, कामदानं च नटनर्तकादिदत्तं च, रिक्थहरः पुत्रो दायादो वा, अकामो न दद्यात् । **इति दत्तस्यानपाकर्मेति** । व्याख्यातमिति शेषः ।

अस्वामिविक्रय इति सूत्रम् । अस्वामिकृतो विक्रयोऽस्वामिविक्रयः । सः तद्दण्डश्चाभिधीयत इति सूत्रार्थः ।

अस्वामिविक्रयस्त्विति । प्रतिपाद्यत इति शेषः । **नष्टापहृतमिति** । तद् द्रव्यम् आसाद्य कस्यचिद् वशे विद्यमानमुपलभ्य, स्वामी, धर्मस्थेन ग्राहयेद् अर्थाद् यस्य वशे द्रव्यं विद्यते तम् । धर्मस्थश्च, स्वामिनं सम्प्रति तद्द्रव्योपनेतारम्, अनुयुञ्जीत पृच्छेत्—कुतः ते त्वया लब्धमिति । स पृष्टो द्रव्यहस्तः, आचारक्रमं द्रव्यागमपरिपाटीं, दर्शयेत विभावयेच्चेत्, विक्रेतारं न दर्शयेत चेत्, तस्य द्रव्यस्य अतिसर्गेण स्वामिहस्तेऽर्पणेन, मुच्येत, न तु तस्य स्तेयदण्डः । **विक्रेतेति** । स चेद् दृश्येत, मूल्यं क्रेतुर्दद्यात्, स्तेयदण्डं च राज्ञे दद्यात् । **स चेदिति** । स विक्रेता अपसारमधिगच्छेच्चेत् अपराधिपदादात्मापसरणहेतुं विभावयेच्चेद् आत्मनो विक्रेतारमन्यं प्रदर्शयेच्चेदित्यर्थः, अपसरेद् अपक्रामेद् दण्डं विना । **आपसारक्षयादितीति** । अयमुत्तरोत्तरापसाराधिगमेनापसरणक्रमोऽपसारक्षयावधिकः सम्भवतीत्यर्थः । क्षये चरमोपलब्धस्य विक्रेतुरपसारानधिगमे सति, मूल्यं स्तेयदण्डं च दद्याद् अर्थात् स एव ।

नाष्टिकं च स्वकरणं कृत्वा नष्टप्रत्याहृतं लभेत। स्वकरणाभावे पञ्चबन्धो दण्डः। तच्च द्रव्यं राजधर्म्यं स्यात्।

नष्टापहृतमनिवेद्योत्कर्षतः स्वामिनः पूर्वः साहसदण्डः।

शुल्कस्थाने नष्टापहृतोत्पन्नं तिष्ठेत्। त्रिपक्षादूर्ध्वमनभिसारं राजा हरेत्, स्वामी वा स्वकरणेन।

पञ्चपणिकं द्विपदरूपस्य निष्क्रयं दद्यात्। चतुष्पणिकमेकखुरस्य। द्विपणिकं गोमहिषस्य। पादिकं क्षुद्रपशूनाम्। रत्नसारफल्गुकुप्यानां पञ्चकं शतं दद्यात्।

परचक्राटवीहृतं तु प्रत्यानीय राजा यथास्वं प्रयच्छेत्। चोरहृतमविद्यमानं स्वद्रव्येभ्यः प्रयच्छेत् प्रत्यानेतुमशक्तो वा। स्वयं ग्राहेणाहृतं प्रत्यानीय तन्निष्क्रयं वा प्रयच्छेत्।

नाष्टिकं चेति। नाष्टिकं नष्टवस्तुविषयं, स्वकरणं स्वत्वसाधकं साक्षिलेख्यादि, कृत्वा दर्शयित्वा, नष्टप्रत्याहृतं, लभेत। स्वकरणाभावे, पञ्चबन्धः तद्द्रव्यमूल्यपञ्चभागो दण्डः। तच्च द्रव्यं राजधर्म्यं राज्ञो न्यायप्राप्तं स्यात्।

नष्टापहृतमिति। तद् द्रव्यम्, अनिवेद्य स्वयं गृह्णतः, स्वामिनः पूर्वः साहसदण्डः।

शुल्कस्थान इति। तस्मिन्, नष्टापहृतोत्पन्नं, तिष्ठेत् स्थापितं भवेत्। त्रिपक्षादूर्ध्वम्, अनभिसारम् अभिसारोऽनुगामी तद्रहितं, राजा हरेत्। स्वामी वा स्वकरणेन स्वत्वविभावनेन हरेत्।

नष्टापहृतोत्पन्नस्य द्विपदादेर्मोचननिष्क्रयमाह — **पञ्चपणिकमिति**। द्विपदरूपस्य द्विपदो दासीदासादिः तद्व्यक्तेरेकस्याः, पञ्चपणिकं निष्क्रयं दद्यात्। तावन्निष्क्रयदानेन द्विपदरूपं मोचयेत्। चतुष्पणिकम्, एकखुरस्य अश्वखरोष्ट्रादेः। द्विपणिकं गोमहिषस्य। पादिकं क्षुद्रपशूनाम्। रत्नसारफल्गुकुप्यानां पञ्चकं शतं शतस्य पञ्चभागं निष्क्रयं दद्यात्।

परचक्राटवीहृतं त्विति। परचक्रेण आटविकेन च हृतं द्विपदचतुष्पदादिकं, प्रत्यानीय राजा यथास्वं यथायथं प्रयच्छेत्। चोरहृतमविद्यमानं लुप्तं द्रव्यं, स्वद्रव्येभ्यः तज्जातीयेभ्यः, प्रयच्छेत् स्वामिने, राजा प्रत्यानेतुं चोरसकाशात् प्रत्याहर्तुम्, अशक्तो वा अशक्तश्चेत्। स्वयं ग्राहेण आत्मनिर्ब-

परविषयाद् वा विक्रमेणानीतं यथाप्रदिष्टं राज्ञा भुञ्जीतान्यत्रार्यप्राणद्रव्येभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्च। इत्यस्वामिविक्रयः।

स्वस्वामिसम्बन्धस्तु। भोगानुवृत्तिरुच्छिन्नदेशानां यथास्वं द्रव्याणाम्।

यत् स्वं द्रव्यमन्यैर्भुज्यमानं दश वर्षाण्युपेक्षेत, हीयेतास्य अन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः।

विंशतिवर्षोपेक्षितमनुवसितं वास्तु नानुयुञ्जीत।

ज्ञातयः श्रोत्रियाः पाषण्डा वा राज्ञामसन्निधौ परवास्तुषु विवसन्तो न भोगेन हरेयुः; उपनिधिमाधिं निधिं निक्षेपं स्त्रियं सीमानं राजश्रोत्रियद्रव्याणि च।

न्धेन स्तेनग्रहणविषयेण अथवा स्तेनग्रहणाधिकृतेन, आहृतं प्रत्यानीय प्रयच्छेत्। तन्निष्क्रयं वा मुष्टद्रव्यमूल्यं वा प्रयच्छेत्, पूर्वोक्तासम्भवे।

परविषयाद्वेति। शत्रुदेशाद्, विक्रमेण आनीतं सैनिकहृतं धनं, राज्ञा, यथाप्रदिष्टं यथाज्ञप्तं, भुञ्जीत। **अन्यत्रार्यप्राणद्रव्येभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्चेति**। आर्यजीवितानां द्रव्याणि देवादीनां द्रव्याणि च तेभ्य एव पुनर्दापयेदित्यर्थः। इत्यस्वामिविक्रयः।

स्वस्वामिसम्बन्ध इति सूत्रम्। स्वस्वामिनोः संबन्धः न्यायाधिगमलक्षणोऽभिधीयत इति सूत्रार्थः।

स्वस्वामिसंबन्धस्त्विति। अधिक्रियत इति शेषः। **भोगानुवृत्तिरिति**। उच्छिन्नदेशानाम् उच्छिन्नसाक्षिकाणां, द्रव्याणां, यथास्वं यथायथं, भोगानुवृत्तिः अविच्छिन्नो भोगः, स्वत्वे प्रमाणं भवतीति वाक्यशेषः।

यदिति। यत् स्वं स्वीयं द्रव्यम् अन्यैर्भुज्यमानं, दश वर्षाणि उपेक्षेत, हीयेतास्य उपेक्षमाणस्य तद् द्रव्यं हीयेत। **अन्यत्र बालेत्यादि**। बालवृद्धव्याधितव्यसनिप्रोषितानां द्रव्यम् उपेक्षमाणानां न हीयेत, अबालादीनामपि द्रव्यं देशत्यागे राज्यविभ्रमे चोपेक्षमाणानां न हीयेत।

विंशतिवर्षोपेक्षितमिति। तथाविधम्, अनुवसितम् अविच्छिन्नाध्युषितं, वास्तु गृहं, नानुयुञ्जीत न प्रार्थयेत। इह वसितपदे संप्रसारणाकरणमार्षम्।

तत्रापवादमाह — **ज्ञातय** इत्यादि। अतिरोहितार्थम्।

आश्रमिणः पाषण्डा वा महत्यवकाशे परस्परमबाधमाना वसेयुः । अल्पां बाधां सहेरन् । पूर्वागतो वा वासपर्यायं दद्यात् । अप्रदाता निरस्येत ।

वानप्रस्थयतिब्रह्मचारिणामाचार्यशिष्यधर्मभ्रातृसमानतीर्थ्या रिक्थभाजः क्रमेण ।

विवादपदेषु चैषां यावन्तः पणा दण्डाः तावती रात्रीः क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि राज्ञश्चरेयुः । अहिरण्यसुवर्णाः पाषण्डाः साधवः । ते यथास्वमुपवासव्रतैराराधयेयुः अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणेभ्यः । तेषु यथोक्ता दण्डाः कार्याः ।

आश्रमिण इत्यादि । सुबोधम् । **अल्पां बाधां सहेरन्निति** । अमहति अवकाशे परस्परबाधमल्पं जायमानं क्षमेरन् । पूर्वागतो वा, वासपर्यायं वासवारं, दद्यात् नवागताय । अप्रदाता पूर्वागतः, निरस्येत बहिष्क्रियेत ।

वानप्रस्थयतिब्रह्मचारिणामित्यादि । तत्र धर्मभ्राता सखा, समानतीर्थ्यः समानगुरुकुलवासी । क्रमेण आचार्याभावे शिष्यः शिष्याभावे धर्मभ्रातेत्यादिक्रमेण । शेषं प्रतीतम् ।

विवादपदेषु चैषामिति । व्युत्क्रमागतानामाचार्यादीनां, विवादपदेषु रिक्थविषयेषु, यावन्तः पणाः दण्डाः पराजितानां शास्त्रोक्ताः, तावतीः तत्समानसंख्याः, रात्रीः, क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि क्षपणमुपवासः अभिषेकः स्नानम् अग्निकार्यं होमः महाकृच्छ्रं चान्द्रायणप्राजापत्यादिकं प्रशस्तव्रतं तैर्वर्धनानि श्रेयोयोजनानि, राज्ञश्चरेयुः राजार्थे कुर्युः, अर्थात् पराजिता आचार्यादयः । वर्तनानीति पाठे क्षपणादीनां महाकृच्छ्रान्तानां वर्तनानि अनुष्ठानानि राजार्थे कुर्युरित्यर्थः । **अहिरण्यसुवर्णा** इति । हिरण्यसुवर्णहीनाः, पाषण्डाः, साधवः धर्मशीलाः । ते कथञ्चिद् विवादपदेषु पराजयदण्डं प्राप्ता इत्यार्थं, यथास्वम् उपवासव्रतैः, आराधयेयुः धर्ममुपासीरन् राजश्रेयोर्थे । तत्रापवादमाह — **अन्यत्र पारुष्यस्तेयसाहससंग्रहणेभ्य** इति । वक्ष्यमाणवाक्पारुष्यदण्डपारुष्यस्तेयादिविवादव्यतिरेकेण । के तर्हि तेषां पारुष्यादिषु दण्डास्तत्राह — **तेष्विति** । तेषु विषये, यथोक्ताः पारुष्यादिप्रकरणोक्ताः, दण्डाः, कार्याः ।

प्रव्रज्यासु वृथाचारान् राजा दण्डेन वारयेत् ।
धर्मो ह्यधर्मोपहतः शास्तारं हन्त्युपेक्षितः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे षोडशोऽध्यायः
दत्तस्यानपाकर्म अस्वामिविक्रयः स्वस्वामिसम्बन्धः,
आदितस्त्रिसप्ततितमः ॥

अध्यायान्ते श्लोकमाह — प्रव्रज्यास्वित्यादि । प्रव्रज्यासु वृथाचारान् चतुर्थाश्रमेषु मिथ्याचारान् । शेषं सुगमम् ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे षोडशोऽध्यायः
दत्तस्यानपाकर्म अस्वामिविक्रयः स्वस्वामिसंबन्धः,
आदितस्त्रिसप्ततितमः ॥

७१. प्रक. साहसम् ।

साहसमन्वयवत्प्रसभकर्म । निरन्वये स्तेयमपव्ययने च ।

रत्नसारफल्गुकुप्यानां साहसे मूल्यसमो दण्ड इति मानवाः । मूल्यद्विगुण इत्यौशनसाः । यथापराध इति कौटल्यः ।

पुष्पफलशाकमूलकन्दपक्वान्नचर्मवेणुमृद्भाण्डादीनां क्षुद्रकद्रव्याणां द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः ।

कालायसकाष्ठरज्जुद्रव्यक्षुद्रपशुपटादीनां स्थूलकद्रव्याणां चतुर्विंशतिपणावरोऽष्टचत्वारिंशत्पणपरो दण्डः । ताम्रवृत्तकंसकाचदन्तभाण्डादीनां स्थूलकद्रव्याणां अष्टचत्वारिंशत्पणावरः षण्णवतिपरः पूर्वः

साहसमिति सूत्रम् । बलात् क्रियमाणं परस्वहरणादि साहसम् । यदाह नारदः —

> "सहसा क्रियते कर्म यत् किञ्चिद् बलदर्पितैः ।
> तत् साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥" इति ।

तदुच्यत इति सूत्रार्थः । तद् गताध्याये प्रस्तुतम् । तस्य स्वरूपं दण्डश्चात्राभिधीयते ।

साहसमिति । अन्वयवत्प्रसभकर्म अन्वयः अनेकसाधारण्यं तद्वतोऽनेकसाधारणस्य द्रव्यस्य प्रसभकर्म एकेनानेकान्तर्गतेन बलादपहरणं, साहसम् । निरन्वये असाधारणद्रव्ये परकीयद्रव्य इति यावत्, स्तेयं स्तेयव्यपदेश्यम् अर्थात् प्रसभहरणं प्रच्छन्नहरणं वा । अपव्ययने च परकीयं गृहीत्वा न गृहीतमित्यपलापे च विषये, स्तेयं भवति ।

रत्नसारफल्गुकुप्यानामित्यादि । मूल्यसमः रत्नादितत्तन्मूल्यतुल्यः । यथापराधः अपराधानुरूपः । शेषं सुगमम् ।

पुष्पफलेत्यादि । पुष्पादिषट्कं प्रतीतं चर्मभाण्डं वेणुभाण्डं मृद्भाण्डं चेति त्रिकम् एतदादीनां क्षुद्रकद्रव्याणां, साहसे, द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः द्वादशपणोऽधमदण्डः चतुर्विंशतिपण उत्तमदण्डः ।

स्थूलकद्रव्याणां दण्डमाह — **कालायसेत्यादि** । **ताम्रवृत्तेत्यादि** । ताम्रभाण्डवृत्तभाण्डकंसभाण्डकाचभाण्डगजदन्तभाण्डादीनां स्थूलकद्रव्याणां, साहसे, अष्टचत्वारिंशत्पणावरः षण्णवतिपरः, दण्ड इति वर्तते, तत्र षण्ण-

साहसदण्डः। महापशुमनुष्यक्षेत्रगृहहिरण्यसुवर्णसूक्ष्मवस्त्रादीनां स्थूलकद्रव्याणां द्विशतावरः पञ्चशतपरः मध्यमः साहसदण्डः।

स्त्रियं पुरुषं वाभिषह्य बध्नतो बन्धयतो बन्धं वा मोक्षयतः पञ्चशतावरः सहस्रपर उत्तमः साहसदण्ड इत्याचार्याः।

यः साहसं प्रतिपत्तेति कारयति स द्विगुणं दद्यात्। यावद्धिरण्यमुपयोक्ष्यते तावद् दास्यामीति स चतुर्गुणं दण्डं दद्यात्। य एतावद्धिरण्यं दास्यामीति प्रमाणमुद्दिश्य कारयति स यथोक्तं हिरण्यं दण्डं च दद्याद् इति बार्हस्पत्याः।

स चेत् कोपं मदं मोहं वापदिशेत्, यथोक्तवद्दण्डमेनं कुर्यादिति कौटल्यः।

दण्डकर्मसु सर्वेषु रूपमष्टपणं शतम्।
शतावरेषु व्याजीं च विद्यात् पञ्चपणं शतम्॥

वतिपणदण्डः, पूर्वः साहसदण्डः पूर्वसाहसाख्यः। महापशुमनुष्येत्यादि। महापशुमनुष्यक्षेत्रप्रभृतीनां स्थूलकद्रव्याणां, साहसे, द्विशतावरः द्विशतपणाधमः पञ्चशतपरः पञ्चशतपणोत्तमः दण्डः। स च पञ्चशतपणः मध्यमः साहसदण्डः।

स्त्रियमित्यादि। तां, पुरुषं वा, अभिषह्य प्रसह्य बध्नतः, बन्धयतः, बन्धं वा मोक्षयतः, पञ्चशतावरः पञ्चशतपणाधमः सहस्रपरः सहस्रपणोत्तमः दण्डः। स च उत्तमः साहसदण्डो नाम्ना। इत्याचार्याः मन्यन्त इति शेषः।

य इति। यः, साहसं, प्रतिपत्तेति 'अहमभ्युपगन्ते'त्युक्त्वा, कारयति, सः द्विगुणं साहसार्थद्विगुणं दण्डं दद्यात्। 'यावत् हिरण्यमुपयोक्ष्यते साहसकरणार्थे तावद् दास्यामि' इत्युक्त्वा यः साहसं कारयति, सः चतुर्गुणं साहसार्थचतुर्गुणं, दण्डं दद्यात्। य इति। 'एतावद् हिरण्यं दास्यामि' इति प्रमाणं साहसार्थदेयद्रव्येयत्ताम्, उद्दिश्य निर्दिश्य, कारयति, स यथोक्तं हिरण्यं, दण्डं च दद्यात्। इति बार्हस्पत्याः।

स्वमतमाह — स इति। सः कारयिता, कोपं, मदं चित्तविभ्रमं, मोहम् अज्ञानं वा, अपदिशेच्चेत् कारणायां हेतुं कथयेच्चेद्, एनं कारयितारं, यथोक्तवद्दण्डं कर्तृसमानदण्डं कुर्यात्। इति कौटल्यः।

अध्यायप्रान्ते श्लोकावाह — दण्डकर्मस्वित्यादि। सर्वेषु दण्डकर्मसु दण्डविधिषु, रूपं तत्संज्ञं दण्डादुपरि नियतग्राह्यं द्रव्यं, विद्यात् जानीयात्।

प्रजानां दोषबाहुल्याद् राज्ञां वा भावदोषतः ।
रूपव्याज्यावधर्मिष्ठे धर्म्या तु प्रकृतिः स्मृता ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
सप्तदशोऽध्यायः साहसम्,
आदितश्चतुस्सप्ततितमः ॥

रूपं कियद्, अष्टपणं शते दण्डपणशतेऽष्टपणात्मकम् । शतावरेषु शतन्यूनेषु दण्डकर्मसु, व्याजीं तत्संज्ञं दण्डद्रव्यादुपरि नियतग्राह्यं द्रव्यं, विद्यात् । व्याजीं किमात्मिकां, पञ्चपणं शते शते पञ्चपणात्मिकाम् । शतमिति मान्तपाठश्चिन्त्यः ॥

प्रजानामिति । तासां, दोषबाहुल्यान्निमित्ताद्, राज्ञां वा भावदोषतः तासामदुष्टत्वेऽपि राज्ञां धनलिप्सालक्षणचित्तवृत्तिदोषान्निमित्ताद् वा, कल्प्यमाने इति शेषः, रूपव्याज्यौ अधर्मिष्ठे धर्मिष्ठे न भवतः। अतस्तदकल्पनानुकूलं राजभिः प्रजाभिश्चाचरितव्यमित्यभिप्रायः । अत एवाह—**धर्म्या तु प्रकृतिः स्मृतेति** । यथाविहितो दण्ड एव तु धर्म्यः स्मृतिषु कथितः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
सप्तदशोऽध्यायः साहसम्,
आदितश्चतुःसप्ततितमः ॥

---

७२. प्रक. वाक्पारुष्यम्।

वाक्पारुष्यमुपवादः कुत्सनमभिभर्त्सनमिति।

शरीरप्रकृतिश्रुतवृत्तिजनपदानां शरीरोपवादेन काणखञ्जादिभिः सत्ये त्रिपणो दण्डः। मिथ्योपवादे षट्पणो दण्डः।

शोभनाक्षिदन्त इति काणखञ्जादीनां स्तुतिनिन्दायां द्वादशपणो दण्डः।

कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां च। सत्यमिथ्यास्तुतिनिन्दासु द्वादशपणोत्तरा दण्डास्तुल्येषु। विशिष्टेषु द्विगुणः। हीनेष्वर्धदण्डः। परस्त्रीषु द्विगुणः। प्रमादमदमोहादिभिरर्धदण्डाः।

वाक्पारुष्यमिति सूत्रम्। वक्तव्यवचनं वाक्पारुष्यम्। तच्च तद्दण्डश्चाभिधीयत इति सूत्रार्थः।

तत् त्रिधा विभजते — **वाक्पारुष्यमित्यादि**। उपवादोऽङ्गवैकल्यादिवचनं, कुत्सनं कुष्ठोन्मादादिवचनम्, अभिभर्त्सनं घातादिभयोपदर्शनम्।

शरीरेत्यादि। शरीरं प्रकृतिः स्त्रीपुरुषादिलक्षणा श्रुतं वृत्तिर्जनपद इति पञ्च विषया वाक्पारुष्यस्य, तेषां शरीरादीनां मध्ये, काणखञ्जादिभिः काण एकदृक् खञ्जः कोलः आदिना कुणिदन्तुरादिग्रहणम् एतैः काणखञ्जकुणिशब्दैः शरीरोपवादेन, सत्ये काणत्वादौ यथार्थे सति त्रिपणो दण्डः। मिथ्योपवादे षट्पणो दण्डः।

शोभनाक्षिदन्त इतीति। शोभनाक्षः शोभनदन्त इति रीत्या, काणखञ्जादीनां, स्तुतिनिन्दायां स्तुतिव्याजेन निन्दायां कृतायां, द्वादशपणो दण्डः।

कुत्सनविषयमाह — **कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां चेति**। कुष्ठी उन्मत्तः क्लीब इत्यादिप्रकारेण कुत्सने च, द्वादशपणो दण्डः इति वर्तते। सत्यमिथ्यास्तुतिनिन्दासु कुष्ठादिसत्यत्वे तन्मिथ्यात्वे कुष्ठ्यादीन् प्रति कल्य इत्यादिरीत्या स्तुतिनिन्दायां च, द्वादशपणोत्तराः उत्तरोत्तरद्वादशपणाधिकाः द्वादशपणश्चतुर्विंशतिपणः षट्त्रिंशत्पणः इत्येवंरूपाः दण्डाः भवन्ति, तुल्येषु समानेषु विषये। विशिष्टेषु गुणाधिकेषु विषये, द्विगुणः दण्डः। हीनेषु अर्धदण्डः। परस्त्रीषु विषये द्विगुणः। प्रमादमदमोहादिभिः कुत्सायाम् अर्धदण्डाः उक्ताः सर्वे दण्डा अर्धहीनाः।

कुष्ठोन्मादयोश्चिकित्सकाः सन्निकृष्टाः पुमांसश्च प्रमाणम् । क्लीबभावे स्त्रियः मूत्रफेनः अप्सु विष्ठानिमज्जनं च ।

प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्य त्रिपणोत्तराः दण्डाः । पूर्वेणापरस्य द्विपणाधराः । कुब्राह्मणादिभिश्च कुत्सायाम् ।

तेन श्रुतोपवादो वाग्जीवनानां, कारुकुशीलवानां वृत्त्युपवादः, प्राग्घूणकगान्धारादीनां च जनपदोपवादा व्याख्याताः ।

यः परम् "एवं त्वां करिष्यामि" इति करणेनाभिभर्त्सयेदकरणे, यस्तस्य करणे दण्डः ततोऽर्धदण्डं दद्यात् ।

कुत्सनस्य सत्यासत्यविषयत्वनिर्णयप्रमाणापेक्षायामाह — **कुष्ठोन्मादयोश्चिकित्सका** इत्यादि । क्लीबभावे, स्त्रियः, मूत्रफेनः अनुपलभ्यमानो मूत्रे फेनः, अप्सु विष्ठानिमज्जनं च, प्रमाणम् ।

प्रकृतिविषयस्योपवादस्य दण्डमाह—**प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्ये**त्यादि । अन्तावसायिना चण्डालेन शूद्रस्य, शूद्रेण वैश्यस्य वैश्येन क्षत्रियस्य क्षत्रियेण ब्राह्मणस्य चोपवादे, उत्तरोत्तरत्रिपणाधिकाः दण्डाः । पूर्वेण अपरस्य उपवादे द्विपणाधराः उत्तरोत्तरद्विपणावराः दण्डाः । कुब्राह्मणादिभिश्च कुत्सायां, द्विपणाधरा इत्येव ।

प्रकृत्युपवाददण्डविधानं श्रुतोपवादादिष्वतिदिशति—**तेने**ति । उक्तेन प्रकृत्युपवादेन, वाग्जीवनानां श्रुतोपवादः विद्याकुत्सनं, कारुकुशीलवानां वृत्त्युपवादः जीविकाकुत्सनं, प्राग्घूणकगान्धारादीनां हूणका नाम जनपदविशेषः कामगिर्युत्तरतोवृत्तिरुदीच्यः तस्य पूर्वावयवः प्राग्घूणकाः भाषायां तु 'चण्डा-(ल)राष्ट्रमि'त्युक्तम् । गान्धाराः प्रसिद्धाः तदादीनां जनपदोपवादाश्च जनपददोषोद्भावनेन कुत्सनानि च, व्याख्याताः । प्राग्घूणकेति चायं भाषापाठः । अर्थशास्त्रस्यादर्शे तु क्वचित् प्राकारणकारयोर्मध्ये वर्णस्यैकस्य लेखनस्थानमुत्सृष्टम् । क्वचित् प्राणकेति पाठः ।

अभिभर्त्सनविषयमाह—**य** इति । यः परम् अन्यम् , 'एवं त्वां करिष्यामि' इति 'तव पादं भङ्क्ष्यामि भुजं भङ्क्ष्यामी'त्येवं, करणेन शरीरावयवेन, अभिभर्त्सयेत् तर्जयेत्, अकरणे उक्तस्याक्रियायां, तस्य अभिभर्त्सकस्य, करणे यो दण्डः 'पाणिपाददन्तभङ्गे' इत्यादिना दण्डपारुष्ये वक्ष्यमाणः, ततोऽर्धदण्डं दद्यात् ।

अशक्तः कोपं मदं मोहं वाऽपदिशेत्, द्वादशपणं दद्यात् ।
जातवैराशयः शक्तश्चापकर्तुं यावज्जीविकावस्थं दद्यात् ।
स्वदेशग्रामयोः पूर्वं मध्यमं जातिसङ्घयोः ।
आक्रोशाद् देवचैत्यानाम् उत्तमं दण्डमर्हति ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
अष्टादशोऽध्यायः वाक्पारुष्यम्,
आदितः पञ्चसप्ततितमः ॥

अशक्त इति । उक्तपादभङ्गादिकरणाशक्तः, कोपं मदं मोहं वा, अपदिशेत् पादभङ्गादेरुक्तिकारणं वदेच्चेद्, द्वादशपणं दण्डं स दद्यात् । शक्तस्य कोपाद्यपदेशो न स्वीकार्य इत्यभिप्रायः ।

जातवैराशय इति । तथाभूतः, अपकर्तुं शक्तश्च जनः, उक्तविधमभिभर्त्सनं कुर्वन्निति शेषः, यावज्जीविकावस्थं यावज्जीवस्थेयम् आस्वमरणप्रतिभुवं, दद्याद् धर्मस्थेभ्य इत्यार्थम् ।

अध्यायान्ते श्लोकमाह — स्वदेशग्रामयोरिति । तयोः, आक्रोशात् निन्दनात्, पूर्वं दण्डं पूर्वसाहसम् अर्हति । जातिसङ्घयोः अर्थात् स्वीययोः, आक्रोशात् मध्यमं मध्यमसाहसं दण्डम्, अर्हति । देवचैत्यानाम् आक्रोशाद् उत्तमम् उत्तमसाहसं दण्डम्, अर्हति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
अष्टादशोऽध्यायः वाक्पारुष्यम्,
आदितः पञ्चसप्ततितमः ॥

७३. प्रक. दण्डपारुष्यम् ।

दण्डपारुष्यं स्पर्शनमवगूर्णं प्रहतमिति ।

नाभेरधःकायं हस्तपङ्कभस्मपांसुभिरिति स्पृशतस्त्रिपणो दण्डः ।

तैरेवामेध्यैः पादष्ठीविकाभ्यां च षट्पणः । छर्दिमूत्रपुरीषादिभिर्द्वादशपणः । नाभेरुपरि द्विगुणाः । शिरसि चतुर्गुणाः समेषु ।

विशिष्टेषु द्विगुणाः । हीनेषु अर्धदण्डाः । परस्त्रीषु द्विगुणाः । प्रमादमदमोहादिभिरर्धदण्डाः ।

पादवस्त्रहस्तकेशावलम्बनेषु षट्पणोत्तरा दण्डाः ।

पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेषु पूर्वः साहसदण्डः । पातयित्वापक्रमतोऽर्धदण्डाः ।

शूद्रो येनाङ्गेन ब्राह्मणमभिहन्यात् तदस्य छेदयेत् । अवगूर्णे निष्क्रयः, स्पर्शेऽर्धदण्डः । तेन चण्डालाशुचयो व्याख्याताः ।

दण्डपारुष्यमिति सूत्रम् । दण्डग्रहणं हस्तादेरप्युपलक्षणम् । दण्डहस्तादिभिः प्रहरणमिति सूत्रार्थः ।

तस्य त्रीन् प्रकारानाह — दण्डपारुष्यमिति । स्पर्शनं केवलं परामर्शनम्, अवगूर्णम् उद्यमनं, प्रहतं ताडनम् ।

नाभेरित्यादि । तस्य, अधःकायं हस्तपङ्कभस्मपांसुभिः तत्प्रकारैश्च, स्पृशतः त्रिपणो दण्डः ।

तैरेवामेध्यैरिति । हस्तादिभिरेवाशुद्धैः, स्पृशतः, पादष्ठीविकाभ्यां च पादेन मुखकफादिनिरसनेन च, स्पृशतः, षट्पणः । छर्दीत्यादि स्पष्टम् ।

समेषु दण्डमुक्त्वा उत्कृष्टादिष्वाह — विशिष्टेष्वित्यादि ।

पादेत्यादि । पादादीनां ग्रहणेषु, षट्पणोत्तराः यथोत्तरं षट्पणाधिकाः पादग्रहणे षट् वस्त्रग्रहणे द्वादश हस्तग्रहणेऽष्टादश केशग्रहणे चतुर्विंशतिरिति रीत्या दण्डाः ।

पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेष्वित्यादि । अवमर्दने परिवेष्टने कज्जलादिलेपने भूप्रकर्षणे देहोपर्यारुह्योपवेशने च, पूर्वः साहसदण्डः । पातयित्वापक्रमतः भूमौ निपात्यापक्रमणाद्, अर्धदण्डः अर्धप्रथमसाहसदण्डः ।

शूद्र इत्यादि स्पष्टम् । अवगूर्ण इति । हस्ताद्यङ्गोद्यमने, निष्क्रयः एकाङ्गवधनिष्क्रयः कण्टकशोधने वक्ष्यमाणो दण्डः । स्पर्शे उद्यतहस्तादिना स्पर्शनमात्रे, अर्धदण्डः अर्धनिष्क्रयः । तेन उक्तविधिना, चण्डालाशुचयः

हस्तेनावगूर्णे त्रिपणावरो द्वादशपणपरो दण्डः। पादेन द्विगुणः। दुःखोत्पादनेन द्रव्येण पूर्वः साहसदण्डः । प्राणाबाधिकेन मध्यमः ।

काष्ठलोष्टपाषाणलोहदण्डरज्जुद्रव्याणामन्यतमेन दुःखमशोणितमुत्पादयतश्चतुर्विंशतिपणो दण्डः । शोणितोत्पादने द्विगुणः अन्यत्र दुष्टशोणितात् ।

मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः । पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे च अन्यत्र दुष्टव्रणेभ्यः ।

सक्थिग्रीवाभञ्जने नेत्रभेदने वा वाक्यचेष्टाभोजनोपरोधेषु च मध्यमः साहसदण्डः । समुत्थानव्ययश्च । विपत्तौ कण्टकशोधनाय नीयेत ।

चण्डालप्रभृतयोऽशुचयः अर्थाद् ब्राह्मणाभिहननं स्वाङ्गेन कुर्वाणाः, व्याख्याताः विहितदण्डा वेदितव्याः । अनया रीत्या तेषामपि दण्डा यथोचितमूह्या इत्यर्थः।

अवगूर्णविधिमाह— हस्तेनेत्यादि । करेण अवगूर्णे उद्यमने, त्रिपणावरो द्वादशपणपरो दण्डः । पादेनावगूर्णे, द्विगुणः चतुर्विंशतिपणः । दुःखोत्पादकेन द्रव्येण कण्टकादिना, अवगूर्णे, पूर्वः साहसदण्डः । प्राणाबाधिकेन प्राणबाधाकरेण सर्पादिना, अवगूर्णे, मध्यमः साहसः ।

काष्ठेत्यादि । काष्ठादीनां षण्णामन्यतमेन, दुःखम् अशोणितम् अरक्तम्, उत्पादयतः, चतुर्विंशतिपणो दण्डः । शोणितोत्पादने, द्विगुणः अष्टाचत्वारिंशत्पणः । अन्यत्र दुष्टशोणिताद् दुष्टशोणितातिरिक्ते विषये, कुष्ठादिदुष्टशोणितोत्पादने तु न द्विगुणः, किन्तु अर्धमौचित्यात् ।

मृतकल्पमिति । मृततुल्यत्वं यथा भवेत् तथा, अशोणितम् अरक्तं, घ्नतः, हस्तपादपराञ्चिकां हस्तस्य पादस्य वा पराञ्चिकां पराञ्चनम् अन्यथाभावं सन्धिविघटनमिति यावत् । परोपसृष्टादञ्चेर्धात्वर्थनिर्देशे ण्वुल् । पाराञ्चिकमिति पाठे स्वार्थव्युत्पत्ती चिन्त्ये । तां वा कुर्वतः, पूर्वः साहसदण्डः । पाणिपादेत्यादि । पाण्यादिभङ्गे, कर्णनासाच्छेदने, दुष्टव्रणव्यतिरेकेण व्रणानामुद्भेदने च, पूर्वः साहसदण्ड इति वर्तते ।

सक्थीत्यादि । ऊरुकण्ठभङ्गे नेत्रभेदने वा वचनसञ्चरणाभ्यवहरणशक्तिप्रतिबन्धेषु च मध्यमः साहसदण्डः । समुत्थानव्ययश्च यथावत्कार्यक्रियापाटवं समुत्थानं तत्प्रत्यापत्त्यर्थो व्ययश्च, अपराधिना देयः । विपत्ताविति । मरणे, कण्टकशोधनाय कण्टकशोधनोक्तविधानाय, नीयेत ।

महाजनस्यैकं घ्नतः प्रत्येकं द्विगुणो दण्डः ।

पर्युषितः कलहोऽनुप्रवेशो वा नाभियोज्य इत्याचार्याः ।

नास्त्यपकारिणो मोक्ष इति कौटल्यः ।

कलहे पूर्वागतो जयति; अक्षममाणो हि प्रधावति । इत्याचार्याः ।

नेति कौटल्यः । पूर्वं पश्चाद् वागतस्य साक्षिणः प्रमाणम् । असाक्षिके घातः कलहोपलिङ्गनं वा ।

घाताभियोगमप्रतिब्रुवतस्तदहरेव पश्चात्कारः ।

कलहे द्रव्यमपहरतो दशपणो दण्डः ।

क्षुद्रकद्रव्यहिंसायां तच्च तावच्च दण्डः ।

महाजनस्येति । जनसमूहस्य, एकं जनं, घ्नतः, प्रत्येकं द्विगुणो दण्डः एकस्यैकं घ्नतो यो दण्डस्तद्द्विगुणो दण्डः ।

पर्युषित इति । चिरातीतः, कलहः, अनुप्रवेशो वा हृतद्रव्यायत्तीकरणं वा, नाभियोज्यः अभियोक्तुमर्हो न भवति । इत्याचार्याः ।

कलहानुप्रवेशलक्षणापराधकारिणः अपराधः पर्युषित इत्येतावता मोक्षणं न भवति, किन्तु चिरादपि सोऽभियोज्य एवेत्येवं स्वमतमाह — **नास्त्यपकारिण** इत्यादि ।

कलह इति । कलहे, पूर्वागतः पूर्वावेदकः, जयति । कुतः हि यतः, अक्षममाणः प्रधावति परकृतमाबाधमसहमानो धर्मस्थायावेदयितुं त्वरितः पूर्वं गच्छति, अर्थात् पश्चादागतः पराजयते । इत्याचार्याः ।

नेति कौटल्य इति । पूर्वागमनं पश्चादागमनं वा यत्किञ्चित्करं, किंतर्हि तत्त्वनिर्णयसाधनमित्याकाङ्क्षायामाह — **पूर्वं पश्चाद्वे**त्यादि । **असाक्षिके घातः कलहोपलिङ्गनं वे**ति । साक्ष्यभावे घातदर्शनेन तत्त्वनिर्णयः घातादर्शने लिङ्गैः कलहस्याभ्यूहनम् ।

घाताभियोगमिति । घातविषयमभियोगं, तदहरेव तस्मिन्नेव दिने, अप्रतिब्रुवतः, पश्चात्कारः पराजयः ।

कलह इत्यादि । कलहायमानयोर्द्वयोर्द्रव्यमपहरतोऽन्यस्य दशपणो दण्डः । अपहृतद्रव्यप्रत्यानयनं तु सिद्धमेव । इह 'द्विशतपणो दण्डः' इति तु भाषानुसारेण पाठोऽनुमेयः ।

क्षुद्रकेत्यादि । क्षुद्रकद्रव्यहिंसायां क्षुद्रकद्रव्याणां पुष्पफलादीनां

स्थूलकद्रव्यहिंसायां तच्च द्विगुणश्च दण्डः ।

वस्त्राभरणहिरण्यसुवर्णभाण्डहिंसायां तच्च पूर्वश्च साहसदण्डः ।

परकुड्यमभिघातेन क्षोभयतस्त्रिपणो दण्डः । छेदनभेदने षट्पणः। पातनभञ्जने द्वादशपणः प्रतीकारश्च ।

दुःखोत्पादनं द्रव्यमन्यवेश्मनि प्रक्षिपतो द्वादशपणो दण्डः । प्राणाबाधिकं पूर्वः साहसदण्डः ।

क्षुद्रपशूनां काष्ठादिभिर्दुःखोत्पादने पणो द्विपणो वा दण्डः । शोणितोत्पादने द्विगुणः ।*

महापशूनामेतेष्वेव स्थानेषु द्विगुणो दण्डः, समुत्थानव्ययश्च ।

पुरोपवनवनस्पतीनां पुष्पफलच्छायावतां प्ररोहच्छेदने षट्पणः। क्षुद्रशाखाच्छेदने द्वादशपणः । पीनशाखाच्छेदने चतुर्विंशतिपणः। स्कन्धवधे पूर्वः साहसदण्डः । समुच्छित्तौ मध्यमः ।

पुष्पफलच्छायावद्गुल्मलतास्वर्धदण्डः । पुण्यस्थानतपोवनश्मशानद्रुमेषु च ।

हिंसायां कलहकारिभिरुपहनने, तच्च हिंसितं क्षुद्रद्रव्यं च स्वामिने देयमिति शेषः । तावच्च तत्परिमाणं द्रव्यं च दण्डो भवति ।

स्थूलकेत्यादि । कालायसादिस्थूलकद्रव्यहिंसायां, तच्च, द्विगुणः तद्द्रव्याद्विगुणो दण्डश्च ।

वस्त्राभरणेत्यादि शोणितोत्पादने द्विगुण इत्येतदन्तं सुबोधम् । 'पातनभञ्जने द्वादशपणः' इति क्वचिन्न पठ्यते ।

महापशूनामिति । गवादीनाम्, एतेष्वेव स्थानेषु दुःखोत्पादनादिषु क्षुद्रपशूक्तेषु विषयेषु, द्विगुणो दण्डः । समुत्थानव्ययश्च तत्स्वस्थीकरणार्थो व्ययश्च देयः ।

पुरोपवनेत्यादि । प्ररोहच्छेदने पल्लवच्छेदने, स्कन्धवधे प्रधाणभञ्जने । समुच्छित्तौ उन्मूलने । शेषं स्पष्टम् ।

पुष्पफलच्छायावद्गुल्मलतास्विति । पुष्पादिमत्सु स्तम्बेषु वल्लीषु च विषये प्ररोहच्छेदनादौ, अर्धदण्डः वनस्पत्युक्तदण्डस्यार्धम् । पुण्यस्थानतपोवनश्मशानद्रुमेषु च, अर्धदण्ड इति संबध्यते ।

---

*एतदुपरि 'व्रणविदारणे चतुर्गुणः । शाखाङ्गच्छेदनेऽष्टचत्वारिंशत्पणः ।' इत्येतावान् ग्रन्थः पठनीयो भाति भाषानुसरणे ।

सीमवृक्षेषु चैत्येषु द्रुमेष्वालक्षितेषु च ।
त एव द्विगुणा दण्डाः कार्या राजवनेषु च ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
एकोनविंशोऽध्यायः दण्डपारुष्यम्,
आदितष्षट्सप्ततितमः ॥

सीमवृक्षेष्वित्यादिरध्यायान्तश्लोकः सुबोधः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधि॰
एकोनविंशोऽध्यायः दण्डपारुष्यम्,
आदितः षट्सप्ततितमः ॥

७४,७५. प्रक. द्यूतसमाह्वयं, प्रकीर्णकानि ।

द्यूताध्यक्षो द्यूतमेकमुखं कारयेत् । अन्यत्र दीव्यतो द्वादशपणो दण्डः गूढाजीविज्ञापनार्थम् ।

द्यूताभियोगे जेतुः पूर्वः साहसदण्डः । पराजितस्य मध्यमः । बालिशजातीयो ह्येष जेतुकामः पराजयं न क्षमत इत्याचार्याः । नेति कौटल्यः पराजितश्चेद् द्विगुणदण्डः क्रियेत न कश्चन राजानमभिसरिष्यति । प्रायशो हि कितवाः कूटदेविनः ।

द्यूतसमाह्वयमिति सूत्रम् । द्यूतम् अक्षशलाकाद्यप्राणिक्रीडा समाह्वयो मल्लमेषकुक्कुटादिप्राणिदेवनं तयोः समाहारो द्यूतसमाह्वयं, तत्संबद्धो व्यवहारो दण्डश्चाभिधीयत इति सूत्रार्थः । पारुष्यप्रसङ्गात् सर्वविधपारुष्यविसंवादादिदोषनिदानस्यास्येह कथनसङ्गतिः ।

द्यूताध्यक्ष इति । सः, द्यूतम् एकमुखम् एकमार्गम् एकस्मिन् प्रदेशे इत्यर्थः, कारयेत् । अन्यत्र प्रदेशान्तरे, दीव्यतः द्वादशपणो दण्डः । **ननु च** द्यूतमेव तावन्निन्दितं प्रतिषिद्धं च शास्त्रेषु— 'प्रकाशमेतत् तास्कर्यं यद् देवनसमाह्वयम्' इति, 'प्रच्छन्नं वा प्रकाशं वा द्यूतं राष्ट्रे निवारयेद्' इति च स्मृतौ, 'अक्षैर्मा दीव्यः' इति चाम्नाये । तत् कुतोऽस्य प्रवर्तनविधिः कुतस्तरां चैकमुखत्वनियमनमित्याशङ्कामपाकर्तुमेकमुखत्वनियमस्य प्रयोजनमाह — **गूढाजीविज्ञापनार्थमि**ति । गूढाजीविनस्तस्करसाहसिकादयो लोककण्टकाः तज्ज्ञापनार्थम् । अयमाशयः — प्रतिषेधातिक्रमेण प्रवृत्तौ श्येनादिवदयं द्यूतसमाह्वयस्य विधिः । तच्च लोककण्टकप्रायजनभूयिष्ठसेव्यं सुरापानवदधर्मरूपमप्येकमुखतया प्रवर्त्यमानं कण्टकज्ञानसाधनीभूय तदुद्धरणरूपधर्मान्तरोपायतां प्रतिपद्यत इति तदेकमुखत्वनियमोऽप्युपपद्यत इति ।

द्यूताभियोगे जेतुरित्यादि । द्यूतविषयमभियोगं द्यूतजेता कुर्वन् पूर्वसाहस दण्ड्यः, द्यूतपराजितस्तद्द्विगुणं दण्डं मध्यमसाहसम् । पराजितस्य दण्डाधिक्ये अधर्म्यजयकामुकता हेतुरित्याह — **बालिशजातीयो ही**त्यादि । बालिशजातीयो मूर्खप्रायः । **नेति कौटल्य** इत्याचार्यमतप्रतिषेधे कारणमाह— **पराजितश्चेदि**ति । स चेद् द्विगुणदण्डः क्रियेत, न कश्चन राजानमभिसरिष्यति न कोऽपि पराजितो जेतृकृतमात्मदुःखं राज्ञे निवेदयितुमागमिष्यति । माभिसरतु को दोष इति चेत् तत्राह — **प्रायशो हि कितवाः कूटदेविन**

तेषामध्यक्षाः शुद्धाः काकणीरक्षांश्च स्थापयेयुः ।

काकण्यक्षाणामन्योपधाने द्वादशपणो दण्डः । कूटकर्मणि पूर्वः साहसदण्डः, जितप्रत्यादानम् । उपधौ स्तेयदण्डश्च ।

जितद्रव्यादध्यक्षः पञ्चकं शतमाददीत, काकण्यक्षारलाशलाकावक्रयमुदकभूमिकर्मक्रयं च । द्रव्याणामाधानं विक्रयं च कुर्यात् । अक्षभूमिहस्तदोषाणां चाप्रतिषेधने द्विगुणो दण्डः ।

तेन समाह्वयो व्याख्यातः अन्यत्र विद्याशिल्पसमाह्वयादिति ।

इति । प्रायेण हि धूर्ताः कपटदेवनशीलाः । अतश्च तेभ्य एकान्तजयिभ्य आपततोऽनर्थजातात् कूटानभिज्ञतया नित्यपराजयिनामनिर्मोक्ष एवापद्येतेत्यभिप्रायः ।

तेषामिति । कितवानाम्, अध्यक्षाः द्यूतकर्मप्रत्यवेक्षकाः, शुद्धाः कूटरहिताः, काकणीः कपर्दान्, अक्षांश्च पाशकांश्च तथाविधान्, स्थापयेयुः, देवनार्थम् ।

काकण्यक्षाणामिति । तेषाम्, अन्योपधाने अन्येषां स्थापितातिरिक्तानां तज्जातीयानाम् उपधाने, द्वादशपणो दण्डः । इहान्यशब्दस्य सापेक्षत्वेऽपि समास आर्षः । **कूटकर्मणीति** । कपटाक्षादिसृष्टौ, पूर्वः साहसदण्डः, जितप्रत्यादानं जितद्रव्यापहरणं च । उपधौ स्थापितेष्वेवाक्षादिषु रेखाव्यत्ययकरणलक्षणे व्याजे मणिमन्त्रादिना बुद्धिवञ्चनायां वा, स्तेयदण्डश्च, चकारात् पूर्वोक्तं च ।

जितद्रव्यादिति । जेतादु द्रव्याद्, अध्यक्षः, पञ्चकं शतम् आददीत शते विंशतिभागं गृह्णीयात्, आत्मवृत्त्यर्थम् । काकण्यक्षारलाशलाकावक्रयं काकण्यः कपर्दाः अक्षाः पाशकाः अरलाः चर्मपट्टिकाजातीयाः साधनभेदाः शलाका दन्तादिमय्यो दीर्घचतुरश्राः काकण्यादीनां देवनसाधनानाम् अवक्रयं भाटकम्, उदकभूमिकर्मक्रयं च, आददीत, जेतृसकाशात् । द्रव्याणाम् आधानं विक्रयं च कुर्याद् द्यूतकैराधीयमानानि विक्रीयमाणानि च द्रव्याणि स्वीकुर्यात् । अक्षभूमिहस्तदोषाणां च अक्षदोषस्य भूमिदोषस्य हस्तदोषस्य च, अप्रतिषेधने प्रतिषेधाकरणे, द्विगुणः स्वादेयद्रव्यभागद्विगुणः, दण्डः, अध्यक्षस्य ।

अप्राणिद्यूतोक्तं दण्डविधानं द्विपदचतुष्पदादिप्राणिद्यूते विद्याशिल्पसमाह्वयातिरिक्तेऽतिदिशति—**तेनेत्यादि** ।

प्रकीर्णकं तु । याचितकावक्रीतकाहितकनिक्षेपकाणां यथादेशकालमदाने, यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने, गुल्मतरदेयं ब्राह्मणं साधयतः प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च द्वादशपणो दण्डः ।

सन्दिष्टमर्थमप्रयच्छतो, भ्रातृभार्यां हस्तेन लङ्घयतो, रूपाजीवामन्योपरुद्धां गच्छतः, परवक्तव्यं पण्यं क्रीणानस्य, समुद्रं गृहमुद्भिन्दतः, सामन्तचत्वारिंशत्कुल्या बाधामाचरतश्चाष्टचत्वारिंशत्पणो दण्डः ।

प्रकीर्णकानीति सूत्रम् । प्रकीर्णानि विक्षिप्तानि परिशिष्टानि च, तत्र किञ्चित् किञ्चित् विवाहसंयुक्तादिशेषं किञ्चित् किञ्चिदध्यक्षप्रचारकण्टकशोधनान्तर्गतम् । तान्युच्यन्त इति सूत्रार्थः ।

प्रकीर्णकं त्विति । प्रतिपाद्यत इति शेषः । याचितकेत्यादि । याचितकावक्रीतकाहितकानि प्रतीतानि, निक्षेपको भूषणादिनिर्माणार्थमर्पितं सुवर्णादि, एतेषां, यथादेशकालम्, अदाने, द्वादशपणो दण्डः । यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने 'नक्तममुकयामे दिवामुकच्छायानालिकायां चामुकदेशे सम्भूयोपवेष्टव्यामि'त्येवं कृतसंकेतानां समुपवेशव्यवस्थानां देशकालातिक्रामणे वा द्वादशपणो दण्डः । इदं समयस्यानपाकर्मशेषम् । गुल्मतरदेयं गुल्मतारणभृतिं नदीतारणभृतिं च, ब्राह्मणं साधयतः ब्राह्मणात् प्रयत्नेन गृह्णतः, द्वादशपणो दण्डः । प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च प्रतिवेशः प्रतिमुखगृहम् अनुवेशोऽनन्तरगृहं तयोर्विद्यमानं श्रोत्रियमतिक्रम्यान्यस्य निमन्त्रणे च, द्वादशपणो दण्डः ।

सन्दिष्टमिति । प्रतिश्रुतमर्थमप्रयच्छतः, भ्रातृभार्यां हस्तेन लङ्घयतः अवलम्बमानस्य, रूपाजीवां गणिकाम्, अन्योपरुद्धां गच्छतः, अष्टचत्वारिंशत्पणो दण्डः । इदं साहसशेषम् । परवक्तव्यं परपरीवादगोचरं, पण्यं क्रीणानस्य, अष्टचत्वारिंशत्पणो दण्डः । इदमस्वामिविक्रयशेषम् । समुद्रं मुद्रया युक्तं गृहम् उद्भिन्दतः, अष्टचत्वारिंशत्पणः । इदं साहसशेषम् । सामन्तचत्वारिंशत्कुल्याः सामन्तिकानां चत्वारिंशतः कुलानां बाधाम् आचरतश्च, अष्टचत्वारिंशत्पणो दण्डः । इदं वास्तुकशेषम् ।

कुलनीवीग्राहकस्यापव्ययने, विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यां स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्म चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च पूर्वः साहसदण्डः ।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः सार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः । कान्तारे मध्यमः । तन्निमित्तं भ्रेषयत उत्तमः । सहप्रस्थायिष्वन्येष्वर्धदण्डः ।

पुरुषमबन्धनीयं बध्नतो बन्धयतो बन्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डः । पुरुषापराधविशेषेण दण्डविशेषः कार्यः ।

कुलनीवीग्राहकस्यापव्ययन इति । कुलसाधारणं धनं गृहीत्वापलपने, विधवां छन्दवासिनीं स्वच्छन्दवर्तिनीमकामां, प्रसह्याधिचरतः बलाद् गच्छतः, चण्डालस्य आर्यां स्पृशतः, प्रत्यासन्नम् अन्तिकस्थम् आपदि अनभिधावतः अभिधाव्यारक्षतः, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् शाक्यान् क्षपणकादींश्च वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः, शत्यो दण्डः शतपणदण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वत इति । आधिकरणिकाः साक्ष्याद्यनुयोगं शपथपूर्वं यमनुतिष्ठन्ति स शपथवाक्यानुयोगः तं धर्मस्थाननुज्ञातं कुर्वतः, युक्तकर्म चायुक्तस्य अनधिकृतस्याधिकृतकर्म कुर्वतश्च, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनः, दास्या गर्भम् औषधेन पातयतश्च स्रावयतश्च, पूर्वः साहसदण्डः ।

पितापुत्रयोरित्यादि । सार्थाभिप्रयातं ग्राममध्ये त्यजतः सङ्घसाह्याश्रयेण प्रस्थितं रोगादिवशाद् ग्रामान्तरे त्यक्त्वा गच्छतः सार्थमुख्यस्य । शेषं सुबोधम् । **कान्तारे मध्यम** इति । दुर्गमेऽरण्ये त्यजतो मध्यमसाहसः । तन्निमित्तं भ्रेषयतः कान्तारत्यागेन निमित्तेन विगतजीवितं कुर्वतः, उत्तमसाहसः । सहप्रस्थायिषु अन्येषु सार्थान्तर्गतेषु विषये, अर्धदण्डः ।

पुरुषमित्यादि । सुबोधम् ।

तीर्थकरस्तपस्वी व्याधितः क्षुत्पिपासाध्वक्लान्तस्तिरोजनपदो दण्डखेदी निष्किञ्चनश्चानुग्राह्याः।

देवब्राह्मणतपस्विस्त्रीबालवृद्धव्याधितानामनाथानामनभिसरतां धर्मस्थाः कार्याणि कुर्युः। न च देशकालभोगच्छलेनातिहरेयुः।

पूज्या विद्याबुद्धिपौरुषाभिजनकर्मातिशयतश्च पुरुषाः।
एवं कार्याणि धर्मस्थाः कुर्युरच्छलदर्शिनः।
समाः सर्वेषु भावेषु विश्वास्या लोकसम्प्रियाः॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे विंशोऽध्यायः
द्यूतसमाह्वयं प्रकीर्णकानि। आदितः सप्तसप्तति-
तमोऽध्यायः। एतावता कौटलीयस्यार्थ-
शास्त्रस्य धर्मस्थीयं तृतीयम-
धिकरणं समाप्तम्॥

तीर्थकर इत्यादि। तीर्थकरः दानोदकहस्तः दानशीलः। तिरोजनपदः अन्यजनपदागतः। दण्डखेदी बहुकृत्वोऽनुभूतदण्डः।

देवब्राह्मणेत्यादि। देवादीनां सप्तानाम्, अनाथानां योगक्षेमचिन्तकरहितानाम्, अनभिसरतां स्वदुःखनिवेदनाय धर्मस्थमनभिगच्छतां, कार्याणि, धर्मस्थाः कुर्युः। देशकालभोगच्छलेन देशादिव्याजेन, न चातिहरेयुः अनाथद्रव्यं नातीव हरेयुः।

साक्ष्यादिभावेनोपगच्छन्तः पुरुषास्तत्तद्विद्याबुद्धिपौरुषाभिजनकर्मणामतिशयानुरोधेन धर्मस्थैर्माननीया इत्याह— पूज्या इत्यादि।

एवं कार्याणीत्यादिः श्लोकः स्पष्टार्थः॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
धर्मस्थीयाधिकरणं तार्तीयीकमपूर्यत॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्त्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायां धर्मस्थीये तृतीयाधिकरणे विंशोऽध्यायः
द्यूतसमाह्वयं प्रकीर्णकानि। धर्मस्थीयं
तृतीयमधिकरणं समाप्तम्॥

कण्टकशोधनं—चतुर्थमधिकरणम् ।

७६. प्रक. कारुकरक्षणम् ।

प्रदेष्टारस्त्रयस्त्रयोऽमात्याः कण्टकशोधनं कुर्युः ।

अर्थ्यप्रकाराः कारुशासितारः सन्निक्षेप्तारः स्ववित्तकारवः श्रेणीप्रमाणा निक्षेपं गृह्णीयुः । विपत्तौ श्रेणी निक्षेपं भजेत । निर्दिष्ट-देशकालकार्यं च कर्म कुर्युः । अनिर्दिष्टदेशकालकार्यापदेशम् ।

अथ चतुर्थं कण्टकशोधनं नामाधिकरणमारभ्यते । कण्टकानां कण्टकाः प्रजापीडाकरत्वात् कण्टकतुल्याः कारुकवैदेहकादयः तेषां शोधनं तेभ्यः प्रजापीडा यथा न भवेत् तथा तच्छमनं कण्टकशोधनम् । तदस्मिन्नधिकरणे प्रस्तुतम् ।

तत्र प्रथमं सूत्रं—कारुकरक्षणमिति । नाडिन्धमतक्षायस्कारादयः कारुकाः तेभ्यः प्रजानां रक्षणमिति सूत्रार्थः ।

प्रदेष्टार इति । कण्टकशोधनाधिकृताः प्रदेष्टार इत्याख्यायन्ते । ते त्रयस्त्रयः, अमात्याः जानपदत्वाद्यमात्यगुणयुक्ताः, कण्टकशोधनं कुर्युः । इह वीप्सा कण्टकशोधनस्थानेषु सर्वेष्वपि प्रदेष्टृत्रित्वप्रतिपत्त्यर्था ।

कीदृग्गुणाः कारवः निक्षेपं ग्रहीतुमर्हन्तीत्याह—अर्थ्येत्यादि । अर्थ्यप्रकाराः अर्थानपेतप्रकाराः शुचिस्वभावा इत्यर्थः अर्थनीयस्वभावा वा, अप्रतीकारा इति क्वचित्के पाठे अनाशंसनीयप्रतिकारा इत्यर्थो वाच्यः । कारुशासितारः बहूनां कारूणामधश्वराणामुपरि स्थित्वा कर्तव्योपदेष्टारः, सन्निक्षेप्तारः प्रातिवेशिकानुवेशिकसाक्षिकं निक्षेपग्रहणप्रत्यर्पणव्यवहर्तारः, स्ववित्तकारवः स्वधनेनापि भूषणशिल्पकारिणः, एतेन भक्षितनिक्षेपनिष्क्रयार्पणशक्तत्वलक्षणां धनवत्तामाह । श्रेणीप्रमाणाः श्रेणीविधेयाः, उक्तविशेषणपञ्चकयुक्ताः, निक्षेपं गृह्णीयुः । विपत्तौ ग्रहीतृमरणदीर्घप्रवासादिना निक्षेपहानिसंभवे श्रेणी निक्षेपं भजेत भागशो दद्यात् । निर्दिष्टदेशकालकार्यं चेति । अयं देशोऽयं काल इदं च कार्यवस्तुस्वरूपमित्येवं निर्दिष्टं व्यवस्थापितं देशादिकं यस्य तत् तथाभूतं, कर्म कुर्युः । अनिर्दिष्टदेशकालकार्यापदेशं कर्म कुर्युरिति वर्तते । अर्थाद् यद् बहुतरदेशकालैकसाध्यम् अनन्योल्लेख्यनानावैचित्र्ययोगकमनीयतया स्वरूपतो निर्देष्टुमशक्यं च भवति, तत् कर्म ।

कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः । अन्यत्र भ्रेषोपनिपाताभ्यां नष्टं विनष्टं वाभ्यावहेयुः । कार्यस्यान्यथाकरणे वेतननाशस्तद्द्विगुणश्च दण्डः ।

तन्तुवाया दशैकादशिकं सूत्रं वर्धयेयुः । वृद्धिच्छेदे छेदद्विगुणो दण्डः ।

सूत्रमूल्यं वानवेतनम् । क्षौमकौशेयानामध्यर्धगुणम् । पत्त्रोर्णाकम्बलदुकूलानां द्विगुणम् ।

मानहीने हीनावहीनं वेतनं तद्द्विगुणश्च दण्डः । तुलाहीने हीनचतुर्गुणो दण्डः । सूत्रपरिवर्तने मूल्यद्विगुणः । तेन द्विपटवानं व्याख्यातम् ।

कालातिपातन इत्यादि । निर्दिष्टकालातिक्रमे पादहीनं वेतनं, तद्द्विगुणश्च दण्डः । अन्यत्र भ्रेषोपनिपाताभ्यामिति । भ्रेषो व्यालकृत उपप्लवः उपनिपातो दैवाग्न्यादिकृतः तदतिरिक्तेन निमित्तेन, नष्टम् अत्यन्तनाशं गतं, विनष्टं वा एकदेशलुप्तं वा, अभ्यावहेयुः निर्यातयेयुः । कार्यस्य अन्यथाकरणे निर्दिष्टप्रकारातिरिक्तप्रकारेण करणे, वेतननाशः तद्द्विगुणश्च दण्डः ।

तन्तुवायकर्माह —**तन्तुवाया** इति । कुविन्दकाः, दशैकादशिकं सूत्रं वर्धयेयुः दशपलस्य सूत्रस्य सकाश्चिकमेकादशपलाधिकसुतं सूत्रं दद्युः । वृद्धिच्छेदे छेदद्विगुणो, दण्डः ।

वानवेतनमाह—**सूत्रमूल्यं वानवेतनमिति** । ऊतिकर्मणो वेतनं सूत्रमूल्यं यावत् तावद् दातव्यम् । क्षौमकौशेयानां वानवेतनम् अध्यर्धगुणं सूत्रमूल्यसार्धगुणम् । पत्त्रोर्णाकम्बलदुकूलानां वानवेतनं द्विगुणं सूत्रमूल्यद्विगुणम् ।

मानहीने इति । निर्दिष्टायामविस्तारहानौ, हीनावहीनं हीनस्यावहीनम् अर्थादष्टहस्तायामचोदनायां सप्तहस्तायामवानेऽष्टमांशहीनं वानवेतनं, देयम् । तद्द्विगुणश्च दण्डः अयथोक्तवानकारिणो भवति । **तुलाहीने** इति । अन्तरालसूत्रन्यूनतायां, हीनचतुर्गुणो दण्डः । सूत्रपरिवर्तने दत्तं सूत्रमपहृत्यान्यस्य सूत्रस्य प्रतिनिधाने, मूल्यद्विगुणः, दण्डः । एष एकैकसूत्रवानविधिर्द्विसूत्रवानेऽपि ऊह्य इत्याह — **तेन द्विपटवानं व्याख्यातमिति** ।

ऊर्णातुलायाः पञ्चपलिको विहननच्छेदो रोमच्छेदश्च ।

रजकाः काष्ठफलकश्लक्ष्णशिलासु वस्त्राणि नेनिज्युः । अन्यत्र नेनिजतो वस्त्रोपघातं षट्पणं च दण्डं दद्युः ।

मुद्गराङ्कादन्यद् वासः परिदधानास्त्रिपणं दण्डं दद्युः । परवस्त्रविक्रयावक्रयाधानेषु च द्वादशपणो दण्डः । परिवर्तने मूल्यद्विगुणो वस्त्रदानं च ।

मुकुलावदातं शिलापट्टशुद्धं धौतसूत्रवर्णं प्रमृष्टश्वेतं चैकरात्रोत्तरं दद्युः ।

पञ्चरात्रिकं तनुरागं, षड्रात्रिकं नीलं, पुष्पलाक्षामञ्जिष्ठारक्तं, गुरुपरिकर्म यत्नोपचार्यं जात्यं वासः सप्तरात्रिकम् । ततः परं वेतनहानिं प्राप्नुयुः ।

ऊर्णातुलाया इति । शतपलाया ऊर्णायाः पञ्चपलो विहननच्छेदः विहननं पिञ्जनं शोधनं तन्निमित्तश्छेदः । रोमच्छेदश्च पञ्चपलः, वाननिमित्तः ।

रजककर्माह — रजका इत्यादि । ते, काष्ठफलकश्लक्ष्णशिलासु काष्ठफलकेषु मसृणशिलासु च, वस्त्राणि नेनिज्युः शोधयेयुः । अन्यत्र खरशिलादौ नेनिजतः नेजनं कुर्वन्तः, णिजेरभ्यस्ताच्छतरि जसि रूपमिदम् । वस्त्रोपघातं, षट्पणं दण्डं च दद्युः ।

मुद्गराङ्कादित्यादि । मुद्गरायुधप्रतिमोपराञ्जितात् । शेषं सुबोधम् ।

अर्पितवस्त्रप्रत्यर्पणकालनियमं तदतिक्रमे दण्डं चाह — मुकुलावदातमिति । मुकुलवन्मसृणसितं, शिलापट्टशुद्धं शिलापट्टस्वच्छं, धौतसूत्रवर्णं क्षालितसूत्रधवलं, प्रमृष्टश्वेतं च अत्यन्तधवलं च, एवं चतुष्प्रकारधावल्यं वस्त्रम्, एकरात्रोत्तरं पूर्वपूर्वापेक्षया एकरात्राधिकप्रत्यर्पणकालमुत्तरोत्तरं यस्मिंस्तत् तथाभूतं दद्युः । तत्राद्यं मुकुलावदातमेकरात्रेण प्रत्यर्पणीयं द्वितीयं द्विरात्रेण तृतीयं त्रिरात्रेण चतुर्थं चतूरात्रेणेति व्यवस्था ।

रञ्जनार्थान् दिवसानाह — पञ्चेत्यादि । तनुरागं शोणशिलावृक्षत्वग्योगसाधितकषायरञ्जनीयं वस्त्रं, पञ्चरात्रिकं पञ्चरात्रेण देयम् । नीलं नील्या महारसया रक्तं, पुष्पलाक्षामञ्जिष्ठारक्तं पुष्पं कुङ्कुमकुसुम्भशेफालिकादि लाक्षा अलक्तः मञ्जिष्ठा अञ्जनवल्लिकाख्या आभिः रञ्जितं, षड्रात्रिकम् ।

श्रद्धेया रागविवादेषु वेतनं कुशलाः कल्पयेयुः।

परार्ध्यानां पणो वेतनं मध्यमानामर्धपणः, प्रत्यवराणां पादः।

स्थूलकानां माषद्विमाषकं द्विगुणं रक्तकानाम्। प्रथमनेजने चतुर्भागः क्षयः। द्वितीये पञ्चभागः। तेनोत्तरं व्याख्यातम्।

रजकैस्तुन्नवाया व्याख्याताः।

सुवर्णकाराणाम्। अशुचिहस्ताद् रूप्यं सुवर्णमनाख्याय सरूपं क्रीणतां द्वादशपणो दण्डः, विरूपं चतुर्विंशतिपणः, चोरहस्ता-

---

गुरुपरिकर्म बहुशिल्पम्, अत एव यत्नोपचार्यं यत्नसंस्कार्यं, जात्यं प्रशस्तं, वासः नेत्रादि, सप्तरात्रिकं सप्तरात्रप्रत्यर्पणीयम्। ततः परं विहितकालातिक्रमे वेतनहानिं प्राप्नुयुः।

श्रद्धेया इति। आप्ताः, कुशलाः रागगुणपरीक्षानिपुणाः, रागविवादेषु वेतनं कल्पयेयुः।

रागवेतनमाह—परार्ध्यानामिति। प्रशस्तानां रागाणां, पणो वेतनं, मध्यमानाम् अर्धपणः, प्रत्यवराणां अधमानां पादः पादपणः।

निर्णेजनभृतिमाह—स्थूलेत्यादि। स्थूलकानां निर्णेजने माषद्विमाषकं माषकं द्विमाषकं वा वेतनम् अधममध्यमोत्तमानुसारेण कल्प्यम्। रक्तकानां द्विगुणं द्विमाषकचतुर्माषकादि पूर्ववत्। नेजनावृत्तिकृतमर्घक्षयमाह—प्रथमनेजन इति। तत्र, चतुर्भागः क्षयः क्रयणकालिकमूल्यस्य चतुर्भागो हीयते। द्वितीये नेजने, पञ्चभागः क्षयः, अर्थात् प्रथमनेजनमूल्यस्य। तेनोत्तरं व्याख्यातमिति। अनया रीत्या तृतीयादौ नेजने द्वितीयादिनेजनमूल्यादेः षड्भागादिः क्षयो द्रष्टव्य इत्यर्थः॥

रजकैस्तुन्नवाया व्याख्याता इति। तुन्नवायाः सौचिकाः। तैरपि वस्त्राणां सप्तरात्रेण प्रत्यर्पणं, विनाशितानां प्रथमनेजनाद्यनुसारेण चतुर्भागादिहीनमूल्यदानं च रजकवत् कर्तव्यमित्यर्थः।

सुवर्णकाराणामिति। सम्बद्धमभिधीयत इति शेषः। अर्थात् तत्प्रतारणपरिहारोपायोऽभिधीयते। अशुचिहस्तादिति। अशुचयो दासकर्मकरादयः तद्द्वारेण, सरूपं भूषणाद्याकारयुक्तं, रूप्यं सुवर्णं च, अनाख्याय सौवर्णिकमनिवेद्य क्रीणतां, द्वादशपणो दण्डः। विरूपं तत् क्रीणतां चतुर्विंशति-

दष्टचत्वारिंशत्पणः । प्रच्छन्नविरूपमूल्यहीनक्रयेषु स्तेयदण्डः । कृतभाण्डोपधौ च ।

सुवर्णान्माषकमपहरतो द्विशतो दण्डः । रूप्यधरणान्माषकमपहरतो द्वादशपणः । तेनोत्तरं व्याख्यातम् ।

वर्णोत्कर्षमसाराणां योगं वा साधयतः पञ्चशतो दण्डः । तयोरपचरणे रागस्यापहारं विद्यात् ।

माषको वेतनं रूप्यधरणस्य । सुवर्णस्याष्टभागः । शिक्षाविशेषेण द्विगुणा वेतनवृद्धिः । तेनोत्तरं व्याख्यातम् ।

ताम्रवृत्तकंसवैकृन्तकारकूटानां पञ्चकं शतं वेतनम् । ताम्र-

पणः । चोरहस्तात् क्रीणताम्, अष्टचत्वारिंशत्पणो दण्डः । प्रच्छन्नविरूप मूल्यहीनक्रयेषु स्तेयदण्ड इति । अन्याविदितं विनाशितरूपं रूप्यसुवर्णं हीनेन मूल्येन क्रीणानस्य चोरदण्डः । कृतभाण्डोपधौ च निर्मितभाण्डपरिवर्तने च, स्तेयदण्ड इति वर्तते ।

सुवर्णादिति । तस्मात्, माषकं सुवर्णषोडशभागम् । अपहरतः, द्विशतो द्विशतपणो दण्डः । रूप्यधरणात् धरणप्रमाणाद् रूप्यात्, माषकमपहरतः, द्वादशपणो दण्डः । तेनोत्तरं व्याख्यातमिति । अनेन प्रकारेण द्विमाषकाद्यपहारे दण्डद्वैगुण्यादिकं कल्पनीयमित्यर्थः ।

वर्णेत्यादि । वर्णोत्कर्षम्, असाराणां हीनवर्णानां, साधयतः, योगं वा सारैरसारयोगं वा साधयतः, पञ्चशतो दण्डः । तयोरिति । कृत्रिमवर्णोत्कर्षस्य असारयुक्तस्य चेत्येतयोः, रागस्य वर्णस्य, अपचरणे यथाविध्यग्निप्रक्षेपेणापगमने, अपहारं विद्यात् ।

कर्मवेतनमाह — माषको वेतनं रूप्यधरणस्येति । धरणप्रमाणस्य रूप्यस्य शिल्पकरणे रूप्यमाषक एको वेतनम् । सुवर्णस्य षोडशमाषकमितस्य स्वर्णस्य शिल्पे, अष्टभागः सुवर्णमाषस्याष्टमांशः, वेतनम् । शिक्षाविशेषेण शिल्पवैचित्र्येण, द्विगुणा वा वेतनवृद्धिः । तेनोत्तरं व्याख्यातमिति । अनेन प्रकारेण गुरुशिल्पकरणे वेतनवृद्धिः कल्पनीया ।

ताम्रवृत्तकंसवैकृन्तकारकूटानामिति । ताम्रादीनां पञ्चानां, पञ्चकं शतं तुलाप्रमाणस्य कर्मणि पञ्चपणं वेतनम् । कर्माणि क्षयमानमाह—ताम्र-

पिण्डो दशभागक्षयः। पलहीने हीनद्विगुणो दण्डः। तेनोत्तरं व्याख्यातम्।

सीसत्रपुपिण्डो विंशतिभागक्षयः। काकणी चास्य पलवेतनम्। कालायसपिण्डः पञ्चभागक्षयः। काकणीद्वयं चास्य पलवेतनम्। तेनोत्तरं व्याख्यातम्।

रूपदर्शकस्य स्थितां पणयात्रामकोप्यां कोपयतः कोप्यामकोपयतो द्वादशपणो दण्डः।

व्याजीपरिशुद्धा पणयात्रा। पणान्माषकमुपजीवतो द्वादशपणो दण्डः। तेनोत्तरं व्याख्यातम्।

कूटरूपं कारयतः प्रतिगृह्णतो निर्यापयतो वा सहस्रं दण्डः। कोशे प्रक्षिपतो वधः।

सरकपांसुधावकाः सारत्रिभागं लभेरन्। द्वौ राजा रत्नं च। रत्नापहार उत्तमो दण्डः।

पिण्ड इति। दशभागक्षयः कर्मकरणे दशभागहानिर्भवति। पलहीन इत्यादि। कर्मण्येकपलहानौ, हीनद्विगुणो दण्डः। एवं द्विपलादिहानौ दण्डविधिरूह्य इत्याह — तेनोत्तरं व्याख्यातमिति।

सीसत्रपुपिण्ड इत्यादि। सुबोधम्।

रूपदर्शकस्येति। पणपरीक्षको रूपदर्शकः तस्य, स्थितां वर्तमानां, पणयात्रामकोप्याम् अदूषणीयं पणव्यवहारं, कोपयतः दूषयतः, कोप्यामकोपयतः दूषणीयामदूषयतः, द्वादशपणो दण्डः।

व्याजीपरिशुद्धा पणयात्रेति। राजदेयं शते पञ्चभागं दत्त्वा पणयात्रां कुर्यात्। पणादिति। पणात् माषकम् उपजीवतः एकस्मिन् शुद्धे पणे माषमेकं हरतः लक्षणाध्यक्षस्य, द्वादशपणो दण्डः। एवमुपजीवनबहुत्वे दण्डबहुत्वमूह्यमित्याह — तेनोत्तरमित्यादि।

कूटरूपमिति। कपटनाणकं, कारयतः, प्रतिगृह्णतः स्वीकुर्वतः, निर्यापयतो वा निर्गमयतो वा, सहस्रं पणसहस्रं, दण्डः। कोशे प्रक्षिपतः अकूटरूपैः सह मिश्रयतः, वधः।

सरकेत्यादि। सरकपांसुधावकाः सरकं रत्नं खनिषु रत्नसम्पृक्तपांसुधावनकर्मकराः, सारत्रिभागं तत्कर्मलब्धसारवस्तुत्रिभागं लभेरन्। द्वौ सारत्रिभागौ, रत्नं च, राजा लभेत। रत्नापहारे उत्तमो दण्डः, सरकपांसुधावकानाम्।

खनिरत्ननिधिनिवेदनेषु षष्ठमंशं निवेत्ता लभेत। द्वादशमंशं भृतकः।

शतसहस्रादूर्ध्वं राजगामी निधिः। ऊने षष्ठमंशं दद्यात्।

पौर्वपौरुषिकं निधिं जानपदः शुचिः स्वकरणेन समग्रं लभेत। स्वकरणाभावे पञ्चशतो दण्डः। प्रच्छन्नादाने सहस्रम्।

भिषजः प्राणाबाधिकमनाख्यायोपक्रममाणस्य विपत्तौ पूर्वः साहसदण्डः। कर्मापराधेन विपत्तौ मध्यमः। मर्मवेधवैगुण्यकरणे दण्डपारुष्यं विद्यात्।

कुशीलवा वर्षारात्रिमेकस्था वसेयुः। कामदानमतिमात्रमेकस्यातिवादं च वर्जयेयुः। तस्यातिक्रमे द्वादशपणो दण्डः। कामं देशजातिगोत्रचरणमैथुनापहाने नर्मयेयुः।

खनिरत्ननिधिनिवेदनेष्विति। खन्यादीनामनर्हहस्तगतानां राज्ञे निवेदनेषु, षष्ठम् अंशं, निवेत्ता निवेदयिता, लभेत। भृतकः खन्यादिनिवेदनवृत्तिः, द्वादशमंशं, लभेत।

निधिः कियद्द्रव्यमानादूर्ध्वं राजगामीत्याह — **शतसहस्रादित्यादि**। तावत्पणमानपर्यन्तस्तूपलब्धृगामीत्यर्थः। ऊने, षष्ठम् अंशं, दद्याद् राज्ञे।

पौर्वपौरुषिकमिति। पितृपितामहादयः पूर्वपुरुषाः तैः स्थापितं, निधिं, जानपदः, शुचिः सद्वृत्तः, स्वकरणेन साक्ष्यलेख्यादिभिः स्वत्वविभावनेन, समग्रं लभेत शतसहस्रातिगमपि। स्वकरणाभावे पञ्चशतो दण्डः। प्रच्छन्नादाने अप्रकाश्य स्वायत्तीकरणे, सहस्रं दण्डः।

प्राणबाधाकरं रोगमनिवेद्य राज्ञे रोगिणं चिकित्सतो वैद्यस्य तद्विपत्तौ पूर्वः साहसदण्डः, चिकित्सादोषेण तद्विपत्तौ मध्यम इत्याह — **भिषज** इत्यादि। **मर्मवेधवैगुण्यकरण** इति। मर्माणि शस्त्रक्रियान्यथाकरणे, दण्डपारुष्यं विद्यात् तदाख्येन विवादपदेन भिषजमभियुञ्जीत, भिषक्क्रियादोषेण रोगिणो यदङ्गमुपहतं तद् भिषज उपहन्यादित्यर्थः।

कुशीलवा इति। लङ्घनप्लवनगीतादिवृत्तयः, वर्षारात्रिं वर्षाकालिकरात्रीः, एकस्था वसेयुः एकं स्थानमाश्रित्य वसेयुः, न तु स्थानात् स्थानान्तरं गच्छन्तः स्ववृत्तिमनुतिष्ठेयुः, तदनुष्ठाने हि सति कर्षकाणां तदासङ्गात् कृषिकर्मणे वर्षाकालकरणीयस्योपघातः स्यादिति। **कामदानमतिमात्रमिति**। प्रीतिवशात् केनचित् न्याय्यां मात्रामतिक्रम्य दीयमानं द्रव्यं, वर्जयेयु

कुशीलवैश्चारणा भिक्षुकाश्च व्याख्याताः। तेषामयश्शूलेन यावतः पणानभिवदेयुः, तावन्तः शिफाप्रहारा दण्डाः।

शेषाणां कर्मणां निष्पत्तिवेतनं शिल्पिनां कल्पयेत्।

एवं चोरानचोराख्यान् वणिक्कारुकुशीलवान्।
भिक्षुकान् कुहकांश्चान्यान् वारयेद् देशपीडनात्॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
प्रथमोऽध्यायः कारुकरक्षणम्,
आदितोऽष्टसप्ततितमः॥

न स्वीकुर्युः। एकस्यातिवादं च बहुषु मध्ये एकस्यातिस्तुतिं च, वर्जयेयुः। तस्यातिक्रमे द्वादशपणो दण्डः। काममिति। देशजातिगोत्रचरणमैथुनापहाने चरणः शाखाध्येता शेषं प्रतीतं, देशजात्याद्यपहासादिपरिहारे सति, कामं नर्मयेयुः विनोदयेयुः प्रेक्षकान्।

कुशीलवोक्तमेव विधानं चारणानां भिक्षुकाणां च द्रष्टव्यमित्याह — **कुशीलवैरित्यादि**। चारणाः अङ्गविक्षेपमात्रकर्तारः। तेषां निर्धनानां दण्डे विशेषमाह — **तेषामिति**। तेषाम्, अयश्शूलेन हृदयतोदकत्वाद् अयश्शूलतुल्येन परमर्मोद्घाटनेन निमित्तेन, यावतः पणान्, अभिवदेयुः दण्डत्वेन विदध्युर्धर्मस्थाः, तावन्तः विहितपणतुल्यसंख्याः, शिफाप्रहाराः दण्डाः धनदण्डप्रतिनिधयः कार्याः।

शिल्पिनामुक्तातिरिक्तकर्मविषयं निष्पत्तिवेतनमूहनीयमुक्तदिशेत्याह— **शेषाणामित्यादि**।

अध्यायान्ते श्लोकमाह—**एवमित्यादि**। चोरान् अचोराख्यान् चोरकर्म कुर्वाणानप्यचोरसंज्ञान्। कुहकान् ऐन्द्रजालिकान्॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
प्रथमोऽध्यायः कारुकरक्षणम्,
आदितोऽष्टसप्ततितमः॥

---

७७. प्रक. वैदेहकरक्षणम् ।

संस्थाध्यक्षः पण्यसंस्थायां पुराणभाण्डानां स्वकरणविशुद्धाना-माधानं विक्रयं वा स्थापयेत् । तुलामानभाण्डानि चावेक्षेत, पौतवाप-चारात् ।

परिमाणीद्रोणयोरर्धपलहीनातिरिक्तमदोषः । पलहीनातिरिक्ते द्वादशपणो दण्डः । तेन पलोत्तरा दण्डवृद्धिर्व्याख्याता ।

तुलायाः कर्षहीनातिरिक्तमदोषः । द्विकर्षहीनातिरिक्ते षट्पणो दण्डः । तेन कर्षोत्तरा दण्डवृद्धिर्व्याख्याता ।

आढकस्यार्धकर्षहीनातिरिक्तमदोषः । कर्षहीनातिरिक्ते त्रिपणो दण्डः । तेन कर्षोत्तरा दण्डवृद्धिर्व्याख्याता ।

तुलामानविशेषाणामतोऽन्येषामनुमानं कुर्यात् ।

वैदेहकरक्षणमिति सूत्रम् । वैदेहकाः वणिजः कण्टकेषु प्रधानाः, तेभ्यो जनपदस्य रक्षणमभिधीयते इति सूत्रार्थः । 'वणिक्कारुकुशीलवानि'ति वणिक्प्रस्तावात् तद्रक्षणप्रकारो व्युत्पाद्यते ।

संस्थाध्यक्ष इति । विपणिमार्गाध्यक्षः, पण्यसंस्थायां पण्यशालायां, पुराणभाण्डानां पुराणानां धान्यादिपण्यानां, पुराणत्वोक्तिः कालपरिवाससंभा-वितगुणयोगार्था, स्वकरणविशुद्धानां विभावितस्वत्वानाम्; एतच्च चोरितत्व-परिहारार्थम् । आदानं ग्रहणं प्रवेशनम्, आधानपाठे निवेशनं, विक्रयं वा, स्थापयेत् । तुलामानभाण्डानि च परिमाण्यादीनि द्रोणाढकादीनि च, अवेक्षेत परीक्षेत, पौतवापचारात् पौतवदोषं परिहर्तुम् ।

परिमाणीद्रोणयोरिति । तुलादण्डधान्यमानविशेषयोः अर्धपलही-नातिरिक्तम् अर्धपलन्यूनत्वमर्धपलाधिकत्वं च, अदोषः दोषाभावः । पलहीना-तिरिक्ते एकपलहानौ तदतिरेके वा, द्वादशपणो दण्डः । तेन पलोत्तरा द्विप-लहान्यतिरेके चतुर्विंशतिपणो दण्ड इत्यादिरूपा, दण्डवृद्धिः व्याख्याता ।

तुलाया इत्यादिस्तुलाया **आढकस्येत्यादि**राढकस्य चार्धकर्षैककर्ष-न्यूनातिरिक्तविषयविधानग्रन्थः स्पष्टार्थः ।

अनुक्तानां तुलाविशेषमानविशेषाणां हीनातिरिक्तविषयं विधानमुक्त-दिशानुमेयमित्याह—**तुलामानविशेषाणामित्यादि** ।

तुलामानाभ्यामतिरिक्ताभ्यां क्रीत्वा हीनाभ्यां विक्रीणानस्य त एव द्विगुणा दण्डाः ।

गण्यपण्येष्वष्टभागं पण्यमूल्येष्वपहरतः षण्णवतिर्दण्डः ।

काष्ठलोहमणिमयं रज्जुचर्ममृन्मयं सूत्रवल्करोममयं वा जात्यमित्यजात्यं विक्रयाधानं नयतो मूल्याष्टगुणो दण्डः ।

सारभाण्डमित्यसारभाण्डं, तज्जातमित्यतज्जातं, राढायुक्तमुपधियुक्तं समुद्गपरिवर्तिमं वा विक्रयाधानं नयतो हीनमूल्यं चतुष्पञ्चाशत्पणो दण्डः, पणमूल्यं द्विगुणः, द्विपणमूल्यं द्विशतः । तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता ।

कारुशिल्पिनां कर्मगुणापकर्षमाजीवं विक्रयक्रयोपघातं वा सम्भूय समुत्थापयतां सहस्रं दण्डः ।

तुलामानाभ्यामतिरिक्ताभ्यामिति । तुलाविशेषेण भाजन्यादिना मानविशेषेण च प्रस्थकुडुबादिनातिरिक्तेन, क्रीत्वा, हीनाभ्यां ताभ्यां, विक्रीणानस्य, त एव द्वादशपणादय एव, द्विगुणा दण्डाः ।

गण्यपण्येष्विति । तेषु विषये, पण्यमूल्येषु अष्टभागम् अपहरतः षण्णवतिर्दण्डः ।

काष्ठादिमयं पण्यं निकृष्टं श्रेष्ठव्यपदेशेन विक्रयमाधानं च कुर्वतो मूल्याष्टगुणो दण्ड इत्याह — काष्ठेत्यादि ।

सारेत्यादि । सारभाण्डमित्यसारभाण्डं कर्पूरादिकमकृत्रिमं सारपण्यमित्युक्त्वा तत् कृत्रिमं, हीनमूल्यं पणावरमूल्यं, विक्रयाधानं नयतः, तज्जातमित्यतज्जातं तद्देशजमित्युक्त्वा अतद्देशजं, हीनमूल्यं विक्रयाधानं नयतः, राढायुक्तं राढा शोभा तया गुणवद्रत्नलक्षणात् श्रेष्ठरत्नयुक्तम् अर्थात् कृत्रिम मौक्तिकादिकं, हीनमूल्यं विक्रयाधानं नयतः, उपधियुक्तं कृत्रिमपण्यमिश्रं, हीनमूल्यं विक्रयाधानं नयतः, समुद्गपरिवर्तिमं समुद्गस्य सम्पुटस्य पूर्वदर्शितस्य परिवर्तेन कृतं कस्मिंश्चित् समुद्गे पण्यं प्रदर्श्यान्यस्मात् समुद्गाद् उद्धृतमित्यर्थः, हीनमूल्यं विक्रयाधानं नयतः, चतुष्पञ्चाशत्पणो दण्डः । पणमूल्यम् एकपणमूल्यम् असारभाण्डादिकं, विक्रयाधानं नयतः, द्विगुणः उक्तदण्डद्विगुणो दण्डः । द्विपणमूल्यं विक्रयाधानं नयतः, द्विशतः । तेन उक्तप्रकारेण, अर्घवृद्धौ त्रिपणचतुष्पणादिपण्यमूल्यवृद्धौ, दण्डवृद्धिः व्याख्याता ।

कारुशिल्पिनामिति । कारूणां शिल्पिनां च, कर्मगुणापकर्षम् 'एवङ्गुणकं भाण्डं निर्मातव्यमि'त्युक्ते 'तादृग्गुणं मा कुर्वि'ति प्रतिषेधेन कर्मगुण-

वैदेहकानां वा सम्भूय पण्यमवरुन्धतामनर्घेण विक्रीणतां क्रीणतां वा सहस्रं दण्डः ।

तुलामानान्तरमर्घवर्णान्तरं वा । धरकस्य मायकस्य वा पणमूल्यादष्टभागं हस्तदोषेणाचरतो द्विशतो दण्डः । तेन द्विशतोत्तरा दण्डवृद्धिर्व्याख्याता ।

धान्यस्नेहक्षारलवणगन्धभैषज्यद्रव्याणां समवर्णोपधाने द्वादशपणो दण्डः ।

यन्निसृष्टमुपजीवेयुः, तदेषां दिवससञ्जातं सङ्ख्याय वणिक् स्थापयेत् । क्रेतृविक्रेत्रोरन्तरपतितमदायादन्यं भवति । तेन धान्यपण्य-

---

हानिं, सम्भूय ऐकमत्येन, समुत्थापयताम्, आजीवं लाभं, सम्भूय समुत्थापयताम् एकपणवेतनं कर्म पणद्वयवेतनं कल्पयतां, विक्रयक्रयोपघातं वा विक्रयोपघातं वा स्वपण्यविक्रये मूल्यातिरेचनेनोपघातं वा क्रयोपघातं वा परपण्यस्वीकरणे मूल्यपातनेनोपघातं वा, सम्भूय समुत्थापयतां, सहस्रं दण्डः पणसहस्रं प्रत्येकं दण्डः ।

वैदेहकानां वेति । वणिजां च, सम्भूय ऐकमत्येन, पण्यम् अवरुन्धताम् अन्यत्र विक्रेतुमविसृजताम्, अनर्घेण अयुक्तेन मूल्येन, विक्रीणतां, क्रीणतां वा, सहस्रं दण्डः प्रत्येकम् ।

तुलेत्यादि । तुलामानान्तरम् आयमान्यादितुलाभ्य उत्पद्यमानो लाभविशेषः प्रस्थादिमानविशेषेभ्य उत्पद्यमानो लाभविशेषश्च, अर्घवर्णान्तरं वा मूल्यभेदनिमित्तो लाभविशेषश्च, पुस्तके लेख्यम् इति वाक्यशेषः । धरकस्य तुलाधारकस्य, मायकस्य वा, पणमूल्यादष्टभागम् एकपणमूल्यस्याष्टमांशप्रमाणं तुलामानान्तरं, हस्तदोषेण, आचरतः कुर्वतः, द्विशतो दण्डः । तेन उक्तविधिना, द्विशतोत्तरा चतुर्भागाद्याहरणे द्विगुणादिका, दण्डवृद्धिः व्याख्याता ।

धान्यस्नेहक्षारलवणगन्धभैषज्यद्रव्याणामिति । धान्यादीनां, समवर्णोपधाने तुल्यवर्णैर्हीनमूल्यैर्धान्यादिभिर्मिश्रणे, द्वादशपणो दण्डः ।

यन्निसृष्टमिति । यत् निसृष्टम् उपजीव्यत्वेनानुमतम् उपजीवेयुः विक्रेत्रादयः । तद् एषां दिवससञ्जातं प्रतिदिनोत्पन्नं, संख्याय संख्यया परिच्छिद्य, वणिक् स्थापयेत् संस्थाध्यक्षः प्रकल्पयेत् । **क्रेतृविक्रेत्रोरन्तरपतितमिति** । क्रेतृविक्रेतृशब्दौ क्रयविक्रयोपलक्षकौ, क्रये विक्रये च पण्यानां संस्थाध्यक्षेण स्वयं क्रियमाणेऽन्तरागतमधिकं धनम्, अदायादन्यं दायादनार्हम् अन्याविभाज्यं भवति केवलराजग्राह्यमेव भवतीत्यर्थः । आदायादन्य-

निचयांश्चानुज्ञाताः कुर्युः। अन्यथानिचितमेषां पण्याध्यक्षो गृह्णीयात्। तेन धान्यपण्यविक्रये व्यवहरेतानुग्रहेण प्रजानाम्।

अनुज्ञातक्रयादुपरि चैषां स्वदेशीयानां पण्यानां पञ्चकं शतमाजीवं स्थापयेत्। परदेशीयानां दशकम्। ततः परमर्घं वर्धयतां क्रये विक्रये वा भावयतां पणशते पञ्चपणाद् द्विशतो दण्डः। तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता।

सम्भूयक्रये चैषाम् अविक्रीते नान्यं सम्भूयक्रयं दद्यात्। पण्योपघाते चैषामनुग्रहं कुर्यात् पण्यबाहुल्यात्।

पण्याध्यक्षः सर्वपण्यान्येकमुखानि विक्रीणीत। तेष्वविक्रीतेषु नान्ये विक्रीणीरन्। तानि दिवसवेतनेन विक्रीणीरन् अनुग्रहेण प्रजानाम्।

मिति वृद्धपाठो मातृकासु चिन्त्यार्थः। अदायाद्यमित्येव वा पाठः शुद्धः सम्भाव्यते। **तेनेति**। धान्यपण्यनिचयांश्च, तेन संस्थाध्यक्षेण, अनुज्ञाताः कुर्युः। एषाम् अन्यथानिचितम् अननुज्ञातनिचितं, पण्याध्यक्षो गृह्णीयात्। **तेनेति**। तेन निचितेन, धान्यपण्यविक्रये विषये, प्रजानाम् अनुग्रहेण व्यवहरेत प्रजानामुपकारो यथा स्यात् तथा समाचरेदित्यर्थः।

किं तन्निसृष्टमित्याह—**अनुज्ञातक्रयादुपरि चेति**। स्वीकरणकालिकादर्घादुपरि, एषां वणिजां, स्वदेशीयानां स्वदेशभवानां, पण्यानां, पञ्चकं शतम् आजीवं स्थापयेत् शते पञ्चपणिकं लाभं व्यवस्थापयेत्। परदेशीयानां पण्यानां, दशकं शतं शते दशपणिकं लाभं स्थापयेत्। ततः परम् उक्तलाभादधिकम्, अर्घं मूल्यं, वर्धयतां, क्रये विक्रये वा, भावयतां लाभमुत्पादयतां, पणशते पञ्चपणात् पणपञ्चकमात्रलाभभावनादपि, द्विशतो दण्डः। **तेनेति**। उक्तविधिना, अर्घवृद्धौ अर्घवर्धनेन लाभवर्धने, दण्डवृद्धिः व्याख्याता पणशते दशपणभावनाच्चतुश्शतो दण्ड इत्यादिरीत्या दण्डस्य वृद्धिः व्याख्याता।

सम्भूयेत्यादि। एषां वणिजां, सम्भूयक्रये संभूयक्रीते, अविक्रीते अकृतविक्रये सति, अन्यं सम्भूयक्रयं, न दद्यात् अर्थाद् वणिगन्तरेभ्यः। पण्योपघाते च जलाग्न्यादिजनिते पण्यदूषणे, एषां सम्भूयक्रयकारिणाम्, अनुग्रहम् उपकारं, कुर्यात्, पण्यबाहुल्यात् पण्यानां बहुत्वे सति। इदमुत्तरवाक्येन वा सम्बध्यते।

पण्याध्यक्ष इति। सः, सर्वपण्यानि, एकमुखानि विक्रीणीत एकविक्रेतृद्वारेण विक्रीणीत। तेषु सर्वपण्येषु, अविक्रीतेषु सत्सु, अन्ये पूर्वाक्री-

देशकालान्तरितानां तु पण्यानां —
प्रक्षेपं पण्यनिष्पत्तिं शुल्कं वृद्धिमवक्रयम् ।
व्ययानन्यांश्च सङ्ख्याय स्थापयेदर्घमर्घवित् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
द्वितीयोऽध्यायः वैदेहकरक्षणम्,
आदित एकोनाशीतितमः ॥

कृतविक्रयकर्मभ्योऽतिरिक्ताः, न विक्रीणीरन् । तानि पण्यानि दिवसवेतनेन दिवसवेतनदानेन, विक्रीणीरन्, प्रजानाम्, अनुग्रहेण आनुकूल्येन ।

देशकालव्यवहितपण्यविषयमाह — **देशकालान्तरितानां तु पण्यानामिति** । इदं **प्रक्षेपमि**त्यादिवक्ष्यमाणश्लोकान्वयि । देशव्यवहितानां कालव्यवहितानां च पण्यानां, प्रक्षेपं वस्तुमूल्यं, पण्यनिष्पत्तिम्, इदमियता कालेन निष्पद्यत इत्यमुमर्थं, शुल्कं, वृद्धिम्, अवक्रयं शकटबलीवर्दादिभाटकम्, अन्यान् व्ययांश्च, संख्याय, अर्घं, स्थापयेत् कल्पयेत्, अर्घवित् अर्घविधानाभिज्ञः संस्थाध्यक्षः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
द्वितीयोऽध्यायः वैदेहकरक्षणम्,
आदित एकोनाशीतितमः ॥

---

७८. प्रक. उपनिपातप्रतीकारः ।

दैवान्यष्टौ महाभयानि — अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसीति । तेभ्यो जनपदं रक्षेत् ।

ग्रीष्मे बहिरधिश्रयणं ग्रामाः कुर्युः । दशकुलीसङ्ग्रहेणाधिष्ठिता वा । नागरिकप्रणिधावग्निप्रतिषेधो व्याख्यातः । निशान्तप्रणिधौ राजपरिग्रहे च ।

बलिहोमस्वस्तिवाचनैः पर्वसु चाग्निपूजाः कारयेत् ।

वर्षारात्रमनूपग्रामाः पूरवेलामुत्सृज्य वसेयुः । काष्ठवेणुनावश्चावगृह्णीयुः ।

उपनिपातप्रतीकार इति सूत्रम् । उपनिपाता नाम दैव्योऽग्न्यादिनिमित्ता विपदः, तेषां प्रतीकारोऽभिधीयत इति सूत्रार्थः । कण्टकास्तावद् द्विविधा मनुष्यकण्टका देवकण्टकाश्चेति । तत्र मनुष्यकण्टकाः कारुकादय उक्ताः, देवकण्टकास्त्वधुनोच्यन्ते ।

दैवान्यष्टावित्यादि । स्पष्टार्थम् ।

तेष्वष्टसु अग्नितो रक्षणप्रकारमाह — **ग्रीष्म** इति । तस्मिन्, ग्रामाः, अधिश्रयणं पाकस्थाल्याश्चुल्ल्यां निवेशनं, बहिः गृहबहिर्देशे, कुर्युः । दशकुलीसंग्रहेण दशकुलीरक्षकेण गोपनाम्ना, रक्षकेणेत्येव भाषापाठः । अधिष्ठिता वा 'इहाधिश्रयणं कर्तव्यमि'ति चोदिता वा, कुर्युः । नागरिकप्रणिधौ, अग्निप्रतिषेधः अग्निभयपरिहारविधिः, व्याख्यातः 'अग्निप्रतीकारं च ग्रीष्मे' इत्यादिनोक्तः । निशान्तप्रणिधौ राजपरिग्रहे च व्याख्यातः 'मानुषेणाग्निना त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहती'त्यादिनोपदिष्टः ।

बलीत्यादि । पर्वसु पूर्णिमादिषु, बलिहोमस्वस्तिवाचनैः भूतबलिभिः रक्षाहोमैः शान्तिकैः स्वस्तिवाचनैश्च, अग्निपूजाः कारयेत् ।

अथ जलप्रतिषेधमाह — **वर्षारात्रमिति** । वर्षाकालिकरात्रीः, अनूपग्रामाः जलप्रायप्रदेशवासिनः, पूरवेलाम् उत्सृज्य जलप्रवाहसन्निकृष्टं तटं परिहृत्य, वसेयुः । इह वर्षापूर्वपदकाद् रात्रिशब्दाद् अच्प्रत्ययोऽन्वेष्यः । रात्रिमिति वा पाठः । काष्ठवेणुनावश्च काष्ठं वेणुं नावं च जलप्रवाहतरणार्थाः, अवगृह्णीयुः संगृह्णीयुः ।

उह्यमानमलाबूदृतिप्लवगण्डिकावेणिकाभिस्तारयेयुः । अनभिसरतां द्वादशपणो दण्डः अन्यत्र प्लवहीनेभ्यः ।

पर्वसु च नदीपूजाः कारयेत् ।

मायायोगविदो वेदविदो वर्षमभिचरेयुः ।

वर्षावग्रहे शचीनाथगङ्गापर्वतमहाकच्छपूजाः कारयेत् ।

व्याधिभयमौपनिषदिकैः प्रतीकारैः प्रतिकुर्युः । औषधैश्चिकित्सकाः, शान्तिप्रायश्चित्तैर्वा सिद्धतापसाः ।

तेन मरको व्याख्यातः । तीर्थाभिषेचनं महाकच्छवर्धनं गवां श्मशानावदोहनं कबन्धदहनं देवरात्रिं च कारयेत् ।

उह्यमानमिति । प्रवाहेण नीयमानं बाहुतरणाक्षमम्, अलाबूदृतिप्लवगण्डिकावेणिकाभिः अलाबूस्तुम्बीफलं दृतिः चर्मभस्त्रा प्लव उडुपं गण्डिका तरुप्रकाण्डकं वेणिका जलतरणसाधनभेदः ताभिः, तारयेयुः । अनभिसरतां तारयितुमनभिगच्छतां, द्वादशपणो दण्डः । **अन्यत्र प्लवहीनेभ्य** इति । तरणसाधनहीनाश्चेदनभिसरन्तो नापराध्यन्तीत्यर्थः ।

पर्वसु चेति । अमावास्यादिषु, नदीपूजाः कारयेत् जलविपत्प्रशमार्थम् ।

मायायोगविद इति । शैवादयो मान्त्रिकाः, वेदविदः अथर्ववेदनिपुणाः, वर्षम् अतिवृष्टिम्, अभिचरेयुः जपहोमादिना प्रशमयेयुः ।

वर्षावग्रह इति । वृष्टिप्रतिबन्धे सति, शचीनाथगङ्गापर्वतमहाकच्छपूजाः इन्द्रजाह्नवीशैलसमुद्रपूजाः, कारयेत् ।

अथ व्याधिभयप्रतीकारः । व्याधिस्तावद् द्विविधः कृत्रिमोऽकृत्रिमश्च । आद्य औपनिषदिकोक्तविषधूमविषाम्ब्वादिदोषप्रभवः, द्वितीयो धातुदोषजः । तत्र कृत्रिमव्याधिभयम् औपनिषदिकोक्तैर्विधानैः प्रतिकुर्युः, अकृत्रिमव्याधिभयं भिषज औषधैः सिद्धतापसाश्च शान्तिकर्मभिर्व्रतोपवासादिभिः प्रतिविदध्युरित्याह — **व्याधिभयमित्यादि** ।

तेनेति । उक्तेन व्याधिशमनप्रकारेण, मरको मारीनामा महाव्याधिः, व्याख्यातः उक्तप्रतीकारः । विशेषं त्वाह— **तीर्थाभिषेचनमिति** । गङ्गादितीर्थस्नानं, महाकच्छवर्धनं समुद्रपूजनं, गवां श्मशानावदोहनं श्मशाने दोहनं, कबन्धदहनं तण्डुलसक्तुनिर्मितस्य कबन्धस्य श्मशाने दहनं, देवरात्रिं च देवं कस्मिंश्चित् स्थानेऽर्चयित्वा रात्रिजागरणं च, कारयेत् ।

पशुव्याधिमरके स्थानान्यर्थनीराजनं स्वदैवतपूजनं च कारयेत्।

दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वानुग्रहं कुर्यात्। दुर्गसेतुकर्म वा भक्तानुग्रहेण। भक्तसंविभागं वा। देशनिक्षेपं वा। मित्राणि वा व्यपाश्रयेत। कर्शनं वमनं वा कुर्यात्।

निष्पन्नसस्यमन्यविषयं वा सजनपदो यायात्। समुद्रसरस्तटाकानि वा संश्रयेत। धान्यशाकमूलफलावापान् सेतुषु कुर्वीत। मृगपशुपक्षिव्यालमत्स्यारम्भान् वा।

मूषिकभये मार्जारनकुलोत्सर्गः। तेषां ग्रहणहिंसायां द्वादशपणो दण्डः। शुनामनिग्रहे च अन्यत्रारण्यचरेभ्यः।

पशुव्याधिमरक इति। पशूनां गजाश्वादीनां व्याधौ मरके च, स्थानानि भिन्नस्थानस्थितीः, अर्थनीराजनं नीराजनद्रव्यैर्नीराजनं, स्वदैवतपूजनं च कारयेत्। तत्र गजस्य स्वदैवतं सुब्रह्मण्यः, अश्वस्याश्विनौ, गोः पशुपतिः, महिषस्य वरुणः, वेसरस्य वायुः, अजस्याग्निरिति बोद्धव्यम्।

दुर्भिक्षभयप्रतीकारमाह—दुर्भिक्ष इति। दुर्भिक्षसमये, राजा, बीजभक्तोपग्रहं प्रजानां बीजभक्ताभ्यामनुकूलाचरणं कृत्वा, अनुग्रहं कुर्यात्। दुर्गसेतुकर्म वा दुर्गकर्म सेतुनिर्माणकर्म वा, भक्तानुग्रहेण भक्तदानेन, कुर्यात्। भक्तसंविभागं वा दुर्गसेतुकर्माभावेऽपि केवलान्नदानं, कुर्यात्। देशनिक्षेपं वा अनन्तरदेशे तद्देशराजान्तिके 'प्रजा इमा मे कञ्चित् कालं रक्षित्वा प्रत्यर्पये'-त्युक्त्वा प्रजानिक्षेपणं वा, कुर्यात्। मित्राणि वा धनदानाद्युपकारक्षमाणि, व्यपाश्रयेत प्रजाभक्तार्थम्। कर्शनं निरुपयोगजनानां तत्काले देशान्तरप्रेषणेनाल्पत्वकरणं, वमनं वा सुभिक्षविदेशप्रेषणं वा, कुर्यात्।

निष्पन्नसस्यमिति। सस्यसमृद्धम्, अन्यविषयं वा अन्यदेशं वा, सजनपदो जानपदसहितो, यायात् उपजीवनार्थम्। समुद्रसरस्तटाकानि वा संश्रयेत, मत्स्यपक्षिकूर्मादिजलचरजन्तुभक्षणेन जीवनार्थम्। धान्यशाकमूलफलावापान्, सेतुषु कुर्वीत जलाधारान् निर्माय तत्र कुर्वीत। मृगपशुपक्षिव्यालमत्स्यारम्भान् वा मृगादीनां वधारम्भान् वा, कुर्वीतेति वर्तते।

मूषिकप्रतीकारमाह—मूषिकभय इति। तस्मिन्नुत्पन्ने, मार्जारनकुलोत्सर्गः मार्जाराणां नकुलानां चोत्सर्गः गृहेषु स्वैरसञ्चारघटना कर्तव्या। तेषां मार्जारनकुलानां, ग्रहणहिंसायां ग्रहणे हिंसने वा, द्वादशपणो दण्डः। शुनाम् अनिग्रहे च परोपद्रवादनिवारणे च, द्वादशपणो दण्डः। अन्यत्रारण्यचरेभ्य इति। वनेचराणां शुनामनिग्रहे दण्डाभावः।

स्नुहिक्षीरलिप्तानि धान्यानि विसृजेत् । उपनिषद्योगयुक्तानि वा । मूषिककरं वा प्रयुञ्जीत । शान्तिं वा सिद्धतापसाः कुर्युः । पर्वसु च मूषिकपूजाः कारयेत् ।

तेन शलभपक्षिक्रिमिभयप्रतीकारा व्याख्याताः ।

व्यालभये मदनरसयुक्तानि पशुशवानि प्रसृजेत् । मदनकोद्रवपूर्णान्यौदर्याणि वा ।

लुब्धकाः श्वगणिनो वा कूटपञ्जरावपातैश्चरेयुः । आवरणिनः शस्त्रपाणयो व्यालानभिहन्युः । अनभिसर्तुर्द्वादशपणो दण्डः । स एव लाभो व्यालघातिनः ।

पर्वसु च पर्वतपूजाः कारयेत् । तेन मृगपक्षिसङ्घग्राहप्रतीकारा व्याख्याताः ।

स्नुहीत्यादि । स्नुहिक्षीरलिप्तानि धान्यानि, विसृजेद् विकिरेत्, तानि हि भक्षयित्वा मूषिका म्रियेरन्निति । उपनिषद्योगयुक्तानि वा उपनिषदुक्तौषधयुक्तानि वा, धान्यानि विसृजेत् । मूषिककरं वा प्रयुञ्जीत अमुकगृहे प्रतिदिनमेतावन्तो मूषिका देया इति मूषिकरूपं करं वा कल्पयेत् । शान्तिं वा मूषिकशमनार्थं जपहोमादिकर्म वा, सिद्धतापसाः कुर्युः । पर्वसु च पूर्णिमादिषु च, मूषिकपूजाः कारयेत् ।

उक्तरीत्या शलभभयपक्षिभयक्रिमिभयानां प्रतीकारा द्रष्टव्या इत्याह— **तेन शलभेत्यादि** ।

व्यालभयप्रतीकारमाह— **व्यालभय इति** । व्यालाः हिंस्रमृगाः व्याघ्रादयः तत्कृते भये, मदनरसयुक्तानि उपनिषदुक्तेन मदनरसेन युक्तानि, पशुशवानि पशूनां गोमहिषमेषादीनां तद्भक्ष्याणां शवानि कुणपान्, प्रसृजेत् तद्गोचरे क्षिपेत् । मदनकोद्रवपूर्णानि वनकोद्रवेण वरकेण च पूर्णानि, औदर्याणि वा पशुकोष्ठान् वा, प्रसृजेत् । व्याला हि तद्भक्षणान्म्रियन्ते ।

लुब्धका इति । व्याधाः, श्वगणिनो वा श्वभिर्मृगान् ये ग्राहयन्ति ते वा, कूटपञ्जरावपातैः कपटकुलायैः तृणादिच्छन्नैः पातनगर्तैश्च, चरेयुः व्यवहरेयुः । आवरणिनः सावरणाः, शस्त्रपाणयस्तीक्ष्णाः, व्यालान् अभिहन्युः । **अनभिसर्तुरिति** । व्यालेन दुह्यमाणं दृष्ट्वानभिगच्छतः, द्वादशपणो दण्डः । **स एव लाभो व्यालघातिन** इति । व्यालं हतवते द्वादशपणं पारितोषिकं देयम् ।

पर्वसु चेति । स्फुटार्थम् ।

सर्पभये मन्त्रैरोषधिभिश्च जाङ्गलीविदश्चरेयुः। सम्भूय वोपसर्पान् हन्युः। अथर्ववेदविदो वाभिचरेयुः। पर्वसु च नागपूजाः कारयेत्। तेनोदकप्राणिभयप्रतीकारा व्याख्याताः।

रक्षोभये रक्षोघ्नान्यथर्ववेदविदो मायायोगविदो वा कर्माणि कुर्युः। पर्वसु च वितर्दिच्छत्रोल्लोपिकाहस्तपताकाच्छागोपहारैः चैत्यपूजाः कारयेत्। चरुं वश्चराम इत्येवं सर्वभयेष्वहोरात्रं चरेयुः।

सर्वत्र चोपहतान् पितेवानुगृह्णीयात्।

मायायोगविदस्तस्माद् विषये सिद्धतापसाः।
वसेयुः पूजिता राज्ञा दैवापत्प्रतिकारिणः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
तृतीयोऽध्यायः उपनिपातप्रतीकारः।
आदितोऽशीतितमः॥

सर्पप्रतीकारमाह — **सर्पभय** इति। तस्मिन् सति, मन्त्रैः गारुडादिभिः, ओषधिभिश्च विषघ्नीभिः, जाङ्गलीविदः विषचिकित्सितकुशलाः; चरेयुः प्रतीकारव्यवहारं कुर्युः। सम्भूय वा, उपसर्पान् दृष्टिगोचरमुपगतान् सर्पान्, हन्युः अर्थात् पौराः। अथर्ववेदविदो वा अभिचारमन्त्राभिज्ञा वा, अभिचरेयुः मन्त्रप्रयोगैः सर्पान् हन्युः। पर्वसु च नागपूजाः सर्पपूजाः, कारयेत्। तेन उक्तप्रकारेण, उदकप्राणिभयप्रतीकाराः व्याख्याताः नक्रादिजलचरप्राणिभयस्य प्रतिविधय ऊह्याः।

रक्षःप्रतीकारमाह—**रक्षोभय** इति। तस्मिन् सति, अथर्ववेदविदो, मायायोगविदो वा, रक्षोघ्नानि रक्षोघातकराणि, कर्माणि कुर्युः। पर्वसु च कृष्णचतुर्दश्यष्टम्यादिषु च, वितर्दिच्छत्रोल्लोपिकाहस्तपताकाच्छागोपहारैः वितर्दिः वेदिका छत्रमातपत्रम् उल्लोपिका भक्ष्यभेदः हस्तपताका क्षुद्रध्वजः छागोपहारः छागबलिदानम् इत्येतैः, चैत्यपूजाः चिताङ्के रक्षःपूजाः, कारयेत्। चरुं वश्चराम इति युष्मभ्यं हविः पचाम इत्येवं वदन्तः सन्तः, सर्वभयेषु, अहोरात्रं नक्तन्दिवं, चरेयुः सञ्चरेयुः।

सर्वत्र चेति। सर्वेषु भयेषु, उपहतान् पीडितान् जनान्, पितेव अनुगृह्णीयाद्, राजा।

श्लोकमाह — **मायेत्यादि** । तस्मात् विपत्प्रतीकारकरणेन जनाः सर्वथानुग्राह्या इत्येतस्मात् कारणात् । शेषं सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
तृतीयोऽध्यायः उपनिपातप्रतीकारः,
आदितोऽशीतितमः ॥

---

७९. प्रक॰ गूढाजीविनां रक्षा।

समाहर्तृप्रणिधौ जनपदरक्षणमुक्तम्। तस्य कण्टकशोधनं वक्ष्यामः।

समाहर्ता जनपदे सिद्धतापसप्रव्रजितचक्रचरचारणकुहकप्रच्छन्दककार्तान्तिकनैमित्तिकमौहूर्तिकचिकित्सकोन्मत्तमूकबधिरजडान्धवैदेहककारुशिल्पिकुशीलववेशशौण्डिकापूपिकपाकमांसिकौदनिकव्यञ्जनान् प्रणिदध्यात्। ते ग्रामाणामध्यक्षाणां च शौचाशौचं विद्युः। यं चात्र गूढजीविनं शङ्केत, तं सत्रिसवर्णेनापसर्पयेत्। धर्मस्थं प्रदेष्टारं वा विश्वासोपगतं सत्री ब्रूयात् — असौ मे बन्धुरभियुक्तः, तस्यायमनर्थः प्रतिक्रियताम्, अयं चार्थः प्रतिगृह्यताम् इति। स चेत् तथा कुर्यात्, उपदाग्राहक इति प्रवास्येत।

तेन प्रदेष्टारो व्याख्याताः।

गूढाजीविनां रक्षेति सूत्रम्। गूढाजीविनः प्रच्छन्नलञ्चग्रहणजीवनाः कूटसाक्ष्यादयः तेषां रक्षा वारणं प्रतिक्रियाभिधीयत इति सूत्रार्थः। प्रकटकण्टकाः प्रच्छन्नकण्टका इति द्विविधेषु कण्टकेषु कार्वादिप्रकटकण्टकरक्षणं पूर्वमुक्तं प्रच्छन्नकण्टकरक्षणं त्वधुनोच्यते।

समाहर्तृप्रचारे जनपदरक्षणस्योक्तत्वात् पुनरपि रक्षणप्रस्तावः किमर्थ इत्याशङ्क्य गूढकण्टकेभ्यो रक्षणस्यानुक्तस्याभिधानार्थ इत्यभिप्रायवानाह— **समाहर्तृप्रणिधावित्यादि**।

गूढकण्टकपरिज्ञानार्थमपसर्पप्रणिधानमाह — **समाहर्तेत्यादि**। सिद्धतापसेत्यादिपदे चक्रचरः अश्वस्तनिकः, प्रच्छन्दकः स्वच्छन्दचरः, वेशो वेश्यावाटचरः, शेषाः प्रतीताः, । **त इत्यादि**। ते सिद्धतापसादिव्यञ्जनाः प्रणिहिताः, ग्रामाणां ग्राममुख्यानाम्, अध्यक्षाणां च, शौचाशौचं विद्युः। **यं चेति**। अत्र ग्राममुख्येषु अध्यक्षेषु च, यं गूढजीविनं शङ्केत, तं, सत्रिसवर्णेन सत्रिणा सवर्णेन, अपसर्पयेत् सापसर्पं कुर्यात्। धर्मस्थं, 'प्रदेष्टारं वे'ति प्रक्षिप्तं प्रतिभाति। विश्वासोपगतं विश्वस्तं, सत्री प्रणिहितः, ब्रूयात्। वचनप्रकारः— **असौ मे बन्धुरित्यादि**। स्पष्टार्थम्।

तेनेति। उक्तेन धर्मस्थविधानेन, प्रदेष्टारः कण्टकशोधनाधिकृताः, व्याख्याताः उक्तविधाना बोद्धव्याः।

ग्रामकूटमध्यक्षं वा सत्री ब्रूयात् — असौ जाल्मः प्रभूतद्रव्यः, तस्यायमनर्थः। तेनैनमाहारयस्वेति । स चेत् तथा कुर्याद्, उत्कोचकः इति प्रवास्येत ।

कृतकाभियुक्तो वा कूटसाक्षिणोऽभिज्ञातानर्थवैपुल्येन आरभेत । ते चेत् तथा कुर्युः, कूटसाक्षिण इति प्रवास्येरन् ।

तेन कूटश्रावणकारका व्याख्याताः ।

यं वा मन्त्रयोगमूलकर्मभिः श्माशानिकैर्वा संवननकारकं मन्येत, तं सत्री ब्रूयात्—अमुष्य भार्यां स्नुषां दुहितरं वा कामये । सा मां प्रतिकामयताम्, अयं चार्थः प्रतिगृह्यताम् इति । स चेत् तथा कुर्यात् संवननकारक इति प्रवास्येत ।

तेन कृत्याभिचारशीलौ व्याख्यातौ ।

यं वा रसस्य वक्तारं क्रेतारं विक्रेतारं भैषज्याहारव्यवहारिणं वा रसदं मन्येत, तं सत्री ब्रूयात् — असौ मे शत्रुस्तस्योपघातः

ग्रामकूटमिति । ग्राममुख्यम्, अध्यक्षं वा, सत्री ब्रूयात्, किमिति, असौ जाल्मोऽसमीक्ष्यकारी, प्रभूतद्रव्यः प्रचुरधनः । तस्य अयम् अनर्थः आपतित इति शेषः । तेन उपस्थितानर्थापदेशेन, एनं धनिकम्, आहारयस्व अर्थात् सर्वस्वम्, इति । स चेदित्यादि स्पष्टम् ।

कूटसाक्षिपरीक्षणमाह— कृतकाभियुक्तो वेति । मृषाभियुक्तः सत्री, कूटसाक्षिणः अभिज्ञातान् शङ्कितान्, अर्थवैपुल्येन प्रभूतधनार्पणोपधया, आरभेत प्रलोभयेत् । ते चेदित्यादि स्पष्टम् ।

तेनेति । उक्तेन कूटसाक्षिविधानेन, कूटश्रावणकारकाः अगृहीत एव ऋणे 'ऋणममुकेन मत्सकाशादेतावद् गृहीतमि'त्येवं मृषार्थं प्रातिवेशिकानानुवेशिकांश्च साक्ष्यार्थे ये श्रावयन्ति त एते कूटश्रावयितारः, व्याख्याताः उक्तविधाना बोद्धव्याः ।

यं वेत्यादि । यं वा पुरुषं, मन्त्रयोगमूलकर्मभिः मन्त्रोपायैरौषधप्रयोगैश्च, श्माशानिकैर्वा श्मशानकरणीयकर्मभिर्वा, संवननकारकं वशीकरणकर्तारं मन्येत, तं सत्री ब्रूयात्, किमिति, अमुष्य भार्यामित्यादि । सुबोधम् ।

तेनेत्यादि । कृत्याभिचारशीलौ कृत्याशीलः पिशाचावेशनकर्ता अभिचारशीलो मन्त्रप्रयोगेण मारणशीलः ।

क्रियताम् अयं चार्थः प्रतिगृह्यताम् इति। स चेत् तथा कुर्याद्, रसद इति प्रवासयेत।

तेन मदनयोगव्यवहारी व्याख्यातः।

यं वा नानालोहक्षाराणाम् अङ्गारभस्त्रासन्दंशमुष्टिकाधिकरणीविम्बटङ्कमूषाणामभीक्ष्णं क्रेतारं मषीभस्मधूमदिग्धहस्तवस्त्रलिङ्गं कर्मारोपकरणसंवर्गं कूटरूपकारकं मन्येत, तं सत्री शिष्यत्वेन संव्यवहारेण चानुप्रविश्य प्रज्ञापयेत्। प्रज्ञातः कूटरूपकारक इति प्रवासयेत।

तेन रागस्यापहर्ता कूटसुवर्णव्यवहारी च व्याख्यातः।

आरब्धारस्तु हिंसायां गूढाजीवास्त्रयोदश।
प्रवास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
चतुर्थोऽध्यायः गूढाजीविनां रक्षा,
आदितं एकाशीतितमः॥

यं वा रसस्येत्यादि। रसस्य विषस्य। भैषज्याहारव्यवहारिणं भेषजाभ्यवहार्ययोर्विषोपयोजनशीलम्। शेषं सुगमम्।

तेनेति। उक्तेन रसदविधानेन, मदनयोगव्यवहारी मदनयोगः मदजनकौषधदानोपायः तद्व्यवहारी, व्याख्यातः।

यं वेति। यं वा, नानालोहक्षाराणां नानाजातीयानां लोहानां क्षाराणां च, अङ्गारादीनाम् अङ्गारो निर्वाणाग्निकमिन्धनं भस्त्रा ध्मानदृतिः सन्दंशः कङ्कमुखः मुष्टिका कर्मारोपकरणभेदः अधिकरणी लोहाभिघाताधारः विम्बः प्रतिमा टङ्कः दारणः मूषा ताम्राद्यावर्तनी इत्येतासाम्, अभीक्ष्णं क्रेतारं, मषीभस्मधूमदिग्धहस्तवस्त्रलिङ्गं मष्याद्युपलिप्तहस्तवस्त्रचिह्नं, कर्मारोपकरणसंवर्गम् अयस्कारकर्मसाधनसम्पन्नं, कूटरूपकारकं मन्येत, तं सत्री शिष्यत्वेन, संव्यवहारेण च परस्परव्यवहरणेन च, अनुप्रविश्य आश्रित्य, प्रज्ञापयेत् ईदृग्व्यापारोऽयमिति राज्ञे निवेदयेत्। प्रज्ञातः तथा विदितः, कूटरूपकारक इति, प्रवासयेत।

तेनेति। उक्तेन विधानेन, रागस्यापहर्ता स्वर्णादिवर्णकस्य हानिकर्ता, कूटसुवर्णव्यवहारी च, व्याख्यातः उक्तविधानो द्रष्टव्यः।

T

आरब्धारस्त्विति । हिंसायाः लोकोपद्रवस्य, आरब्धारः कर्तारः, गूढाजीवाः त्रयोदश धर्मस्थः प्रदेष्टा ग्राममुख्यः अध्यक्षः कूटसाक्षी कूटश्रावकः संवननकर्ता कृत्याशीलः अभिचारशीलः रसदः मदनयोगव्यवहर्ता कूटरूपकर्ता कूटसुवर्णव्यवहारीत्युक्तास्त्रयोदशसङ्ख्याः, प्रवास्याः स्वदेशान्निष्कासयितव्याः । दोषविशेषतो निष्क्रयार्थं वा दद्युः अपराधतारतम्येन दण्डं च दद्युः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
चतुर्थोऽध्यायः गूढाजीविनां रक्षा,
आदित एकाशीतितमः ॥

८० प्रक. सिद्धव्यञ्जनैर्माणवप्रकाशनम् ।

सत्रिप्रयोगादूर्ध्वं सिद्धव्यञ्जना माणवा माणवविद्याभिः प्रलोभयेयुः । प्रस्वापनान्तर्धानद्वारापोहमन्त्रेण प्रतिरोधकान्, संवननमन्त्रेण पारतल्पिकान् ।

तेषां कृतोत्साहानां महान्तं सङ्घमादाय रात्रावन्यं ग्राममुद्दिश्यान्यं ग्रामं कृतकस्त्रीपुरुषं गत्वा ब्रूयुः — इहैव विद्याप्रभावो दृश्यताम् । कृच्छ्रः परग्रामो गन्तुम् इति । ततो द्वारापोहमन्त्रेण द्वाराण्यपोह्य, 'प्रविश्यताम्' इति ब्रूयुः । अन्तर्धानमन्त्रेण जाग्रतामारक्षिणां मध्येन माणवानतिक्रामयेयुः । प्रस्वापनमन्त्रेण प्रस्वापयित्वा रक्षिणः

सिद्धव्यञ्जनैर्माणवप्रकाशनमिति सूत्रम् । सिद्धव्यञ्जनाः मुण्डजटिलादयः पूर्वोक्ताः तैः माणवानां चोरपारदारिकादीनां कुपुरुषाणां प्रकाशनमिति सूत्रार्थः । कण्टकविशेषपरिज्ञानोपायः सत्रिप्रयोग उक्तः, अपर इदानीमभिधीयते ।

सत्रिप्रयोगादिति । तत ऊर्ध्वं, सिद्धव्यञ्जना माणवाः, माणवविद्याभिः प्रस्वापनान्तर्धानादिकारिभिः कुमन्त्रैः, प्रलोभयेयुः, अर्थात् कण्टकान् । तत्र विशेषमाह — **प्रस्वापनेत्यादि** । प्रतिरोधकान् चोरान् । पारतल्पिकान् पारदारिकान् ।

तेषामित्यादि । तेषां प्रतिरोधकपारतल्पिकानाम् । कृतोत्साहानां स्वव्यापाराकुतोभयानुष्ठानमार्गप्रदर्शकसिद्धलाभजनितोत्साहानाम्, महान्तं सङ्घम् आदाय रात्रौ अन्यं ग्रामम् उद्दिश्य, प्रस्थिता इति शेषः, अन्यम् उद्दिष्टग्रामादितरं, ग्रामं, कृतकस्त्रीपुरुषं कृतकाः कृत्रिमाः स्वप्रवृत्त्यानुकूल्याय दत्तसंकेताः स्वविधेयाः स्त्रीपुरुषा यस्मिंस्तं तथाभूतं, गत्वा ब्रूयुः । किमिति, इहैव अस्मिन्नेव ग्रामे, विद्याप्रभावः प्रस्वापनादिमन्त्रमहिमा, दृश्यताम् । परग्रामो गन्तुं कृच्छ्रः श्रमवशाद् विदूरत्वाच्चाशक्यः इति । ततो द्वारापोहमन्त्रेण द्वारार्गलापोहनमन्त्रेण, द्वाराण्यपोह्य पूर्वसङ्केतापोहितार्गलेष्वेव द्वारेषु अर्गलापोहनमभिनीय, प्रविश्यतामिति ब्रूयुः । अन्तर्धानमन्त्रेण, जाग्रतां जाग्रत्त्वेऽपि संकेतवशादपश्यन्तमिवात्मानमभिनयताम्, आरक्षिणां मध्येन, माणवान् अतिक्रामयेयुः । प्रस्वापनमन्त्रेण, रक्षिणः, प्रस्वापयित्वा अस्वपत एव स्वापाभिनयं कारयित्वा, शय्याभिः रक्षिशयनीयवर्त्मना, माणवैः सञ्चारयेयुः । प्रस्वापयित्वेति

शय्याभिर्माणवैः सञ्चारयेयुः। संवननमन्त्रेण भार्याव्यञ्जनाः परेषां माणवैः संमोदयेयुः।

उपलब्धविद्याप्रभावानां पुरश्चरणाद्यादिशेयुरभिज्ञानार्थम्।

कृतलक्षणद्रव्येषु वा वेश्मसु कर्म कारयेयुः, अनुप्रविष्टान् वैकत्र ग्राहयेयुः।

कृतलक्षणद्रव्यक्रयविक्रयाधानेषु योगसुरामत्तान् वा ग्राहयेयुः। गृहीतान् पूर्वापदानसहायाननुयुञ्जीत।

पुराणचोरव्यञ्जना वा चोराननुप्रविष्टास्तथैव कर्म कारयेयुः ग्राहयेयुश्च।

गृहीतान् समाहर्ता पौरजानपदानां दर्शयेत् — चोरग्रहणीं विद्यामधीते राजा; तस्योपदेशादिमे चोरा गृहीताः; भूयश्च ग्रहीष्यामिः वारयितव्यो वः स्वजनः पापाचारः इति।

त्र्यबकरणं समासाविवक्षया। प्रतिरोधकप्रत्यायकमुक्त्वा पारतल्पिकप्रत्यायकमाह — **संवननेत्यादि**। संवननमन्त्रेण, परेषां भार्याव्यञ्जनाः परदारच्छलधारिणीः पूर्वदत्तसंकेता एव वनिताः, माणवैः, संमोदयेयुः वशीकरणाभिनयद्वारेण सङ्गसुखमनुभावयेयुः।

उपलब्धविद्याप्रभावानामिति। एवं प्रत्यक्षदृष्टमन्त्रमाहिम्नां, पुरश्चरणादि पुरश्चरणप्रभृतिकं मन्त्रसिद्ध्यङ्गं कर्म, आदिशेयुः, अभिज्ञानार्थं स्मरणार्थम्।

कृतलक्षणद्रव्येषु वेति। कृतस्वामिचिह्नद्रव्योपेतेषु, वेश्मसु, कर्म चौर्यं, कारयेयुः, पूर्वोक्तान् गृहीतमन्त्रान् माणवान्। अनुप्रविष्टान् वा अन्तः प्रविष्टांश्च, एकत्र कचिद् गृहे, ग्राहयेयुः।

कृतलक्षणद्रव्यक्रयविक्रयाधानेष्विति। कृतलक्षणद्रव्याणां मुष्टानां क्रयणविक्रयणाधीकरणावसरेषु, योगसुरामत्तान् वा भेषजयुक्तमद्यपानमत्तान् वा, ग्राहयेयुः। गृहीतान् तथाग्रहणं प्राप्तान् माणवान्, पूर्वापदानसहायान् पूर्वकृतानि चौर्याणि चौर्यसहायांश्च, अनुयुञ्जीत पृच्छेत्।

पुराणचोरव्यञ्जना वेति। पुरातनतस्करच्छद्मानो वा भूत्वा, चोरान् अनुप्रविष्टाः, तथैव पूर्वोक्तरीत्यैव, कर्म कारयेयुः ग्राहयेयुश्च।

गृहीतानिति। ग्रहणं प्राप्तांश्चोरान्, समाहर्ता, पौरजानपदानां दर्शयेत्। किं कृत्वा, चोरग्रहणीं विद्यामधीते राजेत्याद्युक्त्वा।

यं चात्रापसर्पोपदेशेन शम्याप्रतोदादीनामपहर्तारं जानीयात, तमेषां प्रत्यादिशेद् — एष राज्ञः प्रभाव इति।

पुराणचोरगोपालकव्याधश्वगणिनश्च वनचोराटविकाननुप्रविष्टाः प्रभूतकूटहिरण्यकुप्यभाण्डेषु सार्थव्रजग्रामेष्वेनानभियोजयेयुः। अभियोगे गूढबलैर्घातयेयुः, मदनरसयुक्तेन वा पथ्यादनेन। अनुगृहीतलोप्त्रभारानायतगतपरिश्रान्तान् प्रस्वपतः प्रहवणेषु योगसुरामत्तान् वा ग्राहयेयुः।

पूर्ववच्च गृहीत्वैनान् समाहर्ता प्ररूपयेत्।
सर्वज्ञख्यापनं राज्ञः कारयन् राष्ट्रवासिषु॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
पञ्चमोऽध्यायः सिद्धव्यञ्जनैर्माणवप्रकाशनम्,
आदितो द्व्यशीतितमः॥

यं चात्रेति। यं च जनम्, अत्र पुरादौ, शम्याप्रतोदादीनाम् अपहर्तारं युगकीलकतोत्रादीनां चोरयितारम्, अपसर्पोपदेशेन जानीयात, तम्, एषां पौरजानपदानां, प्रत्यादिशेत् प्रज्ञापयेत्, किं कृत्वा, एष राज्ञः प्रभाव इति अत्यल्पविषयस्यापि चौर्यस्येदं परिज्ञानं राज्ञो माहात्म्यकृतमित्युक्त्वा।

वनचोरग्रहणोपायमाह—पुराणचोरेत्यादि। पुराणचोराः गोपालकाः व्याधाः श्वगणिनश्च, राजपुरुषभूता इति शेषः, वनचोराटविकान् वनचोरान् अटवीचरान् पुलिन्दादींश्च, अनुप्रविष्टाः, प्रभूतकूटहिरण्यकुप्यभाण्डेषु प्रभूतानि प्रचुराणि कूटानि फालानि हिरण्यानि कुप्यभाण्डानि च येषु तेषु तथाभूतेषु, सार्थव्रजग्रामेषु वणिक्सङ्घगतागतमार्गेषु गोष्ठेषु ग्रामेषु च, एनान् वनचोराटविकान्, अभियोजयेयुः चौर्यायोद्योजयेयुः। अभियोगे आरब्धे सति, गूढबलैः गूढसैन्यैः, घातयेयुः। मदनरसयुक्तेन मोहजनकविषयुक्तेन, पथ्यादनेन वा पथिभोजनेन वा, घातयेयुः। अनुगृहीतलोप्त्रभारान् उपगृहीतमुष्टद्रव्यभारान्, आयतगतपरिश्रान्तान् दीर्घाध्वगमनपरिखिन्नान्, अत एव प्रस्वपतः एनान्, ग्राहयेयुः। प्रहवणेषु तुष्टिभोजनदानेषु, योगसुरामत्तान् वीर्यवन्मद्यपानमत्तान् वा, ग्राहयेयुः।

अध्यायान्ते श्लोकमाह — पूर्ववच्चेति। समाहर्ता, पूर्ववत् पूर्वोक्तपुरराष्ट्रचोरवत्, एनान् वनचोराटविकान्, गृहीत्वा, राज्ञः सर्वज्ञख्यापनं 'चोर-

ग्रहणीं विद्यामधीते राजा सर्वांश्चोरान् जानाति तत्प्रभावादिमे चोरा गृहीताः' इत्येवं सर्वज्ञत्वख्यापनं, कारयन् , राष्ट्रवासिषु, प्ररूपयेद् दर्शयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
पञ्चमोऽध्यायः सिद्धव्यञ्जनैर्माणवप्रकाशनम् ,
आदितो ध्यशीतितमः ॥

८१. प्रक. शङ्कारूपकर्माभिग्रहः ।

सिद्धप्रयोगादूर्ध्वं शङ्कारूपकर्माभिग्रहः ।

क्षीणदायकुटुम्बमल्पनिर्वेशं विपरीतदेशजातिगोत्रनामकर्मापदेशं प्रच्छन्नवृत्तिकर्माणं मांससुराभक्ष्यभोजनगन्धमाल्यवस्त्रविभूषणेषु प्रसक्तमतिव्ययकर्तारं पुंश्चलीद्यूतशौण्डिकेषु प्रसक्तमभीक्ष्णप्रवासिनमविज्ञातस्थानगमनमेकान्तारण्यनिष्कुटविकालचारिणं प्रच्छन्ने सामिषे वा देशे बहुमन्त्रसन्निपातं सद्यःक्षतव्रणानां गूढप्रतिकारयितारम् अन्तर्गृहनित्यमभ्यधिगन्तारं कान्तापरं परपरिग्रहाणां परस्त्रीद्रव्यवेश्मनामभी-

---

शङ्कारूपकर्माभिग्रह इति सूत्रम् । आत्मनः परान् प्रति परेषामात्मानं प्रति चेति शङ्का द्विरूपा रूपं लोप्त्रं कर्म सन्धिच्छेदादि एतैर्लिङ्गैरभिग्रहः चोराणां ग्रहणमभिधीयत इति सूत्रार्थः ।

गूढाजीविनां रक्षा प्रक्रान्ता । तत्र सिद्धव्यञ्जनादिभिर्ग्रहीतुं शक्यानां गूढाजीविनां ग्रहणप्रकार उक्तः, तदग्राह्याणां शङ्कारूपकर्मभिर्ग्रहणप्रकार इदानीमुच्यते ।

सिद्धप्रयोगादूर्ध्वमिति । सिद्धव्यञ्जनप्रयोगात् परतः, शङ्कारूपकर्माभिग्रहः, वक्ष्यत इति क्रियाध्याहारः ।

शङ्काभिग्रहं तावदाह — **क्षीणदायकुटुम्बमिति** । दायः कुलक्रमागतं द्रव्यं कुटुम्बं कृषिः तदुभयं क्षीणं यस्य तं तथाभूतम्, अल्पनिर्वेशं भक्तव्ययापर्याप्तभृतिं कर्माननुरूपनिहीनभृतिं वा, विपरीतदेशजातिगोत्रनामकर्मापदेशम् अन्यथाकल्पितदेशजात्यादिव्यवहारं, प्रच्छन्नवृत्तिकर्माणम् अन्याविदितवृत्त्यर्थकर्माणं, मांससुरादिष्वष्टसु, प्रसक्तं प्रकर्षेण सक्तम्, अतिव्ययकर्तारं, पुंश्चलीद्यूतशौण्डिकेषु प्रसक्तम्, अभीक्ष्णप्रवासिनं पौनःपुन्यप्रवासशीलम्, अविज्ञातस्थानगमनं क तिष्ठति क गच्छतीत्यन्याविदितस्थानगमनम्, एकान्तारण्यनिष्कुटविकालचारिणं विजने वने गृहारामे च विकाले चरणशीलं, प्रच्छन्ने सामिषे वा देशे बहुमन्त्रसन्निपातम् अन्यदर्शनागोचरे देशे सामिषे सद्रव्ये धनिकगृहनिकटदेशे वा बहुमन्त्रयन्तं बहुकृत्वो गच्छन्तं च, सद्यःक्षतव्रणानां गूढप्रतिकारयितारं व्रणकारणोद्भेदशङ्कया रहसि चिकित्सयितारम्, अन्तर्गृहनित्यं गर्भगृहनित्योपविष्टम्, अभ्यधिगन्तारम् आगच्छतोऽभिमुखं झडिति गत्वा प्रतिनिवर्तमानं, कान्तापरं स्त्रीलोलं, परपरिग्रहाणां परपरिज-

क्षणप्रष्टारं कुत्सितकर्मशस्त्रोपकरणसंसर्गं विरात्रे छन्नकुड्यच्छायासञ्चारिणं विरूपद्रव्याणामदेशकालविक्रेतारं जातवैराशयं हीनकर्मजातिं विगूह्यमानरूपं लिङ्गेनालिङ्गिनं लिङ्गिनं वा भिन्नाचारं पूर्वकृतापदानं स्वकर्मभिरपदिष्टं नागरिकमहामात्रदर्शने गूहमानमपसरन्तमनुच्छ्वासोपवेशिनमाविग्नं शुष्कभिन्नस्वरमुखवर्णं शस्त्रहस्तमनुष्यसम्पातत्रासिनं हिंस्रस्तेननिधिनिक्षेपापहारवरप्रयोगगूढाजीविनामन्यतमं शङ्केतेति शङ्काभिग्रहः ।

रूपाभिग्रहस्तु । नष्टापहृतमविद्यमानं तज्जातव्यवहारिषु निवेदयेत् । तच्चेन्निवेदितमासाद्य प्रच्छादयेयुः, साचिव्यकरदोषमाप्नुयुः ।

नानां, परस्त्रीद्रव्यवेश्मनाम् अभीक्ष्णप्रष्टारं, कुत्सितकर्मशस्त्रोपकरणसंसर्गं मारणचौर्यादिगर्हितकर्मोपयोगिषु शस्त्रेषु उपकरणेषु परिचयवन्तं, शास्त्रेत्यपि पाठः । विरात्रे अर्धरात्रे, छन्नकुड्यच्छायासञ्चारिणं छन्नं यथा भवति तथा कुड्यच्छायायां सञ्चरणशीलं, विरूपद्रव्याणां विनष्टस्वरूपाणां द्रव्याणाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकारिणं, जातवैराशयं, हीनकर्मजातिं, विगूह्यमानरूपं छाद्यमानस्वरूपं, लिङ्गेनालिङ्गिनम् अनुपात्तलिङ्गिचिह्नं लिङ्गिव्रतेन युक्तं, लिङ्गिनं वा भिन्नाचारम् उपात्तलिङ्गिचिह्नं वा लिङ्गिव्रतरहितं, पूर्वकृतापदानं पूर्वमन्यत्र कृतचौर्यं, स्वकर्मभिरपदिष्टं परदारग्रहणादिभिः ख्यातं, नागरिकमहामात्रदर्शने नगररक्षिपुरुषस्य महामात्रस्य च दर्शने, गूहमानमपसरन्तं स्वरूपं छादयन्तं निलीय चरन्तं च, अनुच्छ्वासोपवेशिनं तूष्णीं बहिर्भूम्यादावुपवेशनशीलम्, आविग्नं भीतं, शुष्कभिन्नस्वरमुखवर्णं शुष्कः क्षामः भिन्नः अयथाप्रकारश्च स्वरो मुखवर्णश्च यस्य तं तथाभूतं, शस्त्रहस्तमनुष्यसम्पातत्रासिनं शस्त्रपाणिपुरुषागमनभीरुकम्, एवम्भूतैर्विशेषणैर्यथासम्भवं युक्तं जनं, हिंस्रस्तेनादीनां हिंस्रो घातुकः स्तेनश्चोरः निधिनिक्षेपापहारो निधिनिक्षेपयोरपहर्ता वरप्रयोगः वरः क्रोधस्तन्निमित्तः प्रयोगः शस्त्रप्रयोगो यस्य स तथाभूतः गूढाजीवी प्रतीतः इत्येतेषाम् अन्यतमं, शङ्केत । 'वरो ना भूपजामात्रोर्देवादेरीप्सिते क्रुधि' इति केशवः । इति शङ्काभिग्रह इति । व्याख्यात इति शेषः ।

रूपाभिग्रहस्त्विति । वक्ष्यत इति शेषः । नष्टापहृतमिति । प्रमादभ्रष्टं चोरेणापहृतं द्रव्यम्, अविद्यमानं, तज्जातव्यवहारिषु तज्जातिद्रव्यव्य-

अजानन्तोऽस्य द्रव्यस्यातिसर्गेण मुच्येरन् । न चानिवेद्य संस्थाध्यक्षस्य पुराणभाण्डानामाधानं विक्रयं वा कुर्युः ।

तच्चेन्निवेदितमासाद्येत, रूपाभिगृहीतमागमं पृच्छेत् — कुतस्ते लब्धम् इति । स चेद् ब्रूयाद् — दायाद्यादवाप्तममुष्माल्लब्धं, क्रीतं कारितमाधिप्रच्छन्नम् अयमस्य देशः कालश्चोपसम्प्राप्तः, अयमस्यार्घः प्रमाणं लक्षणं मूल्यं च इति, तस्यागमसमाधौ मुच्येत ।

नाष्टिकश्चेत् तदेव प्रतिसन्दध्यात्, यस्य पूर्वो दीर्घश्च परिभोगः शुचिर्वा देशस्तस्य द्रव्यमिति विद्यात् । चतुष्पदानामपि हि

वहारिपु, निवेदयेत् । निवेदितम् आसाद्य प्रच्छादयेयुश्चेत्, साचिव्यकरदोषं चौर्यसाहाय्यकारिदण्डम्, आप्नुयुः । अजानन्तः अमुकस्येदमित्यविदन्तः, अस्य द्रव्यस्य, अतिसर्गेण अर्पणेन, मुच्येरन् अपराधमुक्ताः स्युः । न चेति । संस्थाध्यक्षस्य पण्यसंस्थाधिकारिणः, अनिवेद्य, पुराणभाण्डानाम्, आधानं विक्रयं वा, न च कुर्युः ।

तच्चेदिति । निवेदितं तद् नष्टापहृतम्, आसाद्येत चेत्, रूपाभिगृहीतं जनम्, आगमं पृच्छेत्— कुतस्ते लब्धमिति । स चेद् ब्रूयात्, किमिति, दायाद्यादवाप्तं दायादभावाल्लब्धम्, अमुष्माल्लब्धं, क्रीतं, कारितं नवनिर्मापितम्, आधिप्रच्छन्नम् आधीकरणवशादियन्तं कालमप्रकाशतया स्थितम्, अयम् अस्य देशः अस्यार्थस्यायं साक्षी यद्वा अस्यायं प्रदेशः, उपसंप्राप्तः उपसम्प्राप्तिमान्, अस्यायं कालश्च उपसम्प्राप्तिमान्, अयम् अस्य अर्घो रूपमूल्यम्, इदं प्रमाणं लक्षणं मूल्यं च इदमस्य सुवर्णकर्षादिमानम् इदमस्य चिह्नम् इदमस्य प्रकृतिमूल्यम्, इति, तर्हीति शेषः, तस्य द्रव्यस्य, आगमसमाधौ आगमसमर्थने सति, मुच्येत रूपाभिगृहीतः । अन्यथा तु तस्य चोरदण्ड इत्यार्थम् ।

नाष्टिकश्चेदिति । नाष्टिकोऽभियोक्ता, तदेव प्रतिसन्दध्याच्चेत् रूपाभिगृहीतप्रयुक्तमेव समाधानं यदि प्रतिसन्दधीत, यस्य रूपाभिगृहीतनाष्टिकयोरन्यतरस्य, पूर्वो, दीर्घश्च, परिभोगः अनुभवः, शुचिर्वा देशः विश्वास्यवचनश्च साक्षी, तस्य द्रव्यमिति, विद्यात् निर्णयेत् । न च तदीयत्वमसम्भावितमित्याह—**चतुष्पदानामपि हीति** । तेषामपि हि भिन्नयोन्यादिप्रसूतानां, रूपलिङ्गसामान्यम् आकृतिसादृश्यं चिह्नसादृश्यं च, भवति । एवं स्थिते इति

रूपलिङ्गसामान्यं भवति, किमङ्गपुनरेकयोनिद्रव्यकर्तृप्रसूतानां कुप्याभरणभाण्डानाम् इति।

स चेद् ब्रूयात्—याचितकमवक्रीतकमाहितकं निक्षेपमुपनिधिं वैयापृत्यभर्म वामुष्येति, तस्य ापसारप्रीतसन्धानेन मुच्येत।

नैवम् इत्यपसारो वा ब्रूयाद्, रूपाभिगृहीतः परस्य दानकारणमात्मनः प्रतिग्रहकारणमुपलिङ्गनं वा दायकदापकनिबन्धकप्रतिग्राहकोपदेष्टृभिरुपश्रोतृभिर्वा प्रतिसमानयेत्।

उज्झितप्रनष्टनिष्पतितोपलब्धस्य देशकाललाभोपलिङ्गनेन शुद्धिः। अशुद्धस्तच्च तावच्च दण्डं दद्यात्। अन्यथा स्तेयदण्डं भजेत इति रूपाभिग्रहः।

शेषः, एकयोनिद्रव्यकर्तृप्रसूतानां, कुप्याभरणभाण्डानां कुप्यनिर्मितभूषणपात्राणां, किमङ्गपुनः किमु वक्तव्यं, तेषां रूपलिङ्गसामान्यं सुतरां भवतीत्यर्थः। इति अतः कारणात्।

स चेदिति। स रूपाभिगृहीतः, याचितकं याच्ञया लब्धम्, अवक्रीतकं भाटकगृहीतम्, आहितकम् आधित्वेन गृहीतं, निक्षेपं भूषणभाण्डनिर्माणार्थं निक्षिप्तम्, उपनिधिं रक्षणाय विश्वासाद् दत्तं, वैयापृत्यभर्म वा कर्मणः कृतस्य दत्तां भृतिं वा, अमुष्येति ब्रूयाच्चेत् अमुकपुरुषसम्बन्धीत्येवं वदेच्चेत्, अर्थान्नाष्टिकार्थितं रूपं, तस्य द्रव्यस्य, अपसारप्रतिसन्धानेन मदीयमेवेदं याचितकादीत्यपसारपुरुषकृतेनाभ्युपगमेन, मुच्येत, अर्थात् सः।

नैवमित्यपसारो वा ब्रूयादिति। न मे याचितकादीत्यपसारो यदि वदेत, रूपाभिगृहीतः, परस्य अपसारस्य, दानकारणम्, आत्मनः प्रतिग्रहकारणम्, उपलिङ्गनं वा लिङ्गैरभिज्ञापनं च, प्रतिसमानयेत् निरूपयेत्, कैः, दायकदापकनिबन्धकप्रतिग्राहकोपदेष्टृभिः उपश्रोतृभिर्वा, वाशब्दश्चार्थे। तत्र निबन्धको लेखकः, उपदेष्टा लेखनीयवाक्यवक्ता, शेषाः प्रतीताः।

उज्झितेत्यादि। उज्झितप्रनष्टनिष्पतितोपलब्धस्य उज्झितं विस्मृतं वस्त्राभरणादि प्रनष्टं स्वयूथच्युतं गोमहिषादि निष्पतितं छन्नापसृतं दासीदासादि तस्योपलब्धस्य, देशकाललाभोपलिङ्गनेन देशादीनां विभावनेन, शुद्धिः अभियोक्तुः। अशुद्धः अविभावितदेशादिः सः, तच्च तावच्च दण्डं दद्यात् यत् स्वीयमित्युक्तं तत्समम् अन्यच्च तत्समपरिमाणं दण्डं दद्यात्, अभियोक्ता।

कर्माभिग्रहस्तु । मुषितवेश्मनः प्रवेशनिष्कसनमद्वारेण, द्वारस्य सन्धिना बीजेन वा वेधम्, उत्तमागारस्य जालवातायननीव्रवेधम्, आरोहणावतरणे च कुड्यस्य वेधम् उपखननं वा गूढद्रव्यनिक्षेपग्रहणोपायमुपदेशोपलभ्यम् अभ्यन्तरच्छेदोत्करपरिमर्दोपकरणमभ्यन्तरकृतं विद्यात् । विपर्यये बाह्यकृतम् । उभयत उभयकृतम् ।

अभ्यन्तरकृते पुरुषमासन्नं व्यसनिनं क्रूरसहायं तस्करोपकरणसंसर्गं स्त्रियं वा दरिद्रकुलामन्यप्रसक्तां वा परिचारकजनं वा तद्विधाचारमतिस्वप्नं निद्राक्लान्तमाधिक्लान्तमाविग्नं शुष्कभिन्नस्वरमुखवर्णमनवस्थितमतिप्रलापिनमुच्चारोहणसंरब्धगात्रं विलूननिघृष्टभिन्नपाटित-

---

अन्यथा स्तेयदण्डं भजेत देशाद्युपलिङ्गनेन स्वत्वस्याविभावने, चौर्यदण्डभाग् भवति । इति **रूपाभिग्रह** इति । व्याख्यात इति शेषः ।

कर्माभिग्रहस्त्विति । उच्यत इति शेषः । चौर्यं नाम त्रिविधम् — आभ्यन्तरकृतं बाह्यकृतम् उभयकृतमिति । तत्राभ्यन्तरचौर्यमाह — **मुषितवेश्मन** इति । चोरितगृहस्य, अद्वारेण पश्चाद्द्वारेण प्रवेशनिष्कसनं प्रवेशो निर्गमनं च, द्वारस्य सन्धिना सुरुङ्गया बीजेन वेधसाधनेन वा वेधं निर्माणम्, उत्तमागारस्य उपरिभूमिकायाः जालवातायननीव्रवेधम् आनायगवाक्षवलीकभेदनम्, आरोहणावतरणे च कुड्यस्य वेधं पदन्यासस्थानकरणं, गूढद्रव्यनिक्षेपग्रहणोपायं कुड्यगूहितस्य द्रव्यनिक्षेपस्य ग्रहणं प्रत्युपायभूतम्, उपदेशोपलभ्यम् उपदेशैकविज्ञेयम्, अभ्यन्तरच्छेदोत्करपरिमर्दोपकरणम् अन्तर्गतकुड्यच्छेदपांसूत्करपरिमर्दनसाधनम्, उपखननं वा कुड्यसमीपभूखननं वा, अभ्यन्तरकृतम् आभ्यन्तरजनकृतं, विद्याद् अभ्यूहेत् । विपर्यये उक्तलक्षणवैपरीत्ये, बाह्यकृतं विद्यात् । उभयतः उभयलक्षणसत्त्वे, उभयकृतं विद्यात् ।

अभ्यन्तरकृतत्वशङ्कायां परीक्षणमाह—**अभ्यन्तरकृत** इति । अभ्यन्तरजनकृतं चौर्यमित्यूहे सति, पुरुषम् आसन्नम् आभ्यन्तरं, परीक्षेत, कथम्भूतं परीक्षेत, व्यसनिनं द्यूतमद्यप्रसक्तं, क्रूरसहायं क्रूरास्त्यक्तात्मानस्तेषां सहायं, तस्करोपकरणसंसर्गं, स्त्रियं वा दरिद्रकुलाम्, अन्यप्रसक्तां स्त्रियं वा, परिचारकजनं वा तद्विधाचारम् अन्यस्त्रीप्रसक्तम्, अतिस्वप्नं मोषणानन्तरदिवसेऽतिमात्रनिद्रं, निद्राक्लान्तं स्वापाभावश्रान्तम्, आधिक्लान्तम्, आविग्नं भीतं, शुष्कभिन्नस्वरमुखवर्णम्, अनवस्थितम्, अतिप्रलापिनम्, उच्चारोहण-

शरीरवस्त्रं जातकिणसंरब्धहस्तपादं पांसुपूर्णकेशनखं विलूनभुग्नकेशनखं वा सम्यक्स्नातानुलिप्तं तैलप्रमृष्टगात्रं सद्योधौतहस्तपादं वा पांसुपिच्छिलेषु तुल्यपादपदनिक्षेपं प्रवेशनिष्कसनयोर्वा तुल्यमाल्यमद्यगन्धवस्त्रच्छेदविलेपनस्वेदं परीक्षेत। चोरं पारदारिकं वा विद्यात्॥

सगोपस्थानिको बाह्यं प्रदेष्टा चोरमार्गणम्।
कुर्यान्नागरिकश्चान्तर्दुर्गे निर्दिष्टहेतुभिः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
षष्ठोऽध्यायः शङ्कारूपकर्माभिग्रहः,
आदितस्त्र्यशीतितमः॥

संरब्धगात्रम् उच्चारोहणपरवशवपुषं, विलूननिघृष्टभिन्नपाटितशरीरवस्त्रमित्यादि विशेषणसप्तकं स्फुटार्थम्। पांसुपिच्छिलेषु तुल्यपादपदनिक्षेपं पांसुषु पङ्किलेषु च स्वपादसदृशचरणन्यासं, प्रवेशनिष्कसनयोर्वा प्रवेशनिर्गमनयोर्वा, तुल्यमाल्यमद्यगन्धवस्त्रच्छेदविलेपनस्वेदं मुषितवेश्मगतेन माल्यमद्यगन्धेन समानगन्धं वस्त्रच्छेदेन समानवस्त्रच्छेदं विलेपनस्वेदेन तुल्यविलेपनस्वेदम्। **चोरं पारदारिकं वा विद्यादिति**। पूर्वोक्तविशेषणविशिष्टं परीक्ष्य तस्कर इति वा पारतल्पिक इति वा जानीयात्॥

विधिशेषं श्लोकेनाह — **सगोपस्थानिक इति**। गोपो दशकुलीपञ्चकुलीरक्षकः स्थानिको दुर्गजनपदचतुर्भागरक्षी ताभ्यां सहितः, प्रदेष्टा कण्टकशोधनाधिकृतः, बाह्यं चोरमार्गणं कुर्यात्। नागरिकश्च, अन्तर्दुर्गे दुर्गान्तर्भागे, निर्दिष्टहेतुभिः, चोरमार्गणं कुर्यात्॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
षष्ठोऽध्यायः शङ्कारूपकर्माभिग्रहः,
आदितस्त्र्यशीतितमः॥

---

८१. प्रक. आशुमृतकपरीक्षा।

तैलाभ्यक्तमाशुमृतकं परीक्षेत।

निष्कीर्णमूत्रपुरीषं वातपूर्णकोष्ठत्वक्कं शूनपादपाणिमुन्मीलिताक्षं सव्यञ्जनकण्ठं पीडननिरुद्धोच्छ्वासहतं विद्यात्।

तमेव सङ्कुचितबाहुसक्थिमुद्बन्धहतं विद्यात्।

शूनपाणिपादोदरमपगताक्षमुद्वृत्तनाभिमवरोपितं विद्यात्।

निस्तब्धगुदाक्षं सन्दष्टजिह्वमाध्मातोदरमुदकहतं विद्यात्।

शोणितानुसिक्तं भग्नभिन्नगात्रं काष्ठै रश्मिभिर्वा हतं विद्यात्।

सम्भग्नस्फुटितगात्रमवक्षिप्तं विद्यात्।

आशुमृतकपरीक्षेति सूत्रम्। अन्तरेण व्रणाभिघातादिकमकाण्डे मृत आशुमृतकः तस्य परीक्षाभिधीयत इति सूत्रार्थः। द्रव्यापहारिणः कण्टकाः प्रागुक्ताः, प्राणापहारिण इदानीमुच्यन्ते।

तैलेत्यादि। आशुमृतकं, तैलाभ्यक्तं परीक्षेत तस्य कायमखिलं तैलेनाभ्यक्तं कृत्वा परीक्षेत। तैलाभ्यञ्जने हि कृते गूढाः प्रहारा व्यक्तीभवन्तीति तद्व्यक्तीभावानुरूपा परीक्षा प्रवर्तत इति।

निष्कीर्णमूत्रपुरीषमिति। निस्सृतकीर्णमूत्रपुरीषं, वातपूर्णकोष्ठत्वक्कं वातपूर्णमुदरं त्वक् च यस्य तं, शूनपादपाणिं प्रवृद्धपादपाणिम्, उन्मीलिताक्षम् अमीलितनेत्रं, सव्यञ्जनकण्ठं सचिह्नः पतितत्वरूपचिह्नयुक्तः कण्ठो यस्य तम्, इत्थम्भूतं जनं, पीडननिरुद्धोच्छ्वासहतं कण्ठपीडनकृतेनोच्छ्वासनिरोधेन हतं विद्यात्।

तमेवेति। उक्तलक्षणमेव, संकुचितबाहुसक्थिं प्राप्तसंकोचभुजोरुम्, उद्बन्धहतम् उल्लम्बनहतं, विद्यात्।

शूनेत्यादि। शूनपाणिपादोदरम्, अपगताक्षम् अन्तर्मग्नचक्षुषम्, उद्वृत्तनाभिम् उद्गतनाभिम्, अवरोपितं शूलारोपितं, विद्यात्।

निस्तब्धगुदाक्षमिति। गुदमक्षि च निर्गतं यस्य तं, सन्दष्टजिह्वम्,, आध्मातोदरं शूनोदरम्, उदकहतं विद्यात्।

शोणितानुसिक्तमित्यादि। स्फुटार्थम्।

संभग्नेत्यादि। अवक्षिप्तं प्रासादादिपातितम्।

श्यावपाणिपाददन्तनखं शिथिलमांसरोमचर्माणं फेनोपदिग्ध-मुखं विषहतं विद्यात् ।

तमेव सशोणितदंशं सर्पकीटहतं विद्यात् ।

विक्षिप्तवस्त्रगात्रमतिवान्तविरिक्तं मदनयोगहतं विद्यात् ।

अतोऽन्यतमेन कारणेन हतं हत्वा वा दण्डभयादुद्बन्धनिकृत्त-कण्ठं विद्यात् ।

विषहतस्य भोजनशेषं पयोभिः परीक्षेत । हृदयादुद्धृत्याग्नौ प्रक्षिप्तं चिटचिटायदिन्द्रधनुर्वर्णं वा विषयुक्तं विद्यात् । दग्धस्य हृदयमदग्धं दृष्ट्वा वा ।

तस्य परिचारकजनं वाग्दण्डपारुष्यातिलब्धं मार्गेत । दुःखोपहतमन्यप्रसक्तं वा स्त्रीजनं, दायनिवृत्तिस्त्रीजनाभिमन्तारं वा बन्धुम् । तदेव हतोद्बद्धस्य परीक्षेत ।

श्यावपाणीत्यादि । श्यावशब्दः कपिशार्थः । विषहतं वत्सनाभादि-स्थावरविषहतम् ।

तमेवेति । श्यावपाणिपाददन्तनखत्वादियुक्तमेव ।

विक्षिप्तेत्यादि । विक्षिप्तवस्त्रगात्रं वस्त्रं गात्रं च तत इतो विसारितं येन तम् । मदनयोगहतं मदकररसदानहतं विद्यात् ।

निष्कीर्णेत्यादिनोक्तेषु कारणेषु अन्यतमदर्शनेन हतमनुमिनुयात्, हन्त्रा वा स्वदण्डभयादुल्लम्बनाच्छिन्नकण्ठमनुमिनुयादित्याह—**अत** इत्यादि ।

विषहतस्येत्यादि । हृदयादुद्धृत्य हृदयदेशात् खण्डमवदाय । चिटचिटायत् चिटचिटाशब्दं कुर्वत् ।

विषदपरिज्ञानोपायमाह — **तस्ये**ति । विषहतस्य, परिचारकजनं, वाग्दण्डपारुष्यातिलब्धं वाक्पारुष्यदण्डपारुष्याभ्यां पीडितं, मार्गेत अन्विष्येत्, तथाभूतो हि परिजनः स्वामिनो विषदायी सम्भाव्यत इति । **दुःखोपहत-मि**ति । तथाभूतं, स्त्रीजनम् । अन्यप्रसक्तं वा पुरुषान्तरसक्तं वा स्त्रीजनं, मार्गेतेति वर्तते । दायनिवृत्तिस्त्रीजनाभिमन्तारं वा 'अमुकेन विभक्तव्यो दायस्तस्य मरणे निवृत्तो मामभिगमिष्यती'त्यभिमानवन्तं तस्य स्त्रीजनो मद्भोग्यो भविष्यतीत्यभिमानवन्तं च वा, बन्धुं मार्गेत । तदेव यथोक्तमेव, हतोद्बद्धस्य हत्वोल्लम्बितस्य, परीक्षेत ।

स्वयमुद्बद्धस्य वा विप्रकारमयुक्तं मार्गेत ।

सर्वेषां वा स्त्रीदायाद्यदोषः कर्मस्पर्धा प्रतिपक्षद्वेषः पण्यसंस्था समवायो वा विवादपदानामन्यतमं वा रोषस्थानम् । रोषनिमित्तो घातः ।

स्वयमादिष्टपुरुषैर्वा चोरैरर्थनिमित्तं सादृश्यादन्यवैरिभिर्वा हतस्य घातमासन्नेभ्यः परीक्षेत । येनाहूतः सहस्थितः प्रस्थितो हतभूमिमानीतो वा, तमनुयुञ्जीत । ये चास्य हतभूमावासन्नचरास्तानेकैकशः पृच्छेत् — केनायमिहानीतो हतो वा कः सशस्त्रः संगूहमान उद्विग्नो वा युष्माभिर्दृष्ट इति । ते यथा ब्रूयुस्तथानुयुञ्जीत ।

अनाथस्य शरीरस्थमुपभोगं परिच्छदम् ।
वस्त्रं वेषं विभूषां वा दृष्ट्वा तद्व्यवहारिणः ॥
अनुयुञ्जीत संयोगं निवासं वासकारणम् ।
कर्म च व्यवहारं च ततो मार्गणमाचरेत् ॥

स्वयमुद्बद्धस्य वेति । स्वयमुल्लम्बनमृतस्य, विप्रकारम् अयुक्तं मात्रातिगं पीडनं, मार्गेत केन कीदृशमुत्पादितमित्यन्विष्येत् ।

सामान्यतः परमारणनिमित्तान्याह — **सर्वेषां वेति** । जनसामान्यस्य, रोषस्थानं कोपहेतुः, स्त्रीदायाद्यदोषः स्त्रीनिमित्तो दायादत्वनिमित्तश्च दोषः, कर्मस्पर्धा राजकुलनियोगापचारादिकृतः संघर्षः, प्रतिपक्षद्वेषः शत्रुवैरं, पण्यसंस्था वाणिज्यम् अपचारादिद्वारेण, समवायो वा समूहो वा प्राधान्यभङ्गद्वारेण, विवादपदानाम् अन्यतमं वा पूर्वोक्तानां विवाहसंयुक्तादीनामेकतमं वा, भवतीति शेषः । रोषनिमित्तो, घातः वधः ।

स्वयमिति । आत्मना हतस्य, आदिष्टपुरुषैः स्वनियुक्तपुरुषैर्वा हतस्य, चोरैः अर्थनिमित्तं धनार्थं हतस्य, सादृश्यादन्यवैरिभिर्वा हतस्य हतादन्यास्मिन् वैरवद्भिः 'स एवायमि'ति सादृश्याद् मिथ्याबुद्धिं कृत्वा हतस्य, घातम्, आसन्नेभ्यः हतप्रत्यासन्नजनेभ्यः, परीक्षेत अन्विष्य जानीयात् । **येनाहूत इत्यादि** । संगूहमानः छन्नचरः । उद्विग्नः भीतः । शेषं सुबोधम् ।

अनाथस्येत्यादिश्लोकद्वयमेकान्वयम् । अनाथस्य मृतस्य, शरीरस्थम्, उपभोगं माल्यादि, परिच्छदं छत्रोपानहादि, वस्त्रं, वेषं जटिलमुण्डितत्वादि, विभूषां वा, दृष्ट्वा, तद्व्यवहारिणः माल्याद्युपभोगव्यवहर्तॄन् मालाकारादीन्,

रज्जुशस्त्रविषैर्वापि कामक्रोधवशेन यः ।
घातयेत् स्वयमात्मानं स्त्री वा पापेन मोहिता ॥
रज्जुना राजमार्गे तां चण्डालेनापकर्षयेत् ।
न श्मशानविधिस्तेषां न सम्बन्धिक्रियास्तथा ॥
बन्धुस्तेषां तु यः कुर्यात् प्रेतकार्यक्रियाविधिम् ।
तद्गतिं स चरेत् पश्चात् स्वजनाद् वा प्रमुच्यते ॥
संवत्सरेण पतति पतितेन समाचरन् ।
याजनाध्यापनाद् यौनात् तैश्चान्योऽपि समाचरन् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
सप्तमोऽध्यायः आशुमृतकपरीक्षा,
आदितश्चतुरशीतितमः ॥

अनुयुञ्जीत पृच्छेत्, किं किं, संयोगं सख्यं, निवासं, वासकारणं, कर्म च वृत्तिं च, व्यवहारं च दानादानक्रियानुष्ठानं च, अर्थाद्धतस्य । ततो मार्गणं घातकान्वेषणम्, आचरेत् ॥

रज्जुशस्त्रेत्यादि । श्लोकद्वयमेकान्वयम् । रज्जुना गुणेन, पुंस्त्वमार्षं, 'रज्ज्वा वे'ति पाठ एव वा प्रमादाद् विरूपितः । सम्बन्धिक्रियाः ज्ञातिकार्याणि निवपनानि । शेषं सुगमम् । रज्जुवस्त्रेति क्वापि पाठः ॥

बन्धुस्तेषामित्यादि । तेषाम् आत्मघातिनाम् । स पश्चात् तद्गतिं चरेत् आत्मघातिप्रेतक्रियाकर्ता देहान्ते आत्मघातिगतिं प्राप्नुयात् । स्वजनाद् वा प्रमुच्यते स्वजनपरित्यक्तश्च भवति, अर्थात् पतितत्वेन हेतुना ॥

संवत्सरेणेति । पतितेन सह, याजनाध्यापनात्, यौनाद् विवाहसम्बन्धाच्च, समाचरन् व्यवहरन्, संवत्सरेण वर्षेणैकेन, पतति । तैश्च पतितसंसर्गपतितैश्च, समाचरन् व्यवहरन्, अन्योऽपि, संवत्सरेण पतति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
सप्तमोऽध्यायः आशुमृतकपरीक्षा,
आदितश्चतुरशीतितमः ॥

८३. प्रक. वाक्यकर्मानुयोगः।

मुषितसन्निधौ बाह्यानामभ्यन्तराणां च साक्षिणमभिशस्तस्य देशजातिगोत्रनामकर्मसारसहायनिवासाननुयुञ्जीत। तांश्चापदेशैः प्रतिसमानयेत्। ततः पूर्वस्याह्नः प्रचारं रात्रौ निवासं च आ ग्रहणादिति अनुयुञ्जीत। तस्यापसारप्रतिसन्धाने शुद्धः स्यात्। अन्यथा कर्मप्राप्तः।

त्रिरात्रादूर्ध्वमग्राह्यः शङ्कितकः, पृच्छाभावादन्यत्रोपकरणदर्शनात्।

अचोरं चोर इत्यभिव्याहरतश्चोरसमो दण्डः, चोरं प्रच्छादयतश्च।

वाक्यकर्मानुयोग इति सूत्रम्। वाक्येन कर्मणा च शङ्काभिगृहीतस्य अनुयोगोऽभिधीयत इति सूत्रार्थः। शङ्कादिलिङ्गानां व्यभिचारसम्भवाद् वस्तुतोऽचोरस्यापि दण्डभयादिनानृतवादित्वदर्शनाच चोरत्वनिर्णयाय वाक्यकर्मानुयोगः प्रस्तूयते।

मुषितसन्निधाविति। चोरहृतधनस्य जनस्य सन्निधौ, बाह्यानाम् अभ्यन्तराणां च सन्निधौ, साक्षिणम्, अभिशस्तस्य शङ्काभिगृहीतस्य, देशं, जातिं, गोत्रं, नाम, कर्म, सारं धनं, सहायं निवासं चेत्येतान् देशादीन् अष्टौ, अनुयुञ्जीत। तांश्चेति। अभिशस्तदेशादीन्, अपदेशैः निमित्तैरुपपत्तिभिः, प्रतिसमानयेत् पर्यालोचयेत् सुष्ठु न वेति। तत इति। पश्चात्, पूर्वस्य अह्नः प्रचारं, रात्रौ निवासं च शयनं च, आ ग्रहणात् यावदभिशस्तग्रहणकालम्, इत्यनुयुञ्जीत अनुयोगोचितेन प्रकारेण पृच्छेद्, अभिशस्तम्। तस्य अभिशस्तस्य, अपसारप्रतिसन्धाने अपराधापसरणकारणोपलब्धौ, शुद्धः स्याद्, अभिशस्तः। अन्यथा कर्मप्राप्तः कृतापराधः।

त्रिरात्रादूर्ध्वमिति। तिसृषु रात्रिषु अतीतासु, शङ्कितकः, अग्राह्यः ग्रहीतुं योग्यो न भवति, कस्मात्, पृच्छाभावात् मोषणदिवसपूर्वदिवसादिचरितस्य विस्मृतिसम्भवेन प्रश्नायोगात्, अन्यत्रोपकरणदर्शनात् मोषणसाधनानामचोरगृहेषूपलम्भसम्भवाच।

अचोरमिति। तं, चोर इति अभिव्याहरतः प्रदेष्ट्रादेः, चोरसमो दण्डः। चोरं प्रच्छादयतश्च तम् अचोर इत्यभिव्याहरतश्च, अथवा चोरं गृहान्तरवस्थाप्याप्रकाशयतश्च, चोरसमो दण्डः।

चोरेणाभिशस्तो वैरद्वेषाभ्यामपदिष्टकः शुद्धः स्यात् । शुद्धं परिवासयतः पूर्वः साहसदण्डः ।

शङ्कानिष्पन्नमुपकरणमन्त्रिसहायरूपवैयापृत्यकरान् निष्पादयेत् । कर्मणश्च प्रवेशद्रव्यादानांशविभागैः प्रतिसमानयेत् ।

एतेषां कारणानाम् अनभिसन्धाने विप्रलपन्तमचोरं विद्यात् । दृश्यते ह्यचोरोऽपि चोरमार्गे यदृच्छया सन्निपाते चोरवेषशस्त्रभाण्डसामान्येन गृह्यमाणो दृष्टः चोरभाण्डस्योपवासेन वा यथा हि माण्डव्यः कर्मक्लेशभयादचोरः 'चोरोऽस्मि' इति ब्रुवाणः ।

तस्माद् समाप्तकरणं नियमयेत् ।

मन्दापराधं बालं वृद्धं व्याधितं मत्तमुन्मत्तं क्षुत्पिपासाध्वक्लान्तमत्याशितमामकाशितं दुर्बलं वा न कर्म कारयेत् ।

चोरेणाभिशस्त इति । चोरेणान्यश्चोर इत्युक्तः, वैरद्वेषाभ्याम् अपदिष्टकः वैरेण द्वेषेण च निमित्तेन कृताभिशंसन इति विभावितश्चेत्, शुद्धः स्यात् । शुद्धं, परिवासयतः अमोचयतः प्रदेष्टुः, पूर्वः साहसदण्डः ।

शङ्कानिष्पन्नमिति । शङ्कागृहीतम्, उपकरणादीन् पञ्च, निष्पादयेत् पृष्ट्वा साधयेत् । तत्र रूपं लोप्त्रं, शेषं प्रतीतम् । **कर्मणश्च प्रवेशेत्यादि** । चौर्यार्थं द्रव्यरक्षागृहे केन केन प्रवेशः कृतः केन द्रव्यं गृहीतं कस्य कियानंशविभागः इति प्रवेशादिप्रश्नैस्तत्त्वं विचारयेत् ।

एतेषां कारणानामिति । उक्तानां चोरत्वसाधकानाम्, अनभिसन्धाने अपरिचिन्तने, विप्रलपन्तं भयादिना विरुद्धवाचिनमपि, अचोरं विद्यात् । किमर्थं परीक्षायत्नो महानुपदिश्यत इत्यत्राह — **दृश्यते हीत्यादि** । चोरभाण्डस्योपवासेन मुष्टद्रव्यस्य समीपस्थित्या । माण्डव्यः आणिमाण्डव्यो नाम महर्षिः । स किलाचोर एव राजपुरुषताडनादिक्लेशभीत्या चोरमात्मानं वदन् विनैव परीक्षां तं चोरं मन्यमानेन राज्ञा शूलमारोपित इति महाभारते कथानुसन्धेया ।

तस्मादिति । अदण्ड्यदण्डप्रणयनं मा प्रसाङ्क्षीदिति हेतोः, समाप्तकरणं सम्यग् बहुप्रकारपरीक्षावधारितापराधं, नियमयेत् दण्डयेत् ।

मन्दापराधमित्यादि । अल्पापराधम् । अत्याशितम् अतिमात्रभुक्तान्नम् । आमकाशितम् अजीर्णान्नम् ।

तुल्यशीलपुंश्चलीप्रावादिककथावकाशभोजनदातृभिरपसर्पयेत् । एवमतिसन्दध्यात् । यथा वा निक्षेपापहारे व्याख्यातम् ।

आप्तदोषं कर्म कारयेत् । न त्वेव स्त्रियं गर्भिणीं सूतिकां वा मासावरप्रजाताम् । स्त्रियास्त्वर्धकर्म । वाक्यानुयोगो वा ।

ब्राह्मणस्य सत्रिपरिग्रहः श्रुतवतस्तपस्विनश्च । तस्यातिक्रम उत्तमो दण्डः कर्तुः कारयितुश्च कर्मणा व्यापादनेन च ।

व्यावहारिकं कर्मचतुष्कं — षड् दण्डाः, सप्त कशाः, द्वावुपरिनिबन्धौ, उदकनालिका च ।

चोरादीन् कथं जानीयादित्याह— **तुल्यशीलेत्यादि** । तुल्यशीलादिभिः तुल्यशीलाः समानवृत्ताः पुंश्चल्यो बन्धक्यः प्रावादिकाः प्रवदनचारिणः दक्षभाषाः कथावकाशभोजनदातारः कथादातारः कथकाः अवकाशदातारो भोजनदातारश्च इत्येतैः, अपसर्पयेत् अपसर्पैः कृतैर्जानीयात्, अर्थाच्चोरादीन् । एवमतिसन्दध्यात् उक्तेन प्रकारेण तान् वञ्चयेत् । ज्ञानोपायान्तरमन्यत्रोक्तं चेहातिदिशति —**यथावेति** । निक्षेपापहारे, यथा व्याख्यातं 'क्षीणदायकुटुम्बमि'त्यादिना निरूपितं, तथा वा जानीयादिति वाक्यशेषः ।

निश्चितापराधस्य दण्डमाह—**आप्तदोषमिति** । निश्चितापराधं, कर्म कारयेत् । गर्भिण्याः स्त्रियाः प्रसूतायाश्चानतीतमासाया न दण्ड इत्याह — **न त्वेवेत्यादि** । **स्त्रियास्त्वर्धकर्मेति** । पुंसो यावद् दण्डकर्म विहितं तस्यार्धं स्त्रियाः । वाक्यानुयोगो वा वाचा परिभाषणं वा कर्तव्यम् अर्धस्याप्ययोगे ।

ब्राह्मणस्येति । तस्य, श्रुतवतो विदुषः, तपस्विनश्च, सत्रिपरिग्रहः सत्रिभिः परिग्रहणं तथा परिग्रहणेन ततइतः पर्यटनक्लेशयोजनेति यावत्, अर्थाद् दण्डः । **तस्यातिक्रम** इति । उक्तदण्डातिरिक्तदण्डकरणे, कर्तुः, कारयितुश्च, उत्तमो दण्डः उत्तमसाहसः, कर्मणा, व्यापादनेन च द्रोहचिन्तनेन च हेतुना ।

व्यावहारिकं कर्मचतुष्कमिति । लोकव्यवहारप्रसिद्धानि चतुष्प्रकाराणि दण्डकर्माणि भवन्ति । षड् दण्डाः दण्डाघाताः षडित्येकः प्रकारः, सप्त कशाः कशाप्रहाराः इति द्वितीयः, द्वौ उपरिनिबन्धौ हस्तयोः पृष्ठतः कृत्वा संश्लेषितयोर्बन्धनं तेन सह शिरसो बन्धनं चेति द्विरूपं बन्धनमिति तृतीयः, उदकनालिका च नासायां सलवणोदकनिषेचनं च इति चतुर्थः ।

परं पापकर्मणां नववेत्रलताद्वादशकं, द्वावूरुवेष्टौ, विंशतिर्नक्तमाललताः, द्वात्रिंशत् तलाः, द्वौ वृश्चिकबन्धौ, उल्लम्बने च द्वे, सूची हस्तस्य, यवागूपीतस्य, एकपर्वदहनमङ्गुल्याः, स्नेहपीतस्य प्रतापनमेकमहः, शिशिररात्रौ बल्वजाग्रशय्या चेत्यष्टादशकं कर्म ।

तस्योपकरणं प्रमाणं प्रहरणं प्रधारणमवधारणं च खरपट्टादागमयेत् ।

दिवसान्तरमेकैकं च कर्म कारयेत् ।

पूर्वकृतापदानं, प्रतिज्ञायापहरन्तम्, एकदेशदृष्टद्रव्यं, कर्मणा

अन्यत् पापकर्मणां चतुर्दशभेदं दण्डनकर्माह — **परं पापकर्मणामिति** । परम् उक्तचतुष्कातिरिक्तं, पापकर्मणां, नववेत्रलताद्वादशकं नवहस्तदीर्घवन्यलतया द्वादश प्रहाराः, द्वौ ऊरुवेष्टौ द्वाभ्यां रज्जुभ्यां पादयोर्वेष्टनं तेन सह शिरसोऽपि वेष्टनमिति द्विप्रकारावूरुवेष्टौ, विंशतिर्नक्तमाललताः विंशतिः करञ्जलताप्रहाराः, द्वात्रिंशत् तलाः चपेटाघाताः, द्वौ वृश्चिकबन्धौ वामकरस्य वामपादस्य च पृष्ठतः संयोज्य बन्धनमित्येको वृश्चिकबन्धः दक्षिणकरस्य दक्षिणपादस्य च तथा संयोज्य बन्धनमित्यपर इत्येवं द्वौ, उल्लम्बने च द्वे संयुक्तबद्धकरद्वयस्य ऋजूर्ध्वलम्बनं संयुक्तबद्धपादद्वयस्योर्ध्वलम्बनं चेति द्विप्रकारे उल्लम्बने, सूची हस्तस्य करस्य नखे सूचीप्रवेशनं, यवागूपीतस्य यवागूपानस्य कारणेति शेषः, यवागूं पाययित्वा मूत्रनिरोधनेनावस्थापनमित्यर्थः । अङ्गुल्या एकपर्वदहनं, स्नेहपीतस्य प्रतापनमेकमहरिति पायितसर्पिष आतपेऽग्नौ वैकदिनप्रतापनं, शिशिररात्रौ बल्वजाग्रशय्या च जलसिक्तबल्वजाग्रशय्याशायनं च, इत्यष्टादशकं पूर्वोक्तचतुष्केण सहाष्टादशावयवकं, कर्म ।

तस्येति । उक्तस्य कर्मणः, उपकरणं रज्ज्वादि, प्रमाणं दण्डकशायायामः, प्रहरणं वेत्रनक्तमालादि, प्रधारणं दण्डनीयस्य स्थापनप्रकारः, अवधारणं च शरीरानुगुणदण्डप्रकारनिर्धारणं च, खरपट्टात् कर्तृनामप्रसिद्धाच्चौर्यशास्त्राद्, आगमयेद् अधीयीत ।

दिवसान्तरमित्यादि । दण्डितं दिवसव्यवधानेनैकैकं कर्म कृच्छ्रव्यापारं, कारयेत् । इत्युत्सर्गः ।

विशेषविधिमाह—पूर्वेत्यादि । पूर्वकृतापदानं पूर्वकृतचौर्यं, प्रतिज्ञायापहरन्तम् अपहरिष्यामीति प्रतिश्रुत्यापहरन्तम्, एकदेशदृष्टद्रव्यं नष्टद्रव्यैक-

रूपेण वा गृहीतं, राजकोशमवस्तृणन्तं, कर्मवध्यं वा राजवचनात् समस्तं व्यस्तमभ्यस्तं वा कर्म कारयेत् ।

सर्वापराधेष्वपीडनीयो ब्राह्मणः । तस्याभिशस्ताङ्को ललाटे स्याद् व्यवहारपतनाय । स्तेये श्वा, मनुष्यवधे कबन्धः, गुरुतल्पे भगं, सुरापाने मद्यध्वजः ॥

ब्राह्मणं पापकर्माणमुद्घुष्याङ्ककृतव्रणम् ।
कुर्यान्निर्विषयं राजा वासयेदाकरेषु वा ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
अष्टमोऽध्यायः वाक्यकर्मानुयोगः,
आदितः पञ्चाशीतितमः ॥

देशयुक्ततयोपलब्धं, कर्मणा गृहीतम् अद्वारप्रवेशनिर्गमसन्धिच्छेदनादिकर्मयुक्तत्वेन दृष्टं, रूपेण वा गृहीतं लोप्त्रयुक्तं गृहीतं, राजकोशम् अवस्तृणन्तं राजधनमवच्छादयन्तं, कर्मवध्यं वा कृतमहापराधं वा, राजवचनात्, समस्तं समुदितं, व्यस्तं तद्विपरीतम्, अभ्यस्तं वा आवृत्तं वा, कर्म कारयेद् यावत्प्राणवियोगम् । स एष क्षत्रियादीनां दण्डविधिः ।

ब्राह्मणस्य विधिमाह—**सर्वापराधेष्वित्यादि** । वधताडनादिना दण्डेन न योज्यः । कस्तर्हि तस्य दण्डस्तत्राह — **तस्येति** । ब्राह्मणस्य, अभिशस्ताङ्कः, ललाटे स्यात् कर्तव्यः, किमर्थं, व्यवहारपतनाय व्यवहारात् पतनाय प्रच्युतये अज्ञानात् तेनान्यः सहव्यवहारं मा कार्षीदित्येतदर्थमित्यर्थः । अपराधभेदेनाङ्कभेदानाह—**स्तेय इति** । तत्र, श्वा अभिशस्ताङ्कः कर्तव्यः, मनुष्यवधे कबन्धः, गुरुतल्पे गुरुदारगमने, भगं योनिः, सुरापाने मद्यध्वजः ॥

श्लोकमाह — **ब्राह्मणमित्यादि** । उद्घुष्य पापकर्मामुक इति पुरग्रामादिषु सघोषणं दर्शयित्वा । निर्विषयं कुर्यात् स्वदेशान्निष्कासयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
अष्टमोऽध्यायः वाक्यकर्मानुयोगः,
आदितः पञ्चाशीतितमः ॥

८४. प्रक. सर्वाधिकरणरक्षणम् ।

समाहर्तृप्रदेष्टारः पूर्वमध्यक्षाणामध्यक्षपुरुषाणां च नियमनं कुर्युः ।

खनिसारकर्मान्तेभ्यः सारं रत्नं वापहरतः शुद्धवधः ।

फल्गुद्रव्यकर्मान्तेभ्यः फल्गु द्रव्यमुपस्करं वा पूर्वः साहसदण्डः ।

पण्यभूमिभ्यो वा राजपण्यं माषमूल्यादूर्ध्वमा पादमूल्यादित्यपहरतो द्वादशपणो दण्डः । आ द्विपादमूल्यादिति चतुर्विंशतिपणः । आ त्रिपादमूल्यादिति षट्त्रिंशत्पणः । आ पणमूल्यादित्यष्टचत्वारिंशत्पणः । आ द्विपणमूल्यादिति पूर्वः साहसदण्डः । आ चतुष्पणमूल्यादिति मध्यमः । आ अष्टपणमूल्यादित्युत्तमः । आ दशपणमूल्यादिति वधः ।

सर्वाधिकरणरक्षणम्इति सूत्रम् । सर्वेषाम् अधिकरणानां धनोत्पत्तिस्थानानाम् अधिकरणस्थानां वा समाहर्त्रादीनां रक्षणं धनहरणाद् वारणं सर्वाधिकरणरक्षणं, तदुच्यत इति सूत्रार्थः । जानपदादिकण्टकशोधनमुक्तम् । राजधनापहारिशोधनमधुनाभिधीयते ।

समाहर्तृप्रदेष्टार इति । समाहर्तारः प्रदेष्टारश्च, पूर्वं कार्यारम्भात् प्राक्, अध्यक्षाणाम्, अध्यक्षपुरुषाणां च, नियमनं व्यवस्थापनं, कुर्युः ।

खनिसारकर्मान्तेभ्य इति । खनिकर्मान्तेभ्यः रत्नस्वर्णरजतादिकर्मस्थानेभ्यः सारकर्मान्तेभ्यः चन्दनागुर्वादिकर्मस्थानेभ्यः, सारं रत्नं वा, अपहरतः, शुद्धवधः धनदण्डामिश्रो घातदण्डः ।

फल्गुद्रव्यकर्मान्तेभ्य इति । कार्पासादिद्रव्यकर्मान्तेभ्यः, फल्गु द्रव्यम्, उपस्करं वा वेशवारं वा, अपहरत इति वर्तते । पूर्वः साहसदण्डः ।

पण्यभूमिभ्यो वेति । जीरकाजमोदाद्युत्पत्तिभूमिभ्यः, राजपण्यं, माषमूल्यादूर्ध्वम्, आ पादमूल्यात् पादः पणचतुर्भागश्चतुर्माषाः आ चतुर्माषमूल्यात्, इत्येवम् अपहरतः, द्वादशपणो दण्डः । **आ द्विपादमूल्यादिति** । चतुर्माषमूल्यादूर्ध्वमष्टमाषमूल्यान्तम्, अपहरतः, चतुर्विंशतिपणः । **आ त्रिपादमूल्यादिति षट्त्रिंशत्पण** इत्यादि **आ दशपणमूल्यादिति वध** इत्येतदन्तं सुबोधम् ।

कोष्ठपण्यकुप्यायुधागारेभ्यः कुप्यभाण्डोपस्करापहारेष्वर्धमूल्ये-ष्वेत एव दण्डाः ।

कोशभाण्डागाराक्षशालाभ्यश्चतुर्भागमूल्येष्वेत एव द्विगुणा दण्डाः ।

चोराणामभिप्रधर्षणे चित्रो घातः । इति राजपरिग्रहेषु व्याख्यातम् ।

बाह्येषु तु प्रच्छन्नमहनि क्षेत्रखलवेश्मापणेभ्यः कुप्यभाण्डमुपस्करं वा माषमूल्यादूर्ध्वमा पादमूल्यादित्यपहरतस्त्रिपणो दण्डः । गोमयप्रदेहेन वा प्रलिप्यावघोषणम् । आ द्विपादमूल्यादिति षट्पणः, गोमयभस्मना वा प्रलिप्यावघोषणम् । आ त्रिपादमूल्यादिति नवपणः, गोमयभस्मना वा प्रलिप्यावघोषणं, शरावमेखलया वा । आ पणमूल्यादिति द्वादशपणः, मुण्डनं प्रव्राजनं वा । आ द्विपणमूल्यादिति चतुर्विंशतिपणः, मुण्डस्येष्टकाशकलेन प्रव्राजनं वा । आ चतुष्पणमूल्यादिति षट्त्रिंशत्पणः । आ पञ्चपणमूल्यादिति अष्टचत्वारिंशत्पणः । आ दशपणमूल्यादिति पूर्वः साहसदण्डः । आ विंशतिपणमूल्यादिति

कोष्ठपण्यकुप्यायुधागारेभ्य इति । कोष्ठागारात् पण्यागारात् कुप्यागाराद् आयुधागाराच्च, कुप्यभाण्डोपस्करापहारेषु, अर्धमूल्येषु अर्धमाषमूल्यादिद्विमाषमूल्यान्तेषु विषये, एत एव द्वादशपणादयो, दण्डाः ।

कोशभाण्डागाराक्षशालाभ्य इति । ताभ्यः, चतुर्भागमूल्येषु काकणीमूल्येषु माषमूल्यान्तेषु अपहृतेषु विषये, एत एव द्विगुणा दण्डाः चतुर्विंशतिपणाष्टाचत्वारिंशत्पणादयः ।

चोराणामभिप्रधर्षणे इति । स्वयमपहृतवतामेव राजपुरुषाणां चोरापहरणच्छलकल्पने, चित्रो घातः क्लेशवधः । इति अनेन प्रकारेण, राजपरिग्रहेषु राजकीयेषु प्रदेशेषु, व्याख्यातम् ।

बाह्येषु त्वित्यादि । बाह्येषु राजकीयातिरिक्तेषु पौरजानपदक्षेत्रादिषु । शेषं सुगमम् । चोरस्य निर्धनत्वे दण्डप्रकारमाह — **गोमयप्रदेहेन वेति** । गोशकृदुपलेपेन, प्रलिप्य देहं प्रकर्षेण लिप्त्वा, अवघोषणं पटहघोषणपुरस्सरं नगरमभितः सञ्चारणम् । **आ द्विपादमूल्यादित्यादि** । स्पष्टम् । **शरावमेखलया वेति** । अवघोषणमिति वर्तते, शरावो मृद्भाण्डविशेषः, प्रोतशरावां रशनां कण्ठे बद्ध्वा पूर्ववन्नगरमभितः सञ्चारणं गोमयभस्माभावपक्षे दण्ड

द्विशतः । आ त्रिंशत्पणमूल्यादिति पञ्चशतः । आ चत्वारिंशत्पणमूल्यादिति साहस्रः । आ पञ्चाशत्पणमूल्यादिति वधः ।

प्रसह्य दिवा रात्रौ वान्तर्यामिकमपहरतोऽर्धमूल्येष्वेत एव द्विगुणा दण्डाः । प्रसह्य दिवा रात्रौ वा सशस्त्रस्यापहरतश्चतुर्भागमूल्येष्वेत एव दण्डाः ।

कुटुम्बिकाध्यक्षमुख्यस्वामिनां कूटशासनमुद्राकर्मसु पूर्वमध्यमोत्तमवधा दण्डाः । यथापराधं वा ।

धर्मस्थश्चेद् विवदमानं पुरुषं तर्जयति, भर्त्सयत्यपसारयति, अभिग्रसते वा, पूर्वमस्मै साहसदण्डं कुर्यात् । वाक्पारुष्ये द्विगुणम् ।

इत्यर्थः । आ पणमूल्यादिति द्वादशपण इत्यादि आ पञ्चाशत्पणमूल्यादिति वध इत्यन्तं वाक्यजातं स्पष्टार्थम् । यदत्र चतुर्विंशतिपणदण्डासामर्थ्ये मुण्डीकृत्येष्टकाखण्डप्रक्षेपेण देशाद् बहिर्निष्कासनमुक्तं, तत् षट्त्रिंशत्पणादिसहस्रपणान्तदण्डासामर्थ्ये दण्डापूपिकान्यायेन सिद्धं द्रष्टव्यम् ।

प्रसह्येति । बलात्कारेण, दिवा रात्रौ वा, अन्तर्यामिकं यामान्तरालकालरक्षाव्यापृतम्, अपहरतो मुष्णतः, अर्धमूल्येषु माषमूल्यादूर्ध्वमित्याद्युक्तमूल्यापेक्षयार्धमूल्येषु अर्थादर्धमाषमूल्यप्रभृतिषु द्विमाषमूल्यान्तेषु विषये, एत एव पूर्वोक्तास्त्रिपणादय एव वधान्ताः, द्विगुणाः अर्थात् षट्पणादयः, दण्डाः । इह द्विगुणा इति पाठो नास्तीति भाषास्वरसतो गम्यते । अन्तर्यामिकमेव दिवा रात्रौ वा प्रसह्य शस्त्रपाणेर्मुष्णतो माषचतुर्भाग(काकणी)मूल्यादि माषमूल्यान्तेषु विषयेऽपि यथोक्ता एव दण्डा इत्याह—**प्रसह्य दिवा रात्रौ वा सशस्त्रस्येत्यादि** ।

कुटुम्बिकाध्यक्षमुख्यस्वामिनामिति । कुटुम्बिनः सुवर्णाध्यक्षादेर्ग्राममुख्यस्य समाहर्तुश्चेत्येतेषां चतुर्णां, कूटशासनमुद्राकर्मसु कपटलेख्यकर्मसु कपटलक्षणकर्मसु च, पूर्वमध्यमोत्तमवधाः दण्डाश्चत्वारो यथाक्रमं भवन्ति । यथापराधं वा अपराधानुगुण्येन वा दण्डाः ।

धर्मस्थशोधनमाह — **धर्मस्थश्चेदित्यादि** । तर्जयति शिरःकम्पनतर्जनीनिर्देशादिना भीषयति । भर्त्सयति वचनेन भीषयति । अपसारयति अपसरन्तं प्रयोजयति । अभिग्रसते भक्षयति उपजीवतीत्यर्थः । पूर्वं साहसदण्डं

पृच्छ्यं न पृच्छति, अपृच्छ्यं पृच्छति, पृष्ट्वा वा विसृजति, शिक्षयति, स्मारयति, पूर्वं ददाति वेति, मध्यममस्मै साहसदण्डं कुर्यात्। देयं देशं न पृच्छति, अदेयं देशं पृच्छति, कार्यमदेशेनातिवाहयति, छलेनातिहरति, कालहरणेन श्रान्तमपवाहयति, मार्गापन्नं वाक्यमुत्क्रमयति, मतिसाहाय्यं साक्षिभ्यो ददाति, तारितानुशिष्टं कार्यं पुनरपि गृह्णाति, उत्तममस्मै साहसदण्डं कुर्यात् । पुनरपराधे द्विगुणं, स्थानाद् व्यवरोपणं च ।

लेखकश्चेदुक्तं न लिखति अनुक्तं लिखति, दुरुक्तमुपलिखति, सूक्तमुल्लिखति, अर्थोत्पत्तिं वा विकल्पयतीति, पूर्वमस्मै साहसदण्डं कुर्यात्, यथापराधं वा ।

प्रथमसाहसम् । वाक्पारुष्ये द्विगुणमिति । विवदमानं प्रति परुषवाक्प्रयोगे उक्तद्विगुणं दण्डं कुर्यात् ।

भूयो धर्मस्थापराधानुल्लिखति — पृच्छ्यमिति । पृच्छार्हं साक्षिणम्, इह दण्डादित्वाद् यत् । न पृच्छति । प्रच्छन्नमित्यपि पाठः । अपृच्छ्यं पृच्छानर्हं विवादिबन्ध्वादिकं, पृच्छति । पृष्ट्वा वा विसृजति अदत्तोत्तरमेवोपेक्षते । शिक्षयति वक्तव्यमध्यापयति । स्मारयति वक्तव्यं विस्मृतमभिज्ञापयति । पूर्वं ददाति वा वाक्यस्य वक्तव्यस्य पूर्वांशं शेषपूरणानुगुणं सूचयति वा । इति एवं, चेष्टमानायेति शेषः, अस्मै धर्मस्थाय, मध्यमं साहसदण्डं कुर्यात् । देयं देशं न पृच्छतीति । विभाव्यवस्तुविभावनायावश्यापेक्ष्यं साक्षिणं न पृच्छति । अदेयं देशं तद्विपरीतं साक्षिणं, पृच्छति । कार्यम्, अदेशेन अतिवाहयति साक्षिणं विनैव निर्णयति । छलेन अतिहरति सत्यवादिनमपि साक्षिणं छलवाक्येन अपराधयति । कालहरणेन श्रान्तं, कृत्वेति शेषः, अपवाहयति परावर्तयति । मार्गापन्नं वाक्यम् अपरित्यक्तक्रमं साक्षिवाक्यम्, उत्क्रमयति त्यक्तक्रमसित्याचष्टे । मतिसाहाय्यं साक्षिभ्यो ददाति । तारितानुशिष्टं विचारितानिर्णीतं, कार्यं, पुनरपि गृह्णाति विचारणार्थम् । अस्मै एवं चेष्टमानाय धर्मस्थाय, उत्तमं साहसदण्डं कुर्यात् । पुनरपराधे कृते, द्विगुणम् अर्थाद् दण्डनम् । स्थानाद् व्यवरोपणं च निरसनं च ।

लेखकशोधनमाह — लेखकश्चेदित्यादि । दुरुक्तमुपलिखति उक्तमसाधु साधूकृत्य लिखति । सूक्तम् उल्लिखति सुष्ठूक्तमसाधूकृत्य लिखति । अर्थोत्पत्तिं वा विकल्पयति साध्यसिद्धिं वान्यथयति । शेषं सुगमम् ।

धर्मस्थः प्रदेष्टा वा हैरण्यमदण्ड्यं क्षिपति, क्षेपद्विगुणमस्मै दण्डं कुर्यात् । हीनातिरिक्ताष्टगुणं वा। शारीरदण्डं क्षिपति, शारीरमेव दण्डं भजेत । निष्क्रयद्विगुणं वा । यं वा भूतमर्थं नाशयत्यभूतमर्थं करोति तदष्टगुणं दण्डं दद्यात् ।

धर्मस्थीयाच्चारकान्निस्सारयतो बन्धनागाराच्छय्यासनभोजनोच्चारसञ्चारं रोधबन्धनेषु त्रिपणोत्तरा दण्डाः कर्तुः कारयितुश्च ।

चारकादभियुक्तं मुञ्चतो निष्पातयतो वा मध्यमः साहसदण्डः अभियोगदानं च । बन्धनागारात् सर्वस्वं वधश्च ।

बन्धनागाराध्यक्षस्य संरुद्धकमनाख्याय चारयतश्चतुर्विंशतिपणो दण्डः । कर्म कारयतो द्विगुणः । स्थानान्यत्वं गमयतोऽन्नपानं वा रुन्धतः षण्णवतिर्दण्डः । परिक्लेशयत उत्कोचयतो वा मध्यमः साहसदण्डः । घ्नतः साहस्रः ।

धर्मस्थ इति । धर्मस्थः, प्रदेष्टा वा, अदण्ड्यं, हैरण्यं क्षिपति हिरण्यं दण्डयति चेत्, असै दण्डयित्रे, क्षेपद्विगुणं क्षिप्तदण्डाद्विगुणं, दण्डं कुर्यात् । **हीनातिरिक्ताष्टगुणं** वेति । न्याय्यदण्डाद्धीनदण्डकरणे न्याय्यदण्डादतिरिक्तदण्डकरणे च हीनदण्डादधिकदण्डाच्च अष्टगुणं दण्डं कुर्यात् । शारीरदण्डं क्षिपति हस्तच्छेदादिरूपं दण्डम् अदण्ड्ये यदि प्रयुङ्क्ते, शारीरमेव दण्डं हस्तच्छेदादिरूपं तमेव, भजेत । निष्क्रयद्विगुणं वा तत्तच्छारीरदण्डस्थानीयधनदण्डद्विगुणं वा दण्डं, भजेत । न्याय्यार्थनाशने अन्याय्यार्थसाधने च नाशितसाधितार्थाष्टगुणं दण्डं दद्यादित्याह — **यं वा भूतमर्थमित्यादि** ।

बन्धनाध्यक्षशोधनमाह — **धर्मस्थीयादिति** । धर्मस्थपरिकल्पितात्, चारकात् संरोधागारात्, निस्सारयतः लञ्चग्रहणेन तद्गतान् बहिः सञ्चारयतः, बन्धनागारात् कारागृहात् निस्सारयतः, रोधबन्धनेषु रोधागारेषु बन्धनागारेषु च शय्यासनभोजनोच्चारसञ्चारं शयनीयासनभोजनानि मूत्रपुरीषोत्सर्गस्थानं च, कर्तुः, कारयितुश्च, त्रिपणोत्तराः उत्तरोत्तरत्रिपणाधिकाः, दण्डाः ।

चारकादिति । धर्मस्थीयसंरोधगृहात्, अभियुक्तं मुञ्चतः, निष्पातयतो वा निष्पतनप्रतिकूलानाचरणान्निष्पतनं प्रयोजयतश्च, मध्यमः साहसदण्डः, अभियोगदानं च अभियुक्तदेयद्रव्यदानं च । बन्धनागारात् प्रदेष्टृकारागृहात्, अभियुक्तं मुञ्चत इति वर्तते, सर्वस्वं सर्वस्वहरणं, वधश्च दण्डः ।

संरुद्धं जनं बन्धनागाराध्यक्षाननुज्ञया चारयतश्चतुर्विंशतिपणो दण्डः, तद्द्विगुणः कर्म कारयत इत्याह— **बन्धनागाराध्यक्षस्येत्यादि** । **स्थानान्य-**

परिगृहीतां दासीमाहितिकां वा संरुद्धिकामधिचरतः पूर्वः साहसदण्डः । चोरडामरिकभार्यां मध्यमः । संरुद्धिकामार्यामुत्तमः । संरुद्धस्य वा तत्रैव घातः । तदेवाध्यक्षेण गृहीतायामार्यायां विद्यात् । दास्यां पूर्वः साहसदण्डः ।

चारकमभित्त्वा निष्पातयतो मध्यमः । भित्त्वा वधः । बन्धनागारात् सर्वस्वं वधश्च ॥

एवमर्थचरान् पूर्वं राजा दण्डेन शोधयेत् ।
शोधयेयुश्च शुद्धास्ते पौरजानपदान् दमैः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
नवमोऽध्यायः सर्वाधिकरणरक्षणम्.
आदितः षडशीतितमः ॥

त्वमित्यादि । स्थानान्य[?] स्थान दम् । परिक्लेशयतः ताडनादिना दुन्वतः । उत्कोचयतः उत्कोचधनं दापयतः । शेषं स्पष्टम् ।

परिगृहीतामिति । क्रयाधिगतां, दासीम्, आहितिकां वा, संरुद्धिकां बन्धनागाररुद्धाम्, अधिचरतो गच्छतः, पूर्वः साहसदण्डः । चोरडामरिकभार्यां चोरभार्यां डमरगतकभार्यां च, अधिचरतः, मध्यमः । संरुद्धिकाम्, आर्यां कुलस्त्रियम्, अधिचरतः, उत्तमः । तत्रैव संरुद्धस्य वा बन्धनागार एव संरुद्धस्य च अर्थात् पूर्वोक्ताः स्त्रीरधिचरतः, घातः वधः । तदेवेति । वधरूपं विधानमेव, अध्यक्षेण, गृहीतायाम् अधिचरितायाम्, आर्यायां, विद्यात् । दास्याम्, अध्यक्षेण गृहीतायामिति वर्तते, पूर्वः साहसदण्डः, अध्यक्षस्य ।

चारकमिति । धर्मस्थीयसंरोधागारम्, अभित्त्वा निष्पातयतः अर्थात् संरुद्धं, मध्यमः साहसदण्डः । भित्त्वा निष्पातयतः, वधः । बन्धनागारात् निष्पातयतः, सर्वस्वं सर्वस्वहरणं, वधश्च दण्डः ॥

अध्यायप्रान्ते श्लोकमाह—एवमिति । अनेन प्रकारेण, अर्थचरान् राजार्थव्यवहाराधिकृतान्, राजा, दण्डेन शोधयेत् । ते च अर्थचराश्च, शुद्धाः, भूत्वेति शेषः, पौरजानपदान्, दमैः दण्डैः, शोधयेयुः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
नवमोऽध्यायः सर्वाधिकरणरक्षणम्,
आदितः षडशीतितमः ॥

८५. प्रक. एकाङ्गवधनिष्क्रयः ।

तीर्थघातग्रन्थिभेदोर्ध्वकराणां प्रथमेऽपराधे सन्दंशच्छेदनं चतुष्पञ्चाशत्पणो वा दण्डः । द्वितीये छेदनं पणस्य शत्यो वा दण्डः । तृतीये दक्षिणहस्तवधश्चतुश्शतो वा दण्डः । चतुर्थे यथाकामी वधः ।

पञ्चविंशतिपणावरेषु कुक्कुटनकुलमार्जारश्वसूकरस्तेयेषु हिंसायां वा चतुष्पञ्चाशत्पणो दण्डः, नासाग्रच्छेदनं वा । चण्डालारण्यचराणामर्धदण्डाः ।

पाशजालकूटावपातेषु बद्धानां मृगपशुपक्षिव्यालमत्स्यानामादाने तच्च तावच्च दण्डः ।

एकाङ्गवधनिष्क्रय इति सूत्रम् । एकाङ्गं हस्तः पादः अङ्गुलिः कर्ण इत्येवमादि तस्य वधश्छेदनम् एकाङ्गवधः तद्युक्तो निष्क्रयः तत्प्रतिनिधिर्धनदण्डः एकाङ्गवधनिष्क्रयः सोऽभिधीयत इति सूत्रार्थः । पूर्वाध्याये 'शारीरमेव दण्डं भजेत, निष्क्रयद्विगुणं वा' इत्युक्तम् । कस्मिन्नपराधे शारीरदण्डः, स कस्याङ्गस्य, कियान् वा तस्य निष्क्रय इत्येतत्तु नोक्तम् । तदिह प्रतिपाद्यत इति सङ्गतिः ।

तीर्थघातग्रन्थिभेदोर्ध्वकराणामिति । तीर्थघातः तीर्थे वस्त्राद्यपहर्ता ग्रन्थिभेदः बन्धच्छेत्ता सन्धिच्छेदको वा ऊर्ध्वकरः पुटच्छेदकः गृहोर्ध्वपटलादौ प्रवेशद्वारकृद् वा एषां त्रयाणां, प्रथमे, अपराधे, सन्दंशच्छेदनं कनिष्ठिकाङ्गुष्ठयोश्छेदनं, दण्डः । वा अथवा सन्दंशच्छेदाभावपक्षे, चतुष्पञ्चाशत्पणो दण्डः । द्वितीये अपराधे, पणस्य छेदनं पणशब्देन व्यवहारसाधनाङ्गुलिलक्षणात् सर्वाङ्गुलिच्छेदनं, शत्यो वा दण्डः शतपणो वा निष्क्रयः । तृतीये अपराधे, दक्षिणहस्तवधः, चतुश्शतो वा दण्डः निष्क्रयरूपः । चतुर्थेऽपराधे, यथाकामी वधः शुद्धश्चित्रो वा यथेच्छम् ।

पञ्चविंशतीत्यादि । पञ्चविंशतिपणावरेषु पञ्चविंशतिपणाधस्तनमूल्येषु । हिंसायां वा अर्थात् कुक्कुटादीनाम् । अर्धदण्डाः सप्तविंशतिपणात्मकाः ।

पाशजालकूटावपातेष्वित्यादि । पाशः कर्णिका जालमानायः कूटावपातः तृणादिच्छन्नो मृगपातनार्थो गर्तः इत्येतेषु । तच्च तावच्च दण्डः अपहृतं च अपहृतसममन्यच्चेति द्वितयं दण्डः ।

मृगद्रव्यवनान्मृगद्रव्यापहारे शत्यो दण्डः । बिम्बविहारमृगपक्षिस्तेये हिंसायां वा द्विगुणो दण्डः ।

कारुशिल्पिकुशीलवतपस्विनां क्षुद्रकद्रव्यापहारे शत्यो दण्डः । स्थूलकद्रव्यापहारे द्विशतः । कृषिद्रव्यापहारे च ।

दुर्गमकृतप्रवेशस्य प्रविशतः प्राकारच्छिद्राद् वा निक्षेपं गृहीत्वापसरतः कन्धरावधो, द्विशतो वा दण्डः ।

चक्रयुक्तां नावं क्षुद्रपशुं वापहरत एकपादवधः त्रिशतो वा दण्डः ।

कूटकाकण्यक्षारलाशलाकाहस्तविषमकारिण एकहस्तवधः, चतुश्शतो वा दण्डः ।

स्तेनपारदारिकयोः साचिव्यकर्मणि स्त्रियाः संगृहीतायाश्च कर्णनासाच्छेदनं, पञ्चशतो वा दण्डः । पुंसो द्विगुणः ।

महापशुमेकं दासं दासीं वापहरतः प्रेतभाण्डं वा विक्रीणानस्य द्विपादवधः, षट्छतो वा दण्डः ।

मृगद्रव्यवनादित्यादि । मृगवनात् चन्दनादिपण्यद्रव्यवनाच्च । बिम्बविहारमृगपक्षिस्तेये बिम्बो नानावर्णः कृकलासः विहारमृगः क्रीडामृगः कृष्णसारादिः विहारपक्षी शुकादिः तेषां स्तेये ।

कारुशिल्पिकुशीलवतपस्विनामित्यादि । कारुः स्थूलशिल्पकारी शिल्पी सूक्ष्मशिल्पकर्ता कुशीलवः चारणः तपस्वी तापसः एतेषाम् । कृषिद्रव्यापहारे हलादिचौर्ये ।

अननुज्ञातप्रवेशस्य दुर्गं प्रविशतः, प्राकारच्छिद्रान्निक्षेपमपहृत्यापसरत इत्यनयोः, कन्धरावधः अर्थात् पादपश्चाद्भागगतसिराद्वयच्छेदनं दण्डः द्विशतपणो वा निष्क्रय इत्याह — **दुर्गमित्यादि** ।

चक्रयुक्तामित्यादि । धनयुक्तां शस्त्रयुक्तां वा ।

कूटकाकण्यक्षारलाशलाकाहस्तविषमकारिण इत्यादि । काकण्यक्षादयो द्यूतसमाह्वये उक्ताः । कूटकाकण्यक्षादिकारिणः हस्तविषमं हस्तकौशलात् काकण्यक्षादिचारवैषम्यकरणं तत्कारिणश्च ।

स्तेनपारदारिकयोरिति । साचिव्यकर्मणि साहाय्यकरणे । स्त्रियाः संगृहीतायाश्चेति चकारात् साचिव्यकर्तुर्जनस्य च । द्विगुणः सहस्रपणः ।

महापशुमित्यादि । महापशुर्गवाश्वमहिषादिः । प्रेतभाण्डं शवमुखपट्टादिकम् । द्विपादवधः चरणद्वयच्छेदनम् ।

वर्णोत्तमानां गुरूणां च हस्तपादलङ्घने राजयानवाहनाद्यारोहणे चैकहस्तपादवधः सप्तशतो वा दण्डः ।

शूद्रस्य ब्राह्मणवादिनो देवद्रव्यमवस्तृणतो राजद्विष्टमादिशतो द्विनेत्रभेदिनश्च योगाञ्जनेनान्धत्वमष्टशतो वा दण्डः ।

चोरं पारदारिकं वा मोक्षयतो राजशासनमूनमतिरिक्तं वा लिखतः कन्यां दासीं वा सहिरण्यमपहरतः कूटव्यवहारिणो विमांसविक्रयिणश्च वामहस्तद्विपादवधो नवशतो वा दण्डः । मानुषमांसविक्रये वधः ।

देवपशुप्रतिमामनुष्यक्षेत्रगृहहिरण्यसुवर्णरत्नसस्यापहारिण उत्तमो दण्डः शुद्धवधो वा ॥

पुरुषं चापराधं च कारणं गुरुलाघवम् ।
अनुबन्धं तदात्वं च देशकालौ समीक्ष्य च ॥
उत्तमावरमध्यत्वं प्रदेष्टा दण्डकर्मणि ।
राज्ञश्च प्रकृतीनां च कल्पयेदन्तरास्थितः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
दशमोऽध्यायः एकाङ्गवधनिष्क्रयः,
आदितः सप्ताशीतितमः ॥

वर्णोत्तमानामित्यादि । हस्तपादलङ्घने हस्तेन पादेन वा ताडने । एकहस्तपादवधः एकस्य हस्तस्य पादस्य च छेदनम् ।

शूद्रस्य ब्राह्मणवादिन इति । ब्राह्मणोऽहमिति वादिनः शूद्रस्य, देवद्रव्यम् अवस्तृणतः अवच्छाद्यापहरतः, राजद्विष्टम् आदिशतः राज्ञोऽनिष्टं मरणपरचक्राक्रमणादिकं भविष्यत् कथयतो दैवज्ञादेः, द्विनेत्रभेदिनश्च, योगाञ्जनेनान्धत्वम् अन्धङ्करणौषधयुक्ताञ्जनलेपेनान्ध्यजननम् , अष्टशतो वा दण्डः निष्क्रयार्थः ।

चोरमित्यादि । मोक्षयतः बन्धनान्मोचयतः । सहिरण्यम् अपहरतः अलङ्कारेण सहितं यथा भवति तथा हरतः । कूटव्यवहारिणः धूपितरञ्जितादिकपटस्वर्णव्यवहर्तुः । विमांसविक्रयिणश्च अभक्ष्यं सृगालादिमांसं विक्रेतुश्च । वामहस्तद्विपादवधः सव्यहस्तच्छेदनं पादद्वयच्छेदनं च ।

देवेत्यादि । देवसम्बन्धिपश्वादिनवकहर्तुः, उत्तमो दण्डः । शुद्धवधो वा अक्लेशमारणं वा ।

प्रान्ते श्लोकावाह — पुरुषमित्यादि । प्रदेष्टा, राज्ञश्च, प्रकृतीनाम् अमात्यादीनां च, अन्तरास्थितः मध्यस्थः सन्, पुरुषं च, अपराधं च, कारणं च, गुरुलाघवं पुरुषादिगौरवलाघवम्, अनुबन्धम् आयतिं, तदात्वं च तत्कालफलं च, देशकालौ च, समीक्ष्य पर्यालोच्य, दण्डकर्मणि उत्तमावरमध्यत्वम् उत्तमत्वं प्रथमत्वं मध्यमत्वं च कल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
दशमोऽध्याय एकाङ्गवधनिष्क्रयः,
आदितः सप्ताशीतितमः ॥

८६. प्रक. शुद्धश्चित्रश्च दण्डकल्पः।

कलहे घ्नतः पुरुषं चित्रो घातः। सप्तरात्रस्यान्तः मृते शुद्धवधः पक्षस्यान्तरुत्तमः। मासस्यान्तः पञ्चशतः समुत्थानव्ययश्च।

शस्त्रेण प्रहरत उत्तमो दण्डः। मदेन हस्तवधः। मोहेन द्विशतः। वधे वधः।

प्रहारेण गर्भं पातयत उत्तमो दण्डः। भैषज्येन मध्यमः। परिक्लेशेन पूर्वः साहसदण्डः।

प्रसभस्त्रीपुरुषघातकाभिसारकनिग्राहकावघोषकावस्कन्दकोपवेधकान् पथिवेश्मप्रतिरोधकान् राजहस्त्यश्वरथानां हिंसकान् स्तेनान् वा शूलानारोहयेयुः।

शुद्धश्चित्रश्च दण्डकल्प इति सूत्रम्। शुद्धः अक्लेशमारणं चित्रः क्लेशमारणम् इति द्विप्रकारो दण्डविधिरुच्यत इति सूत्रार्थः। पूर्वाध्याये वधः प्रस्तुतः। स कस्मिन्नपराधे कीदृशः कर्तव्य इत्येतदिहाभिधीयते।

कलहे घ्नत इत्यादि। मृते अर्थाच्छस्त्रादिप्रहृते। समुत्थानव्ययश्च चिकित्सनादिव्ययश्च।

शस्त्रेणेति। तेन प्रहरतः, उत्तमो दण्डः। मदेन बलदर्पेण, प्रहरतः, हस्तवधः। मोहेन क्रोधेन, प्रहरतः, द्विशतः पणशतद्वयदण्डः। वधे कृते सति, वधः हन्तुः।

प्रहारेणेत्यादि। भैषज्येन औषधेन, गर्भं पातयत इति सम्बध्यते। परिक्लेशेन कृच्छ्रकर्मानुष्ठापनेन।

प्रसभेत्यादि। प्रसभस्त्रीपुरुषघातकः बलात्कारेण स्त्रियाः पुरुषस्य वा घातकः प्रसभाभिसारकः स्त्रीहठाभिसरणकर्ता प्रसभनिग्राहकः बलाज्जानपदकर्णनासादिच्छेदकर्ता अवघोषकः 'हरिष्यामि हनिष्यामी'त्येवमवघोषणकर्ता अवस्कन्दकः बलान्नगरग्रामादेर्द्रव्यापहारकः उपवेधकः भित्तिसन्धिच्छेदनेन चौर्यकर्ता इत्येतान्, पथिवेश्मप्रतिरोधकान् पान्थविश्रमशालापानीयशालयोश्चौर्यकारकान्, राजहस्त्यश्वरथानां राजसम्बन्धिनां गजाश्वसहितानां रथानां हिंसकान्, स्तेनान् वा तेषामेव चोरान् वा, शूलान् वध्यारोपणशस्त्रविशेषान् आरोहयेयुः, आरोपयेयुरिति क्वचित् पाठः।

यश्चैनान् दहेदपनयेद् वा स तमेव दण्डं लभेत, साहसमुत्तमं वा।

हिंस्रस्तेनानां भक्तवासोपकरणाग्निमन्त्रदानवैयापृत्यकर्मसूत्तमो दण्डः। परिभाषणमविज्ञाने। हिंस्रस्तेनानां पुत्रदारमसमन्त्रं विसृजेत्, समन्त्रमाददीत।

राज्यकामुकमन्तःपुरप्रधर्षकमटव्यमित्रोत्साहकं दुर्गराष्ट्रदण्डकोपकं वा शिरोहस्तप्रादीपिकं घातयेत्।

ब्राह्मणं तमः प्रवेशयेत्।

मातृपितृपुत्रभ्रात्राचार्यतपस्विघातकं त्वक्छिरःप्रादीपिकं घातयेत्। तेषामाक्रोशे जिह्वाच्छेदः। अङ्गाभिरदने तदङ्गान्मोच्यः।

यदृच्छाघाते पुंसः, पशुयूथस्तेये च शुद्धवधः। दशावरं च यूथं विद्यात्।

यश्चैनानित्यादि। एनान् शूलारोपणमारितान्।

हिंस्रस्तेनानामिति। हिंस्राणां स्तेनानां च, भक्तवासोपकरणाग्निमन्त्रदानवैयापृत्यकर्मसु भक्तदाने वासस्थानदाने उपकरणदाने अग्निदाने मन्त्रदाने वैयापृत्यकर्मणि कैङ्कर्यकरणे च, उत्तमो दण्डः। परिभाषणमविज्ञाने हिंस्रस्तेना इत्यपरिज्ञानाद् भक्तदानादौ उपालम्भः दण्डः। हिंस्रस्तेनानाम् असमन्त्रं पुत्रदारं सहमन्त्रणरहितान् पुत्रान् दारांश्च, विसृजेद् निरपराधत्वात्। समन्त्रं पुत्रदारम्, आददीत अपराधित्वेन गृहीत्वा दण्डयेत्।

राज्यकामुकमित्यादि। अटव्यमित्रोत्साहकम् अटवीचराणां पुलिन्दादीनाम् अमित्राणाम् उत्साहजनकम्। दुर्गराष्ट्रदण्डकोपकं दुर्गराष्ट्रवासिनां सेनायाश्च कोपोत्पादकम्। शिरोहस्तप्रादीपिकं घातयेत् शिरसि हस्ते च दीपितप्रदीपं कृत्वा मारयेत्।

ब्राह्मणं तमः प्रवेशयेदिति। राज्यकामुकादिश्चेद् ब्राह्मणः तं तमोगृहं प्रवेशयेदपुनर्निर्गमाय।

मातृपित्रित्यादि। त्वक्छिरःप्रादीपिकं घातयेत् त्वगग्नियोजिते शिरस्यग्निं दीपयित्वा मारयेत्। तेषामाक्रोशे मात्रादीनां निन्दने। अङ्गाभिरदने नखादिना मात्राद्यङ्गविलेखने, तदङ्गाद् मोच्यः करादिकमङ्गं यत् तेषां विलेखितं तेनाङ्गेन विलेखनकर्ता वियोज्यः।

यदृच्छया पुरुषवधे पशुयूथचौर्ये चाक्लेशमारणं दण्ड इत्याह — यदृच्छाघात इत्यादि। यूथमानमाह — दशावरमित्यादि।

x

उदकधारणं सेतुं भिन्दतस्तत्रैवाप्सु निमज्जनम्। अनुदकमुत्तमः साहसदण्डः। भग्नोत्सृष्टकं मध्यमः।

विषदायकं पुरुषं स्त्रियं च पुरुषघ्नीमपः प्रवेशयेदगर्भिणीम्। गर्भिणीं मासावरप्रजाताम्।

पतिगुरुप्रजाघातिकाम् अग्निविषदां सन्धिच्छेदिकां वा गोभिः पादयेत्।

विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपिकमग्निना दाहयेत्।

राजाक्रोशकमन्त्रभेदकयोरनिष्टप्रवृत्तिकस्य ब्राह्मणमहानसावलेहिनश्च जिह्वामुत्पाटयेत्।

प्रहरणावरणस्तेनमनायुधीयमिषुभिर्घातयेत्। आयुधीयस्योत्तमः।

उदकधारणमिति। जलं धारयन्तं, सेतुं, भिन्दतः, तत्रैव सेतौ, अप्सु निमज्जनं दण्डः। अनुदकं सेतुं, भिन्दतः, उत्तमः साहसदण्डः। भग्नोत्सृष्टकं स्वयं भग्नमसंस्कृतविसृष्टं, सेतुं भिन्दतः, मध्यमः साहसदण्डः।

विषदायकमिति। तादृशं, पुरुषं, स्त्रियं च, पुरुषघ्नीं पुरुषघातिनीम्, अपः प्रवेशयेद्, अगर्भिणीं सा चेद् गर्भिणी न भवति। **गर्भिणीं मासावरप्रजातामिति**। सा चेद् गर्भिणी, प्रसवानन्तरमेकमासेऽतीते तामप्सु प्रवेशयेत्।

पतिगुरुप्रजाघातिकामित्यादि। सन्धिच्छेदिकां सन्धिं छित्त्वा चौर्यकारिणीम्। गोभिः, पादयेत् पादाघातेन मारयेत्। 'प्रातिपदिकाद्धात्वर्थे' इत्यादिना पादशब्दात् पादाघातवृत्तेर्णिच्।

विवीतक्षेत्रेत्यादि। विवीतक्षेत्राद्यादीपनकर्तारम्।

राजाक्रोशकमन्त्रभेदकयोरिति। तयोः, अनिष्टप्रवृत्तिकस्य राजमरणाद्यनिष्टवार्ताप्रसारकस्य, ब्राह्मणमहानसावलेहिनश्च ब्राह्मणमहानसादन्नमपहृत्य भुञ्जानस्य च, जिह्वाम्, उत्पाटयेत् छिन्द्यात्।

प्रहरणावरणस्तेनमिति। आयुधस्यावरणस्य च चोरम्, अनायुधीयम् अनस्त्रजीविनम्, इषुभिः घातयेत्। आयुधीयस्योत्तमः स चेदायुधादिचोर आयुधजीवी तत्रोत्तमसाहसः।

मेढ्रफलोपघातिनस्तदेव छेदयेत् ।
जिह्वानासोपघाते सन्दंशवधः ॥
एते शास्त्रेष्वनुगताः क्लेशदण्डा महात्मनाम् ।
अक्लिष्टानां तु पापानां धर्म्यः शुद्धवधः स्मृतः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
एकादशोऽध्यायः शुद्धश्चित्रश्च दण्डकल्पः,
आदितोऽष्टाशीतितमः ॥

मेढ्रफलोपघातिन इति । लिङ्गाण्डयोः रतिसामर्थ्यभञ्जकस्य, तदेव मेढ्रफलमेव, छेदयेत् ।

जिह्वानासोपघात इति । जिह्वाया रसास्वादनशक्त्युपघाते नासाया गन्धग्रहणशक्त्युपघाते च, सन्दंशवधः कनिष्ठिकाङ्गुष्ठयोश्छेदनं दण्डः ॥

प्रान्ते श्लोकमाह — **एत** इति । एत उक्ताः क्लेशदण्डाः, महात्मनां मन्वादीनां, शास्त्रेषु, अनुगता अनुज्ञाता विहिताः । अक्लिष्टानाम् अदुष्कराणा-मल्पानामित्यर्थः, पापानां, शुद्धवधः अक्लेशदण्डः, धर्म्यः न्याय्यः, स्मृतः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
एकादशोऽध्यायः शुद्धश्चित्रश्च दण्डकल्पः,
आदितोऽष्टाशीतितमः ॥

८७. प्रक. कन्याप्रकर्म।

सवर्णामप्राप्तफलां कन्यां प्रकुर्वतो हस्तवधश्चतुश्शतो वा दण्डः। मृतायां वधः।

प्राप्तफलां प्रकुर्वतो मध्यमाप्रदेशिनीवधो द्विशतो वा दण्डः। पितुश्चावहीनं दद्यात्।

नच प्राकाम्यमकामायां लभेत। सकामायां चतुष्पञ्चाशत्पणो दण्डः, स्त्रियास्त्वर्धदण्डः।

परशुल्कावरुद्धायां हस्तवधश्चतुश्शतो वा दण्डः, शुल्कदानं च।

सप्तार्तवप्रजातां वरणादूर्ध्वमलभमानां प्रकृत्य प्राकामी स्यात्, नच पितुरवहीनं दद्यात्। ऋतुप्रतिरोधिभिः स्वाम्यादपक्रामति।

कन्याप्रकर्मेति सूत्रम्। कन्यायाः योनिक्षतेन दूषणमित्यर्थः। दण्डप्रस्तावात् तन्निमित्तो दण्डविधिरिहोच्यते।

सवर्णामित्यादि। अप्राप्तफलाम् अनुद्भिन्नपुष्पाम्। मृतायां योनिक्षतवशेन प्रमीतायां सत्याम्।

प्राप्तफलामित्यादि। मध्यमाप्रदेशिनीवधः ज्येष्ठातर्जन्योश्छेदः। पितुश्च, अवहीनं नष्टं तत्प्रार्थितं, दद्यात्।

नचेत्यादि। अकामायां कन्यायां, प्राकाम्यम् इच्छापूर्तिं, नच लभेत। अतो दण्डमात्रलाभफलं तद्रमणमित्युपदेशः। सकामायामिति। इच्छन्त्यां तस्यां, चतुष्पञ्चाशत्पणो दण्डः। स्त्रियास्तु, अर्धदण्डः सप्तविंशतिपणः।

परशुल्कावरुद्धायामिति। परशुल्कग्रहणप्रतिबद्धायां कन्यायां, हस्तवधः, चतुश्शतो वा दण्डः, अर्थात् प्रकुर्वतः। शुल्कदानं च पूर्वदत्तशुल्काय परस्मै कर्तव्यं, पक्षद्वयेऽपि।

सप्तार्तवप्रजातामिति। सप्त आर्तवानि प्रजातानि यस्यास्तां तथाभूतां, वरणादूर्ध्वम् अलभमानां कृतवरणं पुरुषं तावन्तं कालमनासादयन्तीं, प्रकृत्य, प्राकामी प्राकाम्यवान् यथेच्छभोक्ता, स्यात्। नच पितुः, अवहीनं शुल्कं, दद्यात्। कुतः, ऋतुप्रतिरोधिभिः आर्तवरूपैस्तस्करैर्निमित्तभूतैः, स्वाम्याद् अपक्रामति स्वामित्वादपैति, पिता।

त्रिवर्षप्रजातार्तवायास्तुल्यो गन्तुमदोषः । ततः परमतुल्योऽप्य-नलङ्कृतायाः । पितृद्रव्यादाने स्तेयं भजेत ।

परमुद्दिश्यान्यस्य विन्दतो द्विशतो दण्डः । नच प्राकाम्यमकामायां लभेत ।

कन्यामन्यां दर्शयित्वान्यां प्रयच्छतः शत्यो दण्डस्तुल्यायां, हीनायां द्विगुणः ।

प्रकर्मण्यकुमार्याश्चतुष्पञ्चाशत्पणो दण्डः शुल्कव्ययकर्मणी च प्रतिदद्याद् अवस्थाय । तज्जातं पश्चात् कृता द्विगुणं दद्यात् ।

अन्यशोणितोपधाने द्विशतो दण्डः, मिथ्याभिशंसिनश्च पुंसः । शुल्कव्ययकर्मणी च जीयेत । नच प्राकाम्यमकामायां लभेत ।

त्रिवर्षप्रजातार्तवाया इति । वर्षत्रयोपजातरजस्काया विषये, तुल्यो गन्तुम् अदोषः सजातीयस्तां गच्छन् निर्दोषः । ततः परं वर्षत्रयादूर्ध्वम्, अतुल्योऽपि गन्तुम् अदोषः, अनलङ्कृतायाः पितृद्रव्यरहितायाः विषये । **पितृद्रव्यादाने स्तेयं भजेतेति** । पितृद्रव्यसहितायाः ग्रहणे चौर्यदण्डं प्राप्नुयात् ।

परमुद्दिश्येत्यादि । योऽभिप्रेतः स एवाहमित्यात्मानं व्यपदिश्य तदन्यस्य कन्यां विवहतो द्विशतो दण्डः । नच कामचारमकामायां तस्यां विन्देत ।

कन्यामन्यामित्यादि । तुल्यायां सजातीयायां सत्याम् । हीनायां हीनजातीयायां सत्याम् ।

प्रकर्मण्यकुमार्या इति । अकुमार्याः दत्ताया अक्षतयोनेः क्षतयोनीकरणे, चतुष्पञ्चाशत्पणो दण्डः । शुल्कव्ययकर्मणी च पूर्वप्रतिग्रहीतृदत्तं शुल्कं तत्कृतं कर्मव्ययं च, प्रतिदद्याद्, अवस्थाय विवाहप्रतिभुवे । पश्चात् कृता द्वितीयानन्तरं तृतीयेन स्वीकृता, तज्जातं दण्डं, द्विगुणम् अष्टोत्तरशतपणं, दद्यात् ।

अन्यशोणितोपधान इति । क्षतयोनित्वप्रदर्शनार्थम् अन्यरुधिरस्य स्ववस्त्रलेपने, द्विशतो दण्डः, स्त्रियाः । मिथ्याभिशंसिनश्च पुंसः अक्षतयोनिमेव क्षतयोनिरिति मिथ्यावदतः पुरुषस्य च, द्विशतो दण्डः । शुल्कव्ययकर्मणी च जीयेत शुल्कं कर्मव्ययं च दाप्येत । **नच प्राकाम्यमित्यादि** प्रतीतम् ।

स्त्री प्रकृता सकामा समाना द्वादशपणं दण्डं दद्यात्, प्रकर्त्री द्विगुणम् । अकामायाः शत्यो दण्डः आत्मरागार्थं, शुल्कदानं च । स्वयं प्रकृता राजदास्यं गच्छेत् ।

बहिर्ग्रामस्य प्रकृतायां मिथ्याभिशंसने च द्विगुणो दण्डः ।

प्रसह्य कन्यामपहरतो द्विशतः, ससुवर्णामुत्तमः । बहूनां कन्यापहारिणां पृथग् यथोक्ता दण्डाः ।

गणिकादुहितरं प्रकुर्वतश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कं मातुर्भोगः षोडशगुणः ।

दासस्य दास्या वा दुहितरमदासीं प्रकुर्वतश्चतुर्विंशतिपणो दण्डः शुल्काबन्ध्यदानं च । निष्क्रयानुरूपां दासीं प्रकुर्वतो द्वादशपणो दण्डः वस्त्राबन्ध्यदानं च ।

साचिव्यावकाशदाने कर्तृसमो दण्डः ।

स्त्रीति । सकामा, समाना तुल्यजातीया स्त्री, प्रकृता क्षतयोनितां नीता, द्वादशपणं दण्डं दद्यात् । प्रकर्त्री तद्योनिक्षतिकर्त्री, द्विगुणं चतुर्विंशतिपणं दद्यात् । अकामायाः शत्यो दण्ड इत्यादि । अनिच्छन्त्या एव पुंसा स्वरागार्थं प्रकर्मणि कार्यमाणे, कारयितुः शत्यो दण्डः । शुल्कदानं च । स्वयं प्रकृता स्वयं कृतयोनिक्षतिः, राजदास्यं राजदासीभावं, गच्छेत् ।

बहिरिति । ग्रामस्य, बहिर्देशे विजने, प्रकृतायां सत्यां, द्विगुणः चतुर्विंशतिपणः दण्डः, स्त्रियाः । मिथ्याभिशंसने च प्रकृत न प्रकृतेति मिथ्यावादे च द्विगुणो दण्डः, पुंसः ।

प्रसह्य कन्यामित्यादि । उत्तमः साहसदण्डः । पृथक् प्रत्येकम् ।

गणिकादुहितरमिति । तां, प्रकुर्वतः, चतुष्पञ्चाशत्पणो दण्डः । शुल्कं मातुर्भोगः षोडशगुणः शुल्कं मात्रे देयम् उक्तदण्डषोडशगुणं चतुष्षष्ट्यधिकाष्टशतपणात्मकं भवति ।

दासस्य दास्या वेत्यादि । शुल्काबन्ध्यदानं च शुल्काभरणयोर्दानं च । निष्क्रयानुरूपां दास्यमोक्षणानुरूपां रूपादिमत्तया ।

साचिव्यावकाशदान इति । कन्यादूषणं प्रति साहाय्यदाने प्रदेशदाने च, कर्तृसमः दूषकदण्डतुल्यः, दण्डः ।

प्रोषितपतिकामपचरन्तीं पतिबन्धुस्तत्पुरुषो वा सङ्गृह्णीयात् । सङ्गृहीता पतिमाकाङ्क्षेत । पतिश्चेत् क्षमेत, विसृज्येतोभयम् । अक्षमायां स्त्रियाः कर्णनासाच्छेदनम् । वधं जारश्च प्राप्नुयात् ।

जारं चोर इत्यभिहरतः पञ्चशतो दण्डः । हिरण्येन मुञ्चतस्तदष्टगुणः ।

केशाकेशिकं सङ्ग्रहणम् । उपलिङ्गनाद् वा शरीरोपभोगानां, तज्जातेभ्यः, स्त्रीवचनाद् वा ।

परचक्राटवीहृतामोघप्रव्यूढामरण्येषु दुर्भिक्षे वा त्यक्तां प्रेतभावोत्सृष्टां वा परस्त्रियं निस्तारयित्वा यथासम्भाषितं समुपभुञ्जीत । जातिविशिष्टामकामामपत्यवतीं निष्क्रयेण दद्यात् ॥

प्रोषितपतिकामित्यादि । अपचरन्तीं व्यभिचरन्तीम् । तत्पुरुषः पतिभृत्यः । संगृह्णीयात् नियम्य रक्षेत् । आकाङ्क्षेत प्रतीक्षेत । उभयं विसृज्येत जारो जारिणी च न दण्ड्येत ।

जारमित्यादि । अभिहरतः व्यभिचारगोपनार्थमभिवदतः । हिरण्येन मुञ्चतस्तदष्टगुण इति । हिरण्यमुत्कोचं गृहीत्वा जारं मुञ्चतो रक्षिपुरुषस्य गृहीतहिरण्याष्टगुणो दण्डः ।

संग्रहणज्ञानोपायमाह — **केशाकेशिकं संग्रहणमिति** । परस्परकेशग्रहणपुरस्सरारब्धा कामकेलिः केशाकेशि तदेव केशाकेशिकं, तत् प्रत्यक्षदृष्टं कर्तृभूतं, संग्रहणं, बोधयतीति शेषः । उपलिङ्गनाद् वा शरीरोपभोगानां कस्तूर्याद्युपभोगलिङ्गदर्शनाद् वा, संग्रहणं जानीयात् । तज्जातेभ्यः तद्विषयेङ्गितज्ञेभ्यो जानीयात् । स्त्रीवचनाद् वा परामृष्टस्त्रीवाक्याद् वा जानीयात् ।

दण्डानर्हं परस्त्रीग्रहणप्रकारमाह — **परचक्राटवीहृतामिति** । परचक्रापहृताम् आटविकहृतां च, ओघप्रव्यूढां नदीप्रवाहनीताम्, अरण्येषु दुर्भिक्षे वा त्यक्तां, प्रेतभावोत्सृष्टां वा रोगोन्मूर्च्छनात् मृतत्वबुद्ध्या परित्यक्तां वा, परस्त्रियं, निस्तारयित्वा विपदुत्तीर्णां कृत्वा, यथासंभाषितं समुपभुञ्जीत परस्परसंविदनुरोधेन भार्याकृत्य दासीकृत्य वा सम्यग् उपभुञ्जीत । इह निस्तारयित्वेति समासाकरणमार्षम् । जातिविशिष्टां जात्युत्कर्षवतीम्, अकामां सजातित्वेऽप्यकामाम्, अपत्यवतीं, निष्क्रयेण दद्यात् निस्तरणश्रमवेतनग्रहणेन तत्स्वामिनेऽर्पयेत् ॥

चोरहस्तान्नदीवेगाद् दुर्भिक्षाद् देशविभ्रमात् ।
निस्तारयित्वा कान्ताराान्नष्टां त्यक्तां मृतेति वा ॥

भुञ्जीत स्त्रियमन्येषां यथासम्भाषितं नरः ।
न तु राजप्रतापेन प्रमुक्तां स्वजनेन वा ॥
न चोत्तमां न चाकामां पूर्वापत्यवतीं न च ।
ईदृशीं त्वनुरूपेण निष्क्रयेणापवाहयेत् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
द्वादशोऽध्यायः कन्याप्रकर्म.
आदित एकोननवतितमः ॥

अध्यायान्ते श्लोकानाह -- चोरहस्तादित्यादि । राजप्रतापेन स्वजनेन वा प्रमुक्तां राजकोपत्यक्तां स्वजनपरित्यक्तां वा । न तु भुञ्जीतेत्यत्र संबन्धनीयम् । एवं तृतीयश्लोकपूर्वार्धेऽपि न च भुञ्जीतेति योजनीयम् । ईदृशीम् उत्तमजातिम् अनिच्छन्तीं पूर्वापत्यवतीं च । अपवाहयेत् अपनाययेत् । प्रदापयेदिति क्वापि पाठः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
द्वादशोऽध्यायः कन्याप्रकर्म,
आदित एकोननवतितमः ॥

८८. प्रक. अतिचारदण्डः।

ब्राह्मणमपेयमभक्ष्यं वा सङ्ग्रासयत उत्तमो दण्डः, क्षत्रियं मध्यमः, वैश्यं पूर्वः साहसदण्डः, शूद्रं चतुष्पञ्चाशत्पणो दण्डः।

स्वयंग्रसितारो निर्विषयाः कार्याः।

परगृहाभिगमने दिवा पूर्वः साहसदण्डः, रात्रौ मध्यमः। दिवा रात्रौ वा सशस्त्रस्य प्रविशत उत्तमो दण्डः।

भिक्षुकवैदेहकौ मत्तोन्मत्तौ बलादापदि चातिसन्निकृष्टाः प्रवृत्तप्रवेशाश्चादण्ड्याः, अन्यत्र प्रतिषेधात्।

स्ववेश्मनो विरात्रादूर्ध्वं परिवार्यमारोहतः पूर्वः साहसदण्डः। परवेश्मनो मध्यमः। ग्रामारामवाटभेदिनश्च।

अतिचारदण्ड इति सूत्रम्। अतिचारस्य अभक्ष्यभक्षणागम्यागमनादेर्दण्डोऽभिधीयत इति सूत्रार्थः। चोरादिकण्टकशोधनकथनानन्तरमवशिष्टं स्वधर्मव्यतिक्रमिणां कण्टकानां शोधनमिह प्रतिपाद्यते।

ब्राह्मणमपेयमित्यादि। संग्रासयतः संग्रसमानं प्रयोजयतः। शेषं स्फुटम्।

स्वयंग्रसितार इत्यादि। विनैव परप्रेरणाम् अपेयाभक्ष्यग्रासिनः, निर्विषयाः कार्याः देशान्निष्कासयितव्याः।

परगृहाभिगमन इत्यादि। सशस्त्रस्य प्रविशतः शस्त्रसहितस्य परगृहं प्रविशतः।

भिक्षुकवैदेहकाविति। तौ, मत्तोन्मत्तौ बलात् मधुपानविकृतचित्तः विभ्रान्तचित्तश्चेत्येतौ बलात्कारेण, आपदि च आपत्समये आपन्नाश्च, अतिसन्निकृष्टाः बान्धवाः, प्रवृत्तप्रवेशाश्च सौहार्दारब्धप्रवेशाश्च, अदण्ड्याः अर्थात् परगृहं प्रविशन्तः। कदा, अन्यत्र प्रतिषेधाद् गृहजनप्रतिषेधाभावे।

स्ववेश्मन इति। स्वगृहस्य, विरात्रादूर्ध्वं रात्रियामापगमात् परतः, परिवार्यं प्राकारकुड्यादिकम्, आरोहतः, पूर्वः साहसदण्डः। परवेश्मनः, परिवार्यमारोहतो, मध्यमः। ग्रामारामवाटभेदिनश्च ग्रामवृतिमुपवनवृतिं च भित्त्वा ग्राममुपवनं च प्रविशतश्च, मध्यमः इति संबध्यते।

ग्रामेष्वन्तः सार्थिका ज्ञातसारा वसेयुः । मुषितं प्रवासितं चैषामनिर्गतं रात्रौ ग्रामस्वामी दद्यात् । ग्रामान्तेषु वा मुषितं प्रवासितं विवीताध्यक्षो दद्यात् । अविवीतानां चोररज्जुकः । तथाप्यगुप्तानां सीमावरोधविचयं दद्युः । असीमावरोधे पञ्चग्रामी दशग्रामी वा ।

दुर्बलं वेश्म शकटमनुत्तब्धमूर्धस्तम्भं शस्त्रमनपाश्रयमप्रतिच्छन्नं श्वभ्रं कूपं कूटावपातं वा कृत्वा हिंसायां दण्डपारुष्यं विद्यात् ।

वृक्षच्छेदने दम्यरश्मिहरणे चतुष्पदानामदान्तसेवने वाहने काष्ठलोष्टपाषाणदण्डबाणबाहुविक्षेपणेषु याने हस्तिना च सङ्घट्टने 'अपेहि' इति प्रक्रोशन्नदण्ड्यः ।

ग्रामेष्वन्तरित्यादि । सार्थिका वणिजो यदि ग्रामान्तर्वसेयुः, तर्हि स्ववशस्थितं सारद्रव्यं तद्ग्राममुख्यायावेद्यैव वसेयुः । मुषितं, प्रवासितं च अन्यत्र नीतं च, एषां सार्थिकानाम्, अनिर्गतं रात्रौ नक्तं ग्रामादबहिर्गतं, ग्रामस्वामी दद्यात् । ग्रामान्तेषु ग्रामसीमासु, मुषितं, प्रवासितं, द्रव्यं, विवीताध्यक्षो दद्यात् । अविवीतानां प्रदेशानां, चोररज्जुकः चोरग्रहणनियुक्तः, दद्यात् । तथाप्यगुप्तानां तेन प्रकारेणाप्यरक्षितानां, सीमावरोधविचयं दद्युः यस्य सीमायां मोषणं जातं तत्सीमास्वामी यथा विचयं कुर्यात् तथावसरं दद्युः । असीमावरोधे सीमावरोधस्याप्यभावे, पञ्चग्रामी दशग्रामी वा अर्थात् मोषणदेशनिकटवर्तिनी, दद्यात् मुष्टं प्रत्यानीय प्रतिपादयेत् ।

दुर्बलमिति । दुर्बलं जीर्णदीर्णकुड्यं, वेश्म गृहं, कृत्वा, शकटम् अनुत्तब्धमूर्धस्तम्भम् अनुद्धृतशिरःस्थूणं, कृत्वा, शस्त्रम् , अनपाश्रयम् असम्यग्बद्धोर्ध्वाधारं, कृत्वा, अप्रतिच्छन्नम् अमृत्पूरितं, श्वभ्रं गर्तं, कूपं, कूटावपातं वा कूटगर्तं वा, कृत्वा, हिंसायां, दण्डपारुष्यं तद्विहितं दण्डं, विद्यात् हिंसितुः ।

वृक्षच्छेदन इति । वृक्षस्य छेदनावसरे, दम्यरश्मिहरणे दम्यनस्यबन्धनावसरे, चतुष्पदानाम्, अदान्तसेवने वाहने अदान्तशिक्षणार्थे वाहने, काष्ठलोष्टपाषाणदण्डबाणबाहुविक्षेपणेषु कलहायमानयोरन्योन्यं प्रति काष्ठलोष्टादिप्रेरणावसरेषु, याने हस्तिना च गजमारुह्य गमनावसरे च, सङ्घट्टने छिन्नवृक्षसङ्घट्टनादितोऽङ्गभङ्गादिप्रसङ्गे, 'अपेही'ति प्रक्रोशन्, सङ्घट्टनप्राप्तेः पूर्वमेव 'अपसरापसरे'ति प्रकर्षेण क्रोशन् , अदण्ड्यः ।

हस्तिना रोषितेन हतो द्रोणान्नं कुम्भं माल्यानुलेपनं दन्तप्रमार्जनं च पटं दद्यात्। अश्वमेधावभृथस्नानेन तुल्यो हस्तिना वध इति पादप्रक्षालनम्। उदासीनवधे यातुरुत्तमो दण्डः।

शृङ्गिणा दंष्ट्रिणा वा हिंस्यमानममोक्षयतः स्वामिनः पूर्वः साहसदण्डः। प्रतिक्रुष्टस्य द्विगुणः।

शृङ्गिदंष्ट्रिभ्यामन्योन्यं घातयतस्तच्च तावच्च दण्डः।

देवपशुमृषभमुक्षाणं गोकुमारीं वा वाहयतः पञ्चशतो दण्डः। प्रवासयत उत्तमः।

लोमदोहवाहनप्रजननोपकारिणां क्षुद्रपशूनामादाने तच्च तावच्च दण्डः। प्रवासने च, अन्यत्र देवपितृकार्येभ्यः।

हस्तिना रोषितेन हत इति। गजेन तद्गमनमार्गाभिमुखशयनकोपितेन हतः, द्रोणान्नं द्रोणपरिमाणमोदनं, कुम्भं मद्यकुम्भं, माल्यानुलेपनं, दन्तप्रमार्जनं पटं च दन्तसक्तासृक्प्रमृष्टिसाधनं वस्त्रं च, दद्यात् हस्तिने। तेन हस्तिसकाशादात्मघातमिच्छता पूर्वसज्जितं द्रोणान्नादिकं तन्मरणानन्तरं तदीयो बन्धुर्दद्यादित्यर्थः। कस्मादेवं हन्ता पूज्यत इत्यत्राह — **अश्वमेधावभृथस्नानेनेति**। अश्वमेधयज्ञान्तस्नानेन, तुल्यः तुल्यपुण्यः, हस्तिना वधः इति हेतोः, पादप्रक्षालनं हस्तिनः पूजाविशेषोऽयमित्यर्थः। अरोपयितृवधे हस्त्यारोहस्योत्तमसाहसो दण्ड इत्याह — उदासीनेत्यादि।

शृङ्गिणेति। शृङ्गिणा गवादिना, दंष्ट्रिणा वा श्वादिना वा, हिंस्यमानम्, अमोक्षयतः, स्वामिनः हिंसकस्वामिनः, पूर्वः साहसदण्डः। 'हिंसन्तं वारये'-त्यप्रतिक्रुष्टस्यायं दण्डः, प्रतिक्रुष्टस्य त्वाह — **प्रतिक्रुष्टस्य द्विगुण इति**।

शृङ्गिदंष्ट्रिभ्यामिति। ताभ्याम्, अन्योन्यं शृङ्गिणा दंष्ट्रिणं दंष्ट्रिणा शृङ्गिणं च, घातयतः, तच्च तावच्च तन्मूल्यं तत्परिमाणमन्यच्च द्रव्यं, दण्डः।

देवपशुमिति। देवसम्बन्धिनं पशुम्, ऋषभम्, उक्षाणं देवगोवृन्दसेक्तारं पुङ्गवं, गोकुमारीं वा, वाहयतः हरतः, पञ्चशतो दण्डः। प्रवासयतः मारयतः, उत्तमः।

लोमदोहवाहनप्रजननोपकारिणामिति। ऊर्णादिदानोपकारिणां, क्षुद्रपशूनां मेषादीनाम्, आदाने अपहरणे, तच्च तावच्च दण्डः। प्रवासने च, तच्च तावच्च दण्डः। अन्यत्र देवपितृकार्येभ्यः, देवपितृकार्यार्थे प्रवासने तु न दोषः।

छिन्ननस्यं भग्नयुगं तिर्यक्प्रतिमुखागतं च प्रत्यासरद्वा चक्रयुक्तं यानपशुमनुष्यसम्बाधे वा हिंसायामदण्ड्यः । अन्यथा यथोक्तं मानुषप्राणिहिंसायां दण्डमभ्यावहेत् । अमानुषप्राणिवधे प्राणिदानं च ।

बाले यातरि, यानस्थः स्वामी दण्ड्यः । अस्वामिनि यानस्थः प्राप्तव्यवहारो वा याता । बालाधिष्ठितमपुरुषं वा यानं राजा हरेत् ।

कृत्याभिचाराभ्यां यत् परमापादयेत्, तदापादयितव्यः ।

कामं भार्यायामनिच्छन्त्यां कन्यायां वा दारार्थिनां भर्तरि भार्याया वा संवननकरणम् । अन्यथा हिंसायां मध्यमः साहसदण्डः ।

मातापित्रोर्भगिनीं मातुलानीमाचार्यानीं स्नुषां दुहितरं भगिनीं

छिन्ननस्यमिति । छिन्नबलीवर्दनासारज्जुकं, भग्नयुगं भग्नेषान्तदारुकं, तिर्यक्प्रतिमुखागतं च, तिर्यगागतमभिमुखागतं च, प्रत्यासरद् वा पश्चादपसरद् वा, चक्रयुक्तं शकटं, यदा भवति तदेति शेषः, यानपशुमनुष्यसम्बाधे वा ततइतो गच्छतां यानपश्वादीनां भ्रमणसंकटे वा, हिंसायां पशुमनुष्यवधसम्भवे, अदण्ड्यः शाकटिकः । अन्यथा छिन्ननस्यत्वाद्यभावे, मानुषप्राणिहिंसायां, यथोक्तं दण्डम् अभ्यावहेत् । अमानुषप्राणिवधे अजकुक्कुटादिवधे, प्राणिदानं च, कार्यम् ।

बाले यातरीति । यन्तरि अप्राप्तव्यवहारे सति, यानस्थः स्वामी दण्ड्यः, शकटनिमित्तप्राणिहिंसासम्भवे । अस्वामिनि याने, यानस्थो दण्ड्यः, प्राप्तव्यवहारो याता वा यन्ता वा दण्ड्यः । **बालाधिष्ठितमपुरुषं वेति** । बालयन्तृकं प्रधानपुरुषरहितं वा, यानं, राजा हरेत् ।

कृत्याभिचाराभ्यामिति । ताभ्यां, यद् मारणस्तम्भनादि, परम् अन्यजनम्, आपादयेत् प्रापयेत्, तद्, आपादयितव्यः अर्थात् कृत्याभिचारकारकः ।

भार्यायामनिच्छन्त्यां विषये भर्तुः संवननकरणं, कन्यायामनिच्छन्त्यां दारार्थिनां संवननकरणं, भर्तरि अनिच्छति भार्यायाः संवननकरणं चाभ्यनुजानाति — **कामं भार्यायामित्यादि** । अन्यथा उक्तातिरिक्तविषये, हिंसायां संवननादिना हिंसने, मध्यमः साहसदण्डः ।

मातापित्रोर्भगिनीमित्यादि । मातुलानीं मातुलभार्याम् । आचार्या-

त्वाधिचरतस्त्रिलिङ्गच्छेदनं वधश्च । सकामा तदेव लभेत । दासपरिचारकाहितकभुक्ता च ।

ब्राह्मण्यामगुप्तायां, क्षत्रियस्योत्तमः, सर्वस्वं वैश्यस्य । शूद्रः कटाग्निना दह्येत । सर्वत्र राजभार्यागमने कुम्भीपाकः ।

श्वपाकीगमने कृतकबन्धाङ्कः परविषयं गच्छेत्, श्वपाकत्वं वा शूद्रः । श्वपाकस्यार्यागमने वधः, स्त्रियाः कर्णनासाच्छेदनम् ।

प्रव्रजितागमने चतुर्विंशतिपणो दण्डः । सकामा तदेव लभेत ।

रूपाजीवायाः प्रसह्योपभोगे द्वादशपणो दण्डः ।

बहूनामेकामधिचरतां पृथक् चतुर्विंशतिपणो दण्डः ।

स्त्रियमयोनौ गच्छतः पूर्वः साहसदण्डः । पुरुषमधिमेहतश्च ॥

मैथुने द्वादशपणः तिर्यग्योनिष्वनात्मनः ।
दैवतप्रतिमानां च गमने द्विगुणः स्मृतः ॥
अदण्ड्यदण्डने राज्ञो दण्डस्त्रिंशद्गुणोऽम्भसि ।
वरुणाय प्रदातव्यो ब्राह्मणेभ्यस्ततः परम् ॥

नीम् आचार्यपत्नीम् । त्रिलिङ्गच्छेदनं मेढ्रमुष्कच्छेदनम् । **सकामा तदेव लभेते**ति । मातापितृभगिन्यादिः सकामा चेत् त्रिलिङ्गच्छेदनं सस्तनभगच्छेदनं, वधं च, लभेत । दासपरिचारकाहितकभुक्ता च तदेव लभेत तुल्यन्यायाद् दासादिरपि तदेव लभेत ।

ब्राह्मण्यामगुप्तायामिति । तस्यां स्वतन्त्रायां, क्षत्रियस्य गन्तुः, उत्तमः साहसदण्डः । सर्वस्वं सर्वस्वहरणं, वैश्यस्य दण्डः । शूद्रः ब्राह्मणीगन्ता, कटाग्निना दह्येत अग्निप्रदीपनेन नगरं परिगमय्य दग्धव्यः । सर्वत्र क्षत्रियादिषु सर्वेषु विषये, राजभार्यागमने, कुम्भीपाकः तप्तभ्राष्ट्रभर्जनं दण्डः ।

श्वपाकीगमन इत्यादि **पुरुषमधिमेहतश्चे**त्येतदन्तं वाक्याष्टकं सुबोधम् ॥

मैथुन इत्यादि । तिर्यग्योनिषु गवादियोनिषु । अनात्मनः दुरात्मनः । द्विगुणः चतुर्विंशतिपणः ॥

अदण्ड्यदण्डन इति । दण्डानर्हस्य दण्डने, राज्ञो दण्डः त्रिंशद्गुणः, गृहीताद् दण्डात्, स कस्मै दातव्यः, अम्भसि वरुणाय प्रदातव्यः जले वरुणमुद्दिश्य प्रक्षेप्तव्यः । ततः परं ब्राह्मणेभ्यः, प्रदातव्यः ॥

तेन तत् पूयते पापं राज्ञो दण्डापचारजम् ।
शास्ता हि वरुणो राज्ञां मिथ्या व्याचरतां नृषु ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे त्रयोदशोऽध्यायः
अतिचारदण्डः, आदितः नवतितमः ॥

एतावता कौटलीयस्यार्थशास्त्रस्य कण्टकशोधनं
चतुर्थमधिकरणं समाप्तम् ॥

तेनेति । तेन तथा प्रदानेन, राज्ञो दण्डापचारजं दण्डान्यथाप्रणयन-जनितं, तत् पापं, पूयते शोध्यते । लूयत इति पाठे छिद्यत इत्यर्थः । कस्माद् वरुणाय दानेन राजपापं पूयते, हि यस्मात् कारणाद्, वरुणः, नृषु, मिथ्या अनृतं, व्याचरतां विविधमाचरतां, राज्ञां, शास्ता शासकः । 'मिथ्या च चरताम्' इत्यपि पाठः ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
इत्थं तुर्याधिकरणं पूर्णं कण्टकशोधनम् ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-भिजनस्य श्रीसीतास्वाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्री-मूलाख्यायां कण्टकशोधने चतुर्थाधिकरणे त्रयोदशो-ऽध्यायः अतिचारदण्डः आदितो नवतितमः ॥
इति कण्टकशोधनं नाम चतुर्थ-मधिकरणं समाप्तम् ॥

योगवृत्तं — पञ्चममधिकरणम् ।

८९. प्रक. दाण्डकर्मिकम् ।

दुर्गराष्ट्रयोः कण्टकशोधनमुक्तम् । राजराज्ययोर्वक्ष्यामः ।

राजानमवगृह्योपजीविनः शत्रुसाधारणा वा ये मुख्यास्तेषु गूढपुरुषप्रणिधिः कृत्यपक्षोपग्रहो वा सिद्धिः यथोक्तं पुरस्तादुपजापोऽपसर्पो वा यथा च पारग्रामिके वक्ष्यामः ।

अथ योगवृत्ताख्यं पञ्चममधिकरणमारभ्यते । योगानां सत्रितीक्ष्णरसदादीनां वृत्तमनुष्ठानं योगवृत्तं तत्प्रतिपादकत्वादस्याधिकरणस्य **योगवृत्तमिति** संज्ञा । यद्यपीदं दाण्डकर्मिकप्रकरणात्मना पर्यवस्यति, तथाप्या समाप्तेर्योगवृत्तस्य प्रतिपादनात् तत्प्राधान्यादस्याधिकरणस्य हस्तिवनवद् योगवृत्तव्यपदेशः । दण्डकर्मप्रतिपादकत्वसामान्येऽपि च नेदं पूर्वाधिकरणे प्रवेशितं, किन्तु तस्मात् पृथक्कृतं कर्तृभेदात् कण्टकभेदादुपायभेदाच्छोधनीयभेदाच्च । कण्टकशोधने हि प्रदेष्टृप्रभृतयः कर्तारः, कारुकवैदेहकादयः कण्टकाः, शङ्कारूपकर्माभिग्रहशुद्धचित्रवधादय उपायाः, दुर्गराष्ट्रे च शोधनीये । अत्र तु गूढपुरुषसहितो राजा कर्ता, राजावग्रहोपजीविनः राष्ट्रमुख्यादयः कण्टकाः, उपांशुदण्ड उपायः, नृपतिरमात्याश्च शोधनीया इति ।

अत्र प्रथमं सूत्रं — **दाण्डकर्मिकमिति** । दण्ड उपांशुवधः तस्य कर्म प्रयोगो दण्डकर्म तदधिकृत्य प्रवृत्तमिति सूत्रार्थः । पूर्वस्मिन् प्रकरणे शुद्धचित्रवधादयः प्रकाशदण्डा विभज्य दर्शिताः, तत्प्रयोगाविषये अवश्यशोधने च प्रयोक्तव्यस्तूष्णीन्दण्ड इहाभिधीयत इति प्रकरणसङ्गतिः ।

अधिकरणसङ्गतिं सूचयन् प्रकरणार्थं वक्तुमारभते — **दुर्गराष्ट्रयोरित्यादि** । दुर्गं स्थानीयादि राष्ट्रं जनपदादि तयोः, कण्टकशोधनम् उक्तं, गतेऽधिकरणे । राजराज्ययोः राजा स्वामी राज्यममात्यादि तयोः, चण्टकशोधनं, वक्ष्यामः, अस्मिन्नधिकरणे ।

तत्रादौ राजकण्टकान् प्रस्तौति — **राजानमिति** । तम्, अवगृह्य अधःकृत्य, उपजीविनः, शत्रुसाधारणा वा उभयवेतनाश्च, ये मुख्याः मन्त्रिपुरोहितसेनापतियुवराजादयः प्रधानपुरुषाः, तेषु गूढपुरुषप्रणिधिः गूढपुरुष-

राज्योपघातिनस्तु वल्लभाः संहता वा ये मुख्याः प्रकाशमशक्याः प्रतिषेद्धुं दूष्याः, तेषु धर्मरुचिरुपांशुदण्डं प्रयुञ्जीत ।

दूष्यमहामात्रभ्रातरं सत्कृतं सत्री प्रोत्साह्य राजानं दर्शयेत् । तं राजा दूष्यद्रव्योपभोगातिसर्गेण दूष्ये विक्रमयेत् । शस्त्रेण रसेन वा विक्रान्तं तत्रैव घातयेत्, भ्रातृघातकोऽयम् इति ।

तेन पारशवः परिचारिकापुत्रश्च व्याख्यातौ ।

प्रणिधानं, सिद्धिः छेदः—शत्रूच्छेदहेतुत्वात् सिद्धिरित्याख्यायते, कृत्यपक्षोपग्रहो वा कृत्याः शत्रोः क्रुद्धलुब्धभीतादयस्तेषां स्वीकारश्च, सिद्धिः शत्रूच्छेदहेतुत्वात् । तत्स्वीकारः कथं कर्तव्यः, यथोक्तं पुरस्तात् पूर्वं गूढपुरुषप्रणिध्युक्तेन प्रकारेण कर्तव्यः । कोऽसौ, उपजापोऽपसर्पो वा । यथा च पारग्रामिके वक्ष्याम इति । दुर्गलम्भाधिकरणीयपारग्रामिकप्रस्तावे उपजापापसर्पप्रणिधिप्रकरणयोर्यं प्रकारं वक्ष्यामस्तेन च प्रकारेणोपजापोऽपसर्पो वा कर्तव्यः ।

राज्योपघातिन आह — **राज्योपघातिनस्त्विति** । राज्योपहन्तारः, वल्लभाः अध्यक्षाः, संहता वा मुख्याः संहत्यकृतैकमत्यसंकेता अमात्यादयः प्रधानपुरुषाश्च, ये, प्रकाशमशक्याः प्रतिषेद्धुं राज्योपघातकप्रवृत्तेः साक्षाद् वारयितुमशक्याः, अत एव दूष्याः कथमप्युपहन्तव्याः भवन्ति, तेषु धर्मरुचिः उपघातकपरिहारेण राज्यक्षेमचिकीर्षुः, उपांशुदण्डं तूष्णींदण्डं, प्रयुञ्जीत ।

उपांशुदण्डप्रयोगप्रकारमाह — **दूष्यमहामात्रभ्रातरमित्यादि** । दूषणीयस्य हस्त्यारोहाध्यक्षस्य भ्रातरमलब्धदायांशं सत्कारपूर्वं सत्री स्वभ्रातृसकाशाद् भेदयित्वा, 'कण्टकशोधनाधिकारं ते राजा दास्यती'ति प्रोत्साह्य राजानं दर्शयेत् । **तमिति** । तथा दर्शितं, दूष्यद्रव्योपभोगातिसर्गेण दूष्यनिग्रहार्थशस्त्रभटाद्युपकरणद्रव्यदानेन, दूष्ये, विक्रमयेद् विक्रमाय प्रेरयेत् । शस्त्रेण, रसेन वा, विक्रान्तं भ्रातरि प्रयुक्तविक्रमं तं, तत्रैव तस्मिन्नेवापराधे निमित्ते, भ्रातृघातकोऽयमिति प्रख्याप्येति शेषः, घातयेत् ।

तेन पारशव इत्यादि । उक्तेन प्रकारेण महामात्रस्यावरवर्णापुत्रं परिचारिकापुत्रं च प्रोत्साहितानीतं दूष्यद्रव्योपभोगातिसर्गेण पितरि विक्रान्तं कृत्वा पितृघातकोऽयमिति प्रख्याप्य घातयेदित्यर्थः ।

दूष्यं महामात्रं वा सत्रिप्रोत्साहितो भ्राता दायं याचेत। तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात्—हतोऽयं दायकामुकः इति । ततो हतपक्षं परिगृह्येतरं निगृह्णीयात् ।

दूष्यसमीपस्थां वा सत्रिणो भ्रातरं दायं याचमानं घातेन परिभर्त्सयेयुः । तं रात्राविति समानम् ।

दूष्यमहामात्रयोर्वा यः पुत्रः पितुः, पिता वा पुत्रस्य दारानधिचरति भ्राता वा भ्रातुस्तयोः कापटिकमुखः कलहः पूर्वेण व्याख्यातः ।

दूष्यमहामात्रपुत्रमात्मसम्भावितं वा सत्री—'राजपुत्रस्त्वं शत्रुभयादिह न्यस्तोऽसि' इत्युपचरेत् । प्रतिपन्नं राजा रहसि पूजयेत्—प्राप्तयौवराज्यकालं त्वां महामात्रभयान्नाभिषिञ्चामि इति । तं सत्री

प्रकारान्तरमाह —दूष्यं महामात्रं वेत्यादि । अन्यत्र वा दूष्यगृहप्रतिद्वारातिरिक्तप्रदेशे वा । तीक्ष्णः हिंस्राचारश्चारभेदो गूढपुरुषप्रणिध्युक्तः । हतपक्षं परिगृह्य हतस्य बन्धून् पुत्रमातुलादीन् आनाय्य । इतरं निगृह्णीयात् महामात्रं घातयेद् भ्रातृघातक इति ख्यापयन् ।

प्रकारान्तरमाह — दूष्येत्यादि । दूष्यसमीपस्थाः दूष्यसेवकलिङ्गाः । घातेन परिभर्त्सयेयुः 'दायमुपेक्षस्व अन्यथा त्वां हनिष्याम' इति वादेनोद्वेजयेयुः । तं रात्राविति समानमिति । 'तं रात्रौ दूष्यगृहप्रतिद्वारि उपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात् — हतोऽयं दायकामुक इति, ततो हतपक्षं परिगृह्य महामात्रं निगृह्णीयादि'त्येतत् पूर्वोक्तमिहापि तुल्यं द्रष्टव्यमित्यर्थः ।

दूष्यमहामात्रयोर्वेति । दूष्यस्य महामात्रस्य वा, यः पुत्रः पितुर्दारान् अधिचरति अधिगच्छति, पिता वा पुत्रस्य दारान् अधिगच्छति, भ्राता वा भ्रातुर्दारान् अधिगच्छति, तयोः पितापुत्रयोर्भ्रात्रोर्वा, कापटिकमुखः कलहः कापटिकाख्यचारप्रणिधानद्वारकः कलहः, पूर्वेण पूर्वोक्तेन प्रकारेण, व्याख्यातः । तत्रान्यतरेणान्यतरस्य वधे कृते शेषवधः प्राग्वद् द्रष्टव्य इत्यर्थः ।

प्रकारान्तरमाह — दूष्यमहामात्रपुत्रमित्यादि । दूष्यस्य महामात्रस्य च पुत्रम् , आत्मसम्भावितं शौर्यौदार्यादिगुणसम्पन्नम्मन्यं, सत्री उपचरेत् , कथमिति, 'राजपुत्रस्त्वं शत्रुभयाद् इह महामात्रे न्यस्तोऽसी'ति । प्रतिपन्नं सत्रिवचनमङ्गीकृत्यागतं, राजा रहसि पूजयेत् , किमित्युक्त्वा, 'प्राप्त-

महामात्रवधे योजयेत् । विक्रान्तं तत्रैव घातयेत् — पितृघातकोऽयम् इति ।

भिक्षुकी वा दूष्यभार्यां सांवननिकीभिरोषधीभिः संवास्य रसेनातिसन्दध्यात् । इत्याप्यप्रयोगः ।

दूष्यमहामात्रमटवीं परग्रामं वा हन्तुं, कान्तारव्यवहिते वा देशे राष्ट्रपालमन्तपालं वा स्थापयितुं, नागरस्थानं वा कुपितमवग्रहीतुं, सार्थातिवाह्यं प्रत्यन्ते वा सप्रत्यादेयमादातुं फल्गु बलं तीक्ष्णयुक्तं प्रेषयेत् । रात्रौ दिवा वा युद्धे प्रवृत्ते तीक्ष्णाः प्रतिरोधकव्यञ्जना वा हन्युः — अभियोगे हतः इति ।

यौवराज्यकालं त्वां, महामात्रभयात् महामात्रो राज्यकामुकस्त्वामभिषिक्तं सद्यो हन्यादिति शङ्कया, नाभिषिञ्चामी'त्युक्त्वा । तं राजकृतोपजापप्रवणं, सत्री, महामात्रवधे, योजयेत् । विक्रान्तं हतपितृकं, तत्रैव तस्मिन्नेव निमित्ते, घातयेद् राजा पितृघातकोऽयमिति ख्यापयन्निति शेषः । हतेऽपि दूष्ये हन्तुर्वधोऽयमुपदिश्यते स कालान्तरे भूतार्थवेदी भूत्वा शत्रुर्मा भूदित्येतदर्थम् ।

भिक्षुकी वेति । सा वा, चारभूता, दूष्यभार्यां दूष्यस्य महामात्रादेर्भार्यां मन्दसौन्दर्यां, सांवननिकीभिः संवननफलाभिः, ओषधीभिः, निमित्तभूताभिः, स्वगततथाविधौषधिप्रयोगनिपुणताख्यानेनेत्यर्थः । संवास्य आत्मपरिचयं कारयित्वा, रसेन विषेण, अतिसन्दध्यात् वञ्चयेत्, संवननौषधव्याजेन विषं भार्याद्वारा ग्रासयित्वा दूष्यं हन्यादित्यर्थः । **इत्याप्यप्रयोग** इति । एवं क्रियमाणमतिसन्धानम् आप्यप्रयोग इत्याख्यायते ।

दूष्यमहामात्रमिति । दूष्यं महामात्रम्, अटवीम् अटवीपालं, परग्रामं वा पारग्रामिकान् वा, हन्तुं, कान्तारव्यवहिते वा देशे दुर्गमारण्यान्तरिते देशे वा, राष्ट्रपालं स्थापयितुम्, अन्तपालं वा स्थापयितुं, नागरस्थानं वा, कुपितम्, अवग्रहीतुं नियन्तुं, प्रत्यन्ते वा परराष्ट्रसन्धौ वा, सार्थातिवाह्यं सार्थातिवाहनयोग्यं स्थलं, सप्रत्यादेयं प्रत्यादेयं परेण पूर्वं गृहीतं पुनः प्रतिग्रहीतव्यं स्थलं तत्सहितम्, आदातुं, फल्गु बलम् अल्पं सैन्यं, तीक्ष्णयुक्तं तीक्ष्णैरुपेतं, प्रेषयेत् । रात्रौ दिवा वा युद्धे प्रवृत्ते, तीक्ष्णाः प्रतिरोधकव्यञ्जनाः चोरवेषास्तीक्ष्णाः, हन्युः, अभियोगे युद्धे हत इति ख्यापयन्तः । अर्थात् पूर्वोक्तं हन्तव्यं जनम् । वाशब्दः प्रकारविकल्पे ।

यात्राविहारगतो वा दूष्यमहामात्रान् दर्शनायाह्वयेत् । ते गूढ-शस्त्रैस्तीक्ष्णैः सह प्रविष्टा मध्यमकक्ष्यायामात्मविचयमन्तःप्रवेशनार्थं दद्युः । ततो दौवारिकाभिगृहीतास्तीक्ष्णा 'दूष्यप्रयुक्ताः स्मः' इति ब्रूयुः । ते तदभिविख्याप्य दूष्यान् हन्युः । तीक्ष्णस्थाने चान्ये वध्याः ।

बहिर्विहारगतो वा दूष्यान् आसन्नावासान् पूजयेत् । तेषां देवीव्यञ्जना वा दुःस्त्री रात्रावावासेषु गृह्येतेति समानं पूर्वेण ।

दूष्यमहामात्रं वा 'सूदो भक्षकारो वा ते शोभनः' इति स्तवेन भक्षभोज्यं याचेत, बहिर्वा क्वचिदध्वगतः पानीयम् । तदुभयं रसेन योजयित्वा प्रतिस्वादने तावेवोपयोजयेत् । तदभिविख्याप्य 'रसदा-वि'ति घातयेत् ।

उपायान्तरमाह—यात्राविहारगतो वेत्यादि । अयमर्थः—राजकुल-मशस्त्रेण प्रवेष्टव्यमित्याघोषणे स्थिते जातु प्रस्तुतयात्राविहारो दूष्यमहामात्रान् राजा दर्शनायाह्वयेत् । तैः सह राजकुलं निगूढशस्त्रास्तीक्ष्णाः राजदत्तपूर्व-संकेताः प्रविश्य प्रथमद्वारमतीत्य द्वितीयकक्ष्याद्वारं गताः द्वाराधिकृतैः सश-स्त्राशस्त्रपरीक्षणं कुर्वद्भिः 'कुतो यूयं सशस्त्राः' इति पृष्टाः 'नृपतिवधाय महा-मात्रेण प्रेरिता वयम्' इति वदेयुः । ततस्तं दोषं प्रख्याप्य महामात्रान् राजा घातयेत्, तीक्ष्णानां स्थाने चान्यांस्तीक्ष्णापदेशेन घातयेदिति ।

बहिरित्यादि । बहिर्विहारगतः दुर्गबाह्यग्रामनगरादिदर्शनार्थं गतः, दूष्यान्, आसन्नावासान् राजवासस्थानाभ्यर्णस्थानवासिनः, पूजयेत् पौनः-पुनिकसन्दर्शनसम्भाषणसम्भोजनादिना सत्कुर्यात् स्नेहख्यापनार्थम् । स्नेह-ख्यापनं तु वक्ष्यमाणो वधप्रयोगः पारमार्थिकमहापराधनिमित्तो न द्वेषनिमित्त इति लोकप्रत्ययार्थम् । तेषां देवीव्यञ्जना वा दुःस्त्री रात्रावावासेषु गृह्ये-तेति । पुंश्चलीं काञ्चिद् राजभार्याव्यञ्जनां कृत्वा रात्रौ दूष्याणामावासेषु संप्रेष्य स्वगृहादर्शनसंरम्भाभिनयेन स्वनिवासासन्नगृहेषु सपदि स्वभटैः कारितान्वेषणां कृत्वा दूष्यगृहाद् राजा ग्राहयेत् । इति समानं पूर्वेणेति । एवमादि पूर्वो-क्तेन तुल्यं, तच्च — तमिमं देवीकामुकत्वदोषं ख्यापयन् दूष्यान् घातयेदि-त्येवंरूपम् ।

प्रकारमन्यमाह —दूष्यमहामात्रमित्यादि । शोभनः सुष्ठुकारी । या-चेत राजा । बहिर्वा मृगयाप्रदेशे वा । तदुभयं रसेन योजयित्वा महामात्रदत्तं

अभिचारशीलं वा सिद्धव्यञ्जनो गोधाकूर्मकर्कटकूटानां लक्षण्यानामन्यतमप्राशनेन मनोरथानवाप्स्यसीति ग्राहयेत् । प्रतिपन्नं कर्मणि रसेन लोहमुसलैर्वा घातयेत् कर्मव्यापदा हत इति ।

चिकित्सकव्यञ्जनो वा दौरात्मिकमसाध्यं वा व्याधिं दूष्यस्य स्थापयित्वा भैषज्याहारयोगेषु रसेनातिसन्दध्यात् ।

सूदारालिकव्यञ्जना वा प्रणिहिता दूष्यं रसेनातिसन्दध्युः ।

इत्युपनिषत्प्रतिषेधः ।

उभयदूष्यप्रतिषेधस्तु । यत्र दूष्यः प्रतिषेद्धव्यस्तत्र दूष्यमेव फल्गुबलतीक्ष्णयुक्तं प्रेषयेत्—गच्छामुष्मिन् दुर्गे राष्ट्रे वा सैन्यमुत्था-

---

भक्ष्यभोज्यं विषेण योजयित्वा पानीयं च विषेण योजयित्वा प्रतिस्वादने अग्रग्रसने । तावेव भक्षभोज्यदायिनं पानीयदायिनं च । रसदौ अर्थात् भक्ष्यभोज्यदापकः पानीयदापकश्चेत्येतौ ।

अभिचारशीलदूष्यनिग्रहोपायमाह—**अभिचारशीलं** वेत्यादि । तथाविधं दूष्यं, सिद्धव्यञ्जनः, गोधाकूर्मकर्कटककूटानां गोधा निहाका कूर्मकर्कटकौ प्रसिद्धौ कूटो भग्नशृङ्गमृगः इत्येतेषां, लक्षण्यानां लक्षणयुक्तानाम्, अन्यतमप्राशनेन अन्यतमस्य श्मशानाग्निहुतावशिष्टस्य भक्षणेन, मनोरथान्, अवाप्स्यसि, इति ग्राहयेत् बोधयेत् । प्रतिपन्नं तथेति कृताभ्युपगमं, कर्मणि तथाविधहोमे वर्तमाने, रसेन विषप्राशनेन, लोहमुसलैर्वा, घातयेत् । कर्मव्यापदा हत इति कर्मवैगुण्येन पिशाचादिना हत इति ख्यापयन् ।

चिकित्सकव्यञ्जनो वेति । दौरात्मिकं दुर्वृत्तकृतम्, असाध्यम् अप्रतिकार्यं वा, व्याधिं दूष्यस्य स्थापयित्वा, भैषज्याहारयोगेषु औषधाभ्यवहारप्रयोगेषु, रसेन विषेण, अतिसन्दध्यात् मारयेत् ।

सूदारालिकव्यञ्जना वेति । सूदो मांसपाचकः आरालिकस्तण्डुलादिपाचकः तद्व्यञ्जनाः, प्रणिहिताः, दूष्यं रसेन अतिसन्दध्युः । **इत्युपनिषत्प्रतिषेध** इति । एवम्प्रकार उपनिषदुक्तो दूष्यनिग्रहः ।

उभयदूष्यप्रतिषेधस्त्विति । उभयोर्दूष्यपक्षयोर्निग्रह एकेन यत्नेन यथा सिध्येत्, तथा कश्चित् प्रकार उच्यत इत्यर्थः । **यत्रे**ति । यस्मिन् प्रदेशे, दूष्यः, प्रतिषेद्धव्यो निग्राह्यः, वसतीति शेषः, तत्र दूष्यमेवान्यं फल्गुबलतीक्ष्णयुक्तम् अल्पसैन्येन तीक्ष्णेन च युक्तं, प्रेषयेत् । किं कृत्वेत्याह—**गच्छामु-**

पय हिरण्यं वा, वल्लभाद् वा हिरण्यमाहारय, वल्लभकन्यां वा प्रसह्यानय । दुर्गसेतुवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मणामन्यतमं वा कारय, राष्ट्रपाल्यमन्तपाल्यं वा । यश्च त्वा प्रतिषेधयेन्न वा ते साहाय्यं दद्यात् स बन्धव्यः स्यात् इति । तथैव इतरेषां प्रेषयेत् 'अमुष्याविनयः प्रतिषेद्धव्यः' इति । तमेतेषु कलहस्थानेषु कर्मप्रतिघातेषु वा विवदमानं तीक्ष्णाः शस्त्रं पातयित्वा प्रच्छन्नं हन्युः । तेन दोषेणेतरे नियन्तव्याः ।

पुराणां ग्रामाणां कुलानां वा दूष्याणां सीमाक्षेत्रखलवेश्ममर्यादासु द्रव्योपकरणसस्यवाहनहिंसासु प्रेक्षाकृत्योत्सवेषु वा समुत्पन्ने कलहे तीक्ष्णैरुत्पादिते वा तीक्ष्णाः शस्त्रं पातयित्वा ब्रूयुः — एवं क्रियन्ते येऽमुना कलहायन्ते इति । तेन दोषेणेतरे नियन्तव्याः ।

ष्मिन्नित्यादि । इतीत्यनन्तरम् उक्त्वेति शेषः । सैन्यमुत्थापय सेनासमवाययोग्यं जनं संगृह्णीष्व । वल्लभाद् अध्यक्षात् । दुर्गसेतुवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मणां दुर्गसेतुवणिक्पथकर्माणि प्रतीतानि शून्यनिवेशकर्म जाङ्गले नवगृहादिसन्निवेशनकर्म खनिकर्म आकरकर्म द्रव्यवनकर्म दार्वादिवनकर्म हस्तिवनकर्म हस्तिवनाध्यक्षकर्म तेषाम् । राष्ट्रपाल्यं राष्ट्रपालकर्म । अन्तपाल्यम् अन्तपालकर्म । आन्तपाल्यमिति पठितुं युक्तम् । बन्धव्यः बद्ध्वा नेतव्यः । **तथैवेतरेषां प्रेषयेदि**त्यादि । पूर्वोक्तो यत्र प्रेष्यते तत्रत्यानामपि 'अमुष्य प्रेष्यमाणस्योन्मर्यादाः प्रवृत्तयो वार्यन्ताम्' इति वाचिकं धैर्यप्रदं प्रेषयेत् । **तमेतेष्वि**त्यादि । एतेषु सैन्यहिरण्योत्थापनादिषु कलहकारणेषु सन्दिष्टदूष्यपुरुषारब्धेषु कर्मविघ्नेषु वा विसंवादिनं पूर्वदूष्यं तीक्ष्णाः शस्त्रप्रयोगेण रहसि हन्युः । तं च नियुक्तराजपुरुषघातापराधं सन्दिष्टदूष्येष्वारोप्य तेऽपि हन्तव्याः ।

पुराणामित्यादि । पुरग्रामकुलानां दूष्याणां च पुरादिसन्धिक्षेत्रखलवेश्मसीमाविषये हिरण्यवस्त्रसस्ययानोपघातविषये नृत्तदर्शनविवाहाद्युत्सवसम्बद्धे च कलहे सञ्जाते तीक्ष्णनिष्पादिते वा तथाविधे कलहे तीक्ष्णाः प्रच्छन्नं कांश्चिद् दूष्यान् शस्त्रेण हत्वा तदन्येषु दूष्येषु तं घातदोषं नामनिर्देशपूर्वमारोपयेयुः — 'अमुनामुना सह कलहायमानानां गतिरीदृशी'ति प्रवदन्तः । तद्दोषापदेशेन च तान् दूष्यान् राजा दण्डयेत् ।

येषां वा दूष्याणां जातमूलाः कलहाः तेषां क्षेत्रखलवेश्मान्यादीपयित्वा बन्धुसम्बन्धिषु वाहनेषु वा तीक्ष्णाः शस्त्रं पातयित्वा तथैव ब्रूयुः—अमुना प्रयुक्ताः स्मः इति । तेन दोषेणेतरे नियन्तव्याः ।

दुर्गराष्ट्रदूष्यान् वा सत्रिणः परस्परस्यावेशनिकान् कारयेयुः । तत्र रसदा रसं दद्युः, तेन दोषेणेतरे नियन्तव्याः ।

भिक्षुकी वा दूष्यराष्ट्रमुख्यं दूष्यराष्ट्रमुख्यस्य भार्या स्नुषा दुहिता वा कामयत इत्युपजपेत् । प्रतिपन्नस्याभरणमादाय स्वामिने दर्शयेत्—असौ ते मुख्यो यौवनोत्सिक्तो भार्यां स्नुषां दुहितरं वाभिमन्यते इति । तयोः कलहो रात्रौ । इति समानम् ।

दूष्यदण्डोपनतेषु तु युवराजः सेनापतिर्वा किञ्चिदपकृत्यापक्रान्तो विक्रमत । ततो राजा दूष्यदण्डोपनतानेव प्रेषयेत् फल्गुबल-

---

येषां वा दूष्याणां जातमूलाः कलहा इत्यादि । कलहमूलभूतानां दूष्याणां क्षेत्रखलवेश्मानि तीक्ष्णा वह्निना सन्दीप्य बन्धून् सम्बन्धिनो वाहनानि वा शस्त्रेण हत्वा प्रागुक्तरीत्या तं दोषमन्येषु दूष्येषु नामनिर्देशपूर्वमारोपयेयुः—'अमुनामुना सह कलहायमानानां गतिरीदृशी, वयं ह्यमुनामुना प्रयुक्ता एवमकार्ष्मे'ति । तद्दोषापदेशेन च तान् दूष्यान् राजा दण्डयेत् । तीक्ष्णदण्डस्तु 'तीक्ष्णस्थाने चान्ये वध्या' इत्युक्तदिशार्थात् सिद्ध इत्यत्र नोक्तः ।

दुर्गराष्ट्रदूष्यान् वेत्यादि । दुर्गराष्ट्रवास्तव्यान् परस्परवैरिणो दूष्यान् सन्धिकरणेन परस्परं सङ्गमय्य सत्रिपुरुषाः परस्परगृहातिथीन् कारयेयुः । भोजनप्रसङ्गे च विषं दापयित्वा दूष्यान् घातयेयुः । घातितानां प्रतिपक्षांस्तु दूष्यांस्तेनैव रसदानदोषेण राजा नियमयेत् ।

भिक्षुकी वेत्यादि । भिक्षुकी, दूष्यराष्ट्रमुख्यं दूष्यराष्ट्रमुख्यस्यान्यस्य, भार्या स्नुषा दुहिता वा कामयत इति, उपजपेत् मिथ्याबोधनं कुर्यात् । प्रतिपन्नस्य अङ्गीकृततदुपजापस्य दूष्यस्य आभरणम् अभिगन्तव्यस्त्रीसत्कारार्थत्वापदेशेन गृहीत्वा स्त्रीसम्बन्धिने दूष्यराष्ट्रमुख्याय दर्शयेत्—अमुकनामा मुख्यो यौवनदृप्तस्त्वदीयां कामयत इति वदन्ती । ततो रात्रौ तया स्त्रीगृहमानीते कामुके तस्य स्त्रीबन्धोश्च कलहः प्रवर्त्येत । कामुके च हते तेनापराधेन कामुकघातकं दूष्यं हन्यात् ।

दूष्यदण्डोपनतेषु त्विति । दण्डोपनता बलतोऽधःकृताः दण्डोपनतवृत्तप्रकरणवक्ष्यमाणचरितास्तेषु दूष्यभूतेषु विषये, युवराजः, सेनापतिर्वा,

तीक्ष्णयुक्तानिति समानाः सर्वे एव योगाः । तेषां च पुत्रेष्वनुक्षिपत्सु यो निर्विकारः स पितृदायं लभेत । एवमस्य पुत्रपौत्राननुवर्तते राज्यमपास्तपुरुषदोषमिति ॥

स्वपक्षे परपक्षे वा तूष्णीन्दण्डं प्रयोजयेत् ।
आयत्यां च तदात्वे च क्षमावानविशङ्कितः ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
प्रथमोऽध्यायः दाण्डकर्मिकम्,
आदित एकनवतितमः ॥

किञ्चिदपकृत्य तज्जनपदोपघातमल्पं कृत्वा, अपक्रान्तो विक्रमेत अनत्याक्रामन् विक्रमं दर्शयेत् । ततः तदनु, राजा, दूष्यदण्डोपनतानेव अन्यान्, फल्गुबलतीक्ष्णयुक्तान् प्रेषयेत् । अर्थाद् दूष्यैः सह संवित्करणार्थम् । इति सर्वे एव योगाः एवम्प्रायाः सर्वेऽभ्युपायाः, समानाः पूर्वोक्ततुल्याः । संविन्निमित्तकलहप्रवर्तना, तीक्ष्णैर्दूष्याणां राजप्रेषितानां प्रच्छन्नवधः, तस्य सन्धेयदूष्यकृतत्वख्यापनं, तेन निमित्तेन तेषां निग्रहणमित्येवञ्जातीयमूहनीयमित्यभिप्रायः । **तेषां चेति** । तथा मारितानां दूष्याणां, पुत्रेषु, अनुक्षिपत्सु निन्दत्सु मध्ये, यो निर्विकारः द्रोहचिन्तनरहितः, सः पितृदायं लभेत अर्थाद् दूष्योद्धर्तुस्तद्राज्यप्रभविष्णुतां प्राप्तस्य राज्ञ इच्छया । न केवलं पुत्रः तत्पुत्रपौत्रपरम्परापि निर्विकारतायामेव राज्यं लभेतेत्याह— **एवमस्येत्यादि** । अपास्तपुरुषदोषमिति क्रियाविशेषणम् । पुरुषदोषः पुरुषस्य सविकारत्वम् । तद्योगे तु राज्यं स्ववशे स्थापयेत् प्रभविष्णुरित्यर्थः । इतिशब्दः प्रकरणसमाप्तौ ॥

अध्यायान्ते श्लोकमाह — **स्वपक्षे परपक्षे वेत्यादि** । सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
प्रथमोऽध्यायः दाण्डकर्मिकम्,
आदित एकनवतितमः ॥

---

९०. प्रक. कोशाभिसंहरणम्।

कोशमकोशः प्रत्युत्पन्नार्थकृच्छ्रः सङ्गृह्णीयात्।

जनपदं महान्तमल्पप्रमाणं वा देवमातृकं प्रभूतधान्यं धान्यस्यांशं तृतीयं चतुर्थं वा याचेत, यथासारं मध्यमवरं वा।

दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मोपकारिणं प्रत्यन्तमल्पप्रमाणं वा न याचेत।

धान्यपशुहिरण्यादि निविशमानाय दद्यात्। चतुर्थमंशं धान्यानां बीजभक्तशुद्धं च हिरण्येन क्रीणीयात्।

कोशाभिसंहरणमिति सूत्रम्। कोशस्य सुवर्णादेर्धान्यादेश्च अभिसंहरणं क्लृप्तादभ्यधिकतया संग्रहणम् अर्थनिस्तरणीयकृच्छ्रप्राप्त्यवसरेषु राज्ञा क्रियमाणं कोशाभिसंहरणं, तदिह प्रतिपाद्यत इति सूत्रार्थः। कण्टकशोधने दुर्गराष्ट्रगतकण्टकानां शोधनप्रकार उक्तः। अत्र तु राजा स्वगतस्य कण्टकत्वस्य शोधनं कथमनुतिष्ठेदित्येतदुपदिश्यते।

कोशमिति। तम्, अकोशः अल्पकोशः, प्रत्युत्पन्नार्थकृच्छ्रः प्रत्युत्पन्नमतर्कितोपनतम् अर्थकृच्छ्रम् अर्थचिकित्सनीयः क्लेशो यस्य स तथाभूतः, संगृह्णीयात् अर्थसंग्रहणेन वर्धयेत्।

जनपदमित्यादि। जनपदं लक्षणया जानपदान्। देवमातृकं वृष्ट्यम्बुसंवर्धितसस्यजीवनम्। अदेवमातृकमिति पदच्छेदे तद्भिन्नं सदाजलसमृद्धनदीसरस्संवर्धितसस्यजीवनम्। प्रभूतधान्यं समृद्धनिष्पन्नधान्यम्। याचेत याचित्वा गृह्णीयात्, न तु प्रसह्य गृह्णीयात्। यथासारं तत्तद्धान्यपरिमाणानुसारेण। मध्यम् अवरं वा जनपदम्।

अयाच्यांशानाह — दुर्गसेत्वित्यादि। दुर्गकर्मसेतुकर्मादिभिः सप्तभिरुपकारिणं सप्तप्रकारं, न याचेत अर्थात् कर्मविघ्नभयात्। प्रत्यन्तं विषयसीमावासिनं, न याचेत विषयानन्तरवासिशत्रुपक्षप्रवेशभयात्। अल्पप्रमाणम् अल्पधनप्रमाणं, न याचेत।

अर्थकृच्छ्रावस्थायामपि राज्ञा नवकुलनिवेशकाविषये कर्तव्यमाह — धान्यपशुहिरण्यादीति। धान्यं पशुं हिरण्यमित्येवमादिकं कृषिसाधनं, निविशमानाय नवं कुलं स्थापयते कृषकाय, दद्यात्। धान्यानां तत्कृषिनिष्पन्नानां, चतुर्थमंशं हिरण्येन क्रीणीयात् निविशमानसकाशात् क्रयेणाधिगच्छेत् न तु

अरण्यजातं श्रोत्रियस्वं च परिहरेत् । तदप्यनुग्रहेण क्रीणीयात् ।

तस्याकरणे वा समाहर्तृपुरुषा ग्रीष्मे कर्षकाणामुद्वापं कारयेयुः । प्रमादावस्कन्नस्यात्ययं द्विगुणमुदाहरन्तो बीजकाले बीजलेख्यं कुर्युः । निष्पन्ने हरितपक्वादानं वारयेयुः अन्यत्र शाककटभङ्गमुष्टिभ्यां देवपितृपूजादानार्थं गवार्थं वा । भिक्षुकग्रामभृतकार्थं च राशिमूलं परिहरेयुः ।

स्वसस्यापहारिणः प्रतिपातोऽष्टगुणः । परसस्यापहारिणः पञ्चाशद्गुणः सीतात्ययः स्ववर्गस्य, बाह्यस्य तु वधः ।

सामान्यजानपदादिव बलित्वेन गृह्णीयात् । बीजभक्तशुद्धं च बीजभोजनार्थोपयोक्तव्यावशिष्टं च धान्यं, हिरण्येन क्रीणीयात् ।

अरण्यजातमिति । वनोत्पन्नं धान्यं वरकादि, श्रोत्रियस्वं च छान्दसव्रीह्यादिकं च, परिहरेत् न तु विभजेत् । तदपि धान्यम्, अनुग्रहेण बीजभक्तार्थापेक्षितपरिहारेण, क्रीणीयात् ।

तस्याकरणे वेति । श्रोत्रियेण कृष्यकरणे, आकारणे इति पाठे श्रोत्रियेणाह्वानेऽभ्यनुज्ञाने कृते इत्यर्थः, समाहर्तृपुरुषाः, ग्रीष्मे, कर्षकाणाम्, उद्वापम् उद्वपनकर्म, कारयेयुः । प्रमादावस्कन्नस्य कर्षकानवधानविनष्टस्य, द्विगुणम्, अत्ययं दण्डम्, उदाहरन्तः संविल्लेख्ये कथयन्तः, बीजकाले बीजावापकाले, बीजलेख्यं बीजसम्बद्धं लेख्यं, कुर्युः । निष्पन्ने फलिते बीजे, हरितपक्वादानम् आमस्य पक्वस्य च फलस्य ग्रहणं, वारयेयुः, अर्थात् कर्षकाणाम् । तत्रापवादः—अन्यत्र शाककटभङ्गमुष्टिभ्यामित्यादि । शाकमुष्टिर्हरितमुष्टिः कटभङ्गमुष्टिः हस्तच्छिन्नधान्यमुष्टिः, देवपितृपूजादाननिमित्ते गोनिमित्ते च यच्छाकमुष्टिग्रहणं यच्च कटभङ्गमुष्टिग्रहणं तदुभयमपहाय । भिक्षुकग्रामभृतकार्थं चेति । भिक्षुकार्थं ग्रामभृतकार्थं च, राशिमूलं राश्यधस्तलगतं धूलिधान्यं, परिहरेयुः प्रकल्पयेयुः ।

स्वसस्यापहारिण इति । स्वकृष्यमाणक्षेत्रसस्यहर्तुः, प्रतिपातो दण्डः, अष्टगुणः अपहृतसस्यमूल्यादष्टावृत्तिः, कार्य इति शेषः । परसस्यापहारिणः अनन्तरक्षेत्रगतसस्यहर्तुः, पञ्चाशद्गुणः, सीतात्ययः क्षेत्रसस्यापहारनिमित्तो दण्डः, स्ववर्गस्य स्वग्रामस्थस्य सतः । बाह्यस्य तु ग्रामान्तरवासिनः पुनः परसस्यापहारिणः, वधः ।

चतुर्थमंशं धान्यानां षष्ठं वन्यानां तूललाक्षाक्षौमवल्ककार्पास-रौमकौशेयकौषधगन्धपुष्पफलशाकपण्यानां काष्ठवेणुमांसवल्लूराणां च गृह्णीयुः । दन्ताजिनस्यार्धम् । अनिसृष्टं विक्रीणानस्य पूर्वः साहस-दण्डः ।

इति कर्षकेषु प्रणयः ।

सुवर्णरजतवज्रमणिमुक्ताप्रवाळाश्वहस्तिपण्याः पञ्चाशत्कराः । सूत्रवस्त्रताम्रवृत्तकंसगन्धभैषज्यशीधुपण्याश्चत्वारिंशत्कराः । धान्यरस-लोहपण्याः शकटव्यवहारिणश्च त्रिंशत्कराः । काचव्यवहारिणो महा-कारवश्च विंशतिकराः । क्षुद्रकारवो बन्धकीपोषकाश्च दशकराः । काष्ठ-वेणुपाषाणमृद्भाण्डपक्वान्नहरितपण्याः पञ्चकराः । कुशीलवा रूपा-जीवाश्च वेतनार्धं दद्युः । हिरण्यकरमकर्मण्यानाहारयेयुः । न चैषां कञ्चिदपराधं परिहरेयुः । ते ह्यपरगृहीतमभिनीय विक्रीणीरन् ।

चतुर्थमिति । धान्यानाम् अनूननिष्पन्नानां, चतुर्थमंशं गृह्णीयुः । षष्ठम् अंशं, वन्यानां वनभवधान्यानां, तूलादीनां द्वादशानां, काष्ठादीनां चतुर्णां च, गृह्णीयुः । तत्र शाकं दशविधमुक्तचरं, वल्लूरं शुष्कमांसं, शेषं प्रसिद्धम् । दन्ताजिनस्य गजदन्तस्य गवादित्वचश्च, अर्धं गृह्णीयुः । अनिसृष्टं स्वच्छन्द-विनियोगानर्हं राजभोगमित्यर्थः, विक्रीणानस्य पूर्वः साहसदण्डः ।

इति कर्षकेषु प्रणय इति । अनेन प्रकारेण कर्षकविषया प्रार्थना व्याख्याता ।

सुवर्णेत्यादि । सुवर्णरजताद्यष्टपण्याः, पञ्चाशत्कराः पञ्चाशद्भाग-कराः । सूत्रवस्त्रताम्राद्यष्टकपण्याः, चत्वारिंशत्कराः चत्वारिंशद्भागकराः । धान्यरसलोहपण्या इत्यादि । व्रीहिशाल्यादि धान्यं तैलघृतादिं रसम् अय-स्ताम्रादिकं लोहं च शकटवाह्यं कृत्वा क्रयविक्रयानुष्ठानं कुर्वन्तस्त्रिंशद्भाग-कराः । काचव्यवहारिणः विजातिमणिव्यवहरणवृत्तयः, महाकारवश्च सुवर्ण-कारुमहानौकारुप्रभृतयश्च, विंशतिकराः विंशतिभागकराः । क्षुद्रकारवः तक्षा-यस्काररजकादयः, बन्धकीपोषकाश्च वेश्यातुल्याः कुलस्त्रियो बन्धक्यः तत्पो-षकाश्च, दशकराः स्वार्जितदशभागकराः । काष्ठेत्यादि । काष्ठादिषट्कपण्याः, पञ्चकराः । कुशीलवाः नटनर्तकादयः, रूपाजीवाश्च वेश्याश्च, वेतनार्धं स्वा-र्जितस्यार्धं, दद्युः । हिरण्येत्यादि । अकर्मण्यान् वाणिज्यादिकर्मसु अव्यापृतान्

इति व्यवहारिषु प्रणयः ।

कुक्कुटसूकरमर्धं दद्यात् । क्षुद्रपशवः षड्भागम् । गोमहिषाश्वतरखरोष्ट्राश्च दशभागम् । बन्धकीपोषका राजप्रेष्याभिः परमरूपयौवनाभिः कोशं संहरेयुः ।

इति योनिपोषकेषु प्रणयः ।

सकृदेव न द्विः प्रयोज्यः । तस्याकरणे वा समाहर्ता कार्यमपदिश्य पौरजानपदान् भिक्षेत । योगपुरुषाश्चात्र पूर्वमतिमात्रं दद्युः ।

वणिगादीन्, हिरण्यकरम् एकवराटकलक्षणं करं प्रातिशीर्षिकम्, आहारयेयुः दापयेयुः । **न चैषां कञ्चिदपराधं परिहरेयुरिति** । वणिक्तक्षादीनाम् अव्यापारलक्षणमपराधं नैवोपेक्षेरन् । स्वकर्मसु अव्यापारो नाम नोपेक्षणीयोऽर्थः, किन्तु तमपराधपक्षे निक्षिप्य तद्दण्डत्वबुद्ध्या वा हिरण्यकरस्तेभ्यो ग्राह्य एवेत्यभिप्रायः । न च तेषामव्यापारः प्रत्ययप्रयोग्य इत्याह— **ते ह्यपरगृहीतमभिनीय विक्रीणीरन्निति** । ते हि स्वीयमेव पण्यम् अस्वीयमित्यपदिश्य विक्रीणीरन् ।

इति व्यवहारिषु प्रणय इति । एवम्प्रकारा क्रयविक्रयानुष्ठायिविषया करप्रार्थना ।

अथ तिर्यग्योनिपोषकेषु प्रणयमाह — **कुक्कुटसूकरमिति** । कुक्कुटसूकरशब्दौ तत्पोषकोपलक्षकौ कुक्कुटपोषकाः सूकरपोषकाश्च, अर्धं स्ववर्धितानां कुक्कुटसूकराणाम् अर्धभागं, दद्यात् । क्षुद्रपशवः अजाविप्रभृतिपोषकाः, षड्भागम् अजाव्यादीनां षष्ठं भागं, दद्युः । गोमहिषाश्वतरखरोष्ट्राश्च गोमहिषवेसरगर्दभक्रमेलकपोषकाश्च, दशभागं दद्युः । बन्धकीपोषकाः, राजप्रेष्याभिः परमरूपयौवनाभिः स्वपोषिताभिर्द्वारभूताभिः, कोशं, संहरेयुः सञ्चिनुयुः ।

इति योनिपोषकेषु प्रणय इति । व्याख्यात इति शेषः ।

स चायं करप्रणयः सकृदेव प्रयोक्तव्यः न तु द्विः प्रजाकोपभयादित्याह — **सकृदेव न द्विः प्रयोज्य** इति । **तस्याकरणे** वेति । तथा प्रणयस्य करणायोगपक्षे, समाहर्ता विषयबलाधिकृतः, कार्यमपदिश्य अमुककार्यं साधनीयमस्तीति व्यपदिश्य, पौरजानपदान्, भिक्षेत याचेत । योगपुरुषाश्च कृतव्याजसंकेताः समाहर्तृपुरुषाश्च, अत्र समाहर्तृव्यपदिष्टे कार्ये विषये, पूर्वम्, अतिमात्रम् अमितं धनं, दद्युः । एतेन, प्रदेशेन प्रकारेण, राजा पौरजानपदान्

एतेन प्रदेशेन राजा पौरजानपदान् भिक्षेत । कापटिकाश्चैनानल्पं प्रयच्छतः कुत्सयेयुः । सारतो वा हिरण्यमाढ्यान् याचेत । यथोपकारं वा स्ववशा वा यदुपहरेयुः । स्थानच्छत्रवेष्टनविभूषाश्चैषां हिरण्येन प्रयच्छेत् । पाषण्डसङ्घद्रव्यमश्रोत्रियभोग्यं देवद्रव्यं वा कृत्यकराः प्रेतस्य दग्धगृहस्य वा हस्ते न्यस्तमित्युपहरेयुः ।

देवताध्यक्षो दुर्गराष्ट्रदेवतानां यथास्वमेकस्थं कोशं कुर्यात् । तथैव चाहरेत् । दैवतचैत्यं सिद्धपुण्यस्थानमौपपादिकं वा रात्रावुत्थाप्य यात्रासमाजाभ्यामाजीवेत् । चैत्योपवनवृक्षेण वा देवताभिगमनमनार्तवपुष्पफलयुक्तेन ख्यापयेत् । मनुष्यकरं वा वृक्षे रक्षोभयं

भिक्षेत । कापटिकाश्च गूढपुरुषभेदाः, एनान् पौरजानपदान्, अल्पं धनं, प्रयच्छतः, कुत्सयेयुः निन्दयेयुः । सारतो वा तत्तद्धनबलानुसारेण वा, हिरण्यं धनम्, आढ्यान् धनिनो, याचेत । यथोपकारं वा उपकारानुगुण्येन वा, स्ववशा वा यद् उपहरेयुः, तद् गृह्णीयादिति वाक्यशेषः ।

स्थानच्छत्रवेष्टनविभूषाश्चेति । स्थानमध्यक्षपदं छत्रं श्वेतातपत्रं वेष्टनमुष्णीषं विभूषा कनकवलयादिरित्येताश्च बहुमानचिह्नभूताः, एषाम् आढ्यानां, हिरण्येन धनग्रहणेन, प्रयच्छेत् । पाषण्डसङ्घद्रव्यमिति । पाषण्डद्रव्यं सङ्घद्रव्यं च, अश्रोत्रियभोग्यं श्रोत्रियभोग्यव्यतिरिक्तं, देवद्रव्यं वा रक्षणीयं, कृत्यकराः, प्रेतस्य दग्धगृहस्य वा हस्ते न्यस्तमिति यस्य हस्ते रक्षणाय निक्षिप्तं स प्रमीतः अथवा तस्य गृहं दग्धमिति, वदन्त इति शेषः, उपहरेयुः यत्नादुपलभ्य राजान्तिकेऽर्पयेयुः ।

देवताध्यक्ष इति । स वा, दुर्गराष्ट्रदेवतानां दुर्गगतदेवतानां राष्ट्रगतदेवतानां च, कोशं धनं, यथास्वं यथायथम्, एकस्थं परचक्रभयाद्यपदेशेनैकस्थानगतं, कुर्यात् । तथैव चाहरेत् राजान्तिकेऽर्पयेत् । दैवतचैत्यं दैवतवेदिं, सिद्धपुण्यस्थानमौपपादिकं वा सिद्धे प्रतीते पुण्यस्थाने औपपादिकं भूमिमुद्भिद्याविर्भूतं स्वयम्भूलिङ्गमिति वादेन युक्तं, रात्रौ विजने, उत्थाप्य रचयित्वा, यात्रासमाजाभ्यामाजीवेत् तत्रोत्सवकरणेन जनमेलकप्रवर्तनेन च धनं देवार्थमुपहारव्याजेनापहरेत् । चैत्यादिषु देवसान्निध्यविश्वासार्थमद्भुतकल्पनमाह — चैत्योपवनवृक्षेण वेत्यादि । चैत्यारामगते वृक्षविशेषे कस्मिंश्चित्

प्ररूपयित्वा सिद्धव्यञ्जनाः पौरजानपदानां हिरण्येन प्रतिकुर्युः। सुरुङ्गायुक्ते वा कूपे नागमनियतशिरस्कं हिरण्योपहारेण दर्शयेद् नागप्रतिमायामन्तश्छिद्रायाम्। चैत्यच्छिद्रे वल्मीकच्छिद्रे वा सर्पदर्शन आहारेण प्रतिबद्धसंज्ञं कृत्वा श्रद्दधानानादर्शयेत्। अश्रद्दधानानामाचमनप्रोक्षणेषु रसमवपाय्य देवताभिशापं ब्रूयात्। अभित्यक्तं वा दंशयित्वा। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्।

वैदेहकव्यञ्जनो वा प्रभूतपण्यान्तेवासी व्यवहरेत। स यदा पण्यमूल्ये निक्षेपप्रयोगैरुपचितः स्यात् तदैनं रात्रौ मोषयेत्।

पुष्पं फलं च प्रयत्नादनृतावुत्पादितं दर्शयित्वा देवतासान्निध्यमहिमकृतमिदमिति प्रख्यापयेत्। **मनुष्यकरं वा वृक्षे रक्षोभयमित्यादि**। सिद्धव्यञ्जनाः रात्रौ पितृवनादिगते वृक्षे रक्षोवेषेण स्थित्वा 'मह्यं मनुष्य एकैको दिने दिने करत्वेन दातव्यः अन्यथा सर्वान् युगपत् खादेयम्' इत्येवं स्वयं श्रावयित्वा रक्षसा श्रावितमिति प्रख्याप्य निर्दिष्टमनुष्यबलिकस्य तथाविधस्य रक्षोभयस्य प्रतीकारार्थं पौरजानपदेभ्यः प्रभूतं हिरण्यमुत्थाप्य राज्ञ उपहरेयुः। **सुरुङ्गायुक्ते वेति**। भूविवरयुक्ते, कूपे, नागम्, अनियतशिरस्कं त्रिशीर्ष-पञ्चशीर्षादिं सर्पं कृत्रिमं, हिरण्योपहारेण अद्भुतनागदर्शनार्थं द्रष्टृदेयतया स्वकल्पितस्य हिरण्यकस्य ग्रहणेन, दर्शयेद् दिदृक्षुभ्यः, कुत्र दर्शयेत्, नागप्रतिमायाम् अन्तश्छिद्रायां सत्यसर्पावस्थानयोग्यान्तस्सुषिरवत्याम्। चैत्यच्छिद्रे वल्मीकच्छिद्रे वा देवचैत्यभित्त्यादिगते रन्ध्रे तद्गतवल्मीकविवरे वा, सर्पदर्शने यदृच्छोपजाते सति, तं सर्पम्, आहारेण आहार आहरणम् आयत्तीकरणं तत्साधनभूतेन मन्त्रेणौषधेन वा, प्रतिबद्धसंज्ञं निरुद्धगतिं, कृत्वा, श्रद्दधानान् आदर्शयेद् अर्थाद् देवतासान्निध्यप्रभावकृतमिदमगमनं सर्पस्येति ब्रुवन्। अश्रद्दधानानाम् आचमनप्रोक्षणेषु प्राशनस्नानेषु, रसम् अवपाय्य तन्मोहोत्पादनपर्याप्तमात्रं विषम् उपयोज्य, देवताभिशापं ब्रूयात् नागदेवताकोपकृतं तन्मोहनं ख्यापयेत्। **अभित्यक्तं वेति**। वधयोग्यं देवनिन्दकं वा, दंशयित्वा रात्रौ सर्पेण दष्टं कारयित्वा, देवताभिशापं ब्रूयादिति सम्बध्यते। योगदर्शनप्रतीकारेण वा औपनिषदिकोक्तविषचिकित्सारम्भेण वा, कोशाभिसंहरणं कुर्याद्, दष्टपक्षाद् धनं गृहीत्वेत्यार्थम्।

वैदेहकव्यञ्जनो वेति। स वा, प्रभूतपण्यान्तेवासी प्रचुरपण्यः प्रचुरान्तेवासी च, व्यवहरेत क्रयविक्रयानुष्ठानं कुर्यात्। स यदा, पण्यमूल्ये वाणि-

एतेन रूपदर्शकः सुवर्णकारश्च व्याख्यातौ ।

वैदेहकव्यञ्जनो वा प्रख्यातव्यवहारः प्रवहणनिमित्तं याचितकमवक्रीतकं वा रूप्यसुवर्णभाण्डमनेकं गृह्णीयात् । समाजे वा सर्वपण्यसन्दोहेन प्रभूतं हिरण्यसुवर्णमृणं गृह्णीयात्, प्रतिभाण्डमूल्यं च । तदुभयं रात्रौ मोषयेत् ।

साध्वीव्यञ्जनाभिः स्त्रीभिर्दूष्यानुन्मादयित्वा तासामेव वेश्मस्वभिगृह्य सर्वस्वान्याहरेयुः ।

दूष्यकुल्यानां वा विवादे प्रत्युत्पन्ने रसदाः प्रणिहिता रसं दद्युः । तेन दोषेणेतरे पर्यादातव्याः ।

ज्यधने, निक्षेपप्रयोगैः आढ्यविस्रम्भादन्यकृतैर्धननिक्षेपैर्वृद्ध्यर्थऋणार्पणैश्च, उपचितः प्रवृद्धः, स्यात्, तदा, एनं वैदेहकव्यञ्जनं, रात्रौ, मोषयेत् चोरमुषितं कुर्यात् मोषणच्छलेन राजा तदीयं धनमपहरेदित्यर्थः ।

एवं रूपदर्शने रूपदर्शकेन सुवर्णपरीक्षणादौ सुवर्णकारेण च छलं कारयित्वा धनाभिसंहरणं कुर्यादित्याह — **एतेन रूपदर्शक** इत्यादि ।

वैदेहकव्यञ्जनो वा प्रख्यातव्यवहार इति । स वा प्रतीतक्रयविक्रयानुष्ठान , प्रवहणनिमित्तं तुष्टिभोजननिमित्तं, याचितकम्, अवक्रीतकं वा, रूप्यसुवर्णभाण्डं रूप्यभाण्डं सुवर्णभाण्डं च, अनेकं गृह्णीयात् । समाजे वा जनसमुदायसन्निधाने वा, सर्वपण्यसन्दोहेन सकलपण्यभाण्डसमूहप्रदर्शनेन, प्रभूतं हिरण्यसुवर्णम् ऋणं गृह्णीयात, अर्थात् पण्यसन्दोहमिमं विक्रीय प्रत्यर्पयिष्यामीत्युक्त्वा । प्रतिभाण्डमूल्यं च गृह्णीयात् प्रतिपण्यस्य श्वोऽर्पयिष्यमाणस्य मूल्यं च प्रतिपण्यक्रेतृभ्यो गृह्णीयात् । तदुभयं गृहीतं द्वयं, रात्रौ, मोषयेत् मोषणच्छलेनापहरेत् ।

साध्वीत्यादि । साध्वीव्यञ्जनाभिः, स्त्रीभिः दूष्यान् राजद्वेषित्वेन हेतुना दूषणार्हान् जनान्, उन्मादयित्वा रञ्जयित्वा, तासामेव, वेश्मसु गृहेषु, अभिगृह्य सर्वस्वानि आहरेयुः ।

दूष्यकुल्यानां वेति । तेषां, विवादे दायप्रभृतिविषये, प्रत्युत्पन्ने, रसदाः प्रणिहिताः सूदादिवेषेण प्रयुक्ताः, रसं दद्युः विवदमानेष्वन्यतमाय । तेन दोषेण रसदानदोषारोपेण, इतरे रसमारितादन्ये दूष्याः, पर्यादातव्याः सर्वस्वं हारयितव्याः ।

दूष्यमभित्यक्तो वा श्रद्धेयापदेशं पण्यं हिरण्यनिक्षेपमृणप्रयोगं दायं वा याचेत। दासशब्देन वा दूष्यमालम्बेत। भार्यामस्य स्नुषां दुहितरं वा दासीशब्देन भार्याशब्देन वा। तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात् — हतोऽयमित्थं कामुक इति। तेन दोषेणेतरे पर्यादातव्याः।

सिद्धव्यञ्जनो वा दूष्यं जम्भकविद्याभिः प्रलोभयित्वा ब्रूयात्—अक्षयं हिरण्यं राजद्वारिकं स्त्रीहृदयमरिव्याधिकरमायुष्यं पुत्रीयं वा कर्म जानामि इति। प्रतिपन्नं चैत्यस्थाने रात्रौ प्रभूतसुरामांसगन्धमुपहारं कारयेत्, एकरूपं चात्र हिरण्यं पूर्वनिखातम्। प्रेताङ्गं प्रेतशिशुर्वा यत्र निहितः स्यात् ततो हिरण्यमस्य दर्शयेदत्यल्पमिति च ब्रूयात्। 'प्रभूतहिरण्यहेतोः पुनरुपहारः कर्तव्य इति, स्वयमेवैतेन हिर-

---

दूष्यमिति। अभित्यक्तो वा वध्यो वा, दूष्यं, श्रद्धेयापदेशं लोकप्रत्यययोग्यसम्बन्धव्यपदेशं, पण्यं हिरण्यनिक्षेपम् ऋणप्रयोगं दायं वा, याचेत। दासशब्देन वा दूष्यम् आलम्बेत मम दास इति वा दूष्यं व्यपदिशेत्। भार्याम्, अस्य दूष्यस्य, स्नुषां दुहितरं वा दासीशब्देन भार्याशब्देन वा, आलम्बेत। तं यथोक्तमभित्यक्तं, दूष्यगृहप्रतिद्वारि रात्रौ उपशयानम् अन्यत्र वा वसन्तं तीक्ष्णः हत्वा, ब्रूयात् प्रख्याप्यापसरेत्, किमिति — हतोऽयम् इत्थं कामुक इति। तेन दोषेण तीक्ष्णकृतेनाभित्यक्तवधदोषेणारोपितेनेत्यर्थः, इतरे दूष्याः, पर्यादातव्याः सर्वस्वं हारयितव्याः।

सिद्धव्यञ्जनो वेति। स वा, दूष्यं, जम्भकविद्याभिः मायाविद्याभिः, प्रलोभयित्वा, ब्रूयात्, किमिति, अक्षयं हिरण्यं निधिदर्शनं, राजद्वारिकं राजवशीकरणं, स्त्रीहृदयं स्त्रीहृदयाकर्षणम्, अरिव्याधिकरम्, आयुष्यम् आयुष्करं, पुत्रीयं वा पुत्रोत्पत्तिनिमित्तं वा, कर्म जानामि इति। प्रतिपन्नं तद्वाक्यविश्वस्तं दूष्यं, चैत्यस्थाने श्मशानादौ, रात्रौ, प्रभूतसुरामांसगन्धम्, उपहारं देवताबलिदानं, कारयेत्। एकरूपं च, अत्र चैत्यस्थाने, हिरण्यं, पूर्वनिखातं पूर्वं निखाय निवेशितं, कारयेत्। प्रेताङ्गं, प्रेतशिशुर्वा यत्र, निहितः स्थापितः स्यात, ततः तस्मिन् प्रदेशे, हिरण्यम्, अस्य दूष्यस्य, दर्शयेत्, अत्यल्पमिति च ब्रूयात् अत्यल्पोपहारेणात्यल्पं हिरण्यमेकरूपात्मकं लब्धमिति च कथयेत्। प्रभूतहिरण्यहेतोः, पुनरुपहारः भूयः प्रभूतबलिः कर्तव्यः, इति अतः

ण्येन श्वोभूते प्रभूतमौपहारिकं क्रीणीही'ति । तेन हिरण्येनौपहारिकक्रये गृह्येत ।

मातृव्यञ्जनया वा 'पुत्रो मे त्वया हत' इत्यवरूपितः स्यात् । संसिद्धमेवास्य रात्रियागे वनयागे वनक्रीडायां वा प्रवृत्तायां तीक्ष्णा विशस्याभित्यक्तमतिनयेयुः ।

दूष्यस्य वा भृतकव्यञ्जनो वेतनहिरण्ये कूटरूपं प्रक्षिप्य प्ररूपयेत् ।

कर्मकारव्यञ्जनो वा गृहे कर्म कुर्वाणः स्तेनकूटरूपकारकोपकरणमपनिदध्यात् । चिकित्सकव्यञ्जनो वा गरमगरापदेशेन ।

कारणात्, स्वयम् एतेन हिरण्येन, श्वोभूते प्रभूतम् औपहारिकम् उपहारार्थं द्रव्यं क्रीणीहि इति ब्रूयात् । तेन हिरण्येन औपहारिकक्रये, क्रियमाण इति शेषः, गृह्येत अर्थाद् दूष्यो राजपुरुषैः । तेन दोषेण सर्वस्वहरणादिकं तु समानं पूर्वेण ।

मातृव्यञ्जनया वेति । मातृवेषया वा, पुत्रो मे त्वया हत इति, अवरूपितः मिथ्यादर्शितः, स्यात् अर्थाद् दूष्यः । अपराधलिङ्गार्थमाह — संसिद्धमेवेति । अस्य दूष्यस्य, रात्रियागे, वनयागे, वनक्रीडायां वा, प्रवृत्तायां, तीक्ष्णाः, संसिद्धमेव अभित्यक्तं मरणसज्जितमेव वध्यं, विशस्य मारयित्वा, अतिनयेयुः दूष्यप्रवर्तितरात्रियागादिप्रदेशे निदध्युः । तेन दोषेण दूष्यमारणादिकमार्थम् । एवमुत्तरत्रापि ।

दूष्यस्य वेति । तस्य वा, भृतकव्यञ्जनः, वेतनहिरण्ये, कूटरूपं कपटपणादिकं, प्रक्षिप्य स्वयं क्षिप्त्वा, प्ररूपयेत् स्वामिनं कूटरूपप्रक्षेप्तारं निरूपयेत् ।

कर्मकारेत्यादि । कर्मकारवेषो वा, गृहे कर्म कुर्वाणः, स्तेनकूटरूपकारकोपकरणं चोरकपटनाणकनिर्मापकोपकरणं, अपनिदध्यात् प्रच्छन्नं निदध्यात्, अर्थाद् दूष्यस्य गृहे । उपनिदध्यादित्यपि पाठः । चिकित्सकव्यञ्जनो वेति । भिषग्वेषो वा, गरं विषम्, अगरापदेशेन विषहरौषधव्याजेन, उपनिदध्यात्, अर्थाद् दूष्यस्य हस्ते । गदमगदापदेशेनेति पाठे रोगहेतुमौषधापदेशेनेत्यर्थः ।

प्रत्यासन्नो वा दूष्यस्य सत्री प्रणिहितमभिषेकभाण्डममित्रशासनं च कापटिकमुखेन आचक्षीत, कारणं च ब्रूयात् ।

एवं दूष्येष्वधार्मिकेषु च वर्तेत । नेतरेषु ॥

पक्वं पक्वमिवारामात् फलं राज्यादवाप्नुयात् ।
आत्मच्छेदभयादामं वर्जयेत् कोपकारकम् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
द्वितीयोऽध्यायः कोशाभिसंहरणम्,
आदितो द्विनवतितमः ॥

प्रत्यासन्नो वा दूष्यस्येति । दूष्यस्य बन्धुर्वा, सत्री गूढपुरुषविशेषः, प्रणिहितं दूष्यस्य गृहे अपनिहितम्, अभिषेकभाण्डम्; अमित्रशासनं च शत्रुलेख्यं च, कापटिकमुखेन कापटिकाख्यगूढपुरुषविशेषमुखेन, आचक्षीत कथयेत् । कारणं च ब्रूयात् 'हत्वा राजानं तच्छत्रुं राज्येऽभिषेक्तुमयं यतत' इत्येवंरूपम् ।

त एते कोशाभिसंहरणोपायाः दूष्येषु अधार्मिकेषु च प्रयोक्तव्याः, न तु धार्मिकेष्वित्याह — एवं दूष्येष्वित्यादि ॥

अध्यायान्ते श्लोकमाह — पक्वमिति । आरामात्, पक्वं परिणतं फलमिव, राज्यात् पक्वं फलं दोषपरिपाकयुक्तमर्थाद् दुष्टजनस्वामिकं धनम्, अवाप्नुयात् । आत्मच्छेदभयाद्, आमम् अपक्वमदोषयुक्तं धनं, वर्जयेत् । कुतः, कोपकारकं यस्मात् तादृशं धनं प्रकृतिकोपहेतुः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
द्वितीयोऽध्यायः कोशाभिसंहरणम्,
आदितः द्विनवतितमः ॥

---

९१. प्रक. भृत्यभरणीयम् ।

दुर्गजनपदशक्त्या भृत्यकर्म समुदयपादेन स्थापयेत्, कार्यसाधनसहेन वा भृत्यलाभेन । शरीरमवेक्षेत, न धर्मार्थौ पीडयेत् ।

ऋत्विगाचार्यमन्त्रिपुरोहितसेनापतियुवराजराजमातृराजमहिष्योऽष्टचत्वारिंशत्साहस्राः । एतावता भरणे नानास्वाद्यत्वमकोपकं चैषां भवति ।

दौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातारश्चतुर्विंशतिसाहस्राः । एतावता कर्मण्या भवन्ति ।

कुमारकुमारमातृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिष-

भृत्यभरणीयमिति सूत्रम् । भृत्या नाम धीसचिवाः शास्त्रसचिवाः कर्मसचिवा इति त्रिप्रकाराः तेषां भरणं पोषणमधिकृत्य प्रवृत्तमिदं प्रकरणमित्यर्थः । असद्भृत्यानां शोधनकथनानन्तरं सद्भृत्यभरणस्य प्राप्तावसरत्वात् कथनम् ।

दुर्गजनपदशक्त्येति । दुर्गजनपदशक्त्यनुसारेण, भृत्यकर्म भृत्यभरणीयं, समुदयपादेन समुदयस्य सर्वदुर्गजनपदोत्थस्य धनपिण्डस्य चतुर्भागेन, स्थापयेत् । कार्यसाधनसहेन वा भृत्यलाभेन कार्यसाधनसमर्थस्य भृत्यस्य लाभो यावता धनेन भवति तावता वा अर्थात् समुदयपादाधिकेनापि वा, भृत्यकर्म स्थापयेत् । शरीरम् आयशरीरम्, अवेक्षेत । धर्मार्थौ न पीडयेत् धर्मं देवपितृकार्यनित्यदानादिकम् अर्थं दुर्गसेतुवणिक्पथादिकर्मलक्षणं च नोपरुन्ध्यात् ।

समुदयपादस्य भृत्यविशेषापेक्षया विनियोगविशेषानाह — **ऋत्विगाचार्येत्यादि** । ऋत्विगादयोऽष्टौ, अष्टचत्वारिंशत्साहस्राः अष्टाचत्वारिंशत्सहस्रपणाः । एतावता द्रव्येण, भरणे, एषाम् ऋत्विगादीनां, नानास्वाद्यत्वं बहुविधभोज्यभोग्ययुक्तत्वम्, अकोपकम् अकोपजनकं तृप्तिकरमित्यर्थः, भवति ।

दौवारिकेत्यादि । दौवारिको द्वाराधिकृतः अन्तर्वंशिकः अन्तःपुराधिकृतः प्रशास्ता आयुधाध्यक्षः समाहर्ता धान्यकराध्यक्षनेता सन्निधाता भाण्डागाराध्यक्षः इत्येते, चतुर्विंशतिसाहस्राः । एतावता धनेन, कर्मण्याः कर्मयोग्याः, भवन्ति ।

कुमारेत्यादि । कुमारादयोऽष्टौ द्वादशसाहस्राः । तत्र कुमारोऽश्वानुचरः, कुमारमाता अशीतिजननेतेति भाषा, नायकः पदातिनेता, पौरव्यावहा-

राष्ट्रपालान्तपालाश्च द्वादशसाहस्राः। स्वामिपरिबन्धबलसहाया ह्येतावता भवन्ति।

श्रेणीमुख्या हस्त्यश्वरथमुख्याः प्रदेष्टारश्च अष्टसाहस्राः। स्ववर्गानुकर्षिणो ह्येतावता भवन्ति।

पत्त्यश्वरथहस्त्यध्यक्षाः द्रव्यहस्तिवनपालाश्च चतुस्साहस्राः।

रथिकानीकस्थचिकित्सकाश्वदमकवर्धकयो योनिपोषकाश्च द्विसाहस्राः।

कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिकसूतमागधाः पुरोहितपुरुषाः सर्वाध्यक्षाश्च साहस्राः।

शिल्पवन्तः पादाताः सङ्ख्यायकलेखकादिवर्गः पञ्चशताः।

रिकः पुरगतव्यवहारचिन्तकः, कार्मान्तिकः कृषिद्रव्यवनादिकर्मान्तनियुक्तः, मन्त्रिपरिषद् द्वादशामात्याः, राष्ट्रपालोऽन्तपालश्च। एतावता, स्वामिपरिबन्धबलसहायाः स्वामिनः परिकरबलभूताः सहायाश्च, भवन्ति।

श्रेणीमुख्या इति। श्रेण्याः सजातीयशिल्पिगणस्य मुख्याः, हस्त्यश्वरथमुख्याः हस्त्याद्येकैकमुख्याः, प्रदेष्टारश्च कण्टकशोधनाधिकृताश्च, अष्टसाहस्राः। एतावता, स्ववर्गानुकर्षिणः स्ववर्गानुकूलनशीलाः, भवन्ति हि।

पत्त्यश्वेत्यादि। पत्त्यध्यक्षादयश्चत्वारो द्रव्यवनपाला हस्तिवनपालाश्च चतुस्साहस्राः।

रथिकेत्यादि। रथिकादयः पञ्च तत्र रथिको रथचर्याशिक्षकः अनीकस्थो गजाशिक्षकः अनीकपाठे अनीकस्थो लक्ष्यः चिकित्सको भिषक् अश्वदमकः अश्वशिक्षकः वर्धकिर्महातक्षा। योनिपोषकाश्च कुक्कुटसूकरादिसंवर्धकाध्यक्षाश्च, द्विसाहस्राः।

कार्तान्तिकेत्यादि। कार्तान्तिकः स्त्रीपुरुषादिलक्षणदर्शनेनातीतानागतादेष्टा नैमित्तिकः शाकुनविचक्षणः मौहूर्तिको ज्यौतिषिकः पौराणिकः पुराणवक्ता सूतः सारथिः मागधः स्तुतिपाठकः इत्येते षट्, पुरोहितपुरुषाः पुरोहितपरिकर्मिणः, सर्वाध्यक्षाश्च सर्वे सुरासूनासूत्राद्यध्यक्षाश्च, साहस्राः।

शिल्पवन्त इति। चित्रकारादयः, पादाताः पदातिकर्मकुशलाः, संख्यायकलेखकादिवर्गः संख्यायको गणकः लेखको लिपिकरः आदिपदाद् उन्मातृपरिमातृप्रभृतयः गृह्यन्ते तेषां वर्गः, पञ्चशताः।

कुशीलवास्त्वर्धतृतीयशताः । द्विगुणवेतनाश्चैषां तूर्यकराः ।

कारुशिल्पिनो विंशतिशतिकाः ।

चतुष्पदद्विपदपरिचारकपारिकर्मिकौपस्थायिकपालकविष्टिबन्धकाः षष्टिवेतनाः ।

आर्ययुक्तारोहकमाणवकशैलखनकाः सर्वोपस्थायिन आचार्या विद्यावन्तश्च पूजावेतनानि यथार्हं लभेरन् पञ्चशतावरं सहस्रपरम् ।

दशपणिको योजने दूतः मध्यमः । दशोत्तरे द्विगुणवेतन आ योजनशतादिति ।

समानविद्येभ्यस्त्रिगुणवेतनो राजा राजसूयादिषु क्रतुषु, राज्ञः सारथिः साहस्रः ।

कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनाः साहस्राः ।

कुशीलवास्त्विति । ते, अर्धतृतीयशताः पञ्चाशदधिकद्विशतपणाः । एषां कुशीलवानां मध्ये, तूर्यकराः प्रधानवाद्यकराः, द्विगुणवेतनाः इतरापेक्षया ।

कारुशिल्पिन इति । ते, विंशतिशतिकाः विंशत्यधिकशतपणाः ।

चतुष्पदेत्यादि । चतुष्पदसम्बन्धी परिचारकः अनुचरः पारिकर्मिकः प्रधानः तथा द्विपदपरिचारकः द्विपदपारिकर्मिकः औपस्थायिकः शरीरपरिचारकः पालको गवादिरक्षकः विष्टिबन्धकश्चेत्येते, षष्टिवेतनाः ।

आर्येत्यादि । आर्यः शीलाभिजनसम्पन्नः सत्पुरुषः युक्तारोहकः अविधेयहस्त्यश्वारोहणसमर्थः, माणवकः कुपुरुषो वृद्धचोरादिः शैलखनकः शिलाशिल्पकरः इत्येते, सर्वोपस्थायिन आचार्या गान्धर्वाचार्याः, विद्यावन्तश्च धर्मार्थादिशास्त्रकुशलाश्च, पूजावेतनानि पूजायुक्तानि वेतनानि, यथार्हं लभेरन् । कियत्, पञ्चशतावरं सहस्रपरम् ।

दशपणिक इति । मध्यमः असन्दाद्रुतगतिः, दूतः, योजने दशपणिकः योजनगमने दशपणवेतनः आ दशयोजनात् । दशोत्तरे दशयोजनादुपरि, आ योजनशतात्, द्विगुणवेतनः प्रतियोजनं विंशतिपणवेतनः ।

समानविद्येभ्य इति । समानविद्या मन्त्रिपुरोहिताः तेभ्यः, त्रिगुणवेतनः, राजा राजसूयादिषु क्रतुषु, आनीत इति शेषः । राज्ञः सारथिः, साहस्रः सहस्रपणः, क्रतुषु ।

कापटिकेत्यादि । प्रतीतम् ।

ग्रामभृतकसत्रितीक्ष्णरसदभिक्षुक्यः पञ्चशताः ।

चारसञ्चारिणोऽर्धतृतीयशताः । प्रयासवृद्धवेतना वा ।

शतवर्गसहस्रवर्गाणामध्यक्षा भक्तवेतनलाभमादेशं विक्षेपं च कुर्युः । अविक्षेपे राजपरिग्रहदुर्गराष्ट्ररक्षावेक्षणेषु च । नित्यमुख्याः स्युरनेकमुख्याश्च ।

कर्मसु मृतानां पुत्रदारा भक्तवेतनं लभेरन् । बालवृद्धव्याधिताश्चैषामनुग्राह्याः । प्रेतव्याधितसूतिकाकृत्येषु चैषामर्थमानकर्म कुर्यात् ।

अल्पकोशः कुप्यपशुक्षेत्राणि दद्यात्, अल्पं च हिरण्यम् । शून्यं वा निवेशयितुमभ्युत्थितो हिरण्यमेव दद्यात्, न ग्रामं ग्रामसंजातव्यवहारस्थापनार्थम् ।

ग्रामभृतकेत्यादि । ग्रामभृतका रजकादयः । शेषं प्रतीतम् ।

चारसञ्चारिण इति । ते, अर्धतृतीयशताः पञ्चाशदधिकद्विशतपणवेतनाः । **प्रयासवृद्धवेतना** वेति । येषां वेतनमभिहितं ते सर्वे प्रयासानुरूप्येण यथोक्ताभ्यधिकवेतना वा कर्तव्याः ।

यथोक्तवेतनानां भृतकानामेकैकस्य शतवर्गस्य सहस्रवर्गस्य चैकैकमध्यक्षं कृत्वा तन्मुखेन भक्तवेतनदानं राजादेशानुष्ठानं समुचितकर्मनियोजनं च तत्तद्वर्गं कारयेदित्यभिप्रायेणाह — **शतवर्गे**त्यादि । **अविक्षेप** इति । व्यापाराभावे, प्रथमान्तपाठोऽशुद्धः । राजपरिग्रहदुर्गराष्ट्ररक्षावेक्षणेषु च, कुर्युः अर्थादध्यक्षाः स्वं स्वं वर्गम् । नित्यमुख्याः स्युः तत्तद्वर्ग्याः स्वस्वमुख्याधीनप्रवृत्तिका भवेयुर्न तु जातु स्वतन्त्राः । अनेकमुख्याश्च बहुप्रधानाश्च, स्युः ।

कर्मस्विति । राजकर्मकरणावस्थायां, मृतानां, पुत्रदाराः पुत्रा दाराश्च, भक्तवेतनं लभेरन् । बालवृद्धव्याधिताश्च, एषां मृतभृत्यानां पोष्यभूता इत्यर्थम् । अनुग्राह्याः, राज्ञा । **प्रेते**त्यादि । अर्थमानकर्म अर्थदानबहुमानकर्म ।

अल्पकोश इति । तथाभूतो राजा, कुप्यपशुक्षेत्राणि, दद्यात्, दानीयेभ्यः । अल्पं च हिरण्यं सुवर्णादिकं तु स्वल्पं दद्यात् । शून्यं वा निवेशयितुम् अभ्युत्थितः शून्यं देशं ग्रामीकर्तुमुद्युक्तो राजा, हिरण्यमेव दद्यात्, निविशमानानामनुग्रहार्थं, न ग्रामं दद्यात् । किमर्थं, ग्रामसंजातव्यवहारस्थापनार्थम् अमुकग्राम एतावद्धिरण्यमूल्यः अमुकग्रामोत्पन्नाद्धिरण्यादेतावद् देयमित्येवंरूपस्य व्यवहारस्य प्रवर्तनार्थम् ।

एतेन भृतानामभृतानां च विद्याकर्मभ्यां भक्तवेतनविशेषं च कुर्यात् । षष्टिवेतनस्याढकं कृत्वा हिरण्यानुरूपं भक्तं कुर्यात् ।

पत्त्यश्वरथद्विपाः सूर्योदये बहिः सन्धिदिवसवर्जं शिल्पयोग्याः कुर्युः । तेषु राजा नित्ययुक्तः स्यात् । अभीक्ष्णं चैषां शिल्पदर्शनं कुर्यात् । कृतनरेन्द्राङ्कं शस्त्रावरणमायुधागारं प्रवेशयेत् । अशस्त्राश्चरेयुरन्यत्र मुद्रानुज्ञातात् । नष्टं विनष्टं वा द्विगुणं दद्यात् । विध्वस्तगणनां च कुर्यात् ।

सार्थिकानां शस्त्रावरणमन्तपाला गृह्णीयुः, समुद्रमवचारयेयुर्वा । यात्रामभ्युत्थितो वा सेनामुद्योजयेत् । ततो वैदेहकव्यञ्जनाः सर्वपण्यान्यायुधीयेभ्यो यात्राकाले द्विगुणप्रत्यादेयानि दद्युः । एवं राजपण्यविक्रयो वेतनप्रत्यादानं च भवति ।

एतेनेति । उक्तेन प्रकारेण, भृतानामभृतानां च स्थिरभृतिकानाम् अस्थिरभृतिकानां च कर्मकराणां, विद्याकर्मभ्यां विद्याकर्मप्रकर्षानुसारेण, भक्तवेतनविशेषं च भोजनभृतितारतम्यं च, कुर्यात् । कियद्वेतनस्य कियद् भक्तमिति व्यवस्थामाह — **षष्टिवेतनस्याढकं कृत्वेति** । षष्टिपणवेतनस्य तण्डुलाढकमिति क्रममाश्रित्य, हिरण्यानुरूपं भक्तं कुर्यात् हिरण्यवृद्ध्यानुरूप्येण भक्तवृद्धिं कुर्यात् ।

पत्त्यश्वरथद्विपा इत्यादि । सन्धिदिवसवर्जम् अमावास्याद्यनध्यायदिवसान् वर्जयित्वा । शिल्पयोग्याः विचित्राः शस्त्रचर्याशिक्षाः । तेषु पत्त्यादिषु । नित्ययुक्तः नित्यासक्तः । कृतनरेन्द्राङ्कं दत्तराजमुद्राचिह्नम् । शस्त्रावरणं शस्त्रं चावरणं च । **अशस्त्राश्चरेयुरित्यादि** । मुद्रानुज्ञातादन्यत्र मुद्रादानानुज्ञातसशस्त्रसञ्चारं राजपुरुषमपहाय । मुद्रानुज्ञानादित्यपि पाठः । **नष्टं विनष्टं वेति** । विस्मृतम् उपहतं च, शस्त्रावरणं, द्विगुणं दद्यात् । **विध्वस्तगणनां च कुर्यादिति** । आयुधशालादौ एतावन्ति शस्त्राणि ध्वस्तानीति गणयित्वा जानीयात् ।

सार्थिकानामिति । सार्थेन चरतां परदेशागतानां, शस्त्रावरणम् अर्थान्मुद्रानुज्ञानरहितम्, अन्तपालाः गृह्णीयुः । समुद्रं मुद्रानुज्ञानयुक्तम्, अवचारयेयुः अवारितं विसृजेयुः । **यात्रामभीति** । युद्धयात्रामुद्दिश्य, उत्थितः उद्यतः, सेनाम्, उद्योजयेत् समूहयेत् । ततः, वैदेहकव्यञ्जनाः राजप्रयुक्ताः,

एवमवेक्षितायव्ययः कोशदण्डव्यसनं नावाप्नोति ।
इति भक्तवेतनविकल्पः ॥

सत्रिणश्चायुधीयानां वेश्याः कारुकुशीलवाः ।
दण्डवृद्धाश्च जानीयुः शौचाशौचमतन्द्रिताः ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
तृतीयोऽध्यायः, भृत्यभरणीयम् ,
आदितस्त्रिनवतितमः ॥

सर्वपण्यानि सर्वाणि पण्यानि युद्धोपकरणभूतानि, आयुधीयेभ्यः अर्थान्निरुप-करणेभ्यः, यात्राकाले, द्विगुणप्रत्यादेयानि दद्युः युद्धावसाने द्विगुणमेतानि प्रत्यर्पणीयानीत्युक्त्वा ऋणत्वेन दद्युः । ईदृशदानस्य फलमाह — **एवमिति** । अनेन प्रकारेण दाने, राजपण्यविक्रयः, वेतनप्रत्यादानं च दत्तवेतनप्रत्याप-त्तिश्च, भवति सिध्यति ।

एवमिति । यथोक्तेन प्रकारेण, अवेक्षितायव्ययः राजा, कोशदण्ड-व्यसनं धनदरिद्रतां सैन्यदरिद्रतां च, नावाप्नोति ।

इति भक्तवेतनविकल्प इति । व्याख्यात इति शेषः ॥

आयुधयोधिनां शुचित्वमशुचित्वं च सत्रिणः वेश्याः कारवः कुशी-लवाः पुराणभटाश्चाप्रमत्ता विद्युरितीममर्थं श्लोकेनाह — **सत्रिणश्चेत्यादि** ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
तृतीयोऽध्यायः भृत्यभरणीयम्,
आदितस्त्रिनवतितमः ॥

९.२ प्रक. अनुजीविवृत्तम्।

लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत। यं वा मन्येत— यथाहमाश्रयेप्सुरेवमसौ विनयेप्सुराभिगामिकगुणयुक्त इति, द्रव्यप्रकृतिहीनमप्येनमाश्रयेत। न त्वेवानात्मसम्पन्नम्। अनात्मवान् हि नीतिशास्त्रद्वेषादनर्थ्यसंयोगाद् वा प्राप्यापि महदैश्वर्यं न भवति।

आत्मवति लब्धावकाशः शास्त्रानुयोगं दद्यात्। अविसंवादाद्धि स्थानस्थैर्यमवाप्नोति। मतिकर्मसु पृष्टः तदात्वे च आयत्यां च धर्मार्थ-

---

अनुजीविवृत्तमिति सूत्रम्। अनुजीविनो मन्त्र्यादयः तेषां वृत्तं स्वामिनं प्रत्यनुष्ठानमुच्यत इति सूत्रार्थः। पूर्वस्मिन् प्रकरणे भृत्यानां प्रस्तुतत्वादिह तद्वृत्ताख्यानस्य साङ्गत्यं स्पष्टमेव।

कीदृग्गुणोऽनुजीवनाधिकारी कीदृग्गुणमनुजीव्यमाश्रयेतेत्याकाङ्क्षायामाह — लोकयात्राविदिति। अर्थशास्त्राभिज्ञः, राजानम्, आत्मद्रव्यप्रकृतिसम्पन्नम् आत्मसम्पन्नं द्रव्यप्रकृतिसम्पन्नं च, तत्रात्मसम्पन्नं 'महाकुलीनो दैवबुद्धिरि'त्यादिना प्रकृतिसम्पत्प्रकरणे वक्ष्यमाणयात्मसम्पदा युक्तं, द्रव्यप्रकृतिसंपन्नं द्रव्यप्रकृतिभिरमात्यादिभिः पञ्चभिर्जानपदत्वादिगुणयोगिभिर्युक्तं, प्रियहितद्वारेण राज्ञः प्रियाश्च हिताश्च ये पुरुषास्तद्द्वारेण, आश्रयेत। राज्ञस्तथाविधस्यालाभे त्वाह— यं वेति। यथा अहम् आश्रयेप्सुः आश्रयार्थी, एवम् असौ, विनयेप्सुः विद्यावृद्धसंयोगार्थी, आभिगामिकगुणयुक्तः महाकुलीनत्वादिभिराभिगामिकगुणैर्युक्तः, इति यं वा मन्येत, एनं राजानं, द्रव्यप्रकृतिहीनमपि सन्तम्, आश्रयेत। अनात्मसम्पन्नं तु आत्मसम्पद्रहितं तु, नैवाश्रयेत। तत्र हेतुमाह— अनात्मवान् हीति। सः, नीतिशास्त्रद्वेषाद् अर्थाद् मौर्ख्यप्राज्ञपुरुषासंयोगकृतात्, अनर्थ्यसंयोगाद् वा अनर्थावहानां मृगयाद्यूतस्त्रीपानानां वाग्दण्डपारुष्यार्थदूषणानां नटनर्तकादीनां च संयोगाद् वा, प्राप्यापि महदैश्वर्यं महदिति राज्यमुच्यते तदीश्वरत्वं पितृपैतामहं लब्ध्वापि, न भवति नश्यति।

आत्मवतीत्यादि। आत्मसम्पन्ने आश्रये, लब्धावकाशः प्राप्तावसरः, शास्त्रानुयोगम् अर्थशास्त्रादिविषयप्रश्नोत्तरं, दद्यात्। किमर्थमिदमित्याह — अविसंवादादीत्यादि। स्वोक्तेऽर्थे शास्त्राविसंवादिनि हि सति निश्चितशास्त्रज्ञभावः स्थिरामधिकारपदे स्थितिमनुजीवी प्राप्नोति। लक्षणपरीक्षानन्तरं लक्ष्यपरीक्षामाह — मतिकर्मसु पृष्ट इति। बुद्धिसाध्यकर्मविषयेऽनुयुक्तः, तदात्वे

संयुक्तं समर्थं प्रवीणवदपरिषद्भीरुः कथयेत् । ईप्सितः पणेत — धर्मार्थानुयोगम् अविशिष्टेषु बलवत्संयुक्तेषु दण्डधारणं मत्संयोगे तदात्वे च दण्डधारणमिति न कुर्याः । पक्षं वृत्तिं गुह्यं च मे नोपहन्याः । संज्ञया च त्वां कामक्रोधदण्डनेषु वारयेयम् इति ।

आयुक्तप्रदिष्टायां भूमावनुज्ञातः प्रविशेत् । उपविशेच्च पार्श्वतः सन्निकृष्टविप्रकृष्टः । वरासनं विगृह्यकथनमसभ्यमप्रत्यक्षमश्रद्धेयमनृतं च वाक्यमुच्चैरनर्माणि हासं वातष्ठीवने च शब्दवती न कुर्यात् । मिथः कथनमन्येन, जनवादे द्वन्द्वकथनं, राज्ञो वेषमुद्धतकुहकानां च, रत्नातिशयप्रकाशाभ्यर्थनम्, एकाक्ष्योष्ठनिर्भोगं, भ्रुकुटीकर्म, वाक्यावक्षेपणं

चायत्यां च समर्थं तत्काले, चोत्तरकाले च क्षमं, धर्मार्थसंयुक्तं, प्रवीणवत मतिकर्मनिपुणैस्तुल्यम्, अपरिषद्भीरुः सभाकम्परहितः, कथयेत् । ईप्सित इति । लक्ष्यलक्षणकोविदत्वमवधार्य राज्ञा स्वामात्यकर्मणे प्रार्थितोऽनुजीवी, पणेत संविदं कुर्यात्, राज्ञा सह । केन प्रकारेण, धर्मार्थानुयोगमविशिष्टेषु गुणोत्कर्षरहितेषु धर्मार्थप्रश्नं, बलवत्संयुक्तेषु दण्डधारणं, मत्संयोगे तदात्वे च दण्डधारणं मत्सम्बद्धे विषये सद्यश्च दण्डप्रयोगम्, इति एवञ्जातीयं, न कुर्याः । पक्षं स्ववर्गं, वृत्तिं व्यापारं, गुह्यं च रहस्यं च, मे नोपहन्याः । संज्ञया च अक्षिनिकोचभ्रूविकारादिचेष्टया च, त्वां, कामक्रोधदण्डनेषु कामक्रोधनिमित्तकेषु मिथ्यादण्डनेषु, प्रवर्तमानमिति शेषः, वारयेयम्, इति अनेन प्रकारेण ।

आयुक्तप्रदिष्टायामिति । आयुक्ताः अधिकारपदनियुक्ताः तत्प्रवेशार्हायाम्, 'आदिष्टः प्रदिष्टायामि'त्यपपाठः । भूमौ अनुज्ञातः प्रविशेत् । उपविशेच्च पार्श्वतः राज्ञः पार्श्वे न त्वग्रे श्वासादिस्पर्शभयात् । कथम्भूतः, सन्निकृष्टविप्रकृष्टः अनतिसन्निकृष्ट इत्यर्थः । खग्रन्थे 'विप्रकृष्टे'ति न पठ्यते । **वरासनमिति** । श्रेष्ठमासनम् । परासनमिति पाठेऽपि स एवार्थः । विगृह्यकथनम् आक्षिप्य कथनम्, असभ्यम् अश्लीलम्, अप्रत्यक्षं परोक्षार्थविषयम्, अश्रद्धेयम् अविश्वास्यम्, अनृतं च असत्यं च, वाक्यम्, उच्चैरनर्मणि हासं नर्मानवसरे उच्चैर्हसितं, शब्दवती वातष्ठीवने च सशब्दे उपर्यधोवातवृत्तिष्ठीवने च, न कुर्यात् । **मिथः कथनमन्येनेति** । राजसन्निधावन्येन रहसि मन्त्रणं, जनवादे द्वन्द्वकथनं समूहवादे 'इदमेवं भवति न त्वद' इति विधिनिषेधादिकथनं, राज्ञो वेषम्, उद्धतकुहकानां च वेषम् उद्धतानां पाषण्डादीनां

च ब्रुवति । बलवत्संयुक्तविरोधं स्त्रीभिः स्त्रीदर्शिभिः सामन्तदूतैर्द्वेष्यापक्षावक्षिप्तानर्थ्यैश्च प्रतिसंसर्गमेकार्थचर्यां सङ्घातं च वर्जयेत् ॥

अहीनकालं राजार्थं स्वार्थं प्रियहितैः सह ।
परार्थं देशकाले च ब्रूयाद् धर्मार्थसंहितम् ॥
पृष्टः प्रियहितं ब्रूयान्न ब्रूयादहितं प्रियम् ।
अप्रियं वा हितं ब्रूयाच्छृण्वतोऽनुमतो मिथः ॥
तूष्णीं वा प्रतिवाक्ये स्याद् द्वेष्यादींश्च न वर्णयेत् ।
अप्रिया अपि दक्षाः स्युस्तद्भावाद् ये बहिष्कृताः ॥

च वेषं, रत्नातिशयप्रकाशाभ्यर्थनं राजधार्यमाणरत्नगतस्यातिशयस्य स्वस्मै प्रकाशनप्रार्थनम्, एकाक्ष्योष्ठनिर्भोगम् एकस्याक्ष्णः ओष्ठस्य च वक्रत्वं, भ्रुकुटीकर्म भ्रूभङ्गं, वाक्यावक्षेपणं च ब्रुवति राज्ञि कथयति सति मध्ये वाक्यकथनं च, न कुर्यादिति वर्तते । **बलवत्संयुक्तविरोधमिति** । बलवत्सम्बन्धिभिः सह विरोधं, स्त्रीभिः, स्त्रीदर्शिभिः स्त्रीदर्शनशीलैरन्तर्वंशिकैः, सामन्तदूतैः विषयानन्तरनृपतिदूतैः, द्वेष्यापक्षावक्षिप्तानर्थ्यैश्च राज्ञो द्वेष्यैरक्षिगतैः अपक्षैरसहायैरुदासीनैः अवक्षिप्तैरपहृतार्थमानैः अनर्थ्यैर्नटनर्तकादिभिश्च, प्रतिसंसर्गं सख्यम्, एकार्थचर्यां बहूनामर्थिनां मध्ये एकार्थानुष्ठानं, सङ्घातं च सङ्घसमवायं च, वर्जयेत्, अर्थात् प्रधानामात्यादिः ॥

विधिशेषं श्लोकैराह— **अहीनकालमित्यादि** । राजार्थं राजप्रयोजनम्, अहीनकालं ब्रूयात् विना कालविलम्बं सद्य एव कथयेत् । स्वार्थम् आत्मप्रयोजनं, प्रियहितैः सह राज्ञः प्रियैर्हितैश्च जनैः सह, ब्रूयात्, परार्थं परस्य प्रयोजनं, देशकाले समुचितेऽवसरे, ब्रूयात् । धर्मार्थसंहितमिति सर्वशेषः यद्यद् ब्रूयात् तत् सर्वं धर्मेणार्थेन च संयुक्तं स्यादित्यर्थः ॥

पृष्ट इति । राज्ञानुयुक्तः, प्रियहितं ब्रूयात् । अहितं प्रियं न ब्रूयात् । अप्रियं वा हितं ब्रूयात् । कथम्भूतस्य कथम्भूतो ब्रूयात, शृण्वतोऽनुमतो मिथः ब्रूहीत्यभ्यनुज्ञातो रहसि श्रद्धयाकर्णयतः ॥

अप्रियं हितमुच्यमानं न शृणुयादिति मन्यमानः किं कुर्यादिति सार्धश्लोकेनाह — **तूष्णीं वा प्रतिवाक्ये स्यादिति** । प्रतिवाक्यदानप्रसङ्गे अप्रियकथनभये सति मौनमवलम्बेत । द्वेष्यादींश्च न वर्णयेत् राज्ञो द्वेष्यादिवर्णनं न कुर्यात् । कुत इत्याह — ये, तद्भावाद् बहिष्कृताः राजच्छन्दाननुवर्तिनः

अनर्थ्याश्च प्रिया दृष्टाश्चित्तज्ञानानुवर्तिनः ।
अभिहास्येष्वभिहसेद् घोरहासांश्च वर्जयेत् ॥
परात् सङ्क्रामयेद् घोरं न च घोरं स्वयं वदेत् ।
तितिक्षेतात्मनश्चैव क्षमावान् पृथिवीसमः ॥
आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।
अग्नाविव हि संप्रोक्ता वृत्ती राजोपजीविनाम् ॥
एकदेशं दहेदग्निः शरीरं वा परं गतः ।
सपुत्रदारं राजा तु घातयेद् वर्धयेत वा ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
चतुर्थोऽध्यायः अनुजीविवृत्तम्,
आदितश्चतुर्नवतितमः ॥

ते दक्षा अपि अप्रियाः स्युः । चित्तज्ञानानुवर्तिनः राजच्छन्दानुवर्तिनः, अनर्थ्याश्च अनर्थावहाः नटनर्तकादयोऽपि, प्रियाः दृष्टाः ॥

अभिहास्येष्विति । हसति राज्ञि तदभिमुखहसनीयेष्वर्थेषु, अभिहसेत् अभिमुखं हसेत् न तु काष्ठवन्निर्विकारस्तिष्ठेत् । घोरहासान् वर्जयेच्च ॥

परादिति । परद्वारेण, घोरम् अश्राव्यमर्थं, संक्रामयेत् राजानं ग्राहयेत्, न च घोरं स्वयं वदेत् । 'परे वदेदि'ति मूलमातृकापाठे तु परविषय इत्यर्थः । क्षमावान् पृथिवीसमः, आत्मनश्चैव, घोरम् उपनतं, तितिक्षेत सहेत ॥

अग्निसेवनवद् राजसेवनं सुलभापायमिति कृत्वा तत् कुर्वता स्वात्मरक्षायां प्रतिजागरितव्यमित्याह — आत्मरक्षा हीत्यादि ॥

अग्न्यपेक्षया राज्ञो व्यतिरेकमप्याह — एकदेशं दहेदग्निरित्यादि । सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
चतुर्थोऽध्यायः अनुजीविवृत्तम्,
आदितश्चतुर्नवतितमः ॥

९३. प्रक. समयाचारिकम् ।

नियुक्तः कर्मसु व्ययविशुद्धमुदयं दर्शयेत् ।

आभ्यन्तरं बाह्यं गुह्यं प्रकाश्यमात्ययिकमुपेक्षितव्यं वा कार्यम् 'इदमेवम्' इति विशेषयेच्च ।

मृगयाद्यूतमद्यस्त्रीषु प्रसक्तं चानुवर्तेत प्रशंसाभिः । आसन्नश्चास्य व्यसनोपघाते प्रयतेत । परोपजापातिसन्धानोपधिभ्यश्च रक्षेत् ।

इङ्गिताकारौ चास्य लक्षयेत् । कामद्वेषहर्षदैन्यव्यवसायभयद्वन्द्वविपर्यासमिङ्गिताकाराभ्यां हि मन्त्रसंवरणार्थमाचरन्ति प्राज्ञाः ।

समयाचारिकमिति सूत्रम् । समयस्य व्यवस्थायाः आचारोऽनुष्ठानं समयाचारः तमधिकृत्य प्रवृत्तमित्यर्थः । पूर्वाध्याये मन्त्रिणां वृत्तमुक्तम् । तन्मूलत्वात् कोशस्य राज्यफलत्वाच्च अर्थाधिकारिणां वृत्तमिहोच्यत इति सङ्गतिः ।

नियुक्तः कर्मस्विति । कर्मसु नियुक्तः समाहर्तृसन्निधातृप्रभृतिपुरुषः, व्ययविशुद्धम्, उदयम् आयं, दर्शयेत् ।

आभ्यन्तरमिति । अभ्यन्तरभवं दुर्गसम्बन्धि, बाह्यं बहिर्भवं जनपदसम्बन्धि इदमुभयविधं कार्यं, गुह्यं प्रकाश्यम् आत्ययिकम् उपेक्षितव्यं वेति चतुर्विधम्, इदमेवमिति विशेषयेत् इदमीदृशमिति राज्ञे निवेदयेत् लेख्ये निवेशयेच्च । तत्र गुह्यं राजरहस्यादि, प्रकाश्यं राजसर्वज्ञत्वख्यापनादिकं कोशाभिसंहरणोक्तम्, आत्ययिकं सद्योऽननुष्ठाने हीयमानम्, उपेक्षितव्यं सद्योऽननुष्ठानेऽप्यहीयमानम् ।

मृगयाद्यूतमद्यस्त्रीषु प्रसक्तं चेति । तथाविधं राजानम्, अनुवर्तेत प्रशंसाभिः श्लाघावचनैरनुसरेत् । अनुवर्तनफलमाह—आसन्नश्च, अस्य राज्ञः, व्यसनोपघाते, प्रयतेत प्रकर्षेणोत्सहेत । परोपजापातिसंधानोपधिभ्यश्च परप्रयुक्तात् उपजापाद् भेदात् अतिसन्धानाद् वञ्चनात् उपधेस्तीक्ष्णरसदादेश्च, रक्षेत् ।

इङ्गिताकारौ चेति । इङ्गितमयथापूर्वमाचरणम् आकारो मुखरागादिः तौ च, अस्य, लक्षयेत् सूक्ष्मेक्षिकया जानीयात् । कामद्वेषहर्षदैन्यव्यवसायभयद्वन्द्वविपर्यासं कामादीनां व्यत्ययेन प्रदर्शनम्, इङ्गिताकाराभ्यां प्राज्ञाः आचरन्ति हि । किमर्थमाचरन्ति, मन्त्रसंवरणार्थं मन्त्रगोपनार्थम् । अतो दुर्लक्षौ मतिमतामपीङ्गिताकाराविति तद्दर्शनेऽवधानविशेषो देय इति भावः ।

दर्शने प्रसीदति । वाक्यं प्रतिगृह्णाति । आसनं ददाति । विविक्ते दर्शयते । शङ्कास्थाने नातिशङ्कते । कथायां रमते । परज्ञाप्येष्वपेक्षते । पथ्यमुक्तं सहते । स्मयमानो नियुङ्क्ते । हस्तेन स्पृशति । श्लाघ्येनोपहसति । परोक्षे गुणं ब्रवीति । भक्ष्येषु स्मरति । सह विहारं याति । व्यसनेऽभ्यवपद्यते । तद्भक्तीन् पूजयति । गुह्यमाचष्टे । मानं वर्धयति । अर्थं करोति । अनर्थं प्रतिहन्ति इति तुष्टज्ञानम् ।

एतदेव विपरीतमतुष्टस्य । भूयश्च वक्ष्यामः—सन्दर्शने कोपः, वाक्यस्याश्रवणप्रतिषेधौ, आसनचक्षुषोरदानं, वर्णस्वरभेदः, एकाक्षिभ्रुकुट्योष्ठनिर्भोगः, स्वेदश्च, श्वासस्मितानामस्थानोत्पत्तिः, परमन्त्रणम्,

प्रीतिलिङ्गान्याह— दर्शन इति । दर्शने, प्रसीदति तुष्यति । वाक्यं प्रतिगृह्णाति सादरं शृणोति । आसनं ददाति । विविक्ते दर्शयते जनान्तराप्रवेश्येऽन्तःपुरादावपि दर्शनावसरं ददाति । शङ्कास्थाने नातिशङ्कते, विश्वासात् । कथायां सम्भाषणप्रबन्धे, रमते । परज्ञाप्येषु अपेक्षते अन्यैर्विज्ञाप्येषु कार्येष्वपि प्रियपुरुषसाचिव्यमिच्छति । परिज्ञाप्येष्विति पाठेऽप्येष एवार्थः । पथ्यम् उक्तं सहते अर्थात् परुषमपि । स्मयमानो नियुङ्क्ते 'त्वमेवेदं कर्तुमर्हसी'ति सस्मितं कार्ये प्रेरयति । हस्तेन स्पृशति स्पृशन् वक्ति । श्लाघ्येन उपहसति श्लाघनीयेन कर्मणा कृतेन सम्मुखे परिहसति । परोक्षे गुणं ब्रवीति अप्रत्यक्षे श्लाघते । भक्ष्येषु स्मरति, संविभागार्थम् । सह विहारं सञ्चारं याति । व्यसने अभ्यवपद्यते तत्परिहारसाहाय्यमाचरति । तद्भक्तीन् पूजयति तदनुरक्तान् बहुमन्यते । गुह्यं रहस्यम् आचष्टे । मानं वर्धयति उत्कृष्टपदारोपणादिना बहुमानमुपचिनोति । अर्थं करोति धर्मार्थकामलक्षणमीप्सितं साधयति । अनर्थं प्रतिहन्ति निवारयति । इति तुष्टज्ञानम् उक्तप्रकारः प्रीतज्ञानोपायः ।

एतदेव विपरीतमतुष्टस्येति । उक्तमेव दर्शनप्रसादादिकं विपरीतम् अर्थादप्रसादादिकमतुष्टस्य ज्ञानोपायः । भूयश्च अधिकं च लिङ्गं, वक्ष्यामः । तन्निर्दिशति—**सन्दर्शने कोप** इत्यादि । सः, वाक्यस्याश्रवणप्रतिषेधौ, आसनचक्षुषोरदानम् आसनस्याप्रतिपादनं दृष्ट्याप्यसम्भावनं च, वर्णस्वरभेदः वर्णभेदः स्वरभेदश्च, एकाक्षिभ्रुकुट्योष्ठनिर्भोगः काकाक्ष्यवलोकनं भ्रूभङ्गः ओष्ठवक्रीकरणं च, स्वेदश्च, श्वासस्मितानामस्थानोत्पत्तिः दीर्घनिःश्वासानां

अकस्माद् व्रजनं, वर्धनम् अन्यस्य, भूमिगात्रविलेखनम्, अन्यस्योपतोदनं, विद्यावर्णदेशकुत्सा, समनिन्दा, प्रतिदोषनिन्दा, प्रतिलोमस्तवः, सुकृतानवेक्षणं, दुष्कृतानुकीर्तनं, पृष्ठावधानम्, अतित्यागः, मिथ्याभिभाषणं, राजदर्शिनां च तद्वृत्तान्यत्वम् ।

वृत्तिविकारं चावेक्षेताप्यमानुषाणाम् ।

अयमुच्चैः सिञ्चतीति कात्यायनः प्रवव्राज ।

हासानां चाकारणोत्पत्तिः, परिमन्त्रणम् अन्येन सहमन्त्रणम्, अकस्माद् व्रजनं प्रयोजनं विना गमनं, वर्धनमन्यस्य विहायेममितरस्यादरणं, भूमिगात्रविलेखनं भूमौ गात्रे वा नखेन विलेखनम्, अन्यस्योपतोदनं परस्य ताडनं, विद्यावर्णदेशकुत्सा विद्यावर्णदेशानां तदीयानां निन्दनं, समनिन्दा तत्तुल्यकर्मणो निन्दा, समदोषनिन्देत्यपि पाठः । प्रतिदोषनिन्दा तद्गतदोषसमानस्य दोषस्य निन्दा, प्रतिलोमस्तवः तद्विरुद्धवृत्तीनां श्लाघनं, सुकृतानवेक्षणं तेन सम्यक् कृतस्यागणनं, दुष्कृतानुकीर्तनम् असुष्ठुकृतस्यासकृत् संशब्दनं, पृष्ठावधानं प्रतिगच्छतस्तस्य पृष्ठतो विलोकनम्, अतित्यागः विसृष्टप्रत्यागतस्य कार्यापदेशेन पुनःपुनर्विसर्जनं, मिथ्याभिभाषणं भावशून्यं सम्भाषणं, राजदर्शिनां तद्वृत्तान्यत्वं च राजसेवकानां तस्मिन् वृत्तिभेदश्च ।

वृत्तीत्यादि । अमानुषाणामपि पक्ष्यादीनामपि अपिशब्दान्मनुष्याणामपि, वृत्तिविकारं च वृत्तिभेदं च, अवेक्षेत लक्षयेत् ।

तत्र मानुषाणां तदवेक्षणमुदाहरति — अयमित्यादि । अयम् उदकसेचकः, उच्चैः ऊर्ध्वं, सिञ्चति इति हेतोः, कात्यायनः तदाख्यो राजमन्त्री, प्रवव्राज राजानं परित्यज्य गतः । अत्रैष इतिहासः — पौण्ड्रदेशे किल सोमदत्तो नाम राजा क्वचिदपराधे निमित्ते स्वपुत्रं बन्धनागारे निवेशयितुं मन्त्रिणा कात्यायनेन सह संमन्त्रितवान् । इममर्थमिङ्गिताकाराभ्यां तत्पक्ष्या विज्ञाय पुत्रमन्यत्र निन्युः । राजा तु मन्त्रिणमेव मन्त्रभेत्तारं मन्यमानस्तद्वधाय स्वसेवकानादिदेश । श्रुततदादेशरहस्यः कश्चिदुदकसेचकः आगच्छति कात्यायने जलमूर्ध्वतो विकिरन्नसिञ्चत् । मन्त्री च मद्देहजलबिन्दुपातपरिहारायाधः शनैः सेचनं ह्यो यावत् कृतवंतोऽद्येदमुच्चैरुदकसेचनं किमपि मयि राजप्रकोपसूचकं वृत्तिवैकृतमिति जानन् राजानं परितत्याजेति ।

क्रौञ्चोऽपसव्यम् इति कणिङ्को भारद्वाजः ।
तृणमिति दीर्घश्चारायणः ।
शीता शाटीति घोटमुखः ।
हस्ती प्रत्यौक्षीदिति किञ्जल्कः ।

अथामानुषाणामाह — **क्रौञ्च** इति । क्रुङ्नामा पक्षिविशेषः, अपसव्यं, गत इति शेषः । इति हेतोः, कणिङ्कः तदाख्यः, भारद्वाजः भारद्वाजगोत्रः, प्रवव्राजेत्यनुवर्तते । अयमिहेतिहासः — कोसलेषु किल परन्तपस्य राज्ञोऽनुजीवी कणिङ्को नामार्थशास्त्रविचक्षण आसीत् । तस्य राजकुलगमने क्रौञ्चः प्रदक्षिणं नित्यं गच्छेत् । कणिङ्कः कचिद् दिवसे स्वस्मिन् अन्तःपुरस्थे सति समागत इति कृत्वा तं राजा क्रुध्यन् निनिन्द । श्रुततन्निन्दः क्रौञ्चस्तस्यापसव्यं गतः । तदपसव्यगमनानुमितराजकोपश्च कणिङ्को राजानं परित्यक्तवानिति ।

तृणमिति दीर्घश्चारायण इति । तृणमिति ज्ञात्वा चारायणगोत्रो दीर्घः प्रवव्राज । इदमिहैतिह्यं — मगधेषु पुरा बालः कश्चिद् राजा बभूव । तस्याचार्यो दीर्घो नाम कश्चित् तत्पितुः प्रिय आसीत् । आगते तस्मिन् राज्ञो माता स्वभर्तृभक्त्या तं प्रत्युत्थानादिना नित्यमुपचचार । अथ पुत्रः प्राप्तवयस्को मात्रा क्रियमाणं दीर्घस्योपचारमसहमानो मातरं कचिद् दिने पप्रच्छ— 'किमर्थं ब्राह्मणोऽयमुपचर्यते' इति । तं च राजमाता जगाद— 'विद्वानयमस्माकमाचार्यः पितुस्ते परमः स्निग्धो बहुमाननीयश्च ते । तमेनं भक्तचेलदानादिना पूजये'ति । तच्छ्रुत्वा सद्य एव तृणपर्यवच्छन्नमन्नं कृत्वा तस्मै प्रायच्छत् । तेन परिज्ञाततदनादरो दीर्घस्तं परित्यक्तवानिति ।

शीता शाटीति घोटमुख इति । वस्त्रं शीतमित्यनेनेङ्गितेन घोटमुखो नामाचार्यः प्रवव्राज । इहेदं पुरावृत्तम् — अवन्तिष्वंशुमतो नाम राज्ञः पुत्रं घोटमुखो नीतिविद्यामध्यापयन्नुवास । तस्मै च राजा कस्मिंश्चिन्निमित्ते जातु चुक्रोध । तमर्थं विदित्वा गुरुभक्तो राजपुत्र इङ्गितं स्वगुरवे दर्शयाम्बभूव । स हि स्नात्वा गच्छन् नियमेन वस्त्रं निष्पीडितं कण्ठे धरति । तस्मिंस्तु दिने स्नात्वा वस्त्रं शीतमिति वदन् वस्त्ररिक्तकण्ठो जगाम । अनेनेङ्गितेन राज्ञ आत्मनि भावविकारं ज्ञात्वा घोटमुखस्तं तत्याजेति ।

हस्ती प्रत्यौक्षीदिति किञ्जल्क इति । गजः प्रतिसिक्तवानित्यतः किञ्जल्कः प्रवव्राज । तथाचेतिहासः — वङ्गेषु शतानन्दस्य राज्ञोऽनुजीवी

रथाश्वं प्राशंसीदिति पिशुनः ।

प्रतिरवणे शुनः पिशुनपुत्रः । इति ।

अर्थमानावक्षेपे च परित्यागः । स्वामिशीलमात्मनश्च किल्बिषमुपलभ्य वा प्रतिकुर्वीत । मित्रमुपकृष्टं वास्य गच्छेत् ॥

किञ्जल्को नामाचार्य आसीत् । सोऽनुदिनं राजौपवाह्यं हस्तिनं प्रतिलालयन्तमग्रे क्षणमुपलाल्य पश्चाद् राजकुलं गच्छेत् । कदाचिद् राजा त हस्तिनमधिरूढ आचार्यद्रोहममन्त्रयत । श्रुतार्थो हस्ती पुष्करजलैराचार्यमसिञ्चत् । अपूर्वेण तेन जलसेकेङ्गितेन भावविकारमात्मनि राज्ञो विज्ञाय किञ्जल्कस्ततः प्रव्रजित इति ।

रथाश्वं प्राशंसीदिति पिशुन इति । इयमिह कथा — पिशुनो नामाचार्य उज्जयिन्यां प्रद्योतस्य पुत्रं पालकं नीतिविद्यामध्यापयाम्बभूव । अथ समाप्तेऽध्यापने राजा पिशुनस्य धनमपहर्तुममन्त्रयत स्वपुत्रसन्निधौ । तच्छ्रुत्वा पुत्र आचार्यद्रोहं परिजिहीर्षुः स्यन्दनमश्वयुक्तमारुह्याचार्यस्याग्रे स्थित्वा रथाश्वं श्लाघितवान् — अश्वोऽयमेकेनाह्ना त्रिंशतं योजनानि गच्छेदिति । तेनात्मगमनं चोदितं ज्ञात्वा पिशुनस्ततो गत इति ।

प्रतिरवणे शुनः पिशुनपुत्र इति । श्वभषणं श्रुत्वा पिशुनपुत्रः प्रव्रजितः । अत्र चेदमैतिह्यं — पिशुनस्याचार्यस्य पुत्रो बाल्य एवाधीतनीतिशास्त्रतत्त्वः राजानं सेवमानः स्थितः । राजा चैनं विद्वत्तम इत्यनुसरन्नवर्तत । कदाचिद् राजामन्त्रयत — पिशुनपुत्रोऽयं बालत्वाद् मन्त्रिपदायोग्यः । अत आ योग्यवयःप्राप्तेर्बद्ध्वायं रक्षणीयः, अन्यथा देशान्तरं गच्छेदिति । मन्त्रणमिदं श्रुत्वा कुक्कुरः पिशुनपुत्रस्याग्रे बुक्कति स्म । तेनेङ्गितेन राजचित्तवैकृतमनुमाय पिशुनपुत्रः सद्य एव ततो गत इति । इतीति । एवं वृत्तिविकारं ज्ञात्वा राजानं त्यजेदित्यर्थः ।

अर्थमानावक्षेपे च परित्याग इति । अर्थमानहानिकरं च राजानं परित्यजेत् । स्वामीत्यादि । स्वामिशीलं राज्ञः स्वभावम्, आत्मनः किल्बिषं च अपराधं च, उपलभ्य पर्यालोच्य, प्रतिकुर्वीत वा राजकोपस्य प्रतिक्रियां कुर्वीत वा राजानमपरित्यजन् । अस्य स्वामिनः, उपकृष्टं सन्निकृष्टं, मित्रं गच्छेद् वा आश्रयेत वा स्वामिचित्तप्रसादनार्थम् ॥

तत्रस्थो दोषनिर्घातं मित्रैर्भर्तरि चाचरेत्।
ततो भर्तरि जीवेद् वा मृते वा पुनराव्रजेत् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
पञ्चमोऽध्यायः समयाचारिकम्,
आदितः पञ्चनवतितमः ॥

तत्रस्थ इति । राजदुर्गस्थः, मित्रैर्मित्रद्वारेण, भर्तरि, दोषनिर्घातं स्वापराधमार्जनम्, आचरेच्च । ततो दोषमार्जनानन्तरं भर्तरि जीवेद् वा, मृते भर्तरि पुनराव्रजेद् वा ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
पञ्चमोऽध्यायः समयाचारिकम्,
आदितः पञ्चनवतितमः ॥

९४, ९५. प्रक. राज्यप्रतिसन्धानमेकैश्वर्यं च ।

राजव्यसनमेवममात्यः प्रतिकुर्वीत । प्रागेव मरणाबाधभयाद् राज्ञः प्रियहितोपग्रहेण मासद्विमासान्तरं दर्शनं स्थापयेद् 'देशपीडापहममित्रापहमायुष्यं पुत्रीयं वा कर्म राजा साधयति' इत्यपदेशेन राजव्यञ्जनमनुरूपवेलायां प्रकृतीनां दर्शयेत्, मित्रामित्रदूतानां च । तैश्च यथोचितां सम्भाषाम् अमात्यमुखो गच्छेत् । दौवारिकान्तर्वंशिकमुखश्च यथोक्तं राजप्रणिधिमनुवर्तयेत् । अपकारिषु च हेडं प्रसादं वा प्रकृतिकान्तं दर्शयेत् । प्रसादमेवोपकारिषु ।

आप्तपुरुषाधिष्ठितौ दुर्गप्रत्यन्तस्थौ वा कोशदण्डावेकस्थौ कारयेत्, कुल्यकुमारमुख्यांश्चान्यापदेशेन ।

राज्यप्रतिसन्धानमिति सूत्रम् । राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रादीनभिषिच्य परिचिन्तनम् । तदिहोच्यत इति सूत्रार्थः । पूर्वप्रक्रान्तमनुजीविवृत्तं मन्त्रिवृत्तात्मनार्थाधिकारात्मना च द्वाभ्यामध्यायाभ्यां प्रतिपादितं राजस्वास्थ्यदशायाम् । तदस्वस्थतायां मन्त्रिव्यापारोऽधुनाभिधीयते ।

राजव्यसनमिति । राज्ञो व्यसनमस्वास्थ्यम्, एवम् अनेन वक्ष्यमाणेन प्रकारेण, प्रतिकुर्वीत । मरणाबाधभयात् प्रागेव, राज्ञः, प्रियहितोपग्रहेण प्रियहितजनोपसंग्रहेण प्रियहितवचनेन च, मासद्विमासान्तरं मासव्यवहितं द्विमासव्यवहितं च, दर्शनं दिदृक्षुदर्शनावसरदानं, स्थापयेत् नियमयेत् । केनापदेशेन स्थापयेत्, देशपीडापहम्, अमित्रापहम्, आयुष्यमायुष्करं, पुत्रीयं पुत्रोत्पत्त्यर्थं वा, कर्म राजा साधयति इत्यपदेशेन । राजव्यञ्जनं राजचिह्नयुक्तं कमप्यासजनं कृत्वा, अनुरूपवेलायां प्रकृतिदर्शनयोग्ये समये, प्रकृतीनां मित्रामित्रदूतानां च दर्शयेत् । तैः सहावश्यकार्यतया प्रसक्तां सम्भाषां मन्त्रिमुखेन राजा कुर्यान्मौनव्रतमपदिश्येत्याह — तैश्च यथोचितामित्यादि । दिवसाष्टभागकरणीयतया पूर्वमुक्तं राज्ञो व्यापारं द्वाराधिकृतान्तःपुराधिकृतमुखेनानुष्ठापयेदित्याह — दौवारिकेत्यादि । अपकारिष्विति । तेषु, हेडम् अनादरं कोपं, प्रसादं वा, प्रकृतिकान्तं प्रकृतिसम्मतं, दर्शयेत् । प्रसादमेव न तु हेडम्, उपकारिषु दर्शयेत् ।

दुर्गगतौ प्रत्यन्तभूमिगतौ च कोशदण्डावाप्तपुरुषरक्षितौ कृत्वा केनचिद् व्याजेनैकस्थानगतौ कारयेत् । तथा कुलीनान् राजकुमारान् राज्यमुख्यांश्चैकस्थान् कारयेदित्याह — आप्तपुरुषाधिष्ठितावित्यादि ।

यश्च मुख्यः पक्षवान् दुर्गाटवीस्थो वा वैगुण्यं भजेत तमुपग्राहयेत्, बह्वाबाधां वा यात्रां प्रेषयेत् मित्रकुलं वा।

यस्माच्च सामन्तादाबाधं पश्येत्, तमुत्सवविवाहहस्तिबन्धनाश्वपण्यभूमिप्रदानापदेशेन अवग्राहयेत्, स्वमित्रेण वा। ततः सन्धिमदूष्यं कारयेत्।

आटविकामित्रैर्वा वैरं ग्राहयेत्। तत्कुलीनमवरुद्धं वा भूम्येकदेशेनोपग्राहयेत्।

कुल्यकुमारमुख्योपग्रहं कृत्वा वा कुमारमभिषिक्तमेव दर्शयेत्। दाण्डकर्मिकवद् वा राज्यकण्टकानुद्धृत्य राज्यं कारयेत्।

यदि वा कश्चिन्मुख्यः सामन्तादीनामन्यतमः कोपं भजेत, तम् 'एहि राजानं त्वा करिष्यामि' इत्यावाहयित्वा घातयेत्। आपत्प्रतीकारेण वा साधयेत्।

यश्चेति। यश्च मुख्यः, पक्षवान् सहायवान्, दुर्गाटवीस्थो वा दुर्गस्थोऽटवीस्थो वा, वैगुण्यं विक्रियां, भजेत, तम्, उपग्राहयेत् अनुकूलयेत्। बह्वाबाधां वा यात्रां बह्वपायदेशसाधनार्थां यात्रां वा, प्रेषयेत् कारयेत्। मित्रकुलं वा प्रेषयेत् मित्रकुलं प्रति वा तत्साहाय्यार्थं प्रहिणुयात्।

इत्थं स्वविषये कर्तव्यमुक्त्वा परविषये कर्तव्यमाह — **यस्माच्चेति।** **यस्माच्च,** सामन्ताद् भूम्यनन्तरात्, आबाधं, पश्येत् सम्भावयेत्, तम्, उत्सवविवाहहस्तिबन्धनाश्वपण्यभूमिप्रदानापदेशेन उत्सवादिपञ्चकान्यतमव्याजेन, अवग्राहयेत् आनाय्यानुकूलयेत्। स्वमित्रेण वा स्वमित्रद्वारेण वा, तम् अवग्राहयेत्। ततः तन्मुखेन, सन्धिम् अदूष्यं कारयेत्।

आटविकामित्रैर्वेति। आटविकैरमित्रैश्च वा, वैरं ग्राहयेत्, पूर्वोक्तस्य सामन्तस्य। तत्कुलीनं सामन्तकुलोत्पन्नम्, अवरुद्धं वा, भूम्येकदेशेन भूम्येकदेशदानेन, उपग्राहयेत् अर्थात् तद्द्वारेण तं सामन्तं दमयेत्।

त एते राज्ञि म्रियमाणे व्यापाराः। मृते तु कर्तव्यमाह — **कुल्यकुमारमुख्योपग्रहमिति।** राजकुल्यानां राजकुमाराणां राष्ट्रमुख्यानां चोपग्रहं, कृत्वा वा, कुमारम्, अभिषिक्तमेव दर्शयेत्। दाण्डकर्मिकवद् वा दाण्डकर्मिकोक्तरीत्या वा, राज्यकण्टकान् उद्धृत्य राज्यं कारयेत्।

इत्थं स्वविषये कर्तव्यमुक्तम्। परविषये कर्तव्यमाह—**यदि वेत्यादि।** सामन्ताद्यन्यतमः कश्चिन्मुख्यो यदि कुप्येत्, तदा 'बालोऽयं राज्यानर्हः

युवराजे वा क्रमेण राज्यभारमारोप्य राजव्यसनं ख्यापयेत् ।

परभूमौ राजव्यसने मित्रेणामित्रव्यञ्जनेन शत्रोः सन्धिमवस्थाप्यापगच्छेत् । सामन्तादीनामन्यतमं वास्य दुर्गे स्थापयित्वापगच्छेत् । कुमारमभिषिच्य वा प्रतिव्यूहेत । परेणाभियुक्तो वा यथोक्तमापत्प्रतीकारं कुर्यात् ।

एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः ।

नैवमिति भारद्वाजः । प्रम्रियमाणे वा राजन्यमात्यः कुल्यकुमारमुख्यान् परस्परं मुख्येषु वा विक्रामयेत् । विक्रान्तं प्रकृतिकोपेन

प्रकृतिक्षोभपरिहारार्थं केवलमभिषिक्तः । तद् आगच्छ त्वामेवाभिषेक्ष्यामः' इत्युक्त्वा तमानाय्य घातयेत् । यदि स नागच्छेत्, तदा आपत्प्रतीकारोक्तकल्पेन तं साधयेत् ।

उक्तमविद्यमाने युवराजे । यदि स विद्येत, तर्हि तस्मै राज्यभारं जीवत्येव राज्ञि अर्पयित्वा पश्चाद् राजमरणं ख्यापयेदित्याह— **युवराजे वेत्यादि** ।

इत्थं स्वभूमौ राजमरणे राज्यप्रतिसन्धानमुक्त्वा परभूमावाह —**परे**-त्यादि । परभूमौ, राजव्यसने, अमित्रव्यञ्जनेन मित्रेण सह शत्रोः सन्धिम्, अवस्थाप्य स्थापयित्वा, इत्थं परविषयगतकोशदण्डरक्षार्थं संविधानं कृत्वेत्यर्थः, अपगच्छेत् । सामन्तादीनाम् अन्यतमं वा, दुर्गे परकीये, स्थापयित्वा कोशदण्डरक्षार्थं नियुज्य, अपगच्छेत्, पश्चात्कोपाद्यपदेशेनेत्यार्थम् । कुमारं युवराजम्, अभिषिच्य वा, प्रतिव्यूहेत शत्रुं प्रतियुध्येत । परेण शत्रुणा, अभियुक्तो वा, यथोक्तं 'बाह्याभ्यन्तराश्चापदः' 'दूष्यशत्रुसंयुक्ताः' 'अर्थानर्थसंयुक्ताः' इत्यभियास्यत्कर्माधिकरणगतसूत्रत्रयोक्तम् आवलीयसोक्तं च, आपत्प्रतीकारं कुर्यात् । इति राज्यप्रतिसन्धानं व्याख्यातम् । अथैकैश्वर्यमुच्यते ।

एकैश्वर्यमिति सूत्रम् । एकस्यैव राजपुत्रस्य एकातपत्रमैश्वर्यं कर्तव्यमित्येतदुच्यत इति सूत्रार्थः । राज्यप्रतिसन्धानमधस्तादुक्तम् । अमात्यस्यैश्वर्यप्रसङ्गे राजपुत्रस्यैव तत् कर्तव्यमित्यधुनाभिधीयते ।

एवमिति । अनेन प्रकारेण, अमात्यः, एकैश्वर्यं, कारयेत् अर्थाद् राजपुत्रस्य । इति कौटल्यः ।

नैवमिति भारद्वाज इति । अमात्यो राजपुत्रमेकैश्वरं न कुर्यादिति भारद्वाजो मन्यते । तर्हि स किं कुर्यात् तत्राह — **प्रम्रियमाणे वेत्यादि** । अयमर्थः — आसन्नमरणे राज्ञि कुल्यान् कुमारं राष्ट्रमुख्यांश्च परस्परं वा

घातयेत् । कुल्यकुमारमुख्यानुपांशुदण्डेन वा साधयित्वा स्वयं राज्यं गृह्णीयात् । राज्यकारणाद्धि पिता पुत्रान् पुत्राश्च पितरमभिद्रुह्यन्ति; किमङ्ग पुनरमात्यप्रकृतिर्ह्येकप्रग्रहो राज्यस्य । तत् स्वयमुपस्थितं नावमन्येत । स्वयमारूढा हि स्त्री त्यज्यमानाभिशपतीति लोकप्रवादः ।

> कालश्च सकृदभ्येति यं नरं कालकाङ्क्षिणम् ।
> दुर्लभः स पुनस्तस्य कालः कर्म चिकीर्षतः ॥

प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः । राजपुत्रमात्मसम्पन्नं राज्ये स्थापयेत् । संपन्नाभावे व्यसनिनं कुमारं राजकन्यां गर्भिणीं देवीं वा पुरस्कृत्य महामात्रान् सन्निपात्य ब्रूयात् — अयं वो निक्षेपः, पितरमस्यावेक्षध्वं सत्त्वाभिजनमात्मनश्च, ध्वजमात्रोऽयं, भवन्त एव स्वामिनः, कथं वा क्रियताम् इति ।

तथा ब्रुवाणं योगपुरुषा ब्रूयुः — कोऽन्यो भवत्पुरोगादस्माद्राज्ञश्चातुर्वर्ण्यमर्हति पालयितुम् इति । तथेत्यमात्यः कुमारं राजकन्यां

मुख्येषु वा विक्रमयेत् योधयेत् । विक्रान्तं प्रकृतिकोपेन घातयित्वा कुल्यकुमारमुख्यांस्तूष्णींदण्डेन वा घातयित्वा स्वयं राज्यं निष्कण्टकं हरेदमात्यः । कुतः, राज्यहेतोर्हि पिता पुत्रान् पुत्राश्च पितरमभिद्रुह्यन्ति, किमुतामात्यो राज्यैकनियामकः । तस्मात् स्वयमुपनतं राज्यममात्यो न प्रत्याचक्षीत । रन्तुं स्वयमुपगता हि स्त्री प्रत्याख्यायमाना पुरुषमभिशपतीति लोकवादहृष्टान्तेन श्रीरपि स्वयमुपस्थिता नोपेक्षणीयेति ।

अस्मिन्नर्थे श्लोकमप्युदाहरति — **कालश्चेत्यादि** । कर्मकरणाय चिरात् प्रतीक्ष्यमाणं कालं पुरुषः सकृदेव लभते, लब्धमुपेक्षितं तु पुनर्न लभत इत्यतः स सर्वथा नोपेक्षणीय इत्यर्थः ।

तदिदं भारद्वाजमतं प्रतिक्षिपति — **प्रकृतिकोपकमिति** । प्रकृतिकोपकरम् , अधर्मिष्ठं धर्मापेतम् , अनैकान्तिकं नियमेन कार्यासाधकं च, एतत् कुल्यकुमारमुख्यविक्रमणादिकम्, इति कौटल्यः । किं तर्ह्यमात्यः कुर्यादित्याह — **राजपुत्रमात्मसम्पन्नमित्यादि** । व्यसनिनं पानादिप्रसक्तमपि । महामात्रान् राष्ट्रमहत्तरान् युक्तमहत्तरांश्च । सन्निपात्य एकत्र मेलयित्वा । निक्षेपो रक्षणीयपदार्थः । सत्त्वाभिजनं पराक्रमं कुलं च । ध्वजमात्रः पताकास्थानीयः ।

तथा ब्रुवाणमित्यादि । योगपुरुषाः संकेतिताः श्राविताः पुरुषाः ।

गर्भिणीं देवीं वाधिकुर्वीत, बन्धुसम्बन्धिनां मित्रामित्रदूतानां च दर्शयेत् ।

भक्तवेतनविशेषममात्यानामायुधीयानां च कारयेत् । भूयश्चायं वृद्धः करिष्यतीति ब्रूयात् । एवं दुर्गराष्ट्रमुख्यानाभाषेत, यथार्हं च मित्रामित्रपक्षम् । विनयकर्मणि च कुमारस्य प्रयतेत । कन्यायां समानजातीयादपत्यमुत्पाद्य वाभिषिञ्चेत् । मातुश्चित्तक्षोभभयात् कुल्यमल्पसत्त्वं छात्रं च लक्षण्यमुपनिदध्यात् । ऋतौ चैनां रक्षेत् । न चात्मार्थं कञ्चिदुत्कृष्टमुपभोगं कारयेत् । राजार्थं तु यानवाहनाभरणवस्त्रस्त्रीवेश्मपरिवापान् कारयेत् ॥

यौवनस्थं च याचेत विश्रमं चित्तकारणात् ।
परित्यजेदतुष्यन्तं तुष्यन्तं चानुपालयेत् ॥

भवत्पुरोगात् त्वदधिष्ठातृकात् । तथेति योगपुरुषानुमतिं स्वीकृत्य । अधिकुर्वीत अभिषिञ्चेत् । बन्धुसम्बन्धिनां बन्धूनां सम्बन्धिनां च ।

भक्तवेतनविशेषमिति । भक्तस्य वेतनस्य च विशेषं पूर्वापेक्षयाधिक्यम्, अमात्यानाम् आयुधीयानां च, कारयेत् । भूयश्च बहुतरं च, अयं कुमारः, वृद्धः प्राप्तव्यवहारः, करिष्यतीति ब्रूयात् तदुत्साहार्थम् । एवं दुर्गराष्ट्रमुख्यान् दुर्गमुख्यान् राष्ट्रमुख्यांश्च, आभाषेत । यथार्हं च यथोचितं च, मित्रामित्रपक्षम्, आभाषेत । विनयकर्मणि च विद्याशिक्षणव्यापारे च, कुमारस्य, प्रयतेत । कन्यायां राज्याभिषिक्तायां, समानजातीयात् पुरुषात्, अपत्यं पुमपत्यम्, उत्पाद्य वा, अभिषिञ्चेत् । मातुरिति । कुमारमातुः, चित्तक्षोभभयात्, कुल्यं कुलीनम्, अल्पसत्त्वम् अल्पौजसं, छात्रं च, लक्षण्यं सौम्यलक्षणम्, उपनिदध्यात् मातुः समीपे निदध्यात्, अर्थाद् देवतार्चनपरिकर्मपुराणश्रावणाद्यर्थे । ऋतौ च, एनां रक्षेत् । न च, आत्मार्थं, कञ्चिद् उत्कृष्टम् अमात्यपदक्लृप्ताभ्याधिकम्, उपभोगं, कारयेत् । राजार्थं तु, यानवाहनाभरणवस्त्रस्त्रीवेश्मपरिवापान् यानादिषट्कं परिवापं शयनासनादिकं च, कारयेत् ॥

यौवनस्थं चेति । प्राप्तयौवनं सन्तं कुमारं, चित्तकारणात् तदभिप्रायज्ञानार्थं, विश्रमम् आत्मनोऽमात्यकर्मविश्रान्तिं, याचेत । अतुष्यन्तं परित्यजेत् याचितं तं 'याहीं'ति वदन्तं त्यक्त्वा गच्छेत् । तुष्यन्तं चानुपालयेत् 'मा याही'ति वदन्तं, भूयोऽप्युपासीत ॥

निवेद्य पुत्ररक्षार्थं गूढसारपरिग्रहान् ।
अरण्यं दीर्घसत्रं वा सेवेतारुच्यतां गतः ॥
मुख्यैरवगृहीतं वा राजानं तत्प्रियाश्रितः ।
इतिहासपुराणाभ्यां बोधयेदर्थशास्त्रवित् ॥
सिद्धव्यञ्जनरूपो वा योगमास्थाय पार्थिवम् ।
लभेत लब्ध्वा दूष्येषु दाण्डकर्मिकमाचरेत् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे षष्ठोऽध्यायः
राज्यप्रतिसन्धानम् एकैश्वर्यम्, आदितः षण्णवतितमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्य योगवृत्तं
पञ्चममधिकरणं समाप्तम् ॥

निवेद्येति । पुत्ररक्षार्थं, गूढसारपरिग्रहान् गूढपुरुषान् मूलबलम् आपदर्थे पितृपितामहादिस्थापितं निधिपरिग्रहं च, निवेद्य राजपुत्राय ज्ञापयित्वा, अरण्यं सेवेत, तपसे । दीर्घसत्रं वा दीर्घकालनिर्वर्त्यं यज्ञं वा, सेवेत, अनरण्ये । कथम्भूतः, अरुच्यतां गतः अमात्यवृत्तौ अरुचिमत्त्वं प्राप्तः, अथवा राजानं प्रति द्वेष्यतां गतः ॥

मुख्यैरिति । राजमातुलादिभिः, अवगृहीतं वा स्वायत्तीकृतं च राजानं, तत्प्रियाश्रितः तत्प्रियानेवाश्रितः, इतिहासपुराणाभ्यां, बोधयेद् धर्मार्थतत्त्वमित्यार्थम् । कीदृशो बोधयेत्, अर्थशास्त्रवित् पुरुषार्थप्रतिपादकशास्त्राभिज्ञः ॥

तथा बोधयितुमशक्ये राज्ञि का गतिस्तत्राह — **सिद्धव्यञ्जनरूपो वेति** । सिद्धवेषधारी वा, योगम् आस्थाय वर्णकेशान्यथाकरणलक्षणं कपटमाश्रित्य, पार्थिवं राजानं, लभेत वशे कुर्यात् । लब्ध्वा वशे कृत्वा, दूष्येषु मातुलादिषु, दाण्डकर्मिकं तत्प्रकरणोपदिष्टं दण्डकर्म, आचरेत् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
योगवृत्ताधिकरणं पञ्चमं समपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायां योगवृत्ते पञ्चमाधिकरणे षष्ठोऽध्यायः
राज्यप्रतिसन्धानम् एकैश्वर्यम् , आदितः षण्णवतितमः ॥
योगवृत्तं पञ्चमाधिकरणं समाप्तम् ॥

मण्डलयोनिः— षष्ठमधिकरणम् ।

९६. प्रक. प्रकृतिसम्पदः ।

स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः ।

इत्थं वैनयिकादिभिर्योगवृत्तपर्यन्तैः पञ्चभिरधिकरणैस्तन्त्रभागोऽभिहितः । आवाप इदानीमारभ्यते । तन्त्रमिति स्वराष्ट्रानुष्ठानस्य संज्ञा, आवाप इति परराष्ट्रानुष्ठानस्य । तन्त्र्यन्ते विस्तार्यन्ते दुर्गसेतुकर्मवणिक्पथशून्यनिवेशाः खनिद्रव्यहस्तिवनकर्माणि शक्तिसिद्धयो धर्मार्थकामाश्च विजिगीषुणास्मिन्निति तन्त्रव्युत्पत्तिः । आ समन्तात् परराष्ट्रेषु उप्यन्ते प्रयुज्यन्ते इत्यावापाः सन्ध्यादयः तदनुष्ठानमपि तद्विषयत्वादावाप इत्यावापव्युत्पत्तिः । अथवा आ समन्तात् परराष्ट्रप्रयोज्याः सन्ध्यादय उप्यन्ते प्रतिपाद्यन्तेऽत्रेत्यावापो मण्डलयोन्यादिसप्ताधिकरणसमुदाय उच्यते ।

तत्रादिममधिकरणं मण्डलयोनिर्नाम । विजिगीष्वरिमध्यमोदासीनाख्यचतुरवयवं मण्डलं, योनिरुत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः । मण्डलं च तद् योनिश्च मण्डलयोनिः । मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः । मण्डलं हि विजिगीष्वादिलक्षणं परस्परानुष्ठेयस्य सन्धिविग्रहादेः षाड्गुण्यस्य प्रकृतिर्भवतीति ।

तत्र प्रथमं सूत्रं — प्रकृतिसम्पद इति । प्रकृतयः स्वाम्यमात्यराष्ट्रदुर्गकोशदण्डमित्राणि, प्रकृष्टं परस्परमुपकुर्वन्तीति व्युत्पत्तेः, तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः । 'लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नमाश्रयेत' इत्युक्तमधस्तात् । तत्रेयमात्मसम्पद् एषा प्रकृतिसम्पदिति विभागस्त्वधुना प्रदर्श्यते ।

प्रकृतीराह — **स्वाम्यमात्येत्यादि** । स्वाम्यादयः सप्त । तत्र स्वामी अमात्यादीनां पञ्चानां द्रव्यप्रकृतीनामधिपतिः । स द्विधा राजा युवराजश्चेति । अमात्याः बुद्धिसहायाः, ते च त्रयश्चत्वारो द्वादश षोडश विंशतिरित्युक्ता मन्त्राधिकारे । जनपदो ग्रामादिभेदेनाष्टविधः । दुर्गम् 'अन्तर्द्वीपमि'त्यादिना विभक्तम् । कोशो रत्नसारफल्गुकुप्यभेदाच्चतुर्विधः । दण्डश्चतुर्विधो रथगजतुरगपदातिभेदात् । मित्रं सहजकृत्रिमप्राकृतभेदेन त्रिप्रकारम् । सप्तैतानि अन्योन्यसहकारीणि त्रिविष्टब्धकवदन्योन्याश्रयाणि परस्परं प्रकृष्टमुपकुर्वन्तीत्यतः प्रकृतय इत्याख्यायन्ते ।

तत्र स्वामिसम्पत् । महाकुलीनो दैवबुद्धिसत्त्वसम्पन्नो वृद्धदर्शी धार्मिकः सत्यवागविसंवादकः कृतज्ञः स्थूललक्षो महोत्साहोऽदीर्घसूत्रः शक्यसामन्तो दृढबुद्धिरक्षुद्रपरिषत्को विनयकाम इत्याभिगामिका गुणाः ।

शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः ।

शौर्यममर्षः शीघ्रता दाक्ष्यं चोत्साहगुणाः ।

वाग्मी प्रगल्भः स्मृतिमतिबलवानुदग्रः स्ववग्रहः कृतशिल्पो

तेषु स्वामिनः प्राधान्यात् प्रथमं स्वामिसम्पदमाह — स्वामिसम्पदिति । उच्यत इति शेषः । सा च द्विविधा आभिगामिकगुणा इत्यात्मसम्पदिति च । तत्राभिगामिकान् गुणान् प्रथममाह — महाकुलीन इत्यादि । महाकुलीनः सूर्यसोमादिवंशोत्पन्नः श्रुतशीलैश्वर्ययुक्तश्च, दैवबुद्धिसत्त्वसम्पन्नः दैवसम्पन्नः दैवं पौर्वदेहिकं शुभकर्म अल्पप्रयत्नमात्रकार्यसिद्ध्यानुमेयं तत्सम्पन्नः बुद्धिसम्पन्नः शुश्रूषाश्रवणादिबुद्धिगुणयुक्तः सत्त्वसम्पन्नश्च सत्त्वं धैर्यं व्यसनाभ्युदययोर्निर्विकारता तद्युक्तश्च, वृद्धदर्शी ज्ञानोत्कृष्टदर्शनशीलः, धार्मिको धर्मानुष्ठानपरः, सत्यवाक् तथ्यभाषी, अविसंवादकः वचनकर्मणोस्तुल्यार्थः, कृतज्ञः उपकारस्मर्ता, स्थूललक्षो महेच्छो महादाता च, महोत्साहः प्रशस्तव्यवसायः, अदीर्घसूत्रः क्षिप्रकारी, शक्यसामन्तः पीडयितुं कर्शयितुमुच्छेत्तुं च शक्याः विषयान्तरभूपा यस्य स तथाभूतः, दृढबुद्धिः अभग्ननिश्चयः, दृढभक्तिरिति पाठे त्वभेद्यस्नेहः, अक्षुद्रपरिषत्को गुणवत्परिवारः, विनयकामः शास्त्रसंस्कारार्थी, इति षोडश, आभिगामिका गुणाः ।

शुश्रूषेत्यादि । शुश्रूषा श्रोतुमिच्छा, श्रवणं शब्दावगमः, ग्रहणमर्थावगमः, धारणम् अवगताविस्मरणं, विज्ञानं विशेषज्ञानम्, ऊहः ज्ञातस्यार्थस्योपपत्तिपरिचिन्तनम्, अपोहो दुष्टपक्षपरित्यागः, तत्त्वाभिनिवेशः गुणवत्पक्षानुष्ठानम्, इति अष्टौ प्रज्ञागुणाः ।

शौर्यमिति । निर्भीकत्वम्, अमर्षः अक्षमा, शीघ्रता क्षिप्रक्रियत्वं, दाक्ष्यं लङ्घनप्लवनादिनैपुण्यं च, उत्साहगुणाः चत्वारः ।

वाग्मीति । अभिसंहितार्थसमर्पणक्षमवाक्यवक्ता, प्रगल्भः असभाकम्पवक्ता, स्मृतिमतिबलवान् स्मृतिरतीतविषया धीः मतिरागामिगोचरा बलं

व्यसने दण्डनाय्युपकारापकारयोर्दृष्टप्रतिकारी ह्रीमानापत्प्रकृत्योर्विनियोक्ता दीर्घदूरदर्शी देशकालपुरुषकारकार्यप्रधानः सन्धिविक्रमत्यागसंयमपणपरच्छिद्रविभागी संवृतोऽदीनाभिहास्यजिह्मभ्रुकुटीक्षणः कामक्रोधलोभस्तम्भचापलोपतापपैशुन्यहीनः शक्तः स्मितोदग्राभिभाषी वृद्धोपदेशाचार इत्यात्मसम्पत् ।

अमात्यसम्पदुक्ता पुरस्तात् ।

शरीरेन्द्रियदार्ढ्यं तद्वान्, उदग्रः चित्तोन्नतिमान्, स्ववग्रहः अकार्यात् सुखनिवार्यः, कृतशिल्पः हस्त्यश्वप्रहरणविद्यानिपुणः, व्यसने दण्डनायी शत्रोर्दैवमानुषव्यसनावसरे स्वसैन्यं तद्विजयाय प्रेषयिता आत्मनो व्यसनावसरे स्वसैन्यं रक्षिता च, उपकारापकारयोर्दृष्टप्रतिकारी शास्त्रदृष्टप्रतिकारविधायी, ह्रीमान् लज्जावान् अकार्यानुष्ठानविमुख इत्यर्थः । आपत्प्रकृत्योर्विनियोक्ता आपद् दुर्भिक्षं प्रकृतिः स्वास्थ्यं सुभिक्षं तयोर्धान्यादिकं विनियोक्ता सुभिक्षे सञ्चित्य दुर्भिक्षे विनियोक्तेत्यर्थः; अथवा आपदि प्रजायां च धान्यादिविनियोक्ता, दीर्घदूरदर्शी दीर्घकालसम्बद्धमर्थं प्रज्ञया द्रष्टुं दूरदेशसंबद्धमर्थं चारचक्षुषा द्रष्टुं च शीलमस्येति तथाभूतः, देशकालपुरुषकारकार्यप्रधानः स्वसैन्यस्य युद्धोचितो देशः कालः पुरुषकार उत्साहादिशक्तिलक्षणः कार्यं च प्रधानं यस्य स तथाभूतः, सन्धिविक्रमत्यागसंयमपणपरच्छिद्रविभागी विभागो विविच्य ज्ञानं तद्वान् विभागी स सन्ध्यादिषु प्रत्येकं सम्बध्यते । सन्धिविभागी सन्धिप्रयोगाभिज्ञः विक्रमविभागी प्रकाशयुद्धादिप्रयोगज्ञः त्यागविभागी यथादेशकालपुरुषदानसमर्थः संयमपणविभागी प्रजानुपपीडया गूढकोशाभिसंहरणप्रवीणः परच्छिद्रविभागी शत्रोश्छिद्रं पानमृगयादिव्यसनमुपलभ्य तीक्ष्णरसादिप्रयोगसमर्थः, संवृतः संरक्षिताश्रयस्थानो गूढमन्त्रश्च, अदीनाभिहासी दीनानभिहसितुं शीलमस्य नास्तीति तथाभूतः गभीरहासी वा, अजिह्मभ्रुकुटीक्षणः अवक्रसौम्यवीक्षणः, कामादिसप्तकहीनः तत्र स्तम्भ उत्सेकः चापलम् अविवेकानुष्ठानम् उपतापः प्रजाद्रोहः, शेषं प्रतीतं, शक्तः प्रियंवदः, स्मितोदग्राभिभाषी स्मितपूर्वोदाराभिभाषणशीलः, वृद्धोपदेशाचारः विद्यावृद्धोपदेशानुसार्यनुष्ठानः, इत्यात्मसम्पत् ।

अमात्यसम्पदिति । सा, उक्ता पुरस्ताद् वैनयिकाधिकरणे ।

मध्ये चान्ते च स्थानवानात्मधारणः परधारणश्चापदि स्वारक्षः स्वाजीवः शत्रुद्वेषी शक्यसामन्तः पङ्कपाषाणोपरविषमकण्टकश्रेणी-व्यालमृगाटवीहीनः कान्तः सीताखनिद्रव्यहस्तिवनवान् गव्यः पौरुषेयो गुप्तगोचरः पशुमान् अदेवमातृको वारिस्थलपथाभ्यामुपेतः सारचित्रबहुपण्यो दण्डकरसहः कर्मशीलकर्षकोऽबालिशस्वाम्यवरवर्णप्रायो भक्तशुचिमनुष्य इति जनपदसम्पत् ।

दुर्गसम्पदुक्ता पुरस्तात् ।

धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्रस्थूलरत्नहिरण्यो दीर्घामप्यापदमनायतिं सहेतेति कोशसम्पत् ।

जनपदसम्पदमाह — मध्ये चान्ते च स्थानवानिति । मध्ये सीमायां च दुर्गवान्, आत्मधारणः परधारणश्च स्ववास्तव्यजनस्वदेशागन्तुकजनोभयभरणक्षमधान्यादिप्रसोता, आपदि स्वारक्षः विपत्समये शैलवननदीदुर्गवत्तया सुकररक्षः, स्वाजीवः अल्पायासनिष्पाद्यधान्यादिमान्, शत्रुद्वेषी राजशत्रुद्वेषणशीलजनयुक्तः, शक्यसामन्तः दुर्बलसामन्तः, पङ्कपाषाणोपरविषमकण्टकश्रेणीव्यालमृगाटवीहीनः पङ्काद्यष्टकरहितः तत्र कण्टकाश्चोरपारदारिकादयः क्षुद्रशत्रवः श्रेणी राजप्रत्यनीकवृत्तिर्जनसङ्घः शेषं प्रतीतं, कान्तः वृक्षौषधिनदीसरस्तटाकारामादिरमणीयः, सीताखनिद्रव्यहस्तिवनवान् सीता कृष्यभूमिः खनिर्वज्रादिमणिसुवर्णाद्याकरः द्रव्यवनं शाकतिनिशजातीयसारदारूत्पत्तिस्थानं हस्तिवनं गजारण्यं तद्युक्तः, गव्यः गोहितः, पौरुषेयः पुरुषहितः, गुप्तगोचरो लुब्धकादिरक्षितभूमिः, पशुमान् गोच्छागादिबहुलः, अदेवमातृकः नद्यम्बुसम्पद्यमानव्रीहिपालितः, वारिस्थलपथाभ्याम् उपेतः जलमार्गस्थलमार्गयुक्तः, सारचित्रबहुपण्यः महार्घनानाजातीयबहुलक्रय्यवस्तुकः, दण्डकरसहः दण्डोऽपराधप्रायश्चित्तधनं करो राजभागः तावुद्रिक्तावपि सहत इति तथाभूतः, कर्मशीलकर्षकः अनलसकृषीवलः, अबालिशस्वामी अबालिशा बुद्धिमन्तः स्वामिनः स्वाम्यनिर्वाहका यस्मिन् स तथाभूतः, अवरवर्णप्रायः अधमवर्णबहुलः, भक्तशुचिमनुष्यः अनुरक्ताः शुद्धाश्च मनुष्या यस्मिन् स तथाभूतः, इति एवं, जनपदसम्पत् ।

दुर्गसम्पदिति । सा, उक्ता पुरस्ताद् दुर्गविधानप्रकरणे ।

कोशसम्पदमाह — धर्माधिगत इति । न्यायार्जितः धान्यषड्भागपण्यदशभागादिभिः शास्त्रविहितैरुपचित इति यावत्, कैः, पूर्वैः स्वयं व

पितृपैतामहो नित्यो वश्यस्तुष्टभृतपुत्रदारः प्रवासेष्वपि सम्पादितः सर्वत्राप्रतिहतो दुःखसहो बहुयुद्धः सर्वयुद्धप्रहरणविद्याविशारदः सहवृद्धिक्षयिकत्वादद्वैध्यः क्षत्रप्राय इति दण्डसम्पत् ।

पितृपैतामहं नित्यं वश्यमद्वैध्यं महल्लघुसमुत्थमिति मित्रसम्पत् ।

अराजबीजी लुब्धः क्षुद्रपरिषत्को विरक्तप्रकृतिरन्यायवृत्तिरयुक्तो व्यसनी निरुत्साहो दैवप्रमाणो यत्किञ्चनकार्यगतिरननुबन्धः क्लीबो नित्यापकारी चेत्यमित्रसम्पत् । एवंभूतो हि शत्रुः सुखः समुच्छेत्तुं भवति ॥

पूर्वभूपतिभिरात्मना वा, हेमरूप्यप्रायः सुवर्णरजतप्रचुरः, चित्रस्थूलरत्नहिरण्यः बहुविधानि बृहन्ति च रत्नानि हिरण्यानि च नाणकाश्च यस्मिन् सः, दीर्घामप्यापदम् अनायतिं चिरकालानुवृत्तमपि दुर्भिक्षं धनानागमं च, सहेत, अर्थात् कोशः । इति कोशसम्पत् ।

दण्डसम्पदमाह— **पितृपैतामह** इति । पितृपितामहक्रमायातः, अत एव नित्यः स्थिरसेवी, वश्यो वशवर्ती, तुष्टभृतपुत्रदारः सन्तृप्ता यथा स्युस्तथा राज्ञा पुष्टाः पुत्रा दाराश्च यस्य सः, प्रवासेष्वपि सम्पादितः प्रयाणकेष्वपि यथार्हभोगसम्पन्नः कृतः, सर्वत्राप्रतिहतः कचिदप्यप्राप्तभङ्गः, दुःखसहः प्रवासादिक्लेशसहः, बहुयुद्धः बहुसमरपरिचितः, सर्वयुद्धप्रहरणविद्याविशारदः सर्वविधेषु युद्धेषु आयुधविद्यासु च प्रवीणः, सहवृद्धिक्षयिकत्वाद् अद्वैध्यः स्वामिवृद्धौ वृद्धिः स्वामिक्षये क्षय इति स्वामिसमानवृद्धिक्षयत्वाद्धेतोर्द्वैध्यरहितः भेदरहितः अभेद्य इत्यर्थः, क्षत्रप्रायः क्षात्रियप्रचुरः, इति दण्डसम्पत् ।

मित्रसम्पदमाह — **पितृपैतामहमिति** । तथाभूतं, नित्यम् अकृतकं, वश्यम् , अद्वैध्यं, महत् प्रभुमन्त्रोत्साहशक्तियुक्तं, लघुसमुत्थं काले सद्यस्साहाय्योद्यतम्, इति मित्रसम्पत् ।

मित्रसम्पत्प्रसङ्गादमित्रसम्पदमाह — **अराजबीजीत्यादि** । अराजबीजी अराजवंश्यः, लुब्धः, क्षुद्रपरिषत्कः दुष्टपरिवारः, विरक्तप्रकृतिः, अन्यायवृत्तिरयथाशास्त्रानुष्ठानः, अयुक्तः अनुत्थानः, व्यसनी, निरुत्साहः, दैवप्रमाणः पुरुषकारशून्यः, यत्किञ्चनकारी अविवेकानुष्ठानः, अगतिः उच्छिन्नतायामशरणः, अननुबन्धः असहायः, क्लीबो धैर्यहीनः, नित्यापकारी च स्वजनपर-

अरिवर्जाः प्रकृतयः सप्तैताः स्वगुणोदयाः।
उक्ताः प्रत्यङ्गभूतास्ताः प्रकृता राजसम्पदः॥
सम्पादयत्यसम्पन्नाः प्रकृतीरात्मवान् नृपः।
विवृद्धाश्चानुरक्ताश्च प्रकृतीर्हन्त्यनात्मवान्॥
ततः स दुष्टप्रकृतिश्चातुरन्तोऽप्यनात्मवान्।
हन्यते वा प्रकृतिभिर्याति वा द्विषतां वशम्॥
आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा।
नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते॥

इति कौटलीयार्थशास्त्रे मण्डलयोनौ षष्ठाधिकरणे
प्रथमोऽध्यायः प्रकृतिसम्पदः,
आदितः सप्तनवतितमः॥

जनयोः, इत्यरिसम्पत्। एवंभूतो हीति। यथोक्तचतुर्दशगुणयुक्तो हि, शत्रुः, समुच्छेत्तुं, सुखः अनायासेन शक्यः, भवति॥

अरिवर्जा इति। चरमोक्तारिं राजत्वात् स्वामिप्रकृतावन्तर्भूतं वर्जयित्वा, एताः स्वाम्यादयः, सप्त, प्रकृतयः, स्वगुणोदयाः स्वस्वगुणयुक्ताः, उक्ताः। प्रत्यङ्गभूताः परस्परोपकारकतया परस्पराङ्गभूताः, ताः, प्रकृताः स्वस्वकर्मसु व्यापृताः सत्यो, राजसम्पदः, उच्यन्त इति शेषः॥

सम्पादयतीति। आत्मवान् आत्मसम्पद्युक्तः, नृपः, असम्पन्नाः स्वस्वगुणसम्पद्रहिताः, प्रकृतीः, सम्पादयति तत्सम्पन्नाः करोति। अनात्मवान् नृपः, विवृद्धाश्च गुणसमृद्धाश्च, अनुरक्ताश्च, प्रकृतीः, हन्ति॥

तत इति। तद्दोषेण, दुष्टप्रकृतिः दुष्टाः प्रकृतयो यस्य स तथाभूतः, अनात्मवान्, सः राजा, चातुरन्तोऽपि चतुस्समुद्रपर्यन्तभूमीश्वरोऽपि सन्, प्रकृतिभिर्हन्यते वा, द्विषतां, वशम् आयत्ततां, याति वा॥

आत्मवांस्त्विति। प्रकृतिसम्पदा युक्तः, नयज्ञः, आत्मवांस्तु, अल्पदेशोऽपि स्वल्पभूम्यधिपोऽपि सन्, कृत्स्नां पृथिवीं जयत्येव, न हीयते॥

इति कौटलीयार्थशास्त्रव्याख्यायां मण्डलयोनौ षष्ठाधिकरणे
प्रथमोऽध्यायः प्रकृतिसम्पदः,
आदितः सप्तनवतितमः॥

९७. प्रक. शमव्यायामिकम् ।

शमव्यायामौ योगक्षेमयोर्योनिः ।

कर्मारम्भाणां योगाराधनो व्यायामः । कर्मफलोपभोगानां क्षेमाराधनः शमः ।

शमव्यायामयोर्योनिः षाड्गुण्यम् ।

क्षयः स्थानं वृद्धिरित्युदयास्तस्य ।

मानुषं नयापनयौ । दैवमयानयौ ।

शमव्यायामिकमिति सूत्रम् । कर्मफलोपभोगानां क्षेमसाधनं शमः व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः । शक्तिसिद्धियुक्तेन सम्पन्नप्रकृतिना विजिगीषुणा मण्डलेषु षाड्गुण्यं प्रयोक्ष्यमाणेन योगः क्षेम इति द्वयमवश्यं विज्ञातव्यम् । योगक्षेमयोश्च कारणं शमव्यायामाविति तयोरिहाभिधानसङ्गतिः ।

शमव्यायामौ योगक्षेमयोर्योनिरिति । अपूर्वलाभो योगः तस्य व्यायामः कारणम् , आर्जितानां निर्विघ्नोपभोगः क्षेमः तस्य शमः कारणम् । यथासंख्यमिह न विवक्षितम् ।

कर्मारम्भाणामिति । आरभ्यमाणानां कर्मणां स्वविषये दुर्गादीनां परविषये सन्ध्यादीनां च, योगाराधनः योगः कर्मकरपुरुषसम्बन्धस्तदपेक्षितोपकरणसम्बन्धश्च तत्साधकः, व्यायामः व्यायामपदार्थः । कर्मफलोपभोगानां कर्मणां पूर्वोक्तानां फलं स्वविषये रत्नसारफल्गुकुप्यधान्यहिरण्यादि परविषये मित्रभूमिहिरण्यादि तस्य उपभोगाः दृष्टादृष्टार्थां विनियोगाः तेषां, क्षेमाराधनः क्षेमः सर्वविघ्नविघातः तत्साधकः, शमः शमपदार्थः ।

शमव्यायामयोरिति । षाड्गुण्यं षड् गुणाः सन्धिविग्रहादयः, शमव्यायामयोः, योनिः कारणम् ।

क्षय इति । क्षयोऽपचयः, स्थानं तादवस्थ्यं, वृद्धिरुपचयः, इत्येते, तस्य षाड्गुण्यस्य, उदयाः फलानि ।

उदयानां प्रापकं च द्विरूपं कर्म प्रतीतं — मानुषं दैवमिति । तद् विभजते — **मानुषमिति** । मानुषं कर्म , नयापनयौ नयश्चापनयश्चेति द्विप्रकारम् । दैवम्, अयानयौ अयश्चानयश्चेति द्विप्रकारम् ।

दैवमानुषं हि कर्म लोकं यापयति। अदृष्टकारितं दैवम्। तस्मिन्निष्टेन फलेन योगोऽयः। अनिष्टेनानयः।

दृष्टकारितं मानुषम्। तस्मिन् योगक्षेमनिष्पत्तिर्नयः। विपत्तिरपनयः। तच्चिन्त्यम्। अचिन्त्यं दैवमिति।

राजा आत्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं विजिगीषुः। तस्य समन्ततो मण्डलीभूता भूम्यनन्तरा अरिप्रकृतिः। तथैव भूम्येकान्तरा मित्रप्रकृतिः।

दैवमानुषं हीति। दैवमानुषात्मकं हि, कर्म, लोकं यापयति लोकयात्रां वर्तयति। अदृष्टकारितं दैवमिति। अदृष्टेन धर्मात्मकेन वा अधर्मात्मकेन वा कारितं, दैवं भवति। तस्मिन् अर्थाद् धर्मादृष्टकारिते दैवे सति, इष्टेन फलेन अर्थलाभप्रियसङ्गमादिलक्षणेन, योगः, अयः इत्युच्यते। अनिष्टेन फलेनार्थहानिप्रियविरहादिलक्षणेन, योगः अनयशब्दवाच्यः, अर्थादधर्मादृष्टकारिते दैवे सति।

दृष्टकारितं मानुषमिति। प्रभुमन्त्रोत्साहशक्तिहेतुकषाड्गुण्यप्रयोगप्रभवं मानुषं कर्म। तस्मिन् सति, योगक्षेमनिष्पत्तिः अपूर्वलाभकर्मफलोपभोगयोः सिद्धिः, नयः नयपदार्थः अर्थात् सन्ध्यादिसम्यक्प्रयोगः। विपत्तिः अपनयः योगक्षेमानिष्पत्तिरपनयपदार्थः, अर्थात् सन्ध्याद्यसम्यक्प्रयोगः। **तच्चिन्त्यमिति।** मानुषं कर्म प्रत्यक्षत्वाद् विमृश्यानुष्ठेयं योगक्षेमनिष्पत्तये विपत्तिपरिहाराय च। दैवम्, अचिन्त्यं विमष्टुमशक्यमप्रत्यक्षत्वात्। इतिशब्दः शमव्यायामकथनपरिसमाप्त्यर्थः।

अथ मण्डलं वक्तुं तदवधिभूतं विजिगीषुमाह—**राजेति।** सः, आत्मद्रव्यप्रकृतिसम्पन्नः आत्मसम्पद्युक्तः अमात्यादिद्रव्यप्रकृतिपञ्चकसम्पद्युक्तश्च, तत्र महाकुलीनत्वादयो वृद्धोपदेशाचारत्वान्ता गुणाः पूर्वोक्ता आत्मसम्पत्। नयस्य सन्ध्यादिसम्यक्प्रयोगलक्षणस्य, अधिष्ठानम् आश्रयः, विजिगीषुः सामदानाद्युपायैः शत्रून् विजेतुमिच्छुः। तस्य विजिगीषोः, समन्ततः, मण्डलीभूता, भूम्यनन्तरा स्वभूम्यव्यवहिता भूमिः अव्यवहिता भूमी वा अर्थादव्यवहितभूम्यधिपतिः, अरिप्रकृतिः। तथैव, भूम्येकान्तरा देशेनैकेन व्यवहिता एकभूव्यवहिता भूमी वा, मित्रप्रकृतिः।

अरिसम्पद्युक्तः सामन्तः शत्रुः । व्यसनी यातव्यः । अनपाश्रयो दुर्बलाश्रयो वोच्छेदनीयः । विपर्यये पीडनीयः कर्शनीयो वा । इत्यरिविशेषाः ।

तस्मान्मित्रमरिमित्रं मित्रमित्रम् अरिमित्रमित्रं चानन्तर्येण भूमीनां प्रसज्यते पुरस्तात् । पश्चात् पार्ष्णिग्राह आक्रन्दः पार्ष्णिग्राहासार आक्रन्दासार इति ।

भूम्यनन्तरः प्रकृत्यमित्रः तुल्याभिजनः सहजः । विरुद्धो विरोधयिता वा कृत्रिमः ।

अथ शत्रुभेदाश्चत्वार उच्यन्ते — **अरिसम्पद्युक्त** इति । अरिसम्पदा 'अराजबीजी'त्यादिना पूर्वमुक्तया युक्तः, सामन्तः शत्रुः । **व्यसनी यातव्य** इति । शत्रुः मृगयादुर्भिक्षादिव्यसनवान् अभिषेणयितव्यः । अनपाश्रयः दुर्गमित्रहीनः, दुर्बलाश्रयो वा दुर्बलदुर्गमित्रो वा शत्रुः, उच्छेदनीयः । **विपर्यये पीडनीयः कर्शनीयो वेति** । अनपाश्रयत्वविपर्यये मध्यबलदुर्गमित्राश्रयत्वे पीडनीयोऽपकुर्वन्, दुर्बलाश्रयत्ववैपरीत्ये बलवदाश्रयत्वे कर्शनीयः धनदण्डकृशतां नेतव्यः । इति चत्वारः, अरिविशेषाः ।

तस्मादित्यादि । शत्रोरनन्तरं, मित्रम् । तदनन्तरम् अरिमित्रं, तदनन्तरं मित्रमित्रं, तदनन्तरम् अरिमित्रमित्रं च, आनन्तर्येण अव्यवधानेन, भूमीनां, प्रसज्यते, पुरस्ताद् विजिगीषोररिमभियोक्तुं प्रवृत्तस्याग्रतः । त एते एवंसंज्ञकाः पुरस्तात् पञ्च राजानः । पश्चात् किंसंज्ञका इत्याह — **पश्चादित्यादि** । विजिगीषोः पृष्ठतः, पार्ष्णिग्राहः अनन्तरः पार्ष्णिग्राहसंज्ञः शत्रुमित्रं विजिगीषोः पार्ष्णिं शत्रुहिताय गृह्णातीति व्युत्पत्तेः, आक्रन्दः पार्ष्णिग्राहानन्तर आक्रन्दसंज्ञो विजिगीषुमित्रम् 'आगत्य पार्ष्णिग्राहं मे वारये'त्याक्रन्द्यत इति व्युत्पत्तेः, पार्ष्णिग्राहासारः आक्रन्दानन्तरस्तत्संज्ञः अरिमित्रमित्रम् अनुबलदानेन पार्ष्णिग्राहमासरतीति व्युत्पत्तेः, आक्रन्दासारः पार्ष्णिग्राहासारानन्तरस्तत्संज्ञः विजिगीषुमित्रमित्रम् । इति एवं चत्वारः प्रसज्यन्ते । मध्ये च विजिगीषुरेक इत्याहत्य दशराजमण्डलम् ।

अथ शत्र्ववान्तरभेदमाह — **भूम्यनन्तर इत्यादि** । प्रकृत्यमित्रस्तुल्याभिजन इति द्वौ सहजशत्रू । प्रकृत्यामित्रः स्वभूम्यनन्तरः, तुल्याभिजनः समानकुलोत्पन्नो दायादः । अपराद्धोऽपराधयिता च कृत्रिमः शत्रुः ।

भूम्येकान्तरं प्रकृतिमित्रं मातापितृसम्बन्धं सहजं, धनजीवितहेतोराश्रितं कृत्रिममिति।

अरिविजिगीष्वोर्भूम्यनन्तरः संहतासंहतयोरनुग्रहसमर्थो निग्रहे चासंहतयोर्मध्यमः।

अरिविजिगीषुमध्यानां बहिः प्रकृतिभ्यो बलवत्तरः संहतासंहतानामरिविजिगीषुमध्यमानामनुग्रहे समर्थो निग्रहे चासंहतानामुदासीनः। इति प्रकृतयः।

विजिगीषुर्मित्रं मित्रमित्रं वास्य प्रकृतयस्तिस्रः। ताः पञ्चभिरमात्यजनपददुर्गकोशदण्डप्रकृतिभिरेकैकशः संयुक्ता मण्डलमष्टादशकं भवति। अनेन मण्डलपृथक्त्वं व्याख्यातम् अरिमध्यमोदासीनानाम्।

मित्रावान्तरभेदमाह — भूम्येकान्तरमित्यादि। स्वभूम्येकव्यवहितं प्रकृतिमित्रमेकं सहजमित्रं, मातापितृसम्बन्धं मातुलपैतृष्वसेयादिरूपमपरं सहजमित्रम्। धनार्थमुपजीवनार्थं चाश्रितं कृत्रिमं मित्रम्।

मध्यममाह — अरिविजिगीष्वोर्भूम्यनन्तर इत्यादि। तयोर्भूम्यव्यवहितः विदिग्भागाश्रितः, तयोः कृतसन्धिकयोर्विगृहीतयोश्चानुग्रहसमर्थः, विगृहीतयोर्निग्रहे च समर्थो मध्यमः। तस्य भूम्यनन्तरत्वेन शत्रुत्वेऽपि भिन्नलक्षणत्वान्मध्यमसंज्ञा बोद्धव्या।

उदासीनमाह — अरिविजिगीषुमध्यानामित्यादि। अर्यादीनां प्रकृतिभ्यो बाह्यः, बलवतो मध्यमादपि दण्डकोशादितो बलवत्तरः, तेषां संहतानां विगृहीतानां चानुग्रहशक्तः, विगृहीतानां निग्रहे च शक्त उदासीनाख्यः। इति प्रकृतयः एवं द्वादश राजप्रकृतय उक्ताः।

अथ चतुर्मण्डलसंक्षेपमाह — विजिगीषुरित्यादि। अयमर्थः — विजिगीषुस्तस्य मित्रं मित्रमित्रमिति तिस्रः प्रकृतयः। तासां प्रत्येकममात्यादिप्रकृतिपञ्चकसंयोगेन षट्कत्रयसम्पत्तौ अष्टादशावयवकं मण्डलमेकं विजिगीषुसम्बद्धं जायते। तथा अरिस्तस्य मित्रं मित्रमित्रमिति तिसृणां प्रकृतीनां प्रत्येकममात्यादिपञ्चकयोगेन षट्कत्रयसम्पत्तावष्टादशकमरिसम्बद्धं मण्डलं द्वितीयं जायते। एवं मध्यमसम्बद्धं तृतीयम् उदासीनसम्बद्धं चतुर्थं च मण्डलमूह्यमिति।

एवं चतुर्मण्डलसङ्क्षेपः । द्वादश राजप्रकृतयः, षष्टिर्द्रव्यप्रकृतयः, सङ्क्षेपेण द्विसप्ततिः ।

तासां यथास्वं सम्पदः ।

शक्तिः सिद्धिश्च । बलं शक्तिः, सुखं सिद्धिः ।

शक्तिस्त्रिविधा — ज्ञानबलं मन्त्रशक्तिः, कोशदण्डबलं प्रभुशक्तिः, विक्रमबलमुत्साहशक्तिः ।

एवं सिद्धिस्त्रिविधैव मन्त्रशक्तिसाध्या मन्त्रसिद्धिः, प्रभुशक्तिसाध्या प्रभुसिद्धिः, उत्साहशक्तिसाध्या उत्साहसिद्धिरिति ।

ताभिरभ्युचितो ज्यायान् भवति । अपचितो हीनः । तुल्यशक्तिः समः । तस्माच्छक्तिं सिद्धिं च घटेतात्मन्यावेशयितुम् । साधारणो वा द्रव्यप्रकृतिष्वानन्तर्येण शौचवशेन वा । दूष्यामित्राभ्यां वापकृष्टुं यतेत ।

एतावतोक्तं पिण्डीकृत्याह — **एवं चतुर्मण्डलसंक्षेप** इत्यादि । **द्विसप्ततिरिति** राजप्रकृतयः शुद्धा द्वादश अमात्यादिद्रव्यप्रकृतियुक्ताः षष्टिरित्याहत्य ।

तासां यथास्वं सम्पद इति । प्रकृतीनां यथायथं सम्पदः, पूर्वमुक्ता इति शेषः ।

शक्तिसिद्धी आह — **शक्तिः सिद्धिश्चेत्यादि** ।

शक्तिस्त्रिविधेत्यादि । ज्ञानबलं ज्ञानयोगक्षेमसाधनसामर्थ्यं, मन्त्रशक्तिरित्येकः प्रकारः । कोशदण्डबलं कोशदण्डयोगक्षेमसाधनसामर्थ्यं, प्रभुशक्तिरिति द्वितीयः । विक्रमबलं विक्रमयोगक्षेमसाधनसामर्थ्यम्, उत्साहशक्तिरिति तृतीयः ।

मन्त्रशक्तिप्रभुशक्त्युत्साहशक्तिसाध्याः क्रमान्मन्त्रसिद्धिः प्रभुसिद्धिरुत्साहसिद्धिरिति त्रिविधाः सिद्धय इत्याह — **एवं सिद्धिस्त्रिविधैवेत्यादि** ।

ताभिरिति । शक्तिभिः, अभ्युचितः उपचितः, ज्यायान् श्रेष्ठः । अपचितः, हीनः अधमः । तुल्यशक्तिः अन्यूनानधिकशक्तिः, समः मध्यमः । तस्मात् शक्तिसिद्ध्योः प्राधान्यात्, शक्तिं सिद्धिं च आत्मनि, आवेशयितुं वर्धयितुं, घटेत व्याप्रियेत । **साधारणो** वेति । आत्मनि तथा घटनपाटवरहितश्चेत्, द्रव्यप्रकृतिषु अमात्यादिषु, आनन्तर्येण पूर्वममात्ये ततो जनपदे ततो

यदि वा पश्येत्—'अमित्रो मे शक्तियुक्तो वाग्दण्डपारुष्यार्थदूषणैः प्रकृतीरुपहनिष्यति, सिद्धियुक्तो वा मृगयाद्यूतमद्यस्त्रीभिः प्रमादं गमिष्यति, स विरक्तप्रकृतिरुपक्षीणः प्रमत्तो वा साध्यो मे भविष्यति, विग्रहाभियुक्तो वा सर्वसन्दोहेनैकस्थो दुर्गस्थो वा स्थास्यति, स संहतसैन्यो मित्रदुर्गवियुक्तः साध्यो मे भविष्यति, बलवान् वा राजा परतः शत्रुमुच्छेत्तुकामस्तमुच्छिद्य न मामुच्छिन्द्यादि'ति 'बलवता प्रार्थितस्य मे विपन्नकर्मारम्भस्य वा साहाय्यं दास्यति मध्यमलिप्सायां चे'ति, एवमादिषु कारणेष्वमित्रस्यापि शक्तिं सिद्धिं चेच्छेत् ॥

नेमिमेकान्तरान् राज्ञः कृत्वा चानन्तरानरान् ।
नाभिमात्मानमायच्छेन्नेता प्रकृतिमण्डले ॥

दुर्ग इति क्रमेण, शौचवशेन वा क्रमासम्भवे शुचित्ववशेन वा, आवेशयितुं घटेत । द्रव्यप्रकृतिष्वप्यावेशनासामर्थ्ये आह — दूष्यामित्राभ्यां वापकर्षुं यतेतेति। दूष्यमुखेन शत्रुमुखेन वा, अपकर्षुं शत्रोः शक्तिं सिद्धिं च न्यूनयितुं व्यवस्येत् ।

अपकर्षणापवादमाह — यदिवा पश्येदित्यादि । अयमर्थः — मम शत्रुः शक्तियुक्तश्चेत् तदा दर्पाद् वाक्पारुष्यदण्डपारुष्यार्थदूषणैरमात्यादीन् उपहनिष्यति, सुखयुक्तश्चेत् मृगयाद्यूतादिव्यसनैः प्रमत्तो भविष्यति, स विरक्तप्रकृतिरसहायः प्रमत्तश्च जय्यो मे भविष्यति, सर्वसैन्यसमुदायेन सह मया विग्रहार्थमभियुक्तः शक्तिगर्वादेकाकी दुर्गस्थो वा स्थास्यति, स संहतसैन्यो मित्रदुर्गरहितः साध्यो मे भविष्यति, बलवान् वा स राजा परदेशे शत्रुमुच्छेत्तुकामस्तमुच्छिद्य मां नोच्छिन्द्यात्, इति यदि मन्येत, बलवता प्रतियुध्यमानस्य कर्मारम्भेषु विपन्नेषु मध्यमे चापेक्ष्यमाणे साहाय्यं करिष्यति इति च यदि मन्येत, एवञ्जातीयेषु निमित्तेषु शत्रोरपि शक्तिं सिद्धिं च इच्छेदेव, न तु तां विहन्यादिति ॥

अध्यायप्रान्ते श्लोकमाह—नेमिमित्यादि । नेता द्वादशराजमण्डलनायको विजिगीषुः, एकान्तरान् स्वभूम्येकव्यवहितान् मित्रभूतान्, राज्ञः, नेमिं कृत्वा, अनन्तरान् राज्ञः, अरान् कृत्वा अरस्थाने कल्पयित्वा, आत्मानं, नाभिम्, आयच्छेत् कल्पयेत् । कुत्र, प्रकृतिमण्डले राजमण्डलात्मके चक्रे ॥

मध्ये ह्युपहितः शत्रुर्नेतुर्मित्रस्य चोभयोः ।
उच्छेद्यः पीडनीयो वा बलवानपि जायते ॥

इति कौटलीयार्थशास्त्रे मण्डलयोनौ षष्ठाधिकरणे द्वितीयोऽध्यायः
शमव्यायामिकम्, आदितोऽष्टनवतितमः ।

एतावता कौटलीयस्यार्थशास्त्रस्य
मण्डलयोनिः षष्ठमधिकरणं
समाप्तम् ॥

मध्ये हीत्यादि । बलवानपि शत्रुः, विजिगीषोर्मित्रस्येत्युभयोर्मध्ये, उपहितः निवेशितश्चेत्, उच्छेद्यः पीडनीयो वा जायते ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
इत्थं मण्डलयोन्याख्यं षष्ठाधिकरणं गतम् ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य **श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु **कौटलीयार्थशास्त्र**व्याख्यायां **श्रीमूलाख्यायां मण्डलयोनौ** षष्ठाधिकरणे द्वितीयोऽध्यायः
शमव्यायामिकम्, आदितोऽष्टनवतितमः ।
मण्डलयोनिः षष्ठमधिकरणं समाप्तम् ॥

षाड्गुण्यं—सप्तममधिकरणम् ।

९८, ९९. प्रक. षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयश्च ।

षाड्गुण्यस्य प्रकृतिमण्डलं योनिः ।

सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम् इत्याचार्याः ।

द्वैगुण्यम् इति वातव्याधिः, सन्धिविग्रहाभ्यां हि षाड्गुण्यं सम्पद्यत इति ।

षाड्गुण्यमेवैतदवस्थाभेदाद् इति कौटल्यः ।

तत्र पणबन्धः सन्धिः, अपकारो विग्रहः, उपेक्षणमासनम्,

पूर्वस्मिन्नधिकरणे 'शमव्यायामयोर्योनिः षाड्गुण्यम्' इत्युक्तम् । तदिदानीं प्रपञ्चयितुमिदमधिकरणमारभ्यते षाड्गुण्यं नाम । तत्र

षाड्गुण्यसमुद्देश इति प्रथमं सूत्रम् । षाड्गुण्यस्य समुद्देशः संक्षेपः इति सूत्रार्थः । अथवा, षाड्गुण्यस्य समुद्देशः पूर्वपक्षनिराकरणपूर्वं स्वपक्षस्थापनमित्यर्थः । 'द्वैगुण्यमिति वातव्याधिः' इति हि पूर्वपक्षं निराकृत्य 'षाड्गुण्यमेवैतदवस्थाभेदादिति कौटल्यः' इत्येवं स्वपक्षः स्थाप्यते । तदभिधीयत इति सूत्रार्थः । पूर्वस्मिन् प्रकरणे दैवमानुषयोर्मानुषं चिन्त्यमुक्तम् । चिन्तनप्रकारस्त्वत्र प्रदर्श्यत इति सम्बन्धः ।

षाड्गुण्यस्य प्रकृतिमण्डलं योनिरिति । सन्ध्यादीनां षण्णां गुणानां स्वाम्यादिप्रकृतिसप्तकं द्वादशराजमण्डलं च योनिः ।

सन्धीत्यादि । सन्धिर्विग्रह आसनं यानम् आश्रयो द्वैधीभाव इत्येवं षड् गुणाः इत्याचार्याः, वदन्ति ।

द्वैगुण्यमिति । द्वावेव गुणौ सन्धिविग्रहलक्षणौ इति वातव्याधिः । तत्र हेतुः— सन्धिविग्रहाभ्यां हि षाड्गुण्यं सम्पद्यत इतीति । सन्धिविग्रहौ हि षड्गुणरूपतां प्रतिपद्येते—आसनादयश्चत्वारः सन्धिविग्रहयोरन्तर्भवन्ति । तत्रासनसंश्रयौ सन्धौ, यानं विग्रहे, द्वैधीभाव उभयोरित्यतः सन्धिविग्रहौ द्वावेव प्राधान्याद् गुणाविति ।

स्वमतमाह — षाड्गुण्यमेवैतदवस्थाभेदादिति कौटल्य इति । एतयोः सन्धिविग्रहयोरवस्थाभेदेन स्वरूपभेदात् षडेव गुणा गणनीया इति कौटल्यमतम् ।

तान् निरूपयति — तत्रेति । तेषु मध्ये, पणबन्धः सन्धिः 'एवमस्य

अभ्युच्चयो यानं, परार्पणं संश्रयः, सन्धिविग्रहोपादानं द्वैधीभाव इति षड् गुणाः ।

परस्माद्धीयमानः संदधीत । अभ्युचीयमानो विगृह्णीयात् । न मां परो नाहं परमुपहन्तुं शक्तः इत्यासीत । गुणातिशययुक्तो यायात् । शक्तिहीनः संश्रयेत । सहायसाध्ये कार्ये द्वैधीभावं गच्छेत् ।

कार्यस्य करणे भूमिकोशदण्डान्यतमं दास्यामी'त्युक्त्वा तस्य सत्यशपथादिना दृढीकरणं सन्धिपदार्थः । **अपकारो विग्रह इति** । शत्रुं प्रति द्रोहाचरणं विग्रहपदार्थः । **उपेक्षणमासनमिति** । सन्ध्याद्यप्रयोग आसनम् । **अभ्युच्चयो यानमिति** । शक्तिदेशकालाद्यतिशययोगोऽभ्युच्चयः स यानहेतुत्वाद् यानमित्युच्यते कारणे कार्योपचारात् । **परार्पणं संश्रय इति** । बलवतेऽन्यस्मै राज्ञे स्वात्मस्वपुत्रस्वद्रव्याणामर्पणं संश्रयपदार्थः । **सन्धिविग्रहोपादानं द्वैधीभाव इति** । सन्धिविग्रहयोरुभयोरुपादानं द्वैधीभावः । इदं तु बोद्धव्यम् — उभाभ्यां शत्रुभ्यां सह वाङ्मात्रेणात्मसमर्पणं कृत्वा गूढचित्तवृत्तित्वेन वर्तनमेको द्वैधीभावः । यथा कामन्दकेन व्याख्यातः —

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् ।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः ॥" (११, २३)

इति । शत्रुणैकेन सह प्रकटं सन्धानं प्रच्छन्नं द्रोहाचरणं चेत्येवं सन्धिविग्रहसमुदायानुष्ठानमपरो द्वैधीभावः । अयमिह कण्ठोक्तः । प्रथमस्तु 'सहायसाध्ये कार्ये द्वैधीभावं गच्छेद्' इति वक्ष्यमाणग्रन्थेन सूचित इति । **इति षड् गुणाः**, निरूपिता इति शेषः ।

अथ गुणानां प्रयोगविषयमाह — **परस्मादिति** । शत्रोः, हीयमानः, सन्दधीत सन्धिं कुर्यात्, परेण । अभ्युच्चीयमानः उपचीयमानः, **विगृह्णीयात्** शत्रुविषये द्रोहमाचरेत् । **न मां पर इत्यादि** । शत्रुः माम् उपहन्तुं **न शक्तः**, अहं परमुपहन्तुं न शक्तः, इति, मन्यमान इति शेषः । आसीत परमुपेक्षेत । **गुणातिशययुक्तो यायादिति** । अभियास्यत्कर्माधिकरणोक्तः शक्तिदेशकालादिर्गुणातिशयः तद्युक्तः अभिषेणनं कुर्यात् । **शक्तिहीन इति** । सः, संश्रयेत प्रबलमाश्रयेत । **सहायसाध्य इत्यादि** । कार्ये सहायसापेक्षे सति, द्वैधीभावं, गच्छेद् अनुतिष्ठेत् ।

इति गुणावस्थापनम् ।

तेषां यस्मिन् वा गुणे स्थितः पश्येत् 'इहस्थः शक्ष्यामि दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्माण्यात्मनः प्रवर्तयितुं परस्य चैतानि कर्माण्युपहन्तुम्' इति तमातिष्ठेत्, सा वृद्धिः ।

'आशुतरा मे वृद्धिर्भूयस्तरा वृद्ध्युदयतरा वा भविष्यति विपरीता परस्य' इति ज्ञात्वा परवृद्धिमुपेक्षेत । तुल्यकालफलोदयायां वृद्धौ सन्धिमुपेयात् ।

यस्मिन् वा गुणे स्थितः स्वकर्मणामुपघातं पश्येन्नेतरस्य तस्मिन्न तिष्ठेद्, एष क्षयः ।

इति गुणावस्थापनमिति । एवं विषयभेदेन षड् गुणाः स्थापिताः । इत्थं षाड्गुण्यसमुद्देशो निरूपितः ।

क्षयस्थानवृद्धिनिश्चय इति सूत्रम् । क्षयः कोशदण्डयोरल्पत्वं स्थानं साम्यावस्था वृद्धिर्बाहुल्यम् एषां निश्चयः स्वरूपावधारणम् उच्यत इति सूत्रार्थः । गुणा ह्युक्ताः, तेषां फलभूताः क्षयस्थानवृद्धय इह निरूप्यन्ते ।

तत्र चरमनिर्दिष्टापि वृद्धिः प्राधान्यात् प्रथमं निरूप्यते— तेषां यस्मिन् वेत्यादि । अयमर्थः — गुणानां मध्ये यं गुणमाश्रितो मन्येत — 'अहमस्मिन् गुणे स्थितो दुर्गकर्मसेतुकर्मादीन्यात्मनः प्रवर्तयितुं परस्य तान्युपहन्तुं च शक्तो भविष्यामि' इति, तं गुणमनुतिष्ठेत् । तच्च गुणानुष्ठानं वृद्धिनिमित्तत्वादुपचाराद् वृद्धिशब्दितमिति ।

परवृद्ध्युपेक्षाया विषयमाह — आशुतरा मे वृद्धिरित्यादि । वृद्धिर्मे शीघ्रं भाविष्यति परस्य चिराद् भविष्यतीति यदि मन्येत स एको विषयः । यौगपद्येऽपि वृद्धिर्मेऽधिकतरा परस्याल्पा भविष्यतीति यदि मन्येत सोऽपरो विषयः । समापि मे वृद्धिर्वृद्ध्यनुबन्धिनी भाविष्यति परस्य तु वृद्ध्यननुबन्धिनीति यदि मन्येत सोऽन्यो विषयः । एषु विषयेषु परस्य वृद्धिं नोपहन्तुं यतेत । तुल्यकालफलोदयायामित्यादि । परस्यात्मनश्च वृद्धिस्तुल्यकाला तुल्यफलोदया च भविष्यतीति चेन्मन्येत, तदा सन्धिमनुतिष्ठेत् ।

यद्गुणानुष्ठाने स्वकर्मोपघातं परकर्मानुपघातं च पश्येत्, तं गुणं नानुतिष्ठेत् । तदनुष्ठानं च क्षयनिमित्तत्वादुपचारात् क्षय इत्याह — यस्मिन् वा गुणे स्थितः स्वकर्मणामुपघातमित्यादि ।

चिरतरेणाल्पतरं वृद्ध्युदयतरं वा क्षेष्ये, विपरीतं परः इति ज्ञात्वा क्षयमुपेक्षेत ।

तुल्यकालफलोदये वा क्षये सन्धिमुपेयात् ।

यस्मिन् वा गुणे स्थितः स्वकर्मवृद्धिं क्षयं वा नाभिपश्येदेतत् स्थानम् ।

ह्रस्वतरं वृद्ध्युदयतरं वा स्थास्यामि विपरीतं पर इति ज्ञात्वा स्थानमुपेक्षेत ।

तुल्यकालफलोदये वा स्थाने सन्धिमुपेयाद् इत्याचार्याः ।

नैतद् विभाषितम् इति कौटल्यः ।

यदि वा पश्येत्—'सन्धौ स्थितो महाफलैः स्वकर्मभिः पर-

'सुदीर्घतरकालातिक्रमानन्तरं मे क्षयो भविष्यति शत्रोः शीघ्रमि'ति वा, 'अल्पो मे क्षयो भविष्यति शत्रोर्बहुतर' इति वा, 'मम क्षयो वृद्ध्युदयानुबन्धी शत्रोस्तु क्षयानुबन्धी'ति वा यदि मन्येत, एषु त्रिषु विषयेष्वात्मनो जायमानं क्षयमुपेक्षेत न तु तदुपघाताय यत्नं कुर्यादित्याह— **चिरतरेणाल्पतरमित्यादि** ।

तुल्यकालफलोदये वेत्यादि । शत्रोरात्मनश्च क्षयस्तुल्ये काले भविष्यति तुल्यफलोदयश्चेति यदि पश्येत्, तदा सन्धिमनुतिष्ठेत् ।

यद्गुणानुष्ठाने स्वस्य वृद्धिं क्षयं वा न पश्येत्, तदिदं तादवस्थ्यहेतुत्वात् स्थानमित्युच्यत इत्याह— **यस्मिन् वा गुणे स्थितः स्वकर्मवृद्धिमित्यादि** ।

ह्रस्वतरमित्यादि । 'अदीर्घकालं मे स्थानं भविष्यति परस्य दीर्घकालमि'ति वा, 'मम स्थानं वृद्ध्यनुबन्धि भविष्यति परस्य तु क्षयानुबन्धि' इति वा, यदि मन्येत, तदा स्थानमुपेक्षेत ।

तुल्यकालफलोदये वेति । परेण तुल्यकाले तुल्यफले च सति, स्थाने, सन्धिम्, उपेयात् कुर्यात् । **इत्याचार्या इति** । उक्तमिदमर्थजातम् आचार्या ऊचुरित्यर्थः ।

नैतद् विभाषितमिति कौटल्य इति । इदमाचार्यैर्विशेषेण न भाषितम् इति कौटल्यः, मन्यते ।

स्वयं तु विशेषमाह—**यदि वा पश्येदित्यादि** । एषोऽर्थः—सन्धौ क्रियमाणे महाफलैः स्वकर्मभिर्दुर्गसेतुखनिवणिक्पथादिभिः परकर्मणामुपघातं

कर्माण्युपहनिष्यामि, महाफलानि वा स्वकर्माण्युपभोक्ष्ये, परकर्माणि वा, सन्धिविश्वासेन वा योगोपनिषत्प्रणिधिभिः परकर्माण्युपहनिष्यामि, सुखं वा सानुग्रहपरिहारसौकर्यं फललाभभूयस्त्वेन स्वकर्मणां परकर्मयोगावहं जनमास्त्रावयिष्यामि, बलिनातिमात्रेण वा संहितः परः स्वकर्मोपघातं प्राप्स्यति, येन वा विगृहीतो मया सन्धत्ते तेन अस्य विग्रहं दीर्घं करिष्यामि, मया वा संहितस्य मद्द्वेषिणो जनपदं पीडयिष्यति, परोपहतो वास्य जनपदो मामागमिष्यति ततः कर्मसु वृद्धिं प्राप्स्यामि, विपन्नकर्मारम्भो वा विषमस्थः परः कर्मसु न मे विक्रमेत परतः प्रवृत्तकर्मारम्भो वा ताभ्यां संहितः कर्मसु वृद्धिं प्राप्स्यामि, शत्रुप्रतिबद्धं वा शत्रुणा सन्धिं कृत्वा मण्डलं भेत्स्यामि, भिन्नमवा-

---

करिष्यामि — अर्थात् स्वकर्मोत्पादितानां प्रभूतानां साराणां च वस्तूनां परविषये नयनेन परकर्मजनितवस्तूनां मूल्यहानिमुत्पादयिष्यामि — इति चेन्मन्येतेत्येको विषयः, अथवा सन्धिबलाद् महाफलानि कर्माण्यनुभविष्यामीति चेन्मन्येतेति द्वितीयः। यद्वा सन्धिवशाद् महाफलानि परस्य कर्माण्यनुभविष्यामीति चेन्मन्येतेति तृतीयो विषयः, अथवा सन्धिना परस्य विश्वासं जनयित्वा गूढपुरुषतीक्ष्णादिप्रयोगलक्षणैर्योगप्रणिधानैर्विषधूमाम्बुदूषणादिलक्षणैरुपनिषत्प्रयोगैश्च महाफलानां परकीयकर्मणामुपघातं करिष्यामीति चेन्मन्येतेति चतुर्थो विषयः, अथवा सन्धिविश्वासेन शत्रुकर्मानुष्ठानकारिणं जनं बीजदानाद्युपकारलक्षणानुग्रहेण करमोक्षलक्षणपरिहारेण च कृष्यादिसौकर्यातिशययुक्तं कृत्वा फललाभेन च भूयसा योजयित्वा स्वकर्मनियोगार्थेऽनायासादाकक्ष्यामीति चेन्मन्येतेति पञ्चमो विषयः, अथवा बलवता प्रवृद्धकोशेन स्वशत्रुणा कृतसन्धिः शत्रुः तस्मै अतिमात्रधनार्पणेन क्षीणकोशो भूत्वा स्वकर्मोपघातं प्राप्स्यतीति चेन्मन्येतेति षष्ठो विषयः, अथवा येन विग्रहमनुष्ठातुं मया सह सन्धिं करोति तेन सहास्य विग्रहं चिरकालाविच्छिन्नमापादयिष्यामीति चेन्मन्येतेति सप्तमो विषयः, अथवा मया कृतसन्धेर्मच्छत्रोर्जनपदमयं पीडयिष्यतीति चेन्मन्येतेति अष्टमो विषयः, अथवा परोपहतोऽस्य जनपदोऽनेन सहेदानीं सन्धिकरणे मम वशं गमिष्यति तेन मे कर्मवृद्धिर्भविष्यतीति चेन्मन्येतेति नवमो विषयः, अथवा उपहतदुर्गादिकार्यारम्भोऽयं शत्रुः सङ्कटस्थः, अन्यसाह्येन च प्रवृत्तकार्यारम्भोऽसौ सङ्कटस्थः, आभ्यां सन्धिकरणे कर्मसु विघातो मे न भविष्यति प्रत्युत वृद्धिर्भविष्यतीति चेन्मन्येतेति दशमैकादशौ

ष्यामि, दण्डानुग्रहेण वा शत्रुमुपगृह्य मण्डललिप्सायां विद्वेषं ग्राहयिष्यामि, विद्विष्टं तेनैव घातयिष्यामि' इति सन्धिना वृद्धिमातिष्ठेत्।

यदि वा पश्येत्—'आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः शैलवननदीदुर्गैकद्वारारक्षो वा शक्ष्यति पराभियोगं प्रतिहन्तुमिति, विषयान्ते दुर्गमविषह्यमपाश्रितो वा शक्ष्यामि परकर्माण्युपहन्तुमिति, व्यसनपीडोपहतोत्साहो वा परः संप्राप्तकर्मोपघातकाल इति, विगृहीतस्यान्यतो वा शक्ष्यामि जानपदमपवाहयितुम्' इति विग्रहे स्थितो वृद्धिमातिष्ठेत्।

यदि वा मन्येत—'न मे शक्तः परः कर्माण्युपहन्तुं, नाहं तस्य कर्मोपघाती वा, व्यसनमस्य, श्ववराहयोरिव कलहे वा स्वकर्मानुष्ठानपरो वा वर्धिष्ये' इत्यासनेन वृद्धिमातिष्ठेत्।

विषयौ, अथवा शत्रुणा भेदमप्राप्तं मण्डलं शत्रुणा सह सन्धिं कृत्वा भेत्स्यामीति चेन्मन्येतेति द्वादशो विषयः, भिन्नं च शत्रुं साधयिष्यामीति चेन्मन्येतेति त्रयोदशो विषयः, अथवा सैन्यसाह्यदानेन शत्रुं वशयित्वा मण्डललाभार्थं यतमाने तस्मिन् मण्डलस्य तेन सह द्वेषं जनयिष्यामीति चेन्मन्येतेति चतुर्दशो विषयः, द्विष्टं च तेनैव घातयिष्यामीति चेन्मन्येतेति पञ्चदशो विषयः। एषु पञ्चदशसु विषयेष्वन्येषु चैवञ्जातीयेषु सन्ध्यनुष्ठानेनात्मनो वृद्धिं सम्पादयेदिति।

इत्थं सन्धिकरणेन वृद्धिरुक्ता। विग्रहेण वृद्धिमाह—**यदि वा पश्येदित्यादि**। आयुधजीविक्षत्रियादिप्रचुरः कृषिकर्तृकारयितृश्रेणीबहुलः शैलदुर्गवनदुर्गनदीदुर्गयुक्तः एकद्वारप्रवेशनिर्गमतयानायासरक्ष्यो वा मे जनपदः पराभियोगं प्रतिहन्तुं शक्तो भविष्यतीति चेन्मन्येत, अथवा विषयसीमायाम् अविनाश्यं दुर्गम् आश्रितः परकर्माण्युपहन्तुं शक्ष्यामीति चेन्मन्येत, अथवा शत्रोर्व्यसनपीडाभग्नोत्साहत्वात् तत्कर्मोपघातं मे कर्तुमवसरः प्राप्त इति चेन्मन्येत, अथवा विगृहीतस्य शत्रोर्जनपदमन्येन पथावस्कन्दितुं शक्ष्यामीति चेन्मन्येत, एषु चतुर्षु विषयेष्वेवञ्जातीयेष्वन्येषु च विग्रहमास्थाय वृद्धिमन्विच्छेत्।

आसनेन वृद्धिमाह—**यदि वा मन्येतेत्यादि**। शत्रुर्मम कर्माण्युपहन्तुं न शक्तस्तस्य चाहं कर्माण्युपहन्तुं न शक्तः, व्यसनं चास्य वर्तते श्ववराहयोरिव समयोरावयोर्विग्रहे वा सति स्वकर्मानुष्ठानपरो वृद्धिं प्राप्स्यामीति चेन्मन्येत, तादृशे निमित्ते आसनेन वृद्धिमन्विच्छेत्।

यदि वा मन्येत — 'यानसाध्यः कर्मोपघातः शत्रोः, प्रतिविहितस्वकर्मारक्षश्चास्मि' इति यानेन वृद्धिमातिष्ठेत् ।

यदि वा मन्येत — 'नास्मि शक्तः परकर्माण्युपहन्तुं, स्वकर्मोपघातं वा त्रातुम्' इति बलवन्तमाश्रितः स्वकर्मानुष्ठानेन क्षयात् स्थानं स्थानाद् वृद्धिं चाकाङ्क्षेत ।

यदि वा मन्येत — 'सन्धिनैकतः स्वकर्माणि प्रवर्तयिष्यामि विग्रहेणैकतः परकर्माण्युपहनिष्यामि' इति द्वैधीभावेन वृद्धिमातिष्ठेत् ॥

एवं षड्भिर्गुणैरेतैः स्थितः प्रकृतिमण्डले ।
पर्येषेत क्षयात् स्थानं स्थानाद् वृद्धिं च कर्मसु ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे प्रथमोऽध्यायः
षाड्गुण्यसमुद्देशः क्षयस्थानवृद्धिनिश्चयश्च,
आदितो नवनवतितमः ॥

यानेन वृद्धिमाह — यदि वा मन्येत यानसाध्य इत्यादि । परस्य कर्मोपघातो यानेनैव साध्यः, स्वकर्मरक्षा च मया सुसंविहितेति चेत् पश्येत्, तदा यानेन वृद्धिमन्विच्छेत् ।

संश्रयेण वृद्धिमाह—यदि वा मन्येत नास्मि शक्त इत्यादि । परकर्माण्युपहन्तुं स्वकर्मोपघातं प्रतिविधातुं चाहं न शक्त इति चेन्मन्येत, बलवन्तं समाश्रयेत् । ततः स्वकर्मानुष्ठानेन क्षयं परिहृत्य स्थानावस्थां चासाद्य ततो वृद्धिं लिप्सेत ।

द्वैधीभावेन वृद्धिमाह — यदि वा मन्येत सन्धिनेत्यादि । शत्रुणैकेन सन्धिं कृत्वा स्वकर्माणि प्रवर्तयितुम् अन्येन विगृह्य तत्कर्माण्युपहन्तुं च शक्ष्यामीति चेन्मन्येत, तदा द्वैधीभावेन वृद्धिं प्राप्नुयात् ॥

प्रान्ते श्लोकमाह — एवमित्यादि । प्रकृतिमण्डलस्थो राजानेन प्रकारेण सन्ध्यादिषड्गुणप्रयोगैः कर्मसु क्षयावस्थामुत्तीर्याधिगतस्थानावस्थो वृद्धिमन्विच्छेदिति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे प्रथमोऽध्यायः
षाड्गुण्यसमुद्देशः क्षयस्थानवृद्धिनिश्चयश्च,
आदितो नवनवतितमः ॥

१००. प्रक. संश्रयवृत्तिः ।

सन्धिविग्रहयोस्तुल्यायां वृद्धौ सन्धिमुपेयात् । विग्रहे हि क्षयव्ययप्रवासप्रत्यवाया भवन्ति ।

तेनासनयानयोरासनं व्याख्यातम् ।

द्वैधीभावसंश्रययोर्द्वैधीभावं गच्छेत् । द्वैधीभूतो हि स्वकर्मप्रधान आत्मन एवोपकरोति । संश्रितस्तु परस्योपकरोति, नात्मनः ।

यद्बलः सामन्तः तद्विशिष्टबलमाश्रयेत । तद्विशिष्टबलाभावे तमेवाश्रितः कोशदण्डभूमीनामन्यतमेनास्योपकर्तुमदृष्टः प्रयतेत । महादोषो हि विशिष्टसमागमो राज्ञामन्यत्रारिविगृहीतात् ।

अथ द्वितीयोऽध्याय आरभ्यते । तत्रादौ क्षयस्थानवृद्धिनिश्चयप्रकरणशेषं वक्ष्यमाणस्य संश्रयवृत्तिप्रकरणस्य प्रसङ्गकमुच्यते । तत्र पूर्वमेकेन गुणेन वृद्ध्यन्विच्छाप्रकार उक्तः, इदानीं द्वयोर्गुणयोर्वृद्धिसाम्ये कतरोऽनुष्ठेय इत्येतदभिधीयते । **सन्धिविग्रहयोरि**त्यादि । तयोर्वृद्धिलाभे समाने सन्धिमनुतिष्ठेत् । कुतः, **विग्रहे हि क्षयव्ययप्रवासप्रत्यवाया भवन्ती**ति । विग्रहोपादाने हि प्राणिक्षयो धनधान्यादिव्ययः विदेशगमनं परपुरुषकृतविषाम्बुदूषणादिनिमित्तः प्रत्यवायश्चेत्येतेऽनर्था जायन्ते, सन्ध्युपादाने तु नायं दोष इति ।

अनेन न्यायेन यानासनयोस्तुल्यायां वृद्धौ आसनमनुष्ठेयमित्येतदुक्तप्रायमित्याह — **तेनासने**त्यादि ।

द्वैधीभावसंश्रययोरिति । तयोः समवृद्धिकयोः सतोः, द्वैधीभावं गच्छेद् उपाददीत । तत्र हेतुमाह — **द्वैधीभूतो हि, स्वकर्मप्रधानः** प्राधान्येन स्वकर्मैवानुतिष्ठन्, **आत्मन एव उपकरोति । संश्रितस्तु परस्योपकरोति** तद्विधेयत्वात्, आत्मनः नोपकरोति । इत्येतावता क्षयस्थानवृद्धिनिश्चयः परिसमापितः ।

संश्रयवृत्तिरिति सूत्रम् । प्रबलाश्रयणेन स्वशक्तिपरिपूरणं संश्रयवृत्तिः साभिधीयत इति सूत्रार्थः ।

यद्बलः सामन्त इत्यादि । यावद्बलयुक्तः सामन्तोऽभियोक्ता ततोऽप्युत्कृष्टबलयुक्तं सेवेत । विशिष्टबलस्यालाभेऽभियोक्तारमेवाश्रितः कोशदण्डभूमीनामन्यतमदानेन तं प्रसादयितुमदृष्टो दूरस्थोऽसमागत एव सन् यत्नं कुर्यात् । अदृष्टसेवायां कारणमाह — **महादोषो ही**त्यादि । राज्ञां हि विशिष्टबलेन सह समागमो वधबन्धादिमनर्थमुत्पादयेत् । तत्रापवादः — **अन्य-**

अशक्ये दण्डोपनतवद् वर्तेत ।

यदा चास्य प्राणहरं व्याधिमन्तःकोपं शत्रुवृद्धिं मित्रव्यसनमुपस्थितं वा तन्निमित्तामात्मनश्च वृद्धिं पश्येत्, तदा सम्भाव्यव्याधिधर्मकार्यापदेशेनापयायात् । स्वविषयस्थो वा नोपगच्छेत् । आसन्नो वास्य छिद्रेषु प्रहरेत् ।

बलीयसोर्वा मध्यगतस्त्राणसमर्थमाश्रयेत् । यस्य वानन्तर्धिः स्यात् । उभौ वा । कपालसंश्रयस्तिष्ठेत् । मूलहरमितरस्येतरमपदिशन् भेदमुभयोर्वा परस्परापदेशं प्रयुञ्जीत । भिन्नयोरुपांशुदण्डम् ।

त्रारिविगृहीतादिति । शत्रुविगृहीतमपहाय । स विशिष्टबलः शत्रुणा विगृहीतश्चेत् तेन समागमो न दोषावह इत्यर्थः ।

अशक्य इति । असमागम्य सेवितुमशक्ये विशिष्टबले, दण्डोपनतवद् वर्तेत दण्डार्पणकृतसन्धिर्यथा वर्तेत तथा तदन्तिके प्रणतस्तिष्ठेत् ।

यदा चास्येति । यदा, अस्य सेव्यमानस्य, प्राणहरं व्याधिम्, अन्तःकोपं मन्त्रिपुरोहितादिकोपं, शत्रुवृद्धिं, मित्रव्यसनं वा, उपस्थितं पश्येत्, तन्निमित्ताम् आत्मनो वृद्धिं च उपस्थितां पश्येत्, तदा, सम्भाव्यव्याधिधर्मकार्यापदेशेन प्रत्येयं कमपि व्याधिं धर्मकार्यं वा किञ्चिदपदिश्य, अपयायात् ततोऽपसरेत् । स्वविषयस्थो वा नोपगच्छेत् स्वविषये स्थितश्चेद् आहूतोऽपि व्याधिधर्मकार्यशेषापदेशेन तदन्तिकं न गच्छेत् । आसन्नो वा सन्निकृष्ट एव वा भूत्वा, अस्य छिद्रेषु प्रहारस्थानेषु प्रहरेत् । तदिदं बलवतैकेनाभियुक्तं प्रति अभिहितम् ।

द्वाभ्यां बलवद्भ्यामभियुक्तस्य विधिमाह — बलीयसोर्वेति । तयोर्वा, मध्यगतः, त्राणसमर्थम् अन्यतरम्, आश्रयेत् । उभयोः समबलतायामाह — यस्य वानन्तर्धिः स्यादिति । यो वा न व्यवहितः तमाश्रयेदित्यर्थः । उभयोरासन्नतायामाह — उभौ वेति । उभावप्याश्रयेत् । उभयाश्रयणावस्थानप्रकारश्च कपालसन्धिकरणेनावस्थानमित्याह — कपालसंश्रयस्तिष्ठेदिति । त्वमेव मे रक्षकः त्वदरक्षितं मां पर उच्छेत्तुमिच्छतीत्येकैकश उक्त्वा द्वावप्याश्रित्यावस्थानं कपालसन्धिः । मूलेत्यादि । इतरस्य इतरं मूलहरं द्रव्यनाशकमपकर्तारम्, अपदिशन् वदन् गूढपुरुषद्वारकं स्वगतमेवापकर्तृत्वमितरस्मिन्नारोप्य कीर्तयन्नित्यर्थः, उभयोर्वा, भेदं प्रयुञ्जीत, कथम्भूतं, परस्परा-

पार्श्वस्थो वा बलस्थयोरासन्नभयात् प्रतिकुर्वीत । दुर्गापाश्रयो वा द्वैधीभूतस्तिष्ठेत् । सन्धिविग्रहक्रमहेतुभिर्वा चेष्टेत । दूष्यामित्राटविकानुभयोरुपगृह्णीयात् । एतयोरन्यतरं गच्छंस्तैरेवान्यतरस्य व्यसने प्रहरेत् । द्वाभ्यामुपहितो वा मण्डलापाश्रयस्तिष्ठेत् । मध्यममुदासीनं वा संश्रयेत । तेन सहैकमुपगृह्येतरमुच्छिन्द्यादुभौ वा ।

द्वाभ्यामुच्छिन्नो वा मध्यमोदासीनयोस्तत्पक्षीयाणां वा राज्ञां न्यायवृत्तिमाश्रयेत । तुल्यानां वा यस्य प्रकृतयः सुख्येयुरेनं, यत्रस्थो वा शक्नुयादात्मानमुद्धर्तुं, यत्र पूर्वपुरुषोचितागतिरासन्नः सम्बन्धो वा मित्राणि भूयांसीति शक्तिमन्ति वा भवेयुः ॥

पदेशं परस्परस्यापकर्तृत्वारोपो निमित्तं यस्मिंस्तम् । भिन्नयोः उक्तरीत्या भेदितयोः, उपांशुदण्डं रहोवधं, प्रयुञ्जीत ।

पार्श्वस्थो वेत्यादि । बलिनोरुभयोर्यस्माद् भयमासन्नं पश्यति तस्मादात्मानं प्रतिक्रियया रक्षेत् तत्पार्श्वस्थः । **दुर्गापाश्रयो** वेति । दुर्गमाश्रितः द्वैधीभूतः प्रच्छन्नसन्धिविग्रहोभयाभिमुख्यः, तिष्ठेत् । **सन्धिविग्रहक्रमहेतुभिर्वेति** । 'महाफलैः स्वकर्मभिः परकर्माण्युपहनिष्यामि' इत्यादिनोक्तैः सन्धिनिमित्तैर्विक्रमनिमित्तैश्च 'आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः' इत्यादिनोक्तैः, चेष्टेत प्रवर्तेत । **दूष्यामित्रेत्यादि** । उभयोरभियोक्त्रोर्दूष्यान् अमित्रान् आटविकांश्च, उपगृह्णीयात् दानमानादिना स्ववशे कुर्यात् । एतयोः अभियोक्त्रोर्मध्ये, अन्यतरं गच्छन् प्रत्यभियुञ्जानः, तैरेव उपगृहीतैर्दूष्यादिभिरेव साधनभूतैः, अन्यतरस्य, व्यसने रन्ध्रे, प्रहरेत् । **द्वाभ्यामुपहितो** वेति । उभाभ्यां पीडितश्चेत्, मण्डलापाश्रयस्तिष्ठेत् उभयोर्मण्डलमपाश्रित्य वर्तेत 'सर्वात्मना प्रणतं मामेतौ पीडयत' इति वदन् । **मध्यममिति** । तम्, उदासीनं वा पूर्वोक्तलक्षणं, संश्रयेत । तेन सह मध्यमेनोदासीनेन वा सहितः, एकम् उपगृह्य दानादिना वशयित्वा, इतरम् उच्छिन्द्यात्, उभौ वा उच्छिन्द्यात् । इत्येवमुभयभेतुर्व्यापार उक्तः ।

उभाभ्यामुच्छिन्नस्य व्यापारमाह—**द्वाभ्यामुच्छिन्न** इति । तथाभूतः, मध्यमोदासीनयोः, तत्पक्षीयाणां वा मध्यमोदासीनसंबन्धिनां मित्रादीनां वा, राज्ञां मध्ये, न्यायवृत्तिं राजानम्, आश्रयेत । सर्वेषां न्यायवृत्तित्वतुल्यतायामाह—**तुल्यानां वा यस्य प्रकृतय** इत्यादि । तुल्यशीलानां मध्ये यस्य

प्रियो यस्य भवेद् यो वाप्रियोऽस्य कतरस्तयोः ।
प्रियो यस्य स तं गच्छेदित्याश्रयगतिः परा ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
द्वितीयोऽध्यायः संश्रयवृत्तिः,
आदितः शततमः ॥

प्रकृतयः स्वस्मिन् प्रीतिमावहेयुः एनम् आश्रयेत । प्रकृतिप्रीतितुल्यतायां वा यमाश्रित्यात्मोद्धरणं सुकरं मन्यते, एनमाश्रयेत । आत्मोद्धरणसौकर्यतुल्यतायां यस्मिन् पूर्वपुरुषानुवृत्तः प्रवेशः विवाहादिलक्षणो वान्तरङ्गः संबन्धोऽस्ति, मित्राणि वा भूयस्त्वाच्छक्तिमन्ति भवेयुः, एनमाश्रयेत ।

अथ सर्वोत्कृष्टामाश्रयवृत्तिमाह —प्रियो यस्येति । यस्य यः प्रियः, तयोर्मध्ये, कतरः अस्य अप्रियः कतरः कतरस्य प्रियो न भवति द्वावपि परस्परस्य प्रियावेवेत्यर्थः । ततश्च यो यस्य प्रियः, सः तं गच्छेत् आश्रयेत् । इत्याश्रयगतिः परा इत्येषाश्रयवृत्तिः प्रशस्ता ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
द्वितीयोऽध्यायः संश्रयवृत्तिः,
आदितः शततमः ॥

१०१, १०२ प्रक. समहीनज्यायसां गुणाभिनिवेशः हीनसन्धयश्च ।

विजिगीषुः शक्त्यपेक्षः षाड्गुण्यमुपयुञ्जीत । समज्यायोभ्यां सन्धीयेत । हीनेन विगृह्णीयात् । विगृहीतो हि ज्यायसा हस्तिना पादयुद्धमिवाभ्युपैति । समेन चामं पात्रमामेनाहतमिवोभयतः क्षयं करोति । कुम्भेनेवाश्मा हीनेनैकान्तसिद्धिमवाप्नोति ।

ज्यायांश्चेन्न सन्धिमिच्छेत्, दण्डोपनतवृत्तमाबलीयसं वा योगमातिष्ठेत् ।

समश्चेन्न सन्धिमिच्छेत्, यावन्मात्रमपकुर्यात् तावन्मात्रमस्य प्रत्यपकुर्यात् । तेजो हि सन्धानकारणं, नातप्तं लोहं लोहेन सन्धत्त इति ।

हीनश्चेत् सर्वत्रानुप्रणतस्तिष्ठेत्, सन्धिमुपेयात् । आरण्योऽग्निरिव हि दुःखामर्षजं तेजो विक्रमयति । मण्डलस्य चानुग्राह्यो भवति ।

समहीनज्यायसां गुणाभिनिवेश इति सूत्रम् । समः शत्रुणा तुल्यशक्तिसिद्धिः हीनः शत्रुतो न्यूनशक्तिसिद्धिः ज्यायान् ततोऽधिकशक्तिसिद्धिः आसु समाद्यवस्थासु गुणस्थापनोच्यत इति सूत्रार्थः । पूर्वं निमित्तापेक्षः षाड्गुण्यप्रयोग उक्तः, शक्त्यपेक्ष इदानीमभिधीयते ।

विजिगीषुरिति । सः, शक्त्यपेक्षः स्वशक्तिमपेक्ष्य, षाड्गुण्यम्, उपयुञ्जीत प्रयुञ्जीत । समज्यायोभ्यां सन्धीयेत समेन ज्यायसा च सह सन्दधीत । हीनेन विगृह्णीयात् । ज्यायसा सह हीनस्य विग्रहः पदातेरिव हस्तिना युद्धं नाशहेतुः, समेन समस्य विग्रह आमपात्रस्येवामपात्रेणाहननमुभयनाशहेतुः, हीनेन ज्यायसो विग्रहः कुम्भेनेव शिलायाः संघट्ट एकान्तसिद्धिहेतुर्भवतीत्याह —**विगृहीतो हि ज्यायसेत्यादि** ।

ज्यायांश्चेदिति । स चेत्, सन्धिं नेच्छेत्, दण्डोपनतवृत्तं तत्प्रकरणोक्तम्, आवलीयसं योगं वा आबलीयसाधिकरणीययोगातिसन्धानप्रकरणोक्तम्, आतिष्ठेत् अनुतिष्ठेत् ।

समश्चेन्न सन्धिमिच्छेदित्यादि । यावन्मात्रमपकुर्यात् यत्परिमाणमपकारं कुर्यात् सन्धिमिच्छुः समः तावन्मात्रमस्य प्रत्यपकुर्यात् प्रत्यपकारं कुर्यादितरः । तथाकरणं सन्धित्सोत्पादनेन सन्धिकारणं भवतीति तप्तलोहदृष्टान्तपूर्वमाह — **तेजो हीत्यादि** ।

हीनेनासन्धिः पूर्वं प्रतिपादितः । विषयविशेषे तेनापि सन्धिं कुर्यादित्याह — **हीन इति** । स चेत्, सर्वत्र अनुप्रणतः तिष्ठेत्, तर्हि सन्धिम्

संहितश्चेत् 'परप्रकृतयो लुब्धक्षीणापचकिताः प्रत्यादानभयाद् वा नोपगच्छन्ति' इति पश्येद्धीनोऽपि विगृह्णीयात् ।

विगृहीतश्चेत् 'प्रकृतयो लुब्धक्षीणापचरिताः विग्रहोद्विग्ना वा मां नोपगच्छन्ति' इति पश्येत्, ज्यायानपि सन्धीयेत, विग्रहोद्वेगं वा शमयेत् । 'व्यसनयौगपद्ये गुरुव्यसनोऽस्मि, लघुव्यसनः परः सुखेन प्रतिकृत्य व्यसनमात्मनोऽभियुञ्ज्यात्' इति पश्येत्, ज्यायानपि सन्धीयेत ।

सन्धिविग्रहयोश्चेत् परकर्शनमात्मोपचयं वा नाभिपश्येत्, ज्यायानप्यासीत ।

उपेयात्, अर्थात् तेन सह । प्रणतेन सन्ध्यकरणे दोषमाह—**आरण्योऽग्निरिव हीति** । वन्यो वह्निरिव दुर्विषह्यं, दुःखामर्षजं दुःखप्रभवममर्षप्रभवं च, तेजः, विक्रमयति विजिगीषौ विक्रान्तं करोति, अर्थात् तं हीनम् । मण्डलस्य च, अनुग्राह्यः अनुकम्पाविषयो, भवति ।

विजिगीषोर्हीनावस्थायां सन्धिसंश्रययोरनुष्ठानप्रकार उक्तः । तत्रापवादमाह — **संहितश्चेदि**त्यादि । अयमर्थः — हीनो विजिगीषुः परेण सह कृतसन्धिर्यदि मन्येत — 'परप्रकृतयो लुब्धाश्च क्षीणाश्चातृप्ताश्च नोपगच्छन्ति उच्छेदशङ्कया वा मां नोपगच्छन्ती'ति, तर्हि हीनोऽपि ज्यायसापि परेण सह विगृह्णीयात् । अपचकितशब्दोऽपतृप्तार्थकः 'चक तृप्ता'विति धातोरपपूर्वात् क्तप्रत्ययेन निष्पन्नः । अपचरितपाठे दानमानाद्यकरणेनानादृता इत्यर्थः ।

ज्यायसो हीनेन सह यद् विग्रहणं तस्यापवादमाह — **विगृहीतश्चेदि**त्यादि । अयमर्थः— ज्यायान् विजिगीषुः परेण विगृह्णन् यदि मन्येत— 'प्रकृतयो लुब्धक्षीणापचरिताः विग्रहभीता वा मां नोपगच्छन्ती'ति, तर्हि ज्यायानपि परेण हीनेनापि सन्धिं कुर्याद्, विग्रहनिमित्तमुद्वेगं वा प्रकृतीनां शमयेदिति । ज्यायसो हीनेन सह सन्धिकर्तव्यतायामन्यन्निमित्तमाह — **व्यसनयौगपद्य** इत्यादि । 'द्वयोर्व्यसनस्य युगपद्भावे मम व्यसनं गुरु परस्य व्यसनं लघु, तद् आत्मव्यसनस्य प्रतीकारं परः सुखेन कृत्वा मामभियुञ्जीत' इति चेद् विजिगीषुर्मन्येत, तदा ज्यायानपि सन् परेण सन्धिं कुर्यात् ।

सन्धौ विग्रहे वा क्रियमाणे परापचयमात्मोपचयं वा यदि न सम्भावयेत् तदा ज्यायानप्यासनमेवानुतिष्ठेदित्याह—**सन्धिविग्रहयोश्चेदि**त्यादि ।

परव्यसनमप्रतिकार्यं चेत् पश्येत्, हीनोऽप्यभियायात् ।

अप्रतिकार्यासन्नव्यसनो वा ज्यायानपि संश्रयेत ।

सन्धिनैकतो विग्रहेणैकतश्चेत् कार्यसिद्धिं पश्येत्, ज्यायानपि द्वैधीभूतस्तिष्ठेदिति ।

एवं समस्य षाड्गुण्योपयोगः । तत्र तु प्रतिविशेषः—

प्रवृत्तचक्रेणाक्रान्तो राज्ञा बलवताबलः ।
सन्धिनोपनमेत् तूर्णं कोशदण्डात्मभूमिभिः ॥
स्वयं सङ्ख्यातदण्डेन दण्डस्य विभवेन वा ।
उपस्थातव्यमित्येष सन्धिरात्मामिषो मतः ॥

परव्यसनस्यान्तःकोपादिलक्षणस्याप्रतिविधेयत्वसम्भावनायां हीनोऽपि यानमनुतिष्ठेदित्याह — **परव्यसनमित्यादि** ।

आत्मनो व्यसनमप्रतिविधेयमासन्नं यदि पश्येत् स ज्यायानपि सन् हीनं संश्रयेतेत्याह — **अप्रतिकार्यासन्नव्यसन** इत्यादि ।

एकेन सन्धिकरणे कार्यसिद्धिः अन्येन विग्रहकरणे कार्यसिद्धिरिति चेत् पश्येत्, तादृशे निमित्ते ज्यायानपि द्वैधीभावमनुतिष्ठेदित्याह— **सन्धिनैकत** इत्यादि । इतिशब्दः प्रक्रान्तप्रकरणसमाप्त्यर्थः ।

हीनसन्धय इति सूत्रम् । हीनः शक्तिसिद्धिभ्यां शत्रोरपकृष्टः तेन कर्तव्याः सन्धय इति सूत्रार्थः । पूर्वस्मिन् प्रकरणे समहीनज्यायसां षाड्गुण्यप्रयोग उक्तः अत्र तु हीनं प्रति विशेष उच्यते ।

एवमिति । पूर्वोक्तेन प्रकारेण, समस्य सर्वस्य समहीनज्यायसां सर्वेषामित्यर्थः । षाड्गुण्योपयोगः, दर्शित इति शेषः । **तत्र तु प्रतिविशेष** इति । तेषु मध्ये हीनं प्रति विशेषस्तूच्यते ॥

प्रवृत्तेत्यादि । प्रवृत्तचक्रेण प्रवृत्तसैन्येन, बलवता, राज्ञा, आक्रान्तो विजितः, अबलो राजा, कोशदण्डात्मभूमिभिः सन्धिना कोशादिदानपूर्वकेण सन्धिना, तूर्णं त्वरितम्, उपनमेत् प्रणमेद् बलवन्तम् ॥

स्वयमित्यादि । तत्र दण्डेऽपेक्ष्यमाणे तन्निर्दिष्टसङ्ख्याकेन दण्डेन विभवेन च स्वशक्त्यनुरूपेण स्वयं शत्रुसमीपं गत्वा उपस्थातव्यं तदाराधनं कर्तव्यम् । इत्येष सन्धिरात्मामिषो नाम आत्मानमामिषीकृत्य क्रियमाणत्वात् ॥

सेनापतिकुमाराभ्यामुपस्थातव्यमित्ययम् ।
पुरुषान्तरसन्धिः स्यान्नात्मनेत्यात्मरक्षणः ॥
एकेनान्यत्र यातव्यं स्वयं दण्डेन वेत्ययम् ।
अदृष्टपुरुषः सन्धिर्दण्डमुख्यात्मरक्षणः ॥
मुख्यस्त्रीबन्धनं कुर्यात् पूर्वयोः पश्चिमे त्वरिम् ।
साधयेद् गूढमित्येते दण्डोपनतसन्धयः ॥
कोशदानेन शेषाणां प्रकृतीनां विमोक्षणम् ।
परिक्रयो भवेत् सन्धिः स एव च यथासुखम् ॥
स्कन्धोपनेयो बहुधा ज्ञेयः सन्धिरुपग्रहः ।
निरुद्धो देशकालाभ्यामत्ययः स्यादुपग्रहः ॥
विषह्यदानादायत्यां क्षमः स्त्रीबन्धनादपि ।
सुवर्णसन्धिर्विश्वासादेकीभावगतो भवेत् ॥

सेनेत्यादि । सेनापतिकुमाराभ्यां समुचितपरिवाराभ्यामुपस्थातव्यमित्येष पुरुषान्तरो नाम सन्धिः सेनापतिकुमारलक्षणपुरुषविशेषार्पणेन शत्रुसाधनात् । अयमेव सन्धिरात्मरक्षण इत्यप्युच्यते आत्मार्पणेन न क्रियत इति कृत्वा ॥

एकेनेत्यादि । स्वयम् एकेन शत्रुसैन्यसाह्यरहितेन स्वसैन्येन वा शत्रुकार्यसाधनायान्यत्र यातव्यमिति पणनेन क्रियमाणः सन्धिरदृष्टपुरुषाख्यः, न दृष्टः पुरुषः शत्रुणा तत्कार्यं साधयन्नस्मिन् सन्धाविति कृत्वा । दण्डमुख्यात्मरक्षण इत्यप्ययमुच्यते अनेन सन्धिना दण्डमुख्यानामात्मनश्च रक्षणसम्पत्तेः ॥

मुख्यस्त्रीबन्धनमित्यादि । उक्तेषु त्रिषु सन्धिषु पूर्वयोरात्मामिषात्मरक्षणसन्ध्योर्ज्यायसो ये मुख्यास्तत्कन्यानां विवाहसम्बन्धं विश्वासार्थं कुर्यात् । अन्तिमे तु सन्धौ शत्रुं प्रच्छन्नविषादिप्रयोगैः साधयेत् । इत्येते त्रयो दण्डदानप्रणतकरणीयाः सन्धयः ॥

कोशोपनतसन्धीनाह— कोशदानेनेत्यादि । श्लोकत्रयमनुवृत्तपदम् । बलवच्छत्रुहतावशिष्टानां प्रकृतीनां धनदानेन यद् विमोचनं, स परिक्रयो नाम सन्धिः । स एव चात्मानुपपीडया कोशस्य सह्यत्वात्तस्य बहुविधेषु स्कन्धस्कन्धेन देयत्वव्यवस्थायामुपग्रहसंज्ञः परिक्रयभेदः । उपग्रहश्चासौ अमुकदेशेष्वमुककालेष्वेतावद् धनं देयमित्येवं देयदानदेशकालनियमकल्पनायामत्यय-

विपरीतः कपालः स्याद्त्यादानादभाषितः ।
पूर्वयोः प्रणयेत् कुप्यं हस्त्यश्वं वा गरान्वितम् ॥
तृतीये प्रणयेदर्थं कथयन् कर्मणां क्षयम् ।
तिष्ठेच्चतुर्थ इत्येते कोशोपनतसन्धयः ॥
भूम्येकदेशत्यागेन देशप्रकृतिरक्षणम् ।
आदिष्टसन्धिस्तत्रेष्टो गूढस्तेनोपघातिनः ॥
भूमीनामात्तसाराणां मूलवर्जं प्रणामनम् ।
उच्छिन्नसन्धिस्तत्रैष परव्यसनकाङ्क्षिणः ॥

संज्ञः । यथासुखधनदानव्यवस्थाकृतः सन्धिरयं सहनीयदानाद्धेतोरुत्तरकाल-शुभावहः कन्यादानसन्धितोऽपि प्रशस्तः शत्रुविजिगीष्वोर्विश्वासवशादन्योन्य-स्यैकात्मतामपि प्रयोजयेत् सुवर्णयोरिव तप्तयोः । अत एव चायं सुवर्णसन्धि-रित्युच्यते ॥

विपरीत इत्यादि । उक्तविपरीतः सद्यस्सर्वकोशदानव्यवस्थाकृतः सन्धिः कपालाख्यः । स तत्क्षणातिमात्रधनग्रहणदुष्टत्वादुपादेयतया नोक्तः शास्त्रे । परिक्रयादिषु पूर्वोक्तेषु चतुर्षु मध्ये पूर्वयोः परिक्रयोपग्रहसन्ध्योर्व-स्त्रावरणादिकमसारं कुप्यद्रव्यं दद्यात् । गजाश्वं वा शत्रुणापेक्ष्यमाणं द्वित्रमा-सान्तरमरणानुकूलविषप्रयोगयुक्तं कृत्वाल्पसङ्ख्यं दद्यात् ॥

तृतीय इत्यादि । सुवर्णसन्धौ देयस्य कमप्यंशं दद्यात् 'कर्माणि मे विपन्नानी'त्येवं वदन् । चतुर्थे कपालसन्धौ मध्यममुदासीनं वाश्रित्य 'ददामि ददामी'ति वदन् तिष्ठेत् कालं यापयेत् । इत्येवमेते चत्वारः कोशदानेनोपनतैः कर्तव्याः सन्धयः ॥

देशोपनतसन्धीनाह — **भूम्येकदेशत्यागेनेत्यादि** । जनपदस्य प्रकृ-तीनां च रक्षणार्थं जनपदैकदेशदानेन यत् सन्धानं, स आदिष्टसन्धिर्नाम । सोऽयं भूम्येकदेशे दत्ते गूढपुरुषैः स्तेनैश्चोपघातं तस्य पुनस्स्वायत्तीकरणार्थं कर्तुं शक्तस्येष्टो भवति ॥

भूमीनामित्यादि । स्वभूमिभ्यः कृत्स्नं फलं गृहीत्वा राजधानीदुर्गव-र्जितानां सर्वासां तासां शत्रवेऽर्पणेन क्रियमाणः सन्धिरुच्छिन्नसन्धिर्नाम्ना । स एष 'परव्यसने भूमिं प्रत्याच्छेत्स्यामी'ति बुद्धया तत् प्रतीक्षमाणस्येप्सितो भवति ॥

फलदानेन भूमीनां मोक्षणं स्यादवक्रयः ।
फलातिमुक्तो भूमिभ्यः सन्धिः स परदूषणः ॥

कुर्यादवेक्षणं पूर्वौ पश्चिमौ त्वाबलीयसम् ।
आदाय फलमित्येते देशोपनतसन्धयः ॥

स्वकार्याणां वशेनैते देशे काले च भाषिताः ।
आबलीयसिकाः कार्यास्त्रिविधा हीनसन्धयः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे तृतीयोऽध्यायः
समहीनज्यायसां गुणाभिनिवेशो हीनसन्धयः,
आदित एकशततमः ॥

फलदानेनेत्यादि । भूम्युत्पन्नफलदानेन भूमीनां मोक्षणम् अवक्रयसन्धिर्नाम । भूमीनामेव दाने तु तत्स्वामित्वमात्मनोऽपेयादित्ययं क्रियते । सर्वभूमिभ्य उत्पद्यमानं यत् फलं तदेव केवलं शत्रवे नार्प्यते किन्तु ततोऽधिकमपि समर्प्यते यस्मिन् सन्धौ, स परदूषणो नाम, आयाभ्यधिकदानसंविदा परं दूषयत्युपहन्तीति व्युत्पत्त्यान्वर्थाख्यः ॥

कुर्यादित्यादि । एषु चतुर्षु पूर्वौ आदिष्टसन्ध्युच्छिन्नसन्धी उद्दिश्य तन्निमित्तानर्थपरिहारविषये परव्यसनकालप्रतीक्षां कुर्यात् । पश्चिमयोरवक्रयसन्धिपरदूषणसन्ध्योर्विषये च भूमिफलमुपहृत्याबलीयसप्रकरणवक्ष्यमाणविधिना शत्रोर्द्रोहानुष्ठानं कुर्यात् । इत्येवमेते चत्वारो भूम्युपनतसन्धयः ॥

स्वकार्याणामित्यादि । त एते हीनसन्धयः दुर्बलैः स्वकार्यानुसारेण देशानुसारेण कालानुसारेण च परिभाष्यानुष्ठेयाः सन्तः पुनस्त्रिविधा वेदितव्याः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे तृतीयोऽध्यायः
समहीनज्यायसां गुणाभिनिवेशः हीनसन्धयश्च,
आदितः एकशततमः ॥

१०३—१०७. प्रक. विगृह्यासनं, सन्धायासनं, विगृह्ययानं, सन्धाययानं, सम्भूयप्रयाणं च।

सन्धिविग्रहयोरासनं यानं च व्याख्यातम्। स्थानमासनमुपेक्षणं चेत्यासनपर्यायाः।

विशेषस्तु गुणैकदेशे स्थानम्। स्ववृद्धिप्राप्त्यर्थमासनम्। उपायानामप्रयोग उपेक्षणमिति।

सन्धानकामयोरिरिविजिगीष्वोरुपहन्तुमशक्तयोर्विगृह्यासनं सन्धाय वा।

विगृह्यासनमिति सूत्रम्। शत्रुणा सह धान्यप्राप्त्यादिप्रतिघातलक्षणं विग्रहं कृत्वा यदासनं तदुच्यत इति सूत्रार्थः। केवलमासनं यानं च पूर्वमुक्तं, गुणान्तरविशिष्टं त्वधुनाभिधीयते।

सन्धिविग्रहयोरित्यादि। सन्धौ विग्रहे चासनं यानं च व्याख्यातं पूर्वाचार्यैः। स्थानम् आसनम् उपेक्षणमित्येते शब्दा आसनस्य पर्यायवाचिनः।

विशेषस्त्विति। तत्र विशेषस्तूच्यते। **गुणैकदेशे स्थानमित्यादि**। गुण इहासनं तच्च शक्तिसाम्यलक्षणं तस्यैकदेशोऽवयवः स च शक्तेरल्पोंऽशः शत्रुकृतापकारप्रत्यपकारकरणासामर्थ्यरूपा शक्त्यल्पतेति यावत्, तस्यामासनलक्षणादपकृष्टायां स्थानशब्दः प्रयुज्यते। तच्च स्थानं विजिगीषोः सन्धायासनस्य कारणं द्रष्टव्यम्। **स्ववृद्धिप्राप्त्यर्थमासनमिति**। आत्मनो वृद्धिप्राप्तिनिमित्ते आसने आसनशब्दः प्रयुज्यते। इयं परकृतापकारं केवलं प्रतिकुर्वतः स्वयमनपकुर्वतश्चावस्था स्थानविपरीता। वृद्ध्यर्थं चेदमासनं शक्तिसाम्यलक्षणासनापेक्षया शक्त्याधिक्ययोगाद् विगृह्यासनस्य कारणम्। **उपायानामप्रयोग उपेक्षणमिति**। उपायानां प्रयोगाभाव ईषत्प्रयोगे वा उपेक्षणशब्दः प्रयुज्यते। एवं पर्यायवचनानामपि स्थानासनोपेक्षणानां कमपि कमपि विशेषमाश्रित्य संज्ञाभेदा उक्ताः। केचित् तु स्थानादीनां स्वरूपमन्यथा वर्णयन्ति— कपालसन्ध्यादिषु प्रदेयद्रव्याप्रदानं स्थानं, कृतोच्छिन्नसन्धेः परव्यसनप्रतीक्षणावस्थानमासनं, सामाद्युपायाप्रयोग उपेक्षणमिति।

प्रसङ्गागतमासनभेदमभिधाय प्रस्तुतमनुसन्धत्ते — **सन्धानकामयोरित्यादि**। सन्धिमिच्छतोः शत्रुविजिगीष्वोः परस्परापकारकरणाशक्तत्वे विगृह्यासनं सन्धायासनं वा कर्तव्यम्। तत्र च शक्त्याधिक्ये आद्यं शक्त्यल्पत्वे

यदा वा पश्येत् — 'स्वदण्डैर्मित्राटवीदण्डैर्वा समं ज्यायांसं वा कर्शयितुमुत्सहे' इति, तदा कृतबाह्याभ्यन्तरकृत्यो विगृह्यासीत ।

यदा वा पश्येत् — 'उत्साहयुक्ता मे प्रकृतयः संहता विवृद्धाः स्वकर्माण्यव्याहताश्चरिष्यन्ति, परस्य वा कर्माण्युपहनिष्यन्ति' इति तदा विगृह्यासीत ।

यदा वा पश्येत् — 'परस्यापचरिताः क्षीणा लुब्धाः स्वचक्रस्तेनाटवीव्यथिता वा प्रकृतयः स्वयमुपजापेन वा मामेष्यन्तीति, सम्पन्ना मे वार्ता विपन्ना परस्य तस्य प्रकृतयो दुर्भिक्षोपहता मामेष्यन्ति, विपन्ना मे वार्ता सम्पन्ना परस्य तं मे प्रकृतयो न गमिष्यन्ति विगृह्य चास्य धान्यपशुहिरण्यान्याहरिष्यामि, स्वपण्योपघातीति वा परपण्यानि निवर्तयिष्यामि, परवणिक्पथाद् वा सारवन्ति मामेष्यन्ति

द्वितीयम् । फलं चाद्यस्य परकर्मोपघातः स्वकर्मानुष्ठानं च, द्वितीयस्य स्वकर्मरक्षणमात्रमिति विवेक्तव्यम् ।

अथ विगृह्यासने निमित्तविशेषानाह — **यदा वा पश्येत् स्वदण्डै**रित्यादि । 'स्वसैन्यैर्मित्रसैन्यैराटविकसैन्यैर्वाहमात्मनः समशक्तिमधिकशक्तिं वा शत्रुं कर्शयितुं शक्नोमी'ति चेन्मन्येत, तदा कृतबाह्याभ्यन्तरकृत्यः सन् — जनपदगता दुर्गादिगताश्च कृत्याः क्रुद्धलुब्धभीतादयः कृताः परविषये वर्धिताः स्वविषये शमिताश्च येन तथाभूतः सन् — विगृह्यासनमनुतिष्ठेत् ।

यदा वा पश्येद् उत्साहयुक्ता इत्यादि । 'मम प्रकृतय उत्साहवत्य एकमनस्काः वृद्धिमत्यः स्वकर्माण्यप्रतिहता अनुष्ठास्यन्ति, परकर्माणि 'चोपहनिष्यन्ति' इति चेन्मन्येत, तदा विगृह्यासनमनुतिष्ठेत् ।

यदा वा पश्येत् परस्येत्यादि । 'परस्य प्रकृतयः परेणानादृताः दुर्भिक्षोपहताः लुब्धाः स्वसैन्यचोराटविकपीडिताः स्वयं मदीयभेदोपायानुष्ठानेन वा मामुपगमिष्यन्ती'ति चेन्मन्येत, तदा विगृह्यासीत । 'कृषिपाशुपाल्यवणिज्या मे सम्पन्नाः परस्य तु विपन्नाः, तस्य प्रकृतयो दुर्भिक्षपरिक्षीणाः मामाश्रयिष्यन्ती'ति चेन्मन्येत, विगृह्यासीत । 'मम कृषिपाशुपाल्यवणिज्या विपन्नाः, परस्य सम्पन्नाः, प्रकृतयश्च मेऽनुरक्ताः परं न गमिष्यन्ति, अतः परस्य धान्यपशुहिरण्यानि विगृह्यापहरिष्यामी'ति चेन्मन्येत, तदा विगृह्यासीत । 'विक्रयार्हाणां मम पण्यानां विक्रयं परदेशागतानि पण्यान्युपघ्नन्ति । तदेतानि

विगृहीते नेतरं, दूष्यामित्राटवीनिग्रहं वा विगृहीतो न करिष्यति, तैरेव वा विग्रहं प्राप्स्यति, मित्रं मे मित्रभाव्यभिप्रयातो बह्वल्पकालं तनुक्षयव्ययमर्थं प्राप्स्यति, गुणवतीमादेयां वा भूमिं सर्वसंदोहेन वा मामनादृत्य प्रयातुकामः कथं न यायात्' इति परवृद्धिप्रतिघातार्थं प्रतापार्थं च विगृह्यासीत ।

तमेव हि प्रत्यावृत्तो ग्रसत इत्याचार्याः ।

नेति कौटल्यः । कर्शनमात्रमस्य कुर्यादव्यसनिनः । परवृद्धया तु वृद्धः समुच्छेदनम् ।

स्वदेशान्निवर्तयिष्यामी'ति चेन्मन्येत, तदा विगृह्यासीत । 'विगृहीते सति शत्रौ तदीयवणिक्पथात् सारवन्ति -- हस्त्यश्वगजदन्तादीनि — मामागमिष्यन्ति, न तु शत्रुमि'ति चेन्मन्येत, तदा विगृह्यासीत । अथवा 'मया विग्रहे क्रियमाणे परो दूष्यामित्राटविकानां निग्रहं स्वमण्डलशुद्ध्यर्थं न करिष्यती'ति चेन्मन्येत, विगृह्यासीत । 'तैरेव वा दूष्यामित्राटविकैः सह विग्रहं प्राप्स्यती'ति चेन्मन्येत, विगृह्यासीत । इत्थं समस्य विगृह्यासनमुक्त्वा ज्यायस आह — **मित्रं मे मित्रभावी**त्यादि । 'मम मित्रं मित्रभावि — एकार्थानर्थसम्बद्धमुपकार्यविकारि च । मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि ।' इति मित्रसन्धिवक्ष्यमाणलक्षणम् — अभिप्रयातः परोऽल्पकालेनाल्पसैन्यधनव्ययेन महान्तमर्थं प्राप्स्यति, तदहमस्याभिप्रयाणं विहानिष्यामि' इति चेन्मन्येत, तदा विगृह्यासीत । अथवा 'गुणवतीं परसुखसाध्यां भूमिमपहर्तुं सर्वसैन्यसमुदयेन मामवज्ञाय प्रयातुकामोऽयं परो यथा न यायात् तथा करिष्यामी'ति चेन्मन्येत, तर्हि विगृह्यासीत, किमर्थं, परवृद्धिविघातार्थं स्वप्रतापाविष्करणार्थं च ।

तमेव हि प्रत्यावृत्तो ग्रसत इत्याचार्या इति । योऽयं विजिगीषुः सर्वसन्दोहेन यातव्याभिप्रयाणोद्यतं परं प्रति तद्वृद्धिप्रतिषेधार्थं विगृह्यासनमनुतिष्ठति, तमेव स्वप्रयाणविघातकुपितः परो यातव्यात् प्रत्यावृत्योच्छिनत्ति इत्येवमनर्थप्रसङ्गात् तं प्रति विगृह्यासनं नानुष्ठेयमित्याचार्या मन्यन्ते ।

आचार्यमतं दूषयति — **नेति कौटल्य** इति । तत्र हेतुमाह — **कर्शनमात्रमस्य कुर्यादव्यसनिन** इति । अस्य विगृह्यासीनस्य अव्यसनिनः व्यसनहीनस्य सतो विजिगीषोः कर्शनमात्रं कुर्यात् कर्शनमेव केवलं कुर्यात् प्रत्यावृत्तः, न तूच्छेदनमित्यर्थः । प्रत्युत विगृह्यासनस्याननुष्ठान एव स निष्प्र-

एवं परस्य यातव्योऽस्मै साहाय्यमविनष्टः प्रयच्छेत् । तस्मात् सर्वसन्दोहप्रकृतं विगृह्यासीत ।

विगृह्यासनहेतुप्रातिलोम्ये सन्धायासीत ।

विगृह्यासनहेतुभिरभ्युच्चितः सर्वसन्दोहवर्जं विगृह्य यायात् ।

यदा वा पश्येत् — 'व्यसनी परः, प्रकृतिव्यसनं वास्य शेषप्रकृतिभिरप्रतिकार्यं, स्वचक्रपीडिता विरक्ता वास्य प्रकृतयः कर्शिता निरुत्साहाः परस्पराद् भिन्नाः शक्या लोभयितुम्, अग्न्युदकव्याधि-

---

तिबन्धविजितयातव्यसकाशाधिगतैश्वर्याप्यायितनिजशक्तिर्भवन् विजिगीषोरुच्छेदनमेव कुर्यादित्याह — **परवृद्ध्या तु वृद्धः समुच्छेदनमिति ।**

विगृह्यासनस्यानुष्ठानेऽनुपेक्षणीयं प्रयोजनान्तरमाह — **एवं परस्ये**त्यादि । एवं विगृह्यासनस्यानुष्ठानेन, अविनष्टः अप्राप्तनाशः प्राप्तपरिरक्षः, परस्य यातव्यः, अस्मै आत्मोपकारिणे विजिगीषवे, साहाय्यं प्रयच्छेत् । **तस्मादि**ति । यथोक्ताद्धेतोः, सर्वसन्दोहप्रकृतं विगृह्यासीत सर्वसैन्यसमुदयेनारब्धयानं प्रति विगृह्यासनमनुतिष्ठेत् । इति विगृह्यासनं व्याख्यातम् । अथ सन्धायासनम् ।

सन्धायासनमिति सूत्रम् । शत्रुणा सह सन्धिं कृत्वा आसनं सन्धायासनम् । तदभिधीयत इति सूत्रार्थः ।

विगृह्यासनहेतुप्रातिलोम्य इत्यादि । य एते विगृह्यासनहेतव उक्ताः तेषामात्मनि वैपरीत्यदर्शने अर्थात् तेषां शत्रावुत्पत्तिदर्शने सन्धायासनमनुतिष्ठेत् । इति सन्धायासनं व्याख्यातम् ।

विगृह्ययानमिति सूत्रमुत्तानार्थम् । **विगृह्यासनहेतुभिरि**ति । तैः, अभ्युच्चितः शक्त्युपचयं प्राप्तः, विगृह्य यायात्, शत्रुम् । सर्वसन्दोहवर्जं सर्वसन्दोहसहितो यो यातव्यं प्रति अभिप्रयातस्तथाविधं शत्रुं वर्जयित्वा । तं प्रत्याचरितव्यं तु विगृह्यासनमुक्तमेव ।

यदा वा पश्येद् व्यसनीत्यादि । शत्रुर्व्यसनवान् इति चेत् पश्येत्, अस्य प्रकृतीनां वामात्यादीनां व्यसनं शेषप्रकृतिभिः प्रतिकर्तुमशक्यमुत्पन्नमिति यदि पश्येत्, अस्य प्रकृतयः स्वसैन्यपीडिताः राज्ञि निरनुरागाः कर्शिताः अत एव निरुत्साहाः परस्परभिन्नाः लोभयितुं शक्याः इति चेत्

मरकदुर्भिक्षनिमित्तक्षीणयुग्यपुरुषनिचयरक्षाविधानः परः' इति, तदा विगृह्य यायात् ।

यदा वा पश्येत् — 'मित्रमाक्रन्दश्च मे शूरवृद्धानुरक्तप्रकृति-र्विपरीतप्रकृतिः परः पार्ष्णिग्राहश्चासारश्च, शक्ष्यामि मित्रेणासारमाक्र-न्देन पार्ष्णिग्राहं वा विगृह्य यातुम्' इति, तदा विगृह्य यायात् ।

यदा वा फलमेकहार्यमल्पकालं पश्येत्, तदा पार्ष्णिग्राहासा-राभ्यां विगृह्य यायात् ।

विपर्यये सन्धाय यायात् ।

पश्येत्, परोऽग्न्युदकव्याधिमरकदुर्भिक्षैर्निमित्तैर्युग्यकर्मकरकोशानां रक्षावि-धानस्य च क्षयं प्राप्त इति च यदि पश्येत्, एषु चतुर्षु निमित्तेषु विगृह्य यायात् ।

यदा वा पश्येन्मित्रमित्यादि । 'मम पुरस्तान्मित्रभूतो राजा पृष्ठतो मित्रभूतो राजा वा शूरैर्वृद्धैरनुरागिभिश्चामात्यादिभिः प्रकृतिभिरुपेतो भवति, परो विपरीतप्रकृतिस्तथैव पार्ष्णिग्राहश्च आसारश्च, मित्रेण पार्ष्णिग्राहासारम्, आक्रन्देन पार्ष्णिग्राहं च विग्राह्य यातव्यं प्रति प्रयातुं शक्ष्यामि' इति चेन्म-न्येत, तदा विगृह्य यायात् ।

यदा वा फलमित्यादि । यदा वा किमपि फलम् आत्मनैकेनैवाल्पेन कालेन साध्यं पश्येत्, तदा पार्ष्णिग्राहेण तदासारेण च सह विगृह्य यात-व्यमभियायात् । फलस्य त्वन्यहार्यत्वे चिरसाध्यत्वे च ताभ्यां सन्धायैव या-तव्यं यायात् । एतच्च पार्ष्णिग्राहासाराभ्यां विग्रहणं पृष्ठकोपारम्भात् प्रागेव फलस्य सुसाधत्वाद् यातव्यसाधनानन्तरमपि तौ साधयितुं शक्याविति कृत्वो-पदिष्टं द्रष्टव्यम् । इति विगृह्ययानं व्याख्यातम् ।

सन्धाययानमिति सूत्रम् । सन्धानपुरस्सरं यानमुच्यत इति सूत्रार्थः ।

विपर्यये सन्धाय यायादिति । यथोक्तानि विगृह्ययाननिमित्तान्यात्मनो यदा न पश्यति शत्रोस्तु पश्यति, तदा विजिगीषुः सन्धाययानमनुतिष्ठेत् । इति सन्धाययानं व्याख्यातम् ।

सम्भूयप्रयाणमिति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्यप्र-याणमुच्यत इति सूत्रार्थः ।

यदा वा पश्येत्—'न शक्यमेकेन यातुमवश्यं च यातव्यम्', इति, तदा समहीनज्यायोभिः सामवायिकैः सम्भूय यायात्। एकत्र निर्दिष्टेनांशेनानेकत्रानिर्दिष्टेनांशेन। तेषामसमवाये दण्डमन्यतमस्मिन् निविष्टांशेन याचेत। संभूयाभिगमनेन वा निर्विश्येत। ध्रुवे लाभे निर्दिष्टेनांशेनाध्रुवे लाभांशेन॥

अंशो दण्डसमः पूर्वः प्रयाससम उत्तमः।
विलोपो वा यथालाभं प्रक्षेपसम एव वा॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
चतुर्थोऽध्यायः विगृह्यासनं सन्धायासनं विगृह्य-
यानं सन्धाययानं सम्भूयप्रयाणम्.
आदितो द्विशततमः॥

यदा वा पश्येन्न शक्यमित्यादि। असहायेन मया यातुं न शक्यते, यातव्यं चावश्यमिति यदा मन्येत, तदा समहीनज्यायोभिः समवेतैः सम्भूय यायाद् यातव्यम्। **एकत्रेत्यादि**। एकस्मिन् देशेंऽश इयानिति भाषित्वा यायाद् अनेकत्राभाषित्वा यायात् तत्तद्देशानुरोधेन। **तेषामसमवाय इति**। समादीनां मध्ये, अन्यतमस्मिन् अन्यतमे राज्ञि, असमवाये असमवेते सति, दण्डं निविष्टांशेन याचेत तद्देयत्वेन व्यवस्थितो योंऽशः परिमाणं तद्युक्तं सैन्यं देहीति याचेत। इह अन्यतमस्मिन् इति सर्वनामकार्यकरणमार्षम्। अन्य-तरस्मिन् इति पाठे तु बहुविषयनिर्धारणाप्रतीतिः। **सम्भूयाभिगमनेन वा निर्विश्येतेति**। सम्भूयाभिगमनं वा सहायकर्मणो निर्वेशः कल्पेत, 'यदि मम कार्ये सम्भूयाभिगमनेन त्वमिदानीं साहाय्यं कुर्याः अहमपि तव कार्ये तथा साहाय्यं दास्यामि' इति वा साहाय्यदानप्रयोजनं निर्दिशेदित्यर्थः। **ध्रुवे लाभ इति**। लाभश्चेद् ध्रुवो भूम्यादिस्तर्हि, निर्दिष्टेनांशेन निर्विश्येत सहायकर्मनि-र्वेशतया ध्रुवस्य कश्चिदंशो निर्देष्टव्यः पूर्वमेव। अध्रुवे लाभे, लाभांशेन निर्विश्येत अध्रुवस्य लब्धपदार्थस्य कश्चिदंशो निर्वेशतया निर्देष्टव्यः॥

यातव्यं सम्भूययानेन जितवद्भिर्लब्धस्य धनस्य कथं विभागस्तत्राह— **अंशो दण्डसम इति**। दत्तसैन्यबहुत्वाल्पत्वानुरूपो दातृणामंशः कल्प्य इति प्रथमः पक्षः। **प्रयाससम उत्तम इति**। परिस्पन्दाधिक्याल्पत्वानुरूपोंऽश

इत्युत्तमः पक्षः । **विलोपो वा यथालाभमिति** । यथालाभं तेन तेन परिलुण्टितोऽर्थस्तस्य तस्य परिलुण्टितुरंश इत्यपरः पक्षः । **प्रक्षेपसम एव वेति** । अथवा धनसाध्ये कार्ये सम्भूययातृभिः साधिते व्ययार्थधनप्रक्षेपबहुत्वाल्पत्वानुरूपो धनप्रक्षेप्तॄणामंशः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
चतुर्थोऽध्यायः विगृह्यासनं सन्धायासनं विगृह्ययानं सन्धाययानं सम्भूयप्रयाणम् ,
आदितो द्विशततमः ॥

१०८—११०. प्रक. यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविराग-हेतवः प्रकृतीनां, सामवायिकविपरिमर्शश्च।

तुल्यसामन्तव्यसने यातव्यममित्रं वेत्यमित्रमभियायात्, तत्सिद्धौ यातव्यम्। अमित्रसिद्धौ हि यातव्यः साहाय्यं दद्यान्नामित्रो यातव्यसिद्धौ।

गुरुव्यसनं यातव्यं, लघुव्यसनममित्रं वेति गुरुव्यसनं सौकर्यतो यायादित्याचार्याः। नेति कौटल्यः—लघुव्यसनममित्रं यायात्। लघ्वपि हि व्यसनमभियुक्तस्य कृच्छ्रं भवति। सत्यं गुर्वपि गुरुतरं भवति। अनभियुक्तस्तु लघुव्यसनः सुखेन व्यसनं प्रतिकृत्यामित्रो यातव्यमभिसरेत्। पार्ष्णिं गृह्णीयात्।

यातव्यामित्रयोरभिग्रहचिन्तेति सूत्रम्। अरिसम्प्रयुक्तो व्यसनी यातव्यः, अमित्रो नित्यापकारी सामन्तः, अभिग्रहः पीडनकर्शनादिः तद्धेतुत्वाद् यानमिहोच्यते, चिन्ता सम्प्रधारणम्। यातव्यामित्रयोर्मध्ये कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमभिधीयत इति सूत्रार्थः। यानभेदाः कथिताः, यातव्यभेदास्तु कथ्यन्ते।

तुल्यसामन्तव्यसने यातव्यममित्रं वेतीत्यादि। तुल्ये सामन्तयोर्यातव्यामित्रयोर्व्यसने यातव्यं वा पूर्वमभियायादमित्रं वेति चिन्तायाम्; अमित्रमेव पूर्वमभियायात्, तत्साधनानन्तरं तु यातव्यमभियायात्। कुतः, हि यस्मात् कारणात् अमित्रसाधने विषये यातव्यो हेतुं ग्राहितो भृत्यभावी मित्रभावी वा सन् साहाय्यं विजिगीषवे दद्यात्, अमित्रस्तु यातव्यसाधने पूर्वमारभ्यमाणे साहाय्यं न दद्यादरिभावित्वेन विजिगीषुं प्रति नित्यापकारशीलत्वात्।

इत्थं व्यसनसाम्ये यानप्रकारमुक्त्वा व्यसनवैषम्ये आह — **गुरुव्यसनमित्यादि**। गुरुव्यसनं यातव्यं वा यायाल्लघुव्यसनममित्रं वेति चिन्तायां, गुरुव्यसनमेव पूर्वं यायात् सुखसाध्यत्वादित्याचार्या वदन्ति। तत् प्रतिषेधति — **नेति कौटल्य इत्यादि**। गुरुव्यसनलघुव्यसनसन्निपाते लघुव्यसनममित्रमेव यायात्, कुतः, लघ्वपि स्वव्यसनमभियोगेन युक्तं शत्रुणा कृच्छ्रप्रतिकार्यं भवतीति सुखजय्यः शत्रुः। यद्यपि यातव्यस्य गुरु व्यसनमभियोगेन युक्तं गुरुतरं भवतीति शत्रुरभियुक्तः सुजय्यतरो भवति, तथापि, लघुव्यसनोऽमित्र एवाभियोक्तव्यः, अन्यथा सोऽभियोगपीडाविरहादात्मनो व्यसनस्य

यातव्ययौगपद्ये गुरुव्यसनं न्यायवृत्तिं लघुव्यसनमन्यायवृत्तिं विरक्तप्रकृतिं वेति विरक्तप्रकृतिं यायात्। गुरुव्यसनं न्यायवृत्तिमभियुक्तं प्रकृतयोऽनुगृह्णन्ति। लघुव्यसनमन्यायवृत्तिमुपेक्षन्ते। विरक्ता बलवन्तमप्युच्छिन्दन्ति। तस्माद् विरक्तप्रकृतिमेव यायात्।

क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वेति — क्षीणलुब्धप्रकृतिं यायात्। क्षीणलुब्धा हि प्रकृतयः सुखेनोपजापं पीडां वोपगच्छन्ति, नापचारिताः प्रधानावग्रहसाध्या इत्याचार्याः। नेति कौटल्यः—क्षीणलुब्धा हि प्रकृतयो भर्तरि स्निग्धा भर्तृहिते तिष्ठन्ति। उपजापं वा विसंवादयन्ति, अनुरागे सार्वगुण्यमिति। तस्मादपचरितप्रकृतिमेव यायात्।

बलवन्तमन्यायवृत्तिं दुर्बलं वा न्यायवृत्तिमिति, बलवन्तमन्याय-

---

लघुनः सुखेन प्रतीकारं कृत्वा यातव्याय साहाय्यं दद्यात्, तस्य पार्ष्णिं वा गृह्णीयात्।

इत्थं द्विविषयं यानानुष्ठानमुक्त्वा त्रिविषयमाह — **यातव्ययौगपद्य** इत्यादि। न्याय्यवृत्तिर्गुरुव्यसन एकः, अन्याय्यवृत्तिर्लघुव्यसनोऽपरः, विरक्तप्रकृतिरन्य इति त्रिषु यातव्येषु कतमं यायादिति विचारणायां विरक्तप्रकृतिं यायात्। कुतः, न्याय्यवृत्तिर्गुरुव्यसनो हि प्रकृतिभिरनुगृह्येतेत्यसाध्यः, अन्याय्यवृत्तिर्लघुव्यसनः प्रकृतिभिरुपेक्ष्येत न पुनर्द्विष्येतेति केवलस्वबलसाध्यः, विरक्तप्रकृतिस्तु बलवानपि विरक्ताभिः स्वप्रकृतिभिरुच्छिद्येतेति विजिगीषोः सुखतरोच्छेद्य इत्येतस्मात् कारणात्।

क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वेतीत्यादि। क्षीणाः दुर्भिक्षव्यसनादिपीडिता लुब्धाश्च यस्य प्रकृतयस्तथाभूतस्यानादृतप्रकृतेश्चेत्युभयोर्यातव्ययोः प्रसङ्गे क्षीणलुब्धप्रकृतिं यायात्। कस्मात्, क्षीणलुब्धा हि प्रकृतयोऽनायासेन भेदयितुं पीडयितुं च शक्याः, न त्वपचरिताः प्रकृतयः। ता हि प्रधानपुरुषस्वीकारैकसाध्या इत्याचार्याणां मतम्। तत् प्रत्याचष्टे —**नेति कौटल्य** इत्यादि। कुतः, क्षीणलुब्धा हि प्रकृतयः भर्तरि स्नेहवत्यश्चेत् तस्य हितमेव कुर्युः, भेद्यमाना वा भेदं नाङ्गीकुर्युः स्वाम्यनुरागे सर्वगुणयोग इति मन्यमानाः। तस्मादनादृतप्रकृतिमेव यातव्यं यायात्।

बलवन्तमन्यायवृत्तिमित्यादि। अन्याय्यचरितो बलवानेकः न्याय्य-

वृत्तिं यायात्। बलवन्तमन्यायवृत्तिम् अभियुक्तं प्रकृतयो नानुगृह्णन्ति निष्पातयन्त्यमित्रं वास्य भजन्ते। दुर्बलं तु न्यायवृत्तिमभियुक्तं प्रकृतयः परिगृह्णन्ति, अनुनिष्पतन्ति वा।

अवक्षेपेण हि सतामसतां प्रग्रहेण च।
अभूतानां च हिंसानामधर्म्याणां प्रवर्तनैः॥
उचितानां चरित्राणां धर्मिष्ठानां निवर्तनैः।
अधर्मस्य प्रसङ्गेन धर्मस्यावग्रहेण च॥
अकार्याणां च करणैः कार्याणां च प्रणाशनैः।
अप्रदानैश्च देयानामदेयानां च साधनैः॥
अदण्डनैश्च दण्ड्यानां दण्ड्यानां चण्डदण्डनैः।
अग्राह्याणामुपग्राहैर्ग्राह्याणां चानभिग्रहैः॥

चरितो दुर्बल एक इत्यनयोः कतरमभियायादिति विमर्शे, बलवन्तमन्यायवृत्तिमेव यायात्। कुतः, तं हि शत्रुणाभियुक्तं प्रकृतयो नानुगृह्णन्ति, प्रत्युत दुर्गादिस्थानेभ्यो निष्कासयन्ति, अस्य शत्रुं वाश्रयन्ते। दुर्बलं तु न्याय्यचरितं परेणाभियुक्तं प्रकृतयोऽनुगृह्णन्ति, दुर्गादितो निष्क्रामन्तमनुनिष्क्रामन्ति च। इति यातव्यामित्रयोरभिग्रहचिन्ता व्याख्याता।

क्षयलोभविरागहेतवः प्रकृतीनामिति सूत्रम्। क्षयो गजतुरगमुख्यपुरुषाल्पीभावो धनाल्पीभावश्च लोभोऽतितृष्णा विरागः प्रद्वेषः त एते प्रकृतीनां कैर्हेतुभिरुत्पद्यन्त इत्येतदिहोच्यत इति सूत्रार्थः। प्रकृतिक्षयलोभविरागा नाम विजिगीषोर्यातव्यत्वप्रयोजकाः। अतस्तद्धेतवो विजिगीषुणा हानार्थं विज्ञातव्या इति कृत्वेहोपदिश्यन्ते।

तानेकान्वयेन श्लोकाष्टकेनाह— अवक्षेपेण हीत्यादि। सतान् अवक्षेपेण— विद्यावृत्ताभिजनशौर्यादिसम्पन्नानामवज्ञानेन—, असतां प्रग्रहेण— नटनर्तकादीनामर्चनेन —, अभूतानाम् अनुचितानां धर्मापेतानां च हिंसानां प्रवर्तनैः, उचितानां धर्मानपेतानां समुदाचाराणां निवर्तनैः, परस्त्रीग्रहणस्तेयाद्यधर्मासक्त्या, कूपतटाकनिर्माणादिधर्मप्रत्याख्यानेन, अनर्थफलकार्यानुष्ठानैः दुर्गसेतुकर्मादिकार्योपघातैः, भृत्यवेतनादीनां देयानामप्रदानैः, अपूर्वक्लृप्तानामुपदानां प्रजाभ्यः प्रसभहरणैः, दण्डार्हादण्डनैः, दण्ड्यानामत्युग्रदण्डनैः, अग्राह्याणां स्तेनादीनां स्वीकरणैः, जानपदत्वादिगुणोपेतानां पितृपितामह-

अनर्थ्यानां च करणैरर्थ्यानां च विघातनैः ।
अरक्षणैश्च चोरेभ्यः स्वयं च परिमोषणैः ॥
पातैः पुरुषकाराणां कर्मणां गुणदूषणैः ।
उपघातैः प्रधानानां मान्यानां चावमाननैः ॥
विरोधनैश्च वृद्धानां वैषम्येणानृतेन च ।
कृतस्याप्रतिकारेण स्थितस्याकरणेन च ॥
राज्ञः प्रमादालस्याभ्यां योगक्षेमवधेन च ।
प्रकृतीनां क्षयो लोभो वैराग्यं चोपजायते ॥
क्षीणाः प्रकृतयो लोभं लुब्धा यान्ति विरागताम् ।
विरक्ता यान्त्यमित्रं वा भर्तारं घ्नन्ति वा स्वयम् ॥

तस्मात् प्रकृतीनां क्षयलोभविरागकारणानि नोत्पादयेत् । उत्पन्नानि वा सद्यः प्रतिकुर्वीत ।

क्षीणा लुब्धा विरक्ता वा प्रकृतय इति । क्षीणाः पीडनोच्छेदन-

क्रमागतानां ग्राह्याणामसङ्ग्रहणैः, अनर्थावहानां सन्ध्यादीनां करणैः, अर्थावहानां तेषां विघातनैः, चोरेभ्यः प्रजानामरक्षणैः, स्वयं चौर्यकरणैः, पुरुषकाराणां त्यागैः, कर्मणां सम्यगनुष्ठितस्वगुणस्य निन्दनैः, प्रधानानां सेतुदुर्गादिकर्माध्यक्षाणां दोषारोपेण निकृष्टकर्मनियोजनैः, मान्यानाम् ऋत्विगाचार्यपुरोहितादीनामवमाननैः, विद्यादिवृद्धानां विरोधाचरणैः 'विरोधनैश्च भृत्यानाम्' इति पाठे भृत्यानामन्योन्यवैरोत्पादनैः, भृत्येषु समानसामर्थ्येषु विषमवृत्त्या, असत्यवचनेन, उपकारानिष्क्रयेण, स्थितस्य नित्यस्य शक्रोत्सवादेरकरणेन, राज्ञो द्यूतमृगयाद्यासक्तिलक्षणेन प्रमादेन, अलसतया, योगक्षेमवधेन इत्येतैर्हेतुभिः प्रकृतीनां क्षयो लोभो राज्ञि अपरागश्च जायते ॥

क्षीणा इत्यादि । प्रकृतयः क्षये जाते तत एव हेतोर्लोभं प्राप्नुवन्ति, लोभाच राज्ञि अपरागमलब्धकामाः प्राप्नुवन्ति, अपरक्ताश्च स्वामिनं परित्यज्य तच्छत्रुं भजन्ते अथवा स्वयमेव स्वामिनं मारयन्ति ॥

तस्मात् प्रकृतीनां क्षयलोभविरागहेतवो यथा नोत्पद्येरन् तथा प्रयतेत राजा, उत्पन्नांश्च सद्यः प्रतिक्रियया शमयेदित्याह — **तस्मादित्यादि** ।

क्षीणासु लुब्धासु विरक्तासु चेति त्रिविधासु प्रकृतिषु यथोत्तरं गौरवमित्याह — **क्षीणा लुब्धा इत्यादि** । इतिशब्दानन्तरं गौरवक्रम इति

भयात् सद्यः सन्धिं युद्धं निष्पतनं वा रोचयन्ते । लुब्धा लोभेनासन्तुष्टाः परोपजापं लिप्सन्ते । विरक्ताः पराभियोगमभ्युत्तिष्ठन्ते ।

तासां हिरण्यधान्यक्षयः सर्वोपघाती कृच्छ्रप्रतीकारश्च । अश्वपुरुषक्षयो हिरण्यधान्यसाध्यः ।

लोभ ऐकदेशिको मुख्यायत्तः परार्थेषु शक्यः प्रतिहन्तुमादातुं वा।

विरागः प्रधानावग्रहसाध्यः । निष्प्रधाना हि प्रकृतयो भोग्या भवन्त्यनुपजाप्याश्चान्येषामनापत्सहास्तु । प्रकृतिमुख्यप्रग्रहैस्तु बहुधा भिन्ना गुप्ता भवन्त्यापत्सहाश्च ।

शेषः । गौरवतारतम्यनिमित्तभूतांस्ताभ्यः सम्भावितानर्थानाह — **क्षीणाः पीडनोच्छेदनभयादित्यादि** । क्षीणा हि प्रकृतयः पीडनमुच्छेदनं वा शङ्कमानाः शत्रुणा सह सन्धिं सद्यः कुर्युरनिच्छत्यपि विजिगीषौ शत्रोः प्रतिहतोत्साहतामापाद्य पश्चात् तं कर्तव्यं मन्यमाने । युद्धं वा ताः सद्य आरभेरन् विजिगीषौ परस्यच्छिद्रमुपलभ्य पश्चात् तद् आरम्भणीयं मन्यमानेऽपि । निष्क्रमणं वा दुर्गात् ताः सद्यः कुर्युर्विजिगीषौ 'सर्वोपायप्रयोगनैष्फल्यदर्शने पश्चाद् दुर्गम् आदीप्य निष्पतिष्यामी'ति मन्यमानेऽपि । अथ लुब्धाः प्रकृतयो लोभेनातृप्ताः परेण क्रियमाणं भेदमुपगच्छन्ति । विरक्तास्तु विजिगीषुं प्रति परेणारब्धस्याभियोगस्याभिमुख्येन चेष्टन्ते — शत्रुपक्षमनुप्रविश्य विजिगीषुमभियुञ्जत इत्यर्थः ।

तासामिति । प्रकृतीनां, हिरण्यधान्यक्षयः, सर्वोपघाती गजतुरगपदात्यादीनां सर्वेषामुपघातकः, अत एव कृच्छ्रप्रतीकारः अशक्यप्रतिविधानः । अश्वपुरुषक्षयस्तु हिरण्यधान्यसाध्यः सुकरप्रतिविधानः ।

लोभ इति । सः, ऐकदेशिकः प्रकृत्येकदेशाश्रितः, मुख्यायत्तः प्रवर्तननिवर्तनयोर्मुख्याधीनः, परार्थेषु शक्यः प्रतिहन्तुमादातुं वा परेषां यातव्यारिप्रभृतीनामर्थैरेव विषयभूतैः शमयितुं शक्यः मुख्यपुरुषैः स्वयं ग्रहीतुं च शक्यः ।

विरागः प्रधानावग्रहसाध्य इति । विरागस्तु प्रधानपुरुषनिग्रहसाध्यः । **निष्प्रधाना** हीति । मुख्यरहिताः, प्रकृतयः, भोग्याः विजिगीषोर्वश्याः भवन्ति, अन्येषाम् अनुपजाप्याश्च परामेद्याश्च भवन्ति । यद्यपीदृशो गुणो निष्प्रधानत्वे, तथापि कश्चिद् दोषो गणनीयोऽस्तीत्याह — अनापत्स-

सामवायिकानामपि सन्धिविग्रहकारणान्यवेक्ष्य शक्तिशौचयुक्तेन सम्भूय यायात्। शक्तिमान् हि पार्ष्णिग्रहणे यात्रासाहाय्यदाने वा शक्तः, शुचिः सिद्धौ चासिद्धौ च यथास्थितकारीति।

तेषां ज्यायसैकेन द्वाभ्यां समाभ्यां वा सम्भूय यातव्यमिति। द्वाभ्यां समाभ्यां श्रेयः, ज्यायसा ह्यवगृहीतश्चरति समाभ्यामतिसन्धानाधिक्ये वा तौ हि सुखौ भेदयितुम्। दुष्टश्चैको द्वाभ्यां नियन्तुं भेदोपग्रहं चोपगन्तुमिति।

हास्तु आपत्सहास्तु न भवन्ति आपद्युपस्थितायां विजिगीषुं परित्यज्य गच्छन्तीत्यर्थः। सप्रधानत्वे तु बहुविधैः प्रकृतिमुख्यकृतैरुपलालनैः पराभेद्या रक्षिताश्च सत्यः पराभियोगविपत्सहाश्च भवन्तीत्याह — **प्रकृतिमुख्यप्रग्रहैस्त्वित्यादि**। इत्थं क्षयलोभविरागहेतवः प्रकृतीनामित्येतद् व्याख्यातम्।

सामवायिकविपरिमर्श इति सूत्रम्। समवायेन चरन्तीति सामवायिका विजिगीष्वनुयायिनः तेषां विपरिमर्शो गुरुलघुभावचिन्तनमभिधीयत इति सूत्रार्थः। सम्भूयप्रयाणे सामवायिकानामंशकल्पनमुक्तं, गुरुलघुभावस्तु नोक्तः, स इह निरूप्यते।

सामवायिकानामपीति। तेषां च मध्ये, सन्धिविग्रहकारणानि, अवेक्ष्य गुरुलघुभावतः पर्यालोच्य, शक्तिशौचयुक्तेन सम्भूय यायात्। शक्तिशौचयुक्ताविति पाठे शक्तिशौचयोगे सतीत्यर्थः। शक्तिशौचयोगस्य फलमाह— **शक्तिमान् हीत्यादि**। उत्साहादिशक्तित्रययुक्तो हि पार्ष्णिग्राहवारणे, युद्धयात्रासहायसेनादाने वा समर्थो भवति। शुचिश्च ईप्सितस्यार्थस्य सिद्धावसिद्धौ वा न्याय्यमनुतिष्ठति।

सामवायिकापेक्षायामेको ज्यायान् लभ्यते समौ च द्वौ, तत्र का प्रतिपत्तिरिति चिन्तायां, द्वाभ्यां समाभ्यां सम्भूययानं प्रशस्तं, कस्मात्, यस्मात् ज्यायसा सह याने विजिगीषुणा तदधश्चरितव्यं, समाभ्यां सह याने न तथा चरितव्यमित्येको गुणः। पक्षे चातिसन्धानवशादाधिक्ये लब्धे तौ परस्परस्माद् भेदयितुमनायासशक्यौ। यदि च तयोरन्यतरो दुष्टो भवेत्, स विजिगीषुणा तदन्यसहायेन दमयितुं शक्यः, दूष्यादिद्वारकेण भेदप्रयोगेण निग्रहं च गमयितुं शक्य इत्याह— तेषां ज्यायसैकेनेत्यादि।

समेनैकेन द्वाभ्यां हीनाभ्यां वेति । द्वाभ्यां हीनाभ्यां श्रेयः । तौ हि द्विकार्यसाधकौ वश्यौ च भवतः । कार्यसिद्धौ तु —

कृतार्थाज्ज्यायसो गूढः सापदेशमपस्रवेत् ।
अशुचेः शुचिवृत्तात् तु प्रतीक्षेताविसर्जनात् ॥
सत्रादपसरेद् यत्तः कलत्रमपनीय वा ।
समादपि हि लब्धार्थाद् विश्वस्तस्य भयं भवेत् ॥
ज्यायस्त्वे चापि लब्धार्थः समो विपरिकल्पते ।
अभ्युचितश्चाविश्वास्यो वृद्धिश्चित्तविकारिणी ॥
विशिष्टादल्पमप्यंशं लब्ध्वा तुष्टमुखो व्रजेत् ।
अनंशो वा ततोऽस्याङ्के प्रहृत्य द्विगुणं हरेत् ॥

समेनैकेन वा संभूययानमनुष्ठेयं द्वाभ्यां हीनाभ्यां वेति चिन्तायां द्वितीयः पक्ष एव श्रेयान्, कस्मात्, यस्मात् हीनौ पुरः पश्चाच्च रक्षकौ भूत्वा कार्यद्वयं साधयन्तौ विजिगीषोर्वशवर्तिनौ च भवत इत्याह — **समेनैकेन द्वाभ्यां हीनाभ्यां** वेत्यादि ।

एवं राजान्तरेषु सम्भूययानाय विजिगीषुणा मुख्येन सतापेक्ष्यमाणेषु विधिरुक्तः, विजिगीषौ तु राजान्तरैरपेक्ष्यमाणे विधिमाह — **कार्यसिद्धौ तु कृतार्थादि**त्यादि । साह्यार्थमात्मनेतरि ज्यायसि कार्यसिद्ध्यनन्तरमशुचौ दृष्टे अन्याविदितः किमपि निमित्तमपदिशंस्तत्सकाशाद् विजिगीषुरपस्रवेत् अपेयात् । तं शुचिवृत्तमवगत्य तु आ विसर्जनाद् विसर्जनं प्रतीक्षमाणस्तदन्तिक एव तिष्ठेत् ॥

अपसरणस्य कर्तव्यतायामाह — **सत्रादि**ति । दुर्गादिः सङ्कटप्रदेशः सत्रं तस्मात्, अपसरेत्, यत्तः यत्नवान्, किं कृत्वा, कलत्रमपनीय वा कलत्रमित्यन्तरङ्गपरिग्रहाणामुपलक्षणं तान् अन्यत्र नीत्वा । समादपसरणे कारणमाह — **समादपि** हीति । समानादपि लब्धार्थात् विश्वस्तस्य भयं भवेत् अनर्थो जायेत, तस्याशुचित्वात् ॥

ज्यायान् वा भवतु समो वा । लब्धार्थः सर्वो विपरीतवृत्तिर्भवति । अभ्युच्चितो वृद्धिप्राप्तः न विश्वसनीयः । वृद्धिर्हि नाम चित्तं विकारयतीत्याह — **ज्यायस्त्वे चापी**त्यादि ॥

विशिष्टादिति । ज्यायसः सकाशात्, अल्पमप्यंशं लब्ध्वा तुष्टमुखः

कृतार्थस्तु स्वयं नेता विसृजेत् सामवायिकान् ।
अपि जीयेत न जयेन्मण्डलेष्टस्तथा भवेत् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे पञ्चमोऽध्यायः
यातव्यामित्रयोरभिग्रहचिन्ता क्षयलोभविरागहेतवः
प्रकृतीनां सामवायिकविपरिमर्शः,
आदितस्त्रिशततमः ॥

प्रसन्नवदनो गच्छेत् । अनंशो वा अलब्धांशो वा तुष्टमुखो गच्छेत् । ततः पश्चात्, अरयाङ्के प्रहृत्य विशिष्टस्य रन्ध्रे प्रहरणं दत्त्वा, प्रकृत्येति पाठे प्रयत्नं कृत्वेत्यर्थः, द्विगुणम् आदियांशद्विगुणं, हरेत् ।

विजिगीषोः परतन्त्रयानेऽनुष्ठानमभिधाय स्वतन्त्रयानेऽनुष्ठानमाह — **कृतार्थस्त्विति** । स्वयं नेता तु स्वतन्त्रयानकर्ता तु, विजिगीषुः, कृतार्थः सिद्धसमीहितः, सामवायिकान्, विसृजेत् सत्कृत्य प्रेषयेत् । जीयेतापि स्वयं न्यूनांशत्वं प्राप्येतापि, न तु जयेत् न पुनः सामवायिकान् न्यूनांशत्वं प्रापयेत् । तथा तेन प्रकारेणानुष्ठाने, मण्डलेष्टः राजमण्डलस्य प्रियः, भवेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे पञ्चमोऽध्यायः
यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविरागहेतवः
प्रकृतीनां, सामवायिकविपरिमर्शः,
आदितस्त्रिशततमः ॥

१११,११२. प्रक. संहितप्रयाणिकं, परिपणितापरिपणितापसृतसन्धयश्च ।

विजिगीषुर्द्वितीयां प्रकृतिमेवमतिसन्दध्यात् । सामन्तं संहितप्रयाणे योजयेत्— 'त्वमितो याहि, अहमितो यास्यामि, समानो लाभ' इति ।

लाभसाम्ये सन्धिः । वैषम्ये विक्रमः ।

सन्धिः परिपणितश्चापरिपणितश्च ।

संहितप्रयाणिकमिति सूत्रम् । संहितयोः अन्योन्यकृतसन्धिकयोर्विजिगीष्वोः स्वं स्वं यातव्यं प्रति यद् भिन्नदिकं प्रयाणं तदुच्यत इति सूत्रार्थः ।

यानं हि प्रकृतं द्विविधं — शुद्धं गुणान्तरमिश्रमिति । तत्र शुद्धं 'यानेन वृद्धिमातिष्ठेद्' इति प्रथमाध्यायेऽभिहितम् । गुणान्तरमिश्रमपि चतुर्विधं — विगृह्ययानं सन्धाययानं सम्भूयप्रयाणं संहितप्रयाणं चेति । तत्रापि विगृह्ययानादित्रिकं निरूपितम् । सम्भूयप्रयाणं त्वधुना निरूप्यते ।

विजिगीषुरिति । सः, द्वितीयां प्रकृतिम् अरिप्रकृतिम्, एवमतिसन्दध्यात् वक्ष्यमाणप्रकारेण वञ्चयेत् । तं प्रकारमाह — सामन्तं संहितप्रयाणे योजयेत् प्रवर्तयेत् । किमित्युक्त्वा, त्वम् इतो याहि यत्र ते यातव्यस्तत्र देशे याहि, अहमितो यास्यामि यत्र मे यातव्यस्तत्राहं यास्यामि । समानो लाभः उभयत्रोत्पत्स्यमानो लाभ उभयोरावयोः समानः । इत्युक्त्वा ।

लाभसाम्ये सन्धिरिति । उभयोर्लाभे समाने सन्धिः समशक्तित्वात् करणीयः । वैषम्ये विक्रमः विजिगीषोर्लाभाधिक्ये स ज्यायस्त्वाद् विक्रमेत । इति संहितप्रयाणिकं व्याख्यातम् ।

परिपणितापरिपणितापसृताश्च सन्धय इति सूत्रम् । परिपणितसन्धिः अपरिपणितसन्धिः अपसृतसन्धिश्चाभिधीयत इति सूत्रार्थः । परिपणितसन्धिर्नाम देशं कालं कार्यं चानुरुध्य क्रियमाणः । तद्विपरीतोऽपरिपणितसन्धिः । आत्मानं कुतश्चिन्निमित्ताद् विहायापगतैर्मित्रैर्भृत्यैर्वा सह सन्धिरपसृतसन्धिः ।

तृतीयाध्याये 'त्रिविधा हीनसन्धय' इति हीनसन्धय उक्ताः । किमेतावन्त एव सन्धय इति सन्देहे परिपणितादयोऽन्येऽपि सन्धयः सन्तीति निरूपयितुमिदं प्रकरणमारभ्यते ।

सन्धिः परिपणितश्चापरिपणितश्चेति । निरूप्यत इति शेषः ।

'त्वमेतं देशं याह्यहमिमं देशं यास्यामीति' परिपणितदेशः।

'त्वमेतावन्तं कालं चेष्टस्व, अहमेतावन्तं कालं चेष्टिष्य इति' परिपणितकालः।

'त्वमेतावत् कार्यं साधय, अहमेतावत् कार्यं साधयिष्यामीति' परिपणितार्थः।

यदि वा मन्येत—'शैलवननदीदुर्गमटवीव्यवहितं छिन्नधान्यपुरुषवीवधासारमयवसेन्धनोदकमविज्ञातं प्रकृष्टमन्यभावदेशीयं वा सैन्यव्यायामानामलब्धभौमं वा देशं परो यास्यति विपरीतमहम्' इति, एतस्मिन् विशेषे परिपणितदेशं सन्धिमुपेयात्।

यदि वा मन्येत—'प्रवर्षोष्णशीतमतिव्याधिप्रायमुपक्षीणाहारोपभोगं सैन्यव्यायामानां चौपरोधिकं कार्यसाधनानामूनमतिरिक्तं

तत्र परिपणितसन्धिं सप्तविधं क्रमेणाह—त्वमेतमित्यादि। 'त्वमेतं देशं याहि; अहमिमं देशं यास्यामी'त्येवं देशं परिपण्य कृतः सन्धिः परिपणितदेशो नाम प्रथमः परिपणितसन्धिः।

त्वमेतावन्तमित्यादि। 'त्वमियन्तं कालं यथेष्टं चेष्टस्व, अहमियन्तं कालं यथेष्टं चेष्टिष्य' इति कालं परिपण्य कृतः परिपणितकाल इति द्वितीयः।

त्वमेतावत् कार्यमित्यादि। 'त्वं दुर्गादिष्वेतावत् कार्यं निर्वर्तय, अहमेतावन्निर्वर्तयिष्यामी'ति कार्यं परिपण्य कृतः सन्धिः परिपणितार्थ इति तृतीयः।

त्रयाणामेषां क्रमेण प्रयोगनिमित्तान्याह—यदि वा मन्येत शैलवनेत्यादि। 'गिरिदुर्गयुक्तं वनदुर्गयुक्तं नदीदुर्गयुक्तं कान्तारव्यवहितं देशान्तरादनानेतव्यधान्यम् अनानेतव्यपुरुषम् अनानेतव्यतैलघृतादिभारम् अनानेतव्यसुहृद्बलं तृणकाष्ठजलरहितम् अपरिचितं विप्रकृष्टम् अन्यभावदेशीयम्—अस्वामिभक्तदेशीयजनं—वा सैन्यपरिस्पन्दयोग्यभूमिरहितं वा अत एव दुस्साधं देशं परो यास्यति, विपरीतं सुसाधं देशम् अहं यास्यामि' इति यदि मन्येत विजिगीषुः, एतस्मिन् कारणविशेषे परिपणितदेशं सन्धिं कुर्यात्।

यदि वा मन्येत प्रवर्षेत्यादि। 'प्रकृष्टवर्षं प्रकृष्टोष्णं प्रकृष्टशीतम् अत्यन्तव्याधिबहुलम् आहारोपभोगार्थद्रव्योपक्षययुक्तं सैन्यव्यायामोपरोधहेतुं

वा कालं परश्चेष्टिष्यते, विपरीतमहम्' इति, तस्मिन् विशेषे परिपणितकालं सन्धिमुपेयात् ।

यदि वा मन्येत — 'प्रत्यादेयं प्रकृतिकोपकं दीर्घकालं महाक्षयव्ययमल्पमनर्थानुबन्धमकल्यमधर्म्यं मध्यमोदासीनविरुद्धं मित्रोपघातकं वा कार्यं परः साधयिष्यति, विपरीतमहम्' इति, तस्मिन् विशेषे परिपणितार्थं सन्धिमुपेयात् ।

एवं देशकालयोः कालकार्ययोर्देशकार्ययोर्देशकालकार्याणां चावस्थापनात् सप्तविधः परिपणितः । तस्मिन् प्रागेवारभ्य प्रतिष्ठाप्य च स्वकर्माणि, परकर्मसु विक्रमेत ।

व्यसनत्वरावमानालस्ययुक्तमज्ञं वा शत्रुमतिसन्धातुकामो देशकालकार्याणामनवस्थापनात् 'संहितौ स्वः' इति सन्धिविश्वासेन परच्छिद्रमासाद्य प्रहरेत् । इत्यपरिपणितः ।

कार्यसाधनानामपर्याप्तम् अधिकं वा कालं परो व्यापरिष्यते, अहं तु यथोक्तप्रत्यनीकं कालं चेष्टिष्ये ' इति चेद् विजिगीषुर्मन्येत, एतस्मिन् कालविशेषे निमित्ते परिपणितकालं सन्धिं कुर्यात् ।

यदिवा मन्येत प्रत्यादेयमित्यादि । 'रक्षणासुकरत्वात् परप्रत्याच्छेद्यं प्रकृतिकोपजनकं दीर्घकालनिर्वर्त्यं प्रभूतपुरुषनाशं प्रभूतधनव्ययम् अल्पम् अनर्थोत्तरम् अनुष्ठानकालेऽपि दुःखकरं धर्मापेतं मध्यमोदासीनयोर्विरुद्धं मित्रस्यापि पीडावहं कार्यं परः साधयिष्यति, अहं तु यथोक्तविपरीतं कार्यं साधयिष्यामि' इति चेन्मन्येत विजिगीषुः, एवंविधे विशेषे परिपणितार्थं सन्धिं कुर्यात् ।

इत्थं त्रयः प्रकाराः परिपणितसन्धेरुक्ताः । एष्वेव देशकालयोः कालकार्ययोः देशकार्ययोः देशकालकार्याणां चेत्येवमन्योन्यमिश्रणे चत्वारोऽन्ये प्रकारा भवन्तीति सप्तविधः परिपणितसन्धिरित्याह — एवं देशकालयोरित्यादि । तस्मिन्निति । यथोक्ते परिपणितसन्धावुपेते, प्रागेव पूर्वमेव, स्वकर्माणि आरभ्य प्रतिष्ठाप्य च फलपर्यन्तानुष्ठानेन परिसमाप्य च, परकर्मसु विक्रमेत उपघाताय यतेत ।

अपरिपणितसन्धिमाह — व्यसनत्वरावमानालस्ययुक्तमज्ञं वेत्यादि । पानद्यूताद्यासक्त्या त्वरया अवज्ञया आलस्येन च युक्तम् अविद्वांसं शत्रुम्

तत्रैतद् भवति—

सामन्तेनैव सामन्तं विद्वानायोज्य विग्रहे ।
ततोऽन्यस्य हरेद् भूमिं छित्त्वा पक्षं समन्ततः ॥

सन्धेरकृतचिकीर्षा कृतश्लेषणं कृतविदूषणमवशीर्णक्रिया च । विक्रमस्य प्रकाशयुद्धं, कूटयुद्धं, तूष्णींयुद्धम् । इति सन्धिविक्रमौ ।

अपूर्वस्य सन्धेः सानुबन्धैः सामादिभिः पर्येषणं समहीनज्यायसां च यथाबलमवस्थापनमकृतचिकीर्षा ।

कृतस्य प्रियहिताभ्यामुभयतः परिपालनं यथासम्भाषितस्य च निबन्धनस्यानुवर्तनं रक्षणं च 'कथं परस्मान्न भिद्येत इति' कृतश्लेषणम् ।

अतिसन्धित्सुर्विजिगीषुर्देशकालकार्याणां व्यवस्थापनमकृत्वैव 'संहितावावां भवावः' इति वाङ्मात्रकृतेन सन्धिना विश्वासमुत्पाद्य परस्यच्छिद्रमुपलभ्य प्रहरेत् । इत्यपरिपणितसन्धिर्व्याख्यातः ।

तत्रैतद् भवतीति । उक्ते सन्धौ कृते तदुत्तरकरणीयमिदं भवति ।

तच्छ्लोकेनाह — सामन्तेनैवेति । विद्वान् विजिगीषुः, सामन्तेनैव पार्ष्णिग्राहेणैव सह, सामन्तं पार्ष्णिग्राहानन्तरं राजानमर्थादात्मन आक्रन्दं विग्रहे आयोज्य, ततः अन्यस्य यातव्यस्य, भूमिं हरेत् । किं कृत्वा, समन्ततः पक्षं यातव्यमित्रं, छित्त्वा उच्छिद्य ॥

अकृतचिकीर्षादयश्चत्वारः सन्धेर्धर्माः, प्रकाशयुद्धादयस्त्रयो विग्रहस्य धर्मा इत्याह — सन्धेरकृतचिकीर्षेत्यादि । इति सन्धिविक्रमाविति । विभक्ताविति शेषः ।

सन्धिधर्मेष्वकृतचिकीर्षां निरूपयति — अपूर्वस्य सन्धेरिति । केनचिद् राज्ञा सह पूर्वमकृतस्य सन्धेः, सानुबन्धैः सामादिभिः पर्येषणं दानानुबन्धयुक्तैः सामभिः सामानुबन्धयुक्तैर्दानैश्चानुष्ठानाध्यवसायः, समहीनज्यायसां यथाबलमवस्थापनं च समशक्तिकेन कोशदण्डादिदानोपादानादिव्यवहाराकरणं हीनात् कोशदण्डादिग्रहणं ज्यायसे कोशदण्डादिदानमित्येवंरूपं समादीनां स्वबलानतिक्रमेणावस्थानाकलनं च, अकृतचिकीर्षा नाम ।

कृतश्लेषणमाह — कृतस्य प्रियहिताभ्यामुभयतः परिपालनमित्यादि । कृतस्य सन्धेः प्रियाचरणेन हिताचरणेन च उभाभ्यां पक्षाभ्यां रक्षणं

परस्य अपसन्धेयतां दूष्यातिसन्धानेन स्थापयित्वा व्यतिक्रमः कृतविदूषणम् ।

भृत्येन मित्रेण वा दोषापसृतेन प्रतिसन्धानमवशीर्णक्रिया ।

तस्यां गतागतश्चतुर्विधः — कारणाद्गतागतः, विपरीतः, कारणाद्गतोऽकारणादागतः, विपरीतश्चेति ।

स्वामिनो दोषेण गतो गुणेनागतः परस्य गुणेन गतो दोषेणागत इति कारणाद्गतागतः सन्धेयः ।

स्वदोषेण गतागतो गुणमुभयोः परित्यज्य अकारणाद्गतागतश्चलबुद्धिरसन्धेयः ।

यथासम्भाषितस्य च समयबन्धस्यानुवर्तनं शत्रूपजापात् स यथा न विहतो भवेत् तथा रक्षणं च, कृतश्लेषणं नाम ।

कृतविदूषणमाह — परस्यापसन्धेयतामित्यादि । दूष्यद्वारकेणातिसन्धानेन निमित्तेन परस्य सन्धानानर्हत्वं स्थापयित्वा, व्यतिक्रमः — विजिगीषोः पूर्वकृतसन्धिलङ्घनं — कृतविदूषणमुच्यते ।

अवशीर्णक्रियामाह— भृत्येनेत्यादि । तेन वा, मित्रेण वा, दोषापसृतेन कुतश्चिद् दोषाद् विजिगीषुं परित्यज्य गतेन, प्रतिसन्धानं पुनःसन्धिकरणम्, अवशीर्णक्रिया नाम । इयमपसृतसन्धावन्तर्भवति ।

तस्यामिति । अवशीर्णक्रियायां, गतागतः गत्वा प्रत्यागतः, चतुर्विधः चतुष्प्रकारः । प्रकारानाह — कारणाद्गतागत इत्यादि । कारणादेव गतः कारणादेव च प्रत्यागत इत्येकः, अकारणाद् गतः अकारणादेव चागत इति पूर्वविपरीतो द्वितीयः, कारणाद्गतोऽकारणान् प्रत्यागत इति तृतीयः, अकारणाद् गतः कारणात् प्रत्यागत इति तृतीयविपरीतश्चतुर्थः ।

तत्र कारणाद्गतागतं प्रत्याह— स्वामिन इति । तस्य, दोषेण अप्रसादलक्षणेन, गतः, गुणेन स्वामिप्रसादलक्षणेन, आगतः । परस्य, गुणेन गतः गत्वा परमुपाश्रितः, दोषेण परस्मिन् दोषदर्शनेन निमित्तेन, आगतः परं विहाय स्वामिनं प्रत्यागतः । इति सनिमित्तगमनागमनकारित्वाद्धेतोः, कारणाद्गतागतः, सन्धेयः सन्धातुं योग्यः ।

विनैव स्वामिदोषं स्वदोषेण स्वामिनं विहाय परमुपाश्रितः तेनैव हेतुना परमपि विहाय स्वामिनं प्रत्यागतः स्वामिपरयोरुभयोर्गुणप्रत्याकलन-

स्वामिनो दोषेण गतः परस्मात् स्वदोषेणागत इति कारणाद् गतोऽकारणादागतस्तर्कयितव्यः—'परप्रयुक्तः स्वेन वा दोषेणापकर्तुकामः, परस्योच्छेत्तारममित्रं मे ज्ञात्वा प्रतिघातभयादागतः, परं वा मामुच्छेत्तुकामं परित्यज्यानृशंस्यादागतः' इति। ज्ञात्वा कल्याणबुद्धिं पूजयेदन्यथाबुद्धिमपकृष्टं वासयेत्।

स्वदोषेण गतः परदोषेणागतः इत्यकारणाद्गतः कारणादागतस्तर्कयितव्यः—'छिद्रं मे पूरयिष्यति, उचितोऽयमस्य वासः, परत्रास्य जनो न रमते, मित्रैर्मे संहितः, शत्रुभिर्विगृहीतः, लुब्धक्रूरादाविग्नः, शत्रुसंहिताद् वा परस्माद्' इति। ज्ञात्वा यथाबुद्ध्यवस्थापयितव्यः।

विकलश्चञ्चलबुद्धिश्चेति अकारणाद्गतागतो न सन्धानयोग्य इत्याह— **स्वदोषेणेत्यादि**।

स्वामिनो दोषेण तं विहाय शत्रुमाश्रितः शत्रोः सकाशात् स्वदोषेण प्रत्यागत इति हेतोः कारणाद्गतोऽकारणादागतस्तर्कयितव्य इत्याह — **स्वामिनो दोषेण गत** इत्यादि। तर्कणप्रकारमाह — **परप्रयुक्त** इत्यादि। 'किमयं परचोदनया मामपकर्तुकाम आगतः, अथवा मया पूर्वकृतमपकारं स्मरन् स्वेनैव बुद्धिदोषेण मामपकर्तुकाम आगतः, उत ममामित्रं शत्रुसकाशागतपुरुषवधप्रवृत्तं दृष्ट्वा स्वात्मनोऽपि शत्रुसकाशागतत्वाद् वधमाशङ्कमान आगतः, उताहो मदुच्छेदकृतसमीहं मे शत्रुं परित्यज्य मयि पूर्वपरिचयस्नेहादागतः, इत्येवं तर्कयितव्यः। ज्ञात्वेत्यादि। पुनरागमनकारणेषु चतुर्षु अन्यतमं निर्धार्य तं चेत् कल्याणबुद्धिमवगच्छेत्, तमासन्ने कृत्वा सत्कुर्यात्। अन्यथाबुद्धिं दूरे वासयेत्।

अकारणाद्गतः कारणादागतो यः सोऽपि स्वामिदोषमन्तरेण स्वेनैव दोषेण गतः परदोषेण प्रत्यागत इत्यतस्तर्कयितव्य इत्याह — **स्वदोषेण गत** इत्यादि। तर्कणप्रकारमाह — **छिद्रमित्यादि**। किमयं मम छिद्रं परस्य सुखप्रवेश्यं यथा स्यात् तथा विस्तारयिष्यति, अथवास्यैतज्जनपदवासः उपशयोचितः, यद्वास्य कलत्रादिः परिजनः परदेशवासं न रोचयते, आहो अयं मम मित्रैः कृतसन्धानः, उत शत्रुभिर्विप्रकृतः, उताहो परस्माल्लुब्धक्रूराद् भीतः, शत्रुणा कृतसन्धेर्वा परस्माद् इत्येवं तर्कयितव्यः। ज्ञात्वेत्यादि। तर्कणेनागमनहेतुं निर्धार्य तदीयबुद्धिकल्याणत्वाकल्याणत्वानुरोधेन स वर्तयितव्यः।

कृतप्रणाशः शक्तिहानिर्विद्यापण्यत्वमाशानिर्वेदो देशलौल्यमविश्वासो बलवद्विग्रहो वा परित्यागस्थानमित्याचार्याः । भयमवृत्तिरमर्ष इति कौटल्यः ।

इहापकारी त्याज्यः । परापकारी सन्धेयः । उभयापकारी तर्कयितव्य इति समानम् ।

असन्धेयेन त्ववश्यं सन्धातव्ये यतः प्रभावः ततः प्रतिविदध्यात् ।

सोपकारं व्यवहितं गुप्तमायुःक्षयादिति ।
वासयेदरिपक्षीयमवशीर्णक्रियाविधौ ॥

अथ स्वामिनः परित्याज्यत्वे हेतुभूतान् दोषानाह — कृतप्रणाश इत्यादि । कृतप्रणाशः कृतोपकारास्वीकरणं, शक्तिहानिः शक्तीनां क्षयः, विद्यापण्यत्वं विद्या पण्यमिव पण्यं विक्रेयवस्तुतुल्या मूल्यप्रतिग्राह्यप्राकृतपण्यवस्तुसाधारणप्रतिपत्तिविषय इति यावत् यस्य स विद्यापण्यः विद्यावहेली तस्य भावस्तत्त्वम्, आशानिर्वेदः दुदामीति वचनेनाशामुत्पाद्य अदानेन ततो निर्वेदजननं, देशलौल्यं देशे दंशमशकव्याध्युपद्रवः, अविश्वासः भृत्येष्वविश्वस्तत्वं, बलवद्विग्रहो वा बलवता शत्रुणा विगृह्यासनं वा, परित्यागस्थानं स्वामिपरित्यागहेतुः, इत्याचार्याः । भयम् अनारम्भः क्रोधः इति त्रयमेव परित्यागस्थानमिति स्वमतमित्याह — भयमित्यादि ।

गतागतं प्रति भूयो विशेषमाह—इहापकारी त्याज्य इति । आत्मनोऽपकृत्य गतः परस्यापकारमकृत्वा प्रत्यागतः त्यक्तव्यः न तु सन्धेयः । परापकारी सन्धेयः इहापकारमकृत्वैव गतः परस्यापकारं कृत्वा प्रत्यागतः सन्धातुं योग्यः । उभयापकारी तर्कयितव्य इत्यादि । इह परस्मिंश्च कृतापकारः परीक्षणीयः केन निमित्तेनागत इति । यथाबुद्धि चावस्थापनीय इति प्राग्वत् ।

असन्धेयेन त्ववश्यं सन्धातव्ये इति । सन्धानायोग्येन सह सन्धानेऽवश्यकरणीयत्वेनापतिते, यतः प्रभावस्ततः प्रतिविदध्यात् यत् परस्य प्रभावे निमित्तं तद् वारयेत् ।

अथ परपक्षीय आत्माश्रितः केनचिद् दोषेण परं गत्वा पुनरायातः । तथाविधेन गतागतेनावशीर्णविशेषभूतेन कथं सन्धातव्यमित्यपेक्षायामाह — सोपकारमिति । अवशीर्णक्रियाविधौ, अरिपक्षीयं गतागतं जनं, सोपकारं

विक्रामयेद् भर्तरि वा सिद्धं वा दण्डचारिणम् ।
कुर्यादमित्राटवीषु प्रत्यन्ते वान्यतः क्षिपेत् ॥
पण्यं कुर्यादसिद्धं वा सिद्धं वा तेन संवृतम् ।
तस्यैव दोषेणादूष्य परसन्धेयकारणात् ॥
अथवा शमयेदेनमायत्यर्थमुपांशुना ।
आयत्यां च वधप्रेप्सुं दृष्ट्वा हन्याद् गतागतम् ॥
अरितोऽभ्यागतो दोषः शत्रुसंवासकारितः ।
सर्पसंवासधर्मित्वान्नित्योद्वेगेन दूषितः ॥

स्वाम्युपकारावहं, व्यवहितं भृत्यान्तराधश्चरं स्वाम्यनासन्नम् , आ आयुःक्षयाद् गुप्तं यावज्जीवं भृत्यैरन्याविज्ञातरक्षितं, कृत्वेति शेषः, इति अनेन प्रकारेण, वासयेत् ॥

विक्रामयेद् भर्तरि वेति । भर्तुरन्तिके वा तं परिचारयेत् , अर्थाद् व्यवधानवृत्तौ शुचित्वेन ज्ञातम् । सिद्धं वा दण्डचारिणं कुर्यात् तत्र दृष्टकौशलं सैन्यकर्मणि व्यापारयेत् । अमित्राटवीषु अमित्रेषु अटवीषु च, क्षिपेद् व्यापारयेत् । अन्यतः प्रत्यन्ते वा अन्यत्र दूरदेशे वा, क्षिपेत् ॥

पण्यं कुर्यादसिद्धं वेति । असिद्धं वा पण्यं कुर्यात् यत्र क्षिप्तस्तत्रासमर्थं पण्यवन्तं कुर्यात् 'एतावतः पण्यस्यैतावद् धनमि'ति परिभाषया शत्रुविषये पण्यविक्रयाय प्रेषयेदित्यर्थः । तेन संवृतम् अनाम्ना शत्रुणा सह गूढकृतसंकेतं 'शत्रुर्मया साधित' इत्यादिमिथ्यावादव्यक्तीकृतवाम्यं, परसन्धेयकारणाद् आदूष्य सन्धेयशत्रुप्रतिबोधनाय आ समन्तादवघोषणयोपालभ्य; तस्यैव दोषेण मिथ्यावादलक्षणेन, सिद्धं वा कुर्यात् मारयेत् ॥

अथवेति । आदूष्यमारणपक्षाभावे, एनम्, आयत्यर्थम् उत्तरकालयोगक्षेमार्थम् , उपांशुना शमयेद् उपांशुदण्डेन हन्यात् । गतागतसामान्यविषयमाह — गतागतम्, आयत्यां वधप्रेप्सुम् उत्तरकालवधेच्छुं, दृष्ट्वा ज्ञात्वा, हन्यात् ॥

अरित इति । शत्रोः सकाशात्, अभ्यागतः पुरुषः, शत्रुसंवासकारितो दोषः शत्रुसहवासशिक्षितत्वादेकान्तदोषहेतुः, सर्पसंवासधर्मित्वात् सर्पसहवासतुल्यत्वात् , नित्योद्वेगेन नित्यभयहेतुतया निन्दितः ।

जायते प्लक्षबीजाशात् कपोतादिव शाल्मलेः ।
उद्वेगजननो नित्यं पश्चादपि भयावहः ॥
प्रकाशयुद्धं निर्दिष्टो देशे काले च विक्रमः ।
विभीषणमवस्कन्दः प्रमादव्यसनार्दनम् ॥
एकत्र त्यागघातौ च कूटयुद्धस्य मातृका ।
योगगूढोपजापार्थं तूष्णींयुद्धस्य लक्षणम् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे षष्ठोऽध्यायः
संहितप्रयाणिकं परिपणितापरिपणितापसृताश्च सन्धयः,
आदितश्चतुश्शततमः ॥

जायत इति । स गतागतः, प्लक्षबीजाशात् प्लक्षफलभोजिनः, कपोतात् शाल्मलेरिव तूलैकसारफलत्वेनानुपजीव्यस्य शाल्मलितरोरिव अर्थात् तस्य कपोत इव, नित्यम् उद्वेगजननः स्वस्मान्निर्वेदजनकः अर्थादनभिलष्यमाणफलस्य विजिगीषोः, पश्चादपि भयावहः, जायते । ईदृशश्चार्थः 'प्लक्षबीजाशः कपोतः इव' इति पाठे सति सुबोधो भवति ॥

अथ युद्धधर्मगतं द्वाभ्यां श्लोकाभ्यामाह — प्रकाशयुद्धमित्यादि । 'अमुकदेशे अमुककाले युद्धमावयोर्वर्तिष्यत' इति सम्भाष्य विक्रमणं प्रकाशयुद्धं नाम । अल्पस्यापि सैन्यस्य बहुत्वभ्रान्त्युत्पादनेन भयजननं दुर्गादिदाहपरिलुण्टनादिकरणं प्रमादव्यसनावसरेषु पीडनम् एकत्र युद्धे वर्तमाने तत्परित्यागः अन्यघातारम्भश्च इत्येषा कूटयुद्धस्य मातृका लक्षणम् । योगगूढोपजापार्थं योगेन गूढभित्तिशिलापातनादिना योगातिसन्धानोक्तेनोपायेन गूढोपजापेन गूढपुरुषद्वारकोपजापप्रयोगेण च अर्थः शत्रुद्रोहरूपं प्रयोजनं यस्मिंस्तत् तथाभूतं चेष्टितं, तूष्णींयुद्धस्य लक्षणम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे षष्ठोऽध्यायः
संहितप्रयाणिकं परिपणितापरिपणितापसृताश्च सन्धयः,
आदितश्चतुश्शततमः ॥

---

११३. प्रक. द्वैधीभाविकाः सन्धिविक्रमाः।

विजिगीषुर्द्वितीयां प्रकृतिमेवमुपगृह्णीयात् । सामन्तं सामन्तेन सम्भूय यायात् । यदि वा मन्येत—'पार्ष्णिं मे न ग्रहीष्यति, पार्ष्णिग्राहं वारयिष्यति, यातव्यं नाभिसरिष्यति, बलद्वैगुण्यं मे भविष्यति, वीवधासारौ मे प्रवर्तयिष्यति, परस्य वारयिष्यति, बह्वाबाधे मे पथि कण्टकान् मर्दयिष्यति, दुर्गाटव्यपसारेषु दण्डेन चरिष्यति, यातव्यमविषह्ये दोषे सन्धौ वा स्थापयिष्यति, लब्धलाभांशो वा शत्रूनन्यान् मे विश्वासयिष्यती'ति ।

द्वैधीभाविकाः सन्धिविक्रमा इति सूत्रम् । सन्धिविग्रहोपादानं द्वैधीभावः तत्र कर्तव्याः सन्धयो विक्रमाश्चाभिधीयन्ते इति सूत्रार्थः । परिपणितादिसन्धयो ह्युक्ताः पूर्वाध्याये । तेषां द्वैधीभाविकानामनुष्ठानकारणान्यत्र निरूप्यन्ते ।

विजिगीषुरिति । सः, द्वितीयां प्रकृतिं स्वविषयानन्तरं शत्रुम्, उपगृह्णीयात् साहाय्यार्थं स्वीकुर्यात् । कस्मिन् कार्ये साह्यार्थं, तत्राह— सामन्तं सामन्तेन सम्भूय यायादिति । यातव्यं भूम्यनन्तरं पृष्ठपार्श्वभूम्यनन्तरेण सहैकार्थ्यमासाद्य यायात् । सम्भूययानस्य प्रयोजनान्याह — यदि वा मन्येत पार्ष्णिं मे न ग्रहीष्यतीत्यादि । उपगृहीतो हि सामन्तो विजिगीषोः पार्ष्णिग्रहणापकारं न करिष्यतीत्येकं प्रयोजनं, पार्ष्णिं गृह्णन्तमन्यं शत्रुं वारयिष्यतीति द्वितीयं, यातव्यस्य शत्रोः पक्षं नानुप्रवेक्ष्यतीति तृतीयम्, उपगृहीतसामन्तबलेन सहितं विजिगीषोर्बलं द्विगुणं भविष्यतीति चतुर्थम्, उपगृहीतो विजिगीषोः स्वदेशधान्याद्यायतिलक्षणं वीवधं सुहृद्बलागमनं च न वारयिष्यतीति पञ्चमं, परस्य च वारयिष्यतीति षष्ठं, विजिगीषोः प्रस्थितस्य पथि गतिप्रतिबन्धकान् प्रतिरोधकान् स मर्दयिष्यतीति सप्तमं, दुर्गेषु काननेषु च विजिगीषुबलमपसरणप्रसङ्गेषु सामन्तः स्वसैन्यसहितः समन्ताच्चरन् पराबाधाद् रक्षिष्यतीत्यष्टमम्, असहनीयानर्थापाते यातव्येन सह सन्धिं वा घटयिष्यतीति नवमं, विजिगीषुसकाशाल्लाभांशं यथासम्भावितं लब्ध्वा सामन्तो विजिगीषावविसंवादित्वख्यापनेन शत्रूनन्यान् विश्वस्तान् करिष्यतीति दशमम् । इत्येवं पार्ष्णिशुद्ध्यादीनि दश प्रयोजनानि सम्भूययाने भवन्ति ।

द्वैधीभूतो वा कोशेन दण्डं दण्डेन कोशं सामन्तानामन्यतमाल्लिप्सेत ।

तेषां ज्यायसोऽधिकेनांशेन समात् समेन हीनाद्धीनेनेति समसन्धिः । विपर्यये विषमसन्धिः । तयोर्विशेषलाभादतिसन्धिः ।

व्यसनिनमपायस्थाने सक्तमनर्थिनं वा ज्यायांसं हीनो बलसमेन लाभेन पणेत । पणितस्तस्यापकारसमर्थो विक्रमेत । अन्यथा सन्दध्यात् ।

सम्भूतौ चेद् विजिगीपुरविश्वस्तस्तदा किं कुर्यात्, तत्राह — **द्वैधीभूतो वेत्यादि** । द्वैधीभावमास्थितः, सामन्तानां पृष्ठपार्श्वगतानां राज्ञाम्, अन्यतमात्, कोशेन दण्डं लिप्सेत दण्डाल्पत्वे, दण्डेन कोशं लिप्सेत कोशाल्पत्वे ।

सम्भूययाने तदपेक्षितांशादिलाभे च सन्धेरपेक्षणात् तद्भेदानाह — **तेषामित्यादि** । सामन्तानां मध्ये बलाधिकाद् दण्डकोशलिप्सायामधिकांशदानसम्भाषणेन सन्धिरेकः, समानबलात् समानांशदानसम्भाषणेन सन्धिरपरः, हीनबलाद् हीनांशदानसम्भाषणेन सन्धिरन्य इत्येवं त्रिप्रकारः समसन्धिः । **विपर्यये विषमसन्धिरिति** । बलाधिकात् समेनांशेन हीनेनांशेन वेति प्रथमप्रकारविपर्यये द्वौ, समाद् अधिकेन हीनेन वेति द्वितीयप्रकारविपर्यये द्वौ, हीनात् समेनाधिकेन वेति तृतीयप्रकारविपर्यये द्वौ इति षट्प्रकारो विषमसन्धिरित्यर्थः । **तयोर्विशेषलाभादतिसन्धिरिति** । समसन्धिभेदानां विषमसन्धिभेदानां चेत्याहत्य नवानां प्रत्येकं विशेषलाभात् सम्भाषिताभ्यधिकलाभादतिसन्धिर्नाम नवविधो निर्वर्तते । तदेवमष्टादश सन्धयो द्वैधीभाविकाः ।

इह हि लाभास्त्रयः — बलसमः बलसमादधिको बलसमाद्धीन इति । तन्निमित्तान् हीनस्य ज्यायसा सन्धौ सम्भवतो भेदानाह — **व्यसनिनमिति** । गुणप्रातिलोम्यवन्तम्, अपायस्थाने सक्तं शरीरनाशादिहेतौ रतम्, अनर्थिनं वा एकतोनर्थोभयतोनर्थयुक्तं वा, ज्यायांसं, हीनः बलसमेन लाभेन दण्डानुरूपेणांशेन, पणेत सन्दध्यात् । ज्यायसोऽधिकांशेन समसन्धौ कर्तव्येऽप्ययं विषमसन्धिः क्रियते, विजिगीषुणा व्यसनाद्यभिभूते तस्मिन्नवज्ञानादिति बोद्धव्यम् । अवज्ञातस्य कृत्यमाह — **पणितस्तस्येत्यादि** । तथा पणितो ज्यायान् स्वावज्ञातुर्विजिगीषोरपकारे शक्तश्चेत् स्वव्यसनादिप्रशमनपूर्वं विगृह्णीयात्, अपकाराशक्तौ तु सन्दध्यात् । स एष बलसमलाभसन्धिः ।

एवम्भूतो हीनशक्तिप्रतापपूरणार्थं सम्भाव्यार्थाभिसारी मूलपार्ष्णित्राणार्थं वा ज्यायांसं हीनो बलसमाद् विशिष्टेन लाभेन पणेत। पणितः कल्याणबुद्धिमनुगृह्णीयात्। अन्यथा विक्रमेत।

जातव्यसनप्रकृतिरन्ध्रमुपस्थितानर्थं वा ज्यायांसं हीनो दुर्गमित्रप्रतिस्तब्धो वा ह्रस्वमध्वानं यातुकामः शत्रुमयुद्धमेकान्तसिद्धिं लाभमादातुकामो बलसमाद्धीनेन लाभेन पणेत। पणितस्तस्य अपकारसमर्थो विक्रमेत। अन्यथा सन्दध्यात्।

अरन्ध्रव्यसनो वा ज्यायान् दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामो दूष्यदण्डं प्रवासयितुकामो दूष्यदण्डमावाहयितु-

---

हीनस्य ज्यायसा सह विषमसन्धिमुक्त्वा समसन्धिमाह— **एवम्भूत** इति। व्यसनाद्यभिभूतो हीनः, हीनशक्तिप्रतापपूरणार्थं हीनयोरात्मशक्तिप्रतापयोः पूरणार्थं, सम्भाव्यार्थाभिसारी मूलपार्ष्णित्राणार्थं वा लभ्यत्वेन निश्चितप्रायमर्थं साधयितुमभियातुरात्मनो दुर्गस्य पार्ष्णेश्च रक्षणार्थं वा, ज्यायांसं, हीनो, बलसमाद् विशिष्टेन अधिकेन लाभेन पणेत, अर्थात् समसन्धिं 'ज्यायसोऽधिकेनांशेन समसन्धिरि'त्युक्तपूर्वं कुर्यात्। पणितस्य ज्यायसः कर्तव्यमाह—**पणित** इत्यादि। पणितो ज्यायान् पणमानं हीनं यद्यपचिकीर्षारहितं पश्येत् तदानुगृह्णीयाद्, इतरथा विगृह्णीयात्। स एष बलसमाधिकलाभसान्धिः।

ज्यायसा सह हीनस्य बलसमाद्धीनेन लाभेन सन्धिमाह — **जातव्यसनप्रकृतिरन्ध्रमिति**। उपजातमृगयादिव्यसनम् उपजातकुद्धलुब्धभीतादिप्रकोपं च, उपस्थितानर्थं वा एकतोनर्थोभयतोनर्थयुक्तं वा, ज्यायांसं, दुर्गमित्रप्रतिस्तब्धो वा विशिष्टदुर्गमित्रयोगगर्वितो वा, ह्रस्वम् अध्वानं शत्रुं यातुकामो वा, अयुद्धमेकान्तसिद्धिं लाभमादातुकामः युद्धं विनैव निश्चितसिद्धिं लाभं जिघृक्षुर्वा, बलसमाद्धीनेन लाभेन पणेत। पणितो ज्यायान्, तस्य अपकारसमर्थो विक्रमेत हीनलाभपणनकृतात्मावज्ञानस्य हीनस्यापकारे शक्तश्चेद् विगृह्णीयात्। अन्यथा सन्दध्यात् अपकारासामर्थ्ये सन्धिं कुर्यात्।

हीनमपि लाभं हीनात् कार्यविशेषवशेन ज्यायान् पणितः स्वीकुर्यादित्याह—**अरन्ध्रव्यसनो वेति**। प्रकृतिरन्ध्रमृगयादिव्यसनरहितः, ज्यायान्, दुरारब्धकर्माणम् अदेशकालोपक्रान्तकर्माणं शत्रुं, भूयः दुरारम्भोपनतक्षयव्ययातिरेकेण, क्षयव्ययाभ्यां युग्यपुरुषनाशधनव्ययाभ्यां योक्तुकामो वा, दूष्यदण्डं

कामो वा पीडनीयमुच्छेदनीयं वा हीनेन व्यथयितुकामः सन्धिप्रधानो वा कल्याणबुद्धिः हीनं लाभं प्रतिगृह्णीयात् । कल्याणबुद्धिना सम्भूयार्थं लिप्सेत । अन्यथा विक्रमेत ।

एवं समः सममतिसंदध्याद् , अनुगृह्णीयाद् वा ।

परानीकस्य प्रत्यनीकं मित्राटवीनां वा शत्रोर्विभूमीनां देशिकं मूलपार्ष्णित्राणार्थं वा समः समबलेन लाभेन पणेत । पणितः कल्याणबुद्धिमनुगृह्णीयाद् , अन्यथा विक्रमेत ।

जातव्यसनप्रकृतिरन्ध्रमनेकविरुद्धमन्यतो लभमानो वा समः

प्रवासयितुकामो वा स्वदूष्यबलं विध्वंसयितुमिच्छुर्वा, दूष्यदण्डम् आवाहयितुकामो वा परदूष्यबलमानेतुमिच्छुर्वा, पीडनीयमुच्छेदनीयं वा हीनेन व्यथयितुकामो वा उभयतः पीडनयोग्यम् उन्मूलनीयं वा शत्रुं हीनेन सहायभूतेन पीडयितुमुच्छेत्तुं च वाञ्छन् वा, सन्धिप्रधानः बह्वपायाद् विग्रहात् सन्धिरेव श्रेयानिति मन्यमानः, कल्याणबुद्धिः, हीनं लाभं हीनेन पणमानेन दीयमानं, प्रतिगृह्णीयात् । कल्याणबुद्धिना सम्भूय अदुष्टधिया हीनेन सहैकार्थीभूय, अर्थं लिप्सेत साहाय्यमाचरेत् । अन्यथा हीनस्य दुष्टबुद्धित्वे, विक्रमेत । स एष बलसमहीनलाभसन्धिः ।

एवं हीनस्य ज्यायसा सह सन्धावुक्तान् प्रकारान् समस्य समेन सह सन्धावतिदिशति—**एवं समः सममतिसन्दध्यादनुगृह्णीयाद्वेति** । हीनज्यायसोः सन्धिषु दुष्टबुद्धित्वकल्याणबुद्धित्वापेक्षावतिसन्धानानुग्रहौ यथा भवतस्तथा समयोरपि सन्धौ तौ द्रष्टव्यावित्यर्थः ।

अथ समयोः सन्धौ बलसमेन लाभेन पणनमाह — **परानीकस्येति** । शत्रुबलस्य, मित्राटवीनां वा शत्रुसम्बन्धिनां मित्राटविकानां च, प्रत्यनीकं प्रतियोधनशक्तं, शत्रोः, विभूमीनां शैलगुहादीनां, देशिकं प्रचारोपदेष्टारम् अर्थात् समं राजानं, मूलपार्ष्णित्राणार्थं वा स्थानीयस्य पृष्ठस्य च रक्षार्थं वा, समः, समबलेन लाभेन बलसमलाभेन, पणेत । पणितस्य कर्तव्यमाह — **पणितः कल्याणबुद्धिमित्यादि** ।

बलसमाद्धीनेन लाभेन पणनमाह — **जातव्यसनप्रकृतिरन्ध्रमिति** । तथाभूतम् , अनेकविरुद्धं बहुविरोधिनम् अर्थात् समं, समः, समबलाद्धीनेन लाभेन बलसमहीनलाभेन, पणेत । अन्यतो लभमानो वा समसाह्येन विनापी-

समबलाद्धीनेन लाभेन पणेत । पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात् ।

एवम्भूतो वा समः सामन्तायत्तकार्यः कर्तव्यबलो वा बलसमाद् विशिष्टेन लाभेन पणेत । पणितः कल्याणबुद्धिमनुगृह्णीयाद्, अन्यथा विक्रमेत ।

जातव्यसनप्रकृतिरन्ध्रमभिहन्तुकामः स्वारब्धमेकान्तसिद्धिं वाऽस्य कर्मोपहन्तुकामो मूले यात्रायां वा प्रहर्तुकामो यातव्याद् भूयो लभमानो वा ज्यायांसं हीनं समं वा भूयो याचेत । भूयो वा याचितः स्वबलरक्षार्थं दुर्धर्षमन्यदुर्गमासारमटवीं वा परदण्डेन मर्दितुकामः

प्सितकार्यसिद्धिं प्राप्स्यन् वा समः, समबलाद्धीनेन लाभेन पणेत । अपरा व्याख्या—हीनलाभपणनीयसामन्तान्तरसौलभ्ये सति समबलाद्धीनेन लाभेन पणेतेति । **पणितस्तस्यापकारसमर्थ** इत्यादि गतार्थम् ।

बलसमादधिकेन लाभेन पणनमाह — **एवम्भूतो वेति** । जातव्यसनप्रकृतिरन्ध्रत्वानेकविरुद्धत्वयुक्तः, समः, सामन्तायत्तकार्यः सामन्तसाह्यसाध्यकार्यः, कर्तव्यबलो वा उत्पाद्यदण्डो वा सन्, बलसमाद् , विशिष्टेन अधिकेन, लाभेन, पणेत । **पणितः कल्याणे**त्यादि प्रतीतार्थम् ।

विजिगीषुणा पण्यमानस्य सामन्तस्य हीनत्वज्यायस्त्वाद्यवधीरणेन बहुतरं लाभं याचमानस्य विशेषलाभे निमित्ते प्रवर्तमानमतिसन्धिमाह — **जातव्यसनप्रकृतिरन्ध्रमिति** । तथाभूतं, ज्यायांसं हीनं समं वेत्यग्रिमेण सम्बन्धः । अभिहन्तुकामः, स्वारब्धं समुचितदेशकालप्रयुक्तम्, अत एव एकान्तसिद्धिं निश्चितसिद्धिकम्, अस्य विजिगीषोः, कर्म, उपहन्तुकामो वा, यात्रायां मूले प्रहर्तुकामो वा विजिगीषोर्याने सति तदीयं दुर्गादिकमवस्कन्दितुमिच्छुर्वा, यातव्याद् भूयो लभमानो वा विजिगीषुदित्सितादभ्यधिकमर्थं तदीययातव्यसकाशाल्लप्स्यमानो वा अर्थाद् हीनो ज्यायान् समो वा, क्रमेण ज्यायांसं हीनं समं वा, भूयो याचेत हीनत्वाद्यनादरेणाधिकमर्थं यथेष्टं याचेत । एष पणितस्य विधिः । पणितुर्याचितस्य विधिमाह — **भूयो वा याचित इति** । बहुतरं द्रव्यं याचितः पणमानः, स्वबलरक्षणार्थं, भूयो दद्यात् याचितमखिलं याचमानाय प्रयच्छेत् । प्रयोजनान्तराण्याह — **दुर्धर्षं** कृच्छ्रधर्षणीयम्, अन्यदुर्ग शत्रोर्दुर्गम्, आसारं तदीयं मित्रबलम्, अटवीं

प्रकृष्टेऽध्वनि काले वा परदण्डं क्षयव्ययाभ्यां योक्तुकामः परदण्डेन वा विवृद्धस्तमेवोच्छेत्तुकामः परदण्डमादातुकामो वा भूयो दद्यात् ।

ज्यायान् वा हीनं यातव्यापदेशेन हस्ते कर्तुकामः परमुच्छिद्य वा तमेवोच्छेत्तुकामः त्यागं वा कृत्वा प्रत्यादातुकामो बलसमाद् विशिष्टेन लाभेन पणेत । पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात् । यातव्यसंहितो वा तिष्ठेत् । दूष्यामित्राटवीदण्डं वास्मै दद्यात् ।

जातव्यसनप्रकृतिरन्ध्रो वा ज्यायान् हीनं बलसमेन लाभेन पणेत । पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात् ।

तदीयमाटविकं, परदण्डेन पण्यमानसामन्तबलेन, मर्दयितुकामो वा, प्रकृष्टेऽध्वनि दूरविप्रकृष्टे पथि, तथाभूते काले, परदण्डं पण्यमानस्य बलं, क्षयव्ययाभ्यां दूराध्वगतागत-चिरकालव्यापारणनिमित्तकाभ्यामित्यर्थः, योक्तुकामो वा, परदण्डेन वा विवृद्धस्तमेवोच्छेत्तुकामः यातव्यस्य गजतुरगादिबलेन यातव्यजयोत्तरकाललब्धव्येन संवृद्धबलो भूत्वा लाभातिशयमात्मदत्तपूर्वं पण्यमानस्य प्रत्याहरिष्यामीति मन्यमानो वेत्यर्थः, परदण्डमादातुकामो वा यातव्यबलं पण्यमानसाह्येन ग्रहीतुकामो वा, भूयो दद्यात् ।

इत्थं भूयोयाचनतत्प्रदाननिबन्धनमतिसन्धिमुक्त्वा ज्यायसो हीनेन सह सन्धित्रयमाह — ज्यायान् वा हीनमिति । ज्यायान्, हीनं बलसमाद् विशिष्टेन अधिकेन लाभेन पणेत, कथम्भूतः, यातव्यापदेशेन हस्ते कर्तुकामः यातव्योच्छेदार्थसर्वबलसन्दोहसन्नाहव्याजेन हीनं ग्रहीष्यामीत्यभिसन्धियुक्तः, परमुच्छिद्य वा तमेवोच्छेत्तुकामः यातव्योन्मूलनानन्तरं हीनमप्युन्मूलयितुकामो वा, त्यागं वा कृत्वा प्रत्यादातुकामः विशिष्टलाभदानं कृत्वा पश्चात् तदपजिहीर्षुर्वा । अत्र 'ज्यायान् वा हीनम्' इत्यस्य स्थाने 'ज्यायांसं वा हीनं वे'त्यपपाठः । पणमानविधिमुक्त्वा पणितविधिमाह — **पणितस्तस्येत्यादि** । यातव्यसंहितो वा तिष्ठेत् पणितो यातव्येन सह सन्धिं कृत्वा वा स्थानमनुतिष्ठेत् । दूष्यामित्राटवीदण्डं वास्मै दद्यात् दूष्यामित्राटविकबलं वा स्वबध्यं ज्यायसे पणमानाय दद्यात् सन्ध्यर्थम् ।

बलसमाधिकलाभेन सन्धिमुक्त्वा बलसमलाभेन सन्धिमाह — **जातव्यसनप्रकृतिरन्ध्रो वा ज्यायानित्यादि** । सुबोधम् ।

एवम्भूतं वा हीनं ज्यायान् बलसमाद्धीनेन लाभेन पणेत ।
पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात् ॥
आतो बुध्येत पणितः पणमानश्च कारणम् ।
ततो वितर्क्योभयतो यतः श्रेयस्ततो व्रजेत् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
सप्तमोऽध्यायः द्वैधीभाविकाः सन्धिविक्रमाः,
आदितः पञ्चशततमः ॥

बलसमाद्धीनेन लाभेन सन्धिमाह — **एवम्भूतं वा हीनमित्यादि ।** एवम्भूतं जातव्यसनप्रकृतिरन्ध्रम् । शेषं सुगमम् ॥

अध्यायान्ते श्लोकमाह — **आत इति ।** आतः, अव्ययमिदमतश्शब्दस्यार्थे । लाभपणनतदङ्गीकरणनिमित्तवैचित्र्याद्धेतोः, पणितः, पणमानश्च, कारणं बुध्येत जानीयात् । ततः कारणबोधानन्तरम्, उभयतो वितर्क्य सन्धिर्वा श्रेयान् विग्रहो वेति सम्प्रधार्य, यतः श्रेयस्ततो व्रजेत् यस्मिन्नुपादीयमाने श्रेयः पश्यति तमनुतिष्ठेत् । अत्र 'आत' इत्यस्य स्थाने 'आदौ' इति क्वचित् पाठः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
सप्तमोऽध्यायः द्वैधीभाविकाः सन्धिविक्रमाः,
आदितः पञ्चशततमः ॥

११४,११५ प्रक. यातव्यवृत्तिः, अनुग्राह्यमित्रविशेषाश्च ।

यातव्योऽभियास्यमानः सन्धिकारणमादातुकामो विहन्तुकामो वा सामवायिकानामन्यतमं लाभद्वैगुण्येन पणेत । प्रपणिता क्षयव्ययप्रवासप्रत्यवायपरोपकारशरीराबाधांश्चास्य वर्णयेत् । प्रतिपन्नमर्थेन योजयेत् । वैरं वापरैर्ग्राहयित्वा विसंवादयेत् ।

दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामः स्वारब्धायां

यातव्यवृत्तिरिति सूत्रम् । यातव्यो नाम कश्चिद् विजिगीषुं यातारमपेक्ष्य यातव्यावस्थापन्नस्तस्यैव प्रत्यभियाता विजिगीषुविशेषः । तस्य सामवायिकेषु वृत्तिः तस्मिंश्च सामवायिकानां वृत्तिरुच्यत इति सूत्रार्थः । यातव्याभियानसमवायिनामन्योन्यसन्धिविक्रमादिकमुक्तं, यातव्यस्य तेषु तेषां वा यातव्ये वृत्तिस्तु नोक्ता । सेदानीमभिधीयते ।

यातव्य इति । यातव्यावस्थापन्नो विजिगीषुः, अभियास्यमानः यातारं विजिगीषुं प्रति अभियानात् प्राक्, सन्धिकारणम् आदातुकामः सन्धिनिमित्तं ग्रहीतुकामः स्वयं सन्धित्सुरित्यर्थः, सन्धिकारणं विहन्तुकामो वा परचिकीर्षितसन्धिप्रतिजिघांसुर्वेत्यर्थः, सामवायिकानाम् अन्यतमं, लाभद्वैगुण्येन पणेत व्यवस्थिततल्लाभांशद्विगुणेन लाभेन सम्भाषेत अर्थात् परसामवायिकीभावानभ्युपगमार्थम् । तदभ्युपगमे च दोषान् प्रद्वेषाय पणमानो वर्णयेदित्याह — **प्रपणितेति** । पणमानः, नयचन्द्रिकायां पणमान इत्येव पाठः । प्रपणित इति पाठस्तु चिन्त्यः । क्षयव्ययप्रवासप्रत्यवायपरोपकारशरीराबाधांश्च युग्यपुरुषापचयं धनव्ययं दीर्घाध्वगतागतं सम्भूयप्रवृत्तिसम्भावितं संविद्व्यतिक्रमदोषं परस्य शत्रोः पक्षं प्रविश्योपकारकरणं शरीरपीडां चेत्येतान् सामवायिकभावसम्भाव्यान् षड् दोषान् , अस्य पण्यमानस्य, वर्णयेत् बोधयेत् । प्रतिपन्नम् अभ्युपगतपणनम्, अर्थेन योजयेत् पणितमर्थं दत्त्वा स्वसामवायिकं कुर्यादित्यर्थः । विहन्तुकामत्व आह — **वैरं वा अपरैर्ग्राहयित्वा विसंवादयेदिति** । अन्यैः सामवायिकैः सह विरोधमुत्पाद्य सन्धिं विघटयेत् । एवं तावद् यातव्यस्य सामवायिकान्यतमपणनमुक्तम् ।

अथ सामवायिकानामन्येन पणनं प्रस्तूयते । तत्र यातव्यं प्रति सन्धिच्छलेनापकारं चिकीर्षोः प्रभूतार्थग्रहणे तत्करणायुक्तत्वं मन्यमानस्यायत्यां प्रभूतलाभैषिण एव सतस्तदात्वेऽल्पलाभाभ्युपगमपक्षमाह — **दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकाम इति** । अनुचितदेशकालाद्युपक्रान्तयुद्धयात्रम

वा यात्रायां सिद्धिं विघातयितुकामो मूले यात्रायां वा प्रतिहर्तुकामो यातव्यसंहितः पुनर्याचितुकामः प्रत्युत्पन्नार्थकृच्छ्रस्तस्मिन् अविश्वस्तो वा तदात्वे लाभमल्पमिच्छेद्, आयत्यां प्रभूतम् ।

मित्रोपकारममित्रोपघातम् अर्थानुबन्धमवेक्षमाणः पूर्वोपकारकं कारयितुकामो भूयस्तदात्वे महान्तं लाभमुत्सृज्यायत्यामल्पमिच्छेत् ।

दूष्यामित्राभ्यां मूलहरेण वा ज्यायसा विगृहीतं त्रातुकामस्तथाविधमुपकारं कारयितुकामः सम्बन्धापेक्षी वा तदात्वे च आयत्यां च लाभं न प्रतिगृह्णीयात् ।

अत एव मुख्यपुरुषापचयेन सहायाराधनार्थधनव्ययेन च स्वत एव युक्तं दुरारब्धानुवृत्त्या बहुतराभ्यां ताभ्यां योजयितुकामः, स्वारब्धायां वा यात्रायां सिद्धिं विघातयितुकामः समुचितदेशकालाद्यारब्धत्वाद् यात्रायाः फलसिद्धिं सम्भाव्यां विघटयितुमिच्छुर्वा, मूले यात्रायां वा प्रतिहर्तुकामः स्थानीये अभियाने प्रहर्तुमिच्छुर्वा, यातव्यसंहितः पुनर्याचितुकामः सम्प्रत्यल्पेन लाभेन सन्धिं कृत्वा भूयः प्रभूतं याचिष्य इति मन्यमानो वा, प्रत्युत्पन्नार्थकृच्छ्र इति अतर्कितोपनतधनव्ययो वा, तस्मिन् अविश्वस्तो वा पणमाने विषये प्रभूतं प्रतिश्रुत्याप्यसौ पश्चान्न दास्यतीत्युपजातशङ्को वा, तदात्वे तत्काले, लाभम् अल्पम् इच्छेत्, आयत्यां प्रभूतं प्रचुरम् इच्छेत् । एवं पञ्चसु निमित्तेषु तदात्वाल्पलाभपणनमित्येकः पक्ष उक्तः ।

आयत्यामल्पलाभपणनरूपमन्यं पक्षमाह — **मित्रोपकारममित्रोपघातमित्यादि।** स्वमित्रस्योपकारं स्वामित्रस्यापकारं च फलान्तरानुबद्धं पश्यन्, तदात्वोपस्थितं महान्तमपि लाभं परित्यज्य आयत्याम् अल्पं लाभम् इच्छेत् । तथा पूर्वोपकारकं भूयः कारयितुकामो वा — अर्थात् पणमानेन पूर्वं कृतमुपकारं तेनैव भूयः कारयितुमिच्छुर्वा — तदात्वोपस्थितं महान्तं लाभं परित्यज्यायत्यामल्पमिच्छेत् ।

आयत्यां तदात्वे वा लाभः साम्वायिकेन न प्रतिगृह्यत इत्यपरः पक्षः । तमाह — **दूष्यामित्राभ्यामिति** । दूष्यो राजार्थविग्रहचारी पुरमुख्यादिः अमित्रः शत्रुः ताभ्यां, मूलहरेण उच्छेदकारिणा ज्यायसा वा, विगृहीतम् अर्थाद् बन्ध्वादिं, त्रातुकामः स्वयं रक्षितुमिच्छन्, तथाविधमुपकारं कारयितुकामः अन्येन वा स्वीयेन रक्षयितुकामः, सम्बन्धापेक्षी वा यातव्येन सह

कृतसन्धिरतिक्रमितुकामः परस्य प्रकृतिकर्शनं मित्रामित्रसन्धिविश्लेषणं वा कर्तुकामः पराभियोगाच्छङ्कमानो लाभमप्राप्तमधिकं वा याचेत । तमितरस्तदात्वे च आयत्यां च क्रममवेक्षेत । तेन पूर्वे व्याख्याताः ।

अरिविजिगीष्वोस्तु स्वं स्वं मित्रमनुगृह्णतोः शक्यकल्यभव्या-

विवाहसम्बन्धमपेक्षमाणो वा, तदात्वे चायत्यां च, लाभं न प्रतिगृह्णीयात् स्वल्पमपि ।

अथ अप्राप्तस्यार्थस्य वाधिकस्यार्थस्य वा सद्योदानप्रार्थनमित्येवमात्मकं चतुर्थं पक्षमाह— **कृतसन्धिरतिक्रमितुकाम** इति । पूर्वकृतमेव सन्धिं पश्चाल्लङ्घयितुकामः, अप्राप्तं लाभं पणितमप्रविष्टं लाभम् , अधिकं लाभं वा पणितादधिकं लाभं वा, याचेत 'तदात्वे देही'ति प्रार्थयेत । तथा याचितस्य हि पणमानस्य दानासामर्थ्यात् सन्धिः शैथिल्यं प्राप्स्यतीति । परस्य पणमानस्य, प्रकृतिकर्शनं प्रकृतीनां वृत्तिकृच्छ्रं, कर्तुकामो वा, तथा याचेत । मित्रामित्रसन्धिविश्लेषणं कर्तुकामो वा मित्रामित्रयोरल्पलाभपणनेन पूर्वं कृतात् सन्धेर्विश्लेषणमपसरणम् उत्पादयितुमिच्छुर्वा, तथा याचेत । 'मय्येव हि ताभ्यामपि याचितस्य दानासामर्थ्यात् सन्धिः शिथिलो भविष्यती'ति । पराभियोगात् शङ्कमानो लाभमप्राप्तमधिकं वा याचेत 'पर आत्मानमभियुङ्क्ते'ति शङ्कया वा तथा याचेत । याचिते हि परेण दत्ते स आत्मानं नाभियोक्तुं शक्नुयादिति । याचितस्य कर्तव्यमाह— **तमितर** इति । इतरो याचितः, तदात्वे च आयत्यां च, तं क्रमं याचमानोक्तं प्रकारम् ; अवेक्षेत अनुष्ठेयो न वेति पर्यालोच्य निर्णयेत् । तेन पूर्वे **व्याख्याता** इति । एतत्पक्षे क्रमावेक्षणकथनेन पूर्वोक्तेष्वपि त्रिषु पक्षेषु क्रमावेक्षणमुक्तप्रायमित्यर्थः । इत्थं यातव्यवृत्तिर्निरूपिता ।

अनुग्राह्यमित्रविशेषा इति सूत्रम् । अनुग्राह्याणां साहाय्यदानोपकार्याणां मित्राणां भूम्येकान्तराणां विशेषा अभिधीयन्त इति सूत्रार्थः । भूम्यनन्तरास्तावत् सामन्ताः शत्रव इति तेषु सन्ध्यादय उक्ताः, भूम्येकान्तरेषु तु मित्रभूतत्वादनुग्राह्यत्वमेव प्राप्तमिति तदिदानीं निरूप्यते ।

के ते अनुग्राह्या मित्रविशेषाः, किं च तेभ्यः प्रार्थनीयं फलमित्याकाङ्क्षायामाह — **अरिविजिगीष्वोरिति** । तयोः, स्वं स्वं मित्रं स्वस्वभूम्येकान्तरं

रम्भिस्थिरकर्मानुरक्तप्रकृतिभ्यो विशेषः। शक्यारम्भी विषह्यं कर्मारभेत। कल्यारम्भी निर्दोषम्। भव्यारम्भी कल्याणोदयम्। स्थिरकर्मा नासमाप्य कर्मोपरमते। अनुरक्तप्रकृतिः सुसहायत्वादल्पेनाप्यनुग्रहेण कार्यं साधयति। त एते कृतार्थाः सुखेन प्रभूतं चोपकुर्वन्ति। अतः प्रतिलोमे नानुग्राह्याः।

तयोरेकपुरुषानुग्रहे यो मित्रं मित्रतरं वानुगृह्णाति सोऽतिसन्धत्ते। मित्रादात्मवृद्धिं हि प्राप्नोति। क्षयव्ययप्रवासपरोपकारान् इतरः। कृतार्थश्च शत्रुर्वैगुण्यमेति।

राजानम्, अनुगृह्णतोः साहाय्यदानेनोपकुर्वतोः, शक्यकल्यभव्यारम्भिस्थिरकर्मानुरक्तप्रकृतिभ्यो विशेषः बहूनां मित्राणां मध्ये शक्यारम्भी कल्यारम्भी भव्यारम्भी स्थिरकर्मा अनुरक्तप्रकृतिरित्येतेभ्य एव मित्रेभ्य उपकृतेभ्यो विशेषलाभो भवति, अतश्च शक्यारम्भिप्रभृतय एवानुग्राह्या इति भावः। तान् व्याचष्टे—शक्यारम्भीति। सः, विषह्यं शक्यनिर्वहणं, कर्म आरभेत। कल्यारम्भी, निर्दोषं कर्मारभेत। भव्यारम्भी, कल्याणोदयं कल्याणफलं, कर्मारभेत। स्थिरकर्मा, कर्म प्रारब्धम्, असमाप्य, नोपरमते न विरमति। अनुरक्तप्रकृतिः, सुसहायत्वात् अयत्नसुलभसहायत्वाद्, अल्पेनापि अनुग्रहेण सैन्यदानेन, कार्यं साधयति। त एते इति। एते शक्यारम्भिप्रभृतयः, कृतार्थाः अनुग्रहसाधितकार्याः सन्तः, सुखेन अनायासेन, प्रभूतं च बहुगुणं च, उपकुर्वन्ति। अतः प्रतिलोम इति। एभ्यः शक्यारम्भ्यादिभ्यः प्रातिलोम्ये सति, नानुग्राह्याः उपकार्या न भवन्ति, अर्थादशक्यारम्भिप्रभृतयः।

तयोरिति। शत्रोर्वा विजिगीषोर्वा, एकपुरुषानुग्रहे मित्रामित्रयोरेकस्य पुरुषस्य मित्रयोर्वैकस्य पुरुषस्यानुग्रहे कर्तव्यतया प्रसक्ते, यः, मित्रं मित्रतरं वा अनुगृह्णाति अमित्रं परिहृत्य मित्रसम्पद्युक्तमुपकरोति, मित्रमुपेक्ष्य अतिशयितामित्रसम्पद्युक्तं वोपकरोति, सः मित्रानुग्राही मित्रतरानुग्राही च, अतिसन्धत्ते विशेषलाभं भजते। विशेषलाभश्च मित्रादात्मवृद्धिप्राप्तिलक्षण इत्याह—मित्रादात्मवृद्धिं हि प्राप्नोतीति। मित्रभूतो हि पुरुषः स्वभावादेव स्वसुहृदो वृद्ध्यर्थं यतेत, किमुत तेनानुगृहीत इत्यभिप्रायः। अमित्रानुग्राही मित्रसामान्यानुग्राही च नैवमित्याह—क्षयव्ययप्रवासपरोपकारानितर इति।

मध्यमं त्वनुगृह्णतोर्यो मध्यमं मित्रं मित्रतरं वानुगृह्णाति सोऽतिसन्धत्ते । मित्रादात्मवृद्धिं हि प्राप्नोति । क्षयव्ययप्रवासपरोपकारानितरः । मध्यमश्चेदनुगृहीतो विगुणः स्यादमित्रोऽतिसन्धत्ते । कृतप्रयासं हि मध्यमामित्रमपसृतमेकार्थोपगतं प्राप्नोति ।

तेनोदासीनानुग्रहो व्याख्यातः ।

मध्यमोदासीनयोर्बलांशदाने यः शूरं कृतास्त्रं दुःखसहमनुरक्तं वा दण्डं ददाति, सोऽतिसन्धीयते । विपरीतोऽतिसन्धत्ते ।

यत्र तु दण्डः प्रतिहतस्तं वा चार्थमन्यांश्च साधयति, तत्र मौल-

---

क्षयव्ययप्रवासाः युग्यपुरुषापचयधनहानिदीर्घाध्वगमनानि शत्रूपकारार्थानि परोपकारः स्वस्मिन् प्रत्युपकर्तव्ये शत्रुणा परस्योपकारकरणम् इत्येतान्, इतरः प्राप्नोति । कथं पुनः शत्रुरुपकृतः स्वस्मिन् प्रत्युपकर्तव्ये परस्योपकारं कुर्यात्, तत्राह—कृतार्थश्च शत्रुर्वैगुण्यमेतीति । शत्रुः स्वकार्ये स्पर्धनीये गुणवत्तामात्मनो दर्शयति, सिद्धे तु तस्मिन् शत्रुस्वाभाव्याद् विकुरुत इत्यर्थः ।

मध्यमविषयमनुग्रहमाह — मध्यमं त्वित्यादि । गतार्थम् । मध्यमोऽरिविजिगीषुभ्यामुपकृतो यदि विरुद्धवृत्तिर्भवेत्, तर्हि तस्यामित्रो विशेषलाभं प्राप्नोतीत्याह—मध्यमश्चेदनुगृहीत इत्यादि । लाभस्वरूपमाह— कृतप्रयासं हीत्यादि । मध्यमेन सह प्रयासं कृत्वा पूर्वं तन्मित्रभावे स्थितं सम्प्रति तद्वैगुण्यात् तदमित्रत्वं प्रतिपद्य तस्माच्चापसृत्यात्मना सहैकार्थतां गतं मित्रविशेषं हि मध्यमामित्रः प्राप्नोतीत्येष तस्य विशेषलाभ इत्यभिप्रायः ।

मध्यमानुग्रहोक्तरीत्या उदासीनानुग्रहेऽपि मित्राद्यनुग्रहीतुर्मित्रसकाशाद् वृद्धिविशेषलाभः उदासीनवैगुण्ये तदमित्रस्य मित्रविशेषलाभश्च भवतीत्यर्थकमतिदेशमाह — तेनेत्यादि ।

मध्यमोदासीनयोर्बलांशदानेनानुग्रहे कर्तव्यतया प्रसक्ते शूरत्वाशिक्षितास्त्रत्वजितश्रमत्वानुरक्तत्वविशिष्टम् आत्मनो मूलबलं यो ददाति सोऽयुक्तकारित्वाद् वञ्च्यते, तद्विपरीतस्तु दूष्यादिबलदायी युक्तकारी भवतीत्याह— मध्यमोदासीनयोर्बलांशदान इत्यादि ।

क्वचिन्मूलबलस्यापि प्रेषणमाह — यत्र त्विति । यस्मिंस्त्वर्थे, दण्डः प्रतिहतः अन्यद् बलं कुण्ठितं जातं, तं वा चार्थं यातव्यरूपम्, अन्यांश्च जनपदावस्कन्दकमार्गप्रतिरोधकादींश्च, साधयति साधयितुं प्रवृत्तश्चेदित्यर्थः,

भृतश्रेणीमित्राटवीबलानामन्यतममुपलब्धदेशकालं दण्डं दद्यात्। अ-मित्राटवीबलं वा व्यवहितदेशकालम्।

यं तु मन्येत — 'कृतार्थो मे दण्डं गृह्णीयात् अमित्राटव्यभू-म्यनृतुषु वा वासयेदफलं वा कुर्यादि'ति, दण्डव्यासङ्गापदेशेन नैनम-नुगृह्णीयात्। एवमवश्यं त्वनुग्रहीतव्ये तत्कालसहमस्मै दण्डं दद्यात्। आ समाप्तेश्चैनं वासयेद् योधयेच्च, बलव्यसनेभ्यश्च रक्षेत्। कृतार्थाच्च सापदेशमवस्रावयेत्। दूष्यामित्राटवीदण्डं वास्मै दद्यात्। यातव्येन वा सन्धायैनमतिसन्दध्यात्॥

तत्र, मौलभृतश्रेणीमित्राटवीबलानां मौलादीनां पञ्चानां बलानाम्, अन्यतमं, दण्डं सैन्यम्, उपलब्धदेशकालं दद्यात् समुचितं देशं कालं चोपलभ्य प्रेषयेत्। **अमित्राटवीबलं वा व्यवहितदेशकालमिति**। विप्रकृष्टे देशे काले च यदि बलं दद्यात्, तर्हि अमित्राटविकबलमेव दद्यात् न त्वन्यन्मौलादिकमित्यर्थः।

यं तु मन्येतेत्यादि। यं तु मध्यममुदासीनं वा शङ्केत— 'एष मदीयस्य दण्डस्य साहाय्येन स्वार्थं साधयित्वा तमात्मसात्करिष्यति, अथवा अमित्रान्तिके आटविकान्तिके अभूमिषु वासायोग्येषु प्रदेशेषु अनृतुषु युद्धानर्हेषु वर्षादिकालेषु च दण्डं वासयिष्यति, अथवा दण्डं शत्रुजयलभ्यफलाभाजनं करिष्यति' इति, एनं, दण्डव्यासङ्गापदेशेन नानुगृह्णीयात् 'दण्डो मे कार्यान्तरे व्यासक्त' इति व्याजमुल्लिखन् दण्डं तस्मै न दद्यादित्यर्थः। **एवमवश्यं त्वनुग्रहीतव्ये इति**। दण्डदानेनावश्यमनुग्रहे कर्तव्ये तु, तत्कालसहं तत्कालक्षमं, दण्डम्, अस्मै अनुग्राह्याय, दद्यात्। आ समाप्तेश्च आ कार्यसमाप्तेः, एनं दण्डं, वासयेद् योधयेच्च योग्यभूमौ वासयन् युद्धं कारयेत्, बलव्यसनेभ्यश्च शस्त्रक्षयादिभ्यश्च, रक्षेत्। कृतार्थाच्च दण्डकृतप्रयोजनाच्च मध्यमादुदासीनाद् वा, सापदेशं कमपि व्याजमुल्लिख्य, अवस्रावयेत् अपवाहयेत् तदपहारादिदोषपरिहारार्थम्। दण्डपालनक्लेशभीरुत्वे त्वाह — **दूष्यामित्राटवीदण्डं वास्मै दद्यादिति**। तद्धि स्वविनाश्यमन्येन नाशितं भवत्वित्यभिसन्धिनेत्यार्थम्। अनुग्राह्यस्य दुर्बुद्धित्वशङ्कायां प्रकारान्तरानुष्ठानमाह — **यातव्येन वेति**। तेन अनुग्राह्यसम्बन्धिना सह, सन्धाय, एनं यातव्यम्, अतिसन्दध्यात् एतत्सकाशाद् अनुग्राह्यसकाशलभ्याभ्यधिकं लाभं प्राप्नुयादित्यर्थः॥

समे हि लाभे सन्धिः स्याद् विषमे विक्रमो मतः।
समहीनविशिष्टानामित्युक्ताः सन्धिविक्रमाः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे अष्टमोऽध्यायः
यातव्यवृत्तिरनुग्राह्यमित्रविशेषाः.
आदितः षट्छततमः ॥

इत्थं सन्धिविग्रहगतान् लाभपणनादिविशेषानभिधाय सामान्यतः सन्धिविग्रहयोर्निमित्तं श्लोकेन कीर्तयन्नध्यायमुपसंहरति — **समे हि लाभे सन्धिः स्यादित्यादि** । सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
अष्टमोऽध्यायः यातव्यवृत्तिरनुग्राह्यमित्रविशेषाश्च,
आदितः षट्छततमः ॥

११६. प्रक. मित्रहिरण्यभूमिकर्मसन्धयः ।

संहितप्रयाणे मित्रहिरण्यभूमिलाभानामुत्तरोत्तरो लाभः श्रेयान् । मित्रहिरण्ये हि भूमिलाभाद् भवतः, मित्रं हिरण्यलाभात् । यो वा लाभः सिद्धः शेषयोरन्यतरं साधयति ।

'त्वं चाहं च मित्रं लभावहे' इत्येवमादिः समसन्धिः । 'त्वं मित्रम्' इत्येवमादिर्विषमसन्धिः । तयोर्विशेषलाभादतिसन्धिः ।

समसन्धौ तु यः सम्पन्नं मित्रं मित्रकृच्छ्रे वा मित्रमवाप्नोति सोऽतिसन्धत्ते । आपद्धि सौहृदस्थैर्यमुत्पादयति ।

मित्रहिरण्यभूमिकर्मसन्धय इति सूत्रम् । मित्रं नित्यवश्यादिषट्प्रकारं हिरण्यं स्वर्णरजतादि भूमिर्नित्यामित्रादिर्भूमिसन्ध्यध्याये वक्ष्यमाणा कर्म दुर्गादि एषां लाभैः क्रियमाणाः सन्धयः कथ्यन्त इति सूत्रार्थः । श्रेष्ठाश्रेष्ठलाभैः पणनमुक्तम् । श्रैष्ठ्याश्रैष्ठ्ये तु अनिरूपिते इह निरूप्येते ।

इदं च प्रकरणं नवमादिभिश्चतुर्भिरध्यायैर्वितन्यते । तत्र नवमेऽस्मिन्नध्याये मित्रसन्धिर्हिरण्यसन्धिश्च निरूप्यते ।

संहितप्रयाण इति । तस्मिन् विषये, मित्रहिरण्यभूमिलाभानाम् उत्तरोत्तरो लाभः श्रेयान् मित्रलाभापेक्षया हिरण्यलाभः प्रशस्ततरः, हिरण्यलाभापेक्षया भूमिलाभः प्रशस्ततरः । कुत इत्याह — **मित्रहिरण्ये** हीत्यादि । भूमिलाभे हि सिद्धे तदुत्पन्नकृष्यादिफलसम्पदा साधनेन मित्रं हिरण्यं च साधयितुं शक्यते हिरण्यलाभेन च मित्रलाभः साधयितुं शक्यते इति भूमिलाभो हिरण्यलाभश्च स्वेतरसाधको यस्मात् तस्मादित्यर्थः । लाभश्रेष्ठत्वं च शेषान्यतरसाधकत्वरूपमित्याह — **यो** वेत्यादि । स श्रेष्ठ इति वाक्यशेषः ।

मित्रादिलाभनिबन्धनान् समविषमान् सन्धीनाह — **त्वं चाहं** चेत्यादि । 'त्वं चाहं च मित्रं लभावहे' 'त्वं चाहं च हिरण्यं लभावहे' 'त्वं चाहं च भूमिं लभावहे' इत्येवं पणनेन क्रियमाणः सन्धिः समसन्धिः । **त्वं मित्रमित्येवमादिरि**ति । त्वं मित्रं लभसे अहं भूमिं, त्वं हिरण्यमहं भूमिं, त्वं हिरण्यमहं मित्रम् इत्येवम्प्रकारो, विषमसन्धिः । **तयोरि**ति । समसन्धिविषमसन्ध्योः, विशेषलाभात्, अतिसन्धिः भवति ।

समसन्धौ विशेषलाभमाह — **समसन्धौ त्वि**ति । तस्मिन्, यः, सम्पन्नं वक्ष्यमाणनित्यत्ववश्यत्वादिगुणयुक्तं, मित्रम् अवाप्नोति, अथवा मित्र-

मित्रकृच्छ्रेऽपि नित्यमवश्यमनित्यं वश्यं वेति। 'नित्यमवश्यं श्रेयः, तद्ध्यनुपकुर्वदपि नापकरोति' इत्याचार्याः।

नेति कौटल्यः। वश्यमनित्यं श्रेयः, यावदुपकरोति तावन्मित्रं भवति। उपकारलक्षणं मित्रमिति।

वश्ययोरपि महाभोगमनित्यमल्पभोगं वा नित्यमिति। 'महाभोगमनित्यं श्रेयः, महाभोगमनित्यमल्पकालेन महदुपकुर्वन्महान्ति व्ययस्थानानि प्रतिकरोति' इत्याचार्याः।

नेति कौटल्यः। नित्यमल्पभोगं श्रेयः, महाभोगमनित्यमुपकार-

कृच्छ्रे मित्रस्य मित्रसम्प्रयुक्तस्य कृच्छ्रे आपद्दशायां, मित्रं तदेव, अवाप्नोति, सः, अतिसन्धत्ते अतिसन्धिनिमित्तं विशेषलाभं भजते। आपदपेक्षणस्य प्रयोजनमाह—आपद्धीत्यादि। सौहृदस्थैर्यं मैत्रीदार्ढ्यम्।

मित्रकृच्छ्रेऽपि विशेषनिर्धारणार्थं विप्रतिपत्तिमुपक्षिपति—मित्रकृच्छ्रेऽपि नित्यमवश्यमित्यादि। वक्ष्यमाणलक्षणावश्यत्वयुक्तं नित्यं मित्रं वा श्रेयः, आहोस्विद् अनित्यं वश्यं वा श्रेयः इति विचार्यत इत्यर्थः। तत्राचार्याणां निर्धारणमाह—नित्यमवश्यं श्रेय इत्यादि।

आचार्यमतं प्रतिषेधन् स्वमतमाह—नेति कौटल्य इत्यादि। वश्यमनित्यं मित्रं श्रेयः। तत्र हेतुमाह—यावदुपकरोति तावन्मित्रमित्यादि। मित्रस्योपकारलक्षणत्वादुपकुर्वद्दशायामेव मित्रव्यपदेशो भवति नानुपकुर्वद्दशायां, वश्यं च सर्वचित्रमहाभोगत्वलक्षणत्वादुपकुर्वदेव भवतीत्यर्थः। तथाच नित्यवश्ययोर्मध्ये महाभोगत्वलक्षणं वश्यमनित्यं श्रेय इति कौटल्यमतमुक्तं भवति।

वश्ययोरेव नित्यत्वानित्यत्वयोगे श्रेयस्त्वं विचारयति—वश्ययोरपीत्यादि। महाभोगवश्याल्पभोगवश्ययोर्मध्ये किं महाभोगवश्यमनित्यं श्रेयः उताल्पभोगवश्यं नित्यं श्रेय इति चिन्तायाम् आचार्या वदन्ति—महाभोगवश्यमनित्यं श्रेयः, कुतः, तद्धि अल्पेन कालेन महान्तमुपकारं करोति, तेन च व्ययहेतवः प्रभूताः प्रतिकृता भवन्तीत्येतस्मात् कारणात्।

आचार्यमतं निराकुर्वन् स्वमतमाह—नेति कौटल्य इत्यादि। अयमर्थः—अल्पभोगवश्यं नित्यं श्रेयः, कुतः, अनित्यमहाभोगसकाशसम्भावितदोषानास्पदत्वात् तत्सकाशसम्भावितगुणास्पदत्वाच्च। अनित्यं हि महाभोग-

भयादपक्रामति, उपकृत्य वा भत्यादातुमीहते। नित्यमल्पभोगं सातत्यादल्पमुपकुर्वन्महता कालेन महदुपकरोति।

गुरुसमुत्थं महन्मित्रं लघुसमुत्थमल्पं वेति। 'गुरुसमुत्थं महन्मित्रं प्रतापकरं भवति, यदा चोत्तिष्ठते, तदा कार्यं साधयति' इत्याचार्याः।

नेति कौटल्यः—लघुसमुत्थमल्पं श्रेयः, लघुसमुत्थमल्पं मित्रं कार्यकालं नातिपातयति दौर्बल्याच्च यथेष्टभोग्यं भवति, नेतरत् प्रकृष्टभौमम्।

विक्षिप्तसैन्यमवश्यसैन्यं वेति। 'विक्षिप्तं सैन्यं शक्यं प्रतिसंहर्तुं वश्यत्वात्' इत्याचार्याः।

वश्यम् उपकारभीत्या हार्दाभावनिमित्तया मित्रत्वात् प्रच्यवेत, उपकारं कृत्वा वापहर्तुं पश्चाद् यतेत। नित्यं त्वल्पभोगमव्यभिचारित्वेन मित्रभावान्न जातु प्रच्यवेत, अविच्छेदेन चाल्प उपकारस्तेन क्रियमाणो महता कालेन महान् भविष्यतीति।

गुरुसमुत्थमहामित्र-लघुसमुत्थाल्पमित्रयोः किं श्रेय इति विचारयति—गुर्वित्यादि। गुरुसमुत्थं देशविप्रकर्षादिना प्रयत्नोत्थाप्यसैन्यं, महत् प्रबलं, मित्रं वा, श्रेय इति वर्तते, लघुसमुत्थम् अयत्नोत्थाप्यसैन्यम्, अल्पं दुर्बलं मित्रं वा श्रेय इति विचार्यत इति शेषः। तत्राचार्याणां मतमाह—गुर्वित्यादि। गुरुसमुत्थं महत् मित्रं श्रेयः, कुतः, तद्धि शत्रावतिशयेन पराक्रमते, चिरयत्नेनापि यदोत्थितं भवति तदा कार्यमव्यभिचारेण साधयति चेत्यर्थः।

स्वमतमाह—नेति कौटल्य इत्यादि। कार्यकालं नातिपातयति कार्यानुष्ठानार्हमवसरं नातिक्रामयति। इतरत् गुरुसमुत्थम्। प्रकृष्टभौमं विप्रकृष्टभूमिस्थितम्।

विक्षिप्तेत्यादि। विक्षिप्तसैन्यं कार्यान्तरसाधनायानेकत्र प्रेषितं सैन्यं येन तत् तथाभूतं, मित्रं वा श्रेयः अवश्यसैन्यं वा, श्रेय इति विचार्यत इति शेषः। आचार्यमतमाह—विक्षिप्तं सैन्यमित्यादि। प्रतिसंहर्तुं समूहयितुम्।

नेति कौटल्यः । अवश्यसैन्यं श्रेयः । अवश्यं हि शक्यं सामादिभिर्वश्यं कर्तुं, नेतरत् कार्यव्यासक्तं प्रतिसंहर्तुम् ।

पुरुषभोगं हिरण्यभोगं वा मित्रमिति । 'पुरुषभोगं मित्रं श्रेयः, पुरुषभोगं मित्रं प्रतापकरं भवति । यदा चोत्तिष्ठते तदा कार्यं साधयति' इत्याचार्याः ।

नेति कौटल्यः । हिरण्यभोगं मित्रं श्रेयः, नित्यो हिरण्येन योगः कदाचिद् दण्डेन दण्डश्च हिरण्येनान्ये च कामाः प्राप्यन्त इति ।

हिरण्यभोगं भूमिभोगं वा मित्रमिति । 'हिरण्यभोगं गतिमत्त्वात् सर्वव्ययप्रतीकारकरम्' इत्याचार्याः ।

नेति कौटल्यः—'मित्रहिरण्ये हि भूमिलाभाद् भवतः' इत्युक्तं पुरस्तात् । तस्माद् भूमिभोगं मित्रं श्रेय इति ।

स्वमतमाह— नेति कौटल्य इत्यादि । सामादिभिः सामदानभेदैः । इतरत् विक्षिप्तम् ।

पुरुषैरुपकारकमेकं मित्रं हिरण्येनोपकारकमन्यदित्यनयोर्मध्ये किं श्रेय इति चिन्तयति — पुरुषभोगमित्यादि । तत्र पुरुषभोगमित्रं प्रशस्ततरं, यस्मात् शत्रुषु तत् स्वयं पराक्रमितुमर्हम्, उत्थितं च कार्यं साधयतीत्याचार्या मन्यन्त इत्याह — पुरुषभोगं मित्रं श्रेय इत्यादि ।

स्वमतमाह— नेति कौटल्यो हिरण्यभोगमित्यादि । अयमर्थः — हिरण्यभोगं मित्रं प्रशस्ततरं, कुतः, यस्मात् हिरण्यं सर्वत्र नयनानयनयोग्यं हस्ते नित्यं सन्निहितं सर्वदोपयोगक्षमं, दण्डस्तु कादाचित्कोत्थानत्वात् कदाचिदेवोपयोगक्षमो भवति । किञ्च हिरण्येन दण्डश्च अन्ये चेप्सितार्थाः सुसाधा भवन्ति, न पुनर्दण्डेन हिरण्यमन्ये वा कामा इति ।

हिरण्योपकारकभूम्युपकारकमित्रयोर्मध्ये कतरत् प्रशस्ततरमिति विचारयति — हिरण्यभोगमित्यादि । हिरण्यभोगं हिरण्योपकारकं, गतिमत्त्वात् नयनानयनयोग्यत्वात्, सर्वव्ययप्रतीकारकरं सर्वविधव्ययोपयोगक्षमम्, अर्थाद् भूमिभोगम् अगतिमत्त्वादताद्दशम् । ततश्च तदेव श्रेय इत्यर्थः । इत्याचार्या आहुः ।

मित्रहिरण्योभयसाधकत्वलक्षणं गुणातिशयं पूर्वोक्तं स्मारयन् तेन हेतुना भूम्युपकारकं मित्रमेव प्रशस्ततरमित्येवं स्वमतमाह—नेति कौटल्यो

तुल्ये पुरुषभोगे विक्रमः क्लेशसहत्वमनुरागः सर्वबललाभो वा मित्रकुलाद् विशेषः ।

तुल्ये हिरण्यभोगे प्रार्थितार्थता प्राभूत्यमल्पप्रयासता सातत्यं च विशेषः ।

तत्रैतद् भवति —

नित्यं वश्यं लघूत्थानं पितृपैतामहं महत् ।
अद्वैध्यं चेति सम्पन्नं मित्रं षड्गुणमुच्यते ॥
ऋते यदर्थं प्रणयाद् रक्ष्यते यच्च रक्षति ।
पूर्वोपचितसम्बन्धं तन्मित्रं नित्यमुच्यते ॥

मित्रहिरण्ये हीत्यादि । तदेवं पुरुषभोगाहिरण्यभोगभूमिभोगानां गुरुलघुभावो विचारितः ।

अथ पुरुषभोगेष्वेव कश्चिद् भेदः पुरुषभोगभेदान्तरापेक्षया विशिष्ट इत्याह — **तुल्ये पुरुषभोग इत्यादि** । शौर्यम् आयासक्षमत्वं स्नेहो मौलभृतादिसर्वविधबलदायकत्वमित्येभिर्गुणैर्युक्तं पुरुषभोगमित्रमतादृशात् पुरुषभोगमित्रवर्गात् प्रशस्ततरमित्यर्थः ।

हिरण्यभोगभेदस्य कस्यचित् तद्भोगभेदान्तरापेक्षया वैशिष्ट्यमाह — **तुल्ये हिरण्यभोग इत्यादि** । प्रार्थितार्थता प्रार्थितोऽर्थो यस्माल्लभ्यते स प्रार्थितार्थस्तत्त्वं, प्राभूत्यं समृद्धधनत्वम्, अल्पप्रयासता अल्पेन प्रयासेन कार्यसाधकता, सातत्यं च नित्योपकारिता च, विशेषः वैशिष्ट्यनिमित्तम्, एतैर्गुणैर्युक्तं हिरण्यभोगमित्रमतद्विधाद्धिरण्यभोगमित्रवर्गात् प्रशस्ततरमित्यर्थः । एवं पुरुषभोगहिरण्यभोगयोरवान्तरविशेषोऽभिहितः । भूमिभोगस्य तूपरिष्टाद् अभिधास्यते ।

अथ मित्रस्य गुणभेदकृतान् भेदान् वक्तुमाह — **तत्रेति** । तत्र मित्रलाभसन्धौ, एतद् वक्ष्यमाणं मित्रनिरूपणं भवति ।

मित्रस्य गुणानाह — **नित्यमित्यादि** । मित्रसम्पदुपेतं मित्रं नित्यत्ववश्यत्वादिभिः षड्भिर्गुणैर्युक्तमुच्यत इति श्लोकस्यार्थः ॥

गुणान् क्रमेण लक्षयति — **ऋते इत्यादि** । पूर्वप्ररूढयौनादिसम्बन्धनिमित्तस्नेहत्वमात्राद् विनैवार्थसम्बन्धं यद् रक्ष्यते, यच्च कर्तृ रक्षति, तदुभयमन्योन्यं प्रति नित्यं मित्रमित्यर्थः । यदर्थंप्रणयादिति समस्तपाठोऽप्यस्ति ॥

सर्वचित्रमहाभोगं त्रिविधं वश्यमुच्यते ।
एकतोभोग्युभयतः सर्वतोभोगि चापरम् ॥
आदातृ वा दातृपि वा जीवत्यरिषु हिंसया ।
मित्रं नित्यमवश्यं तद् दुर्गाटव्यपसारि च ॥
अन्यतो विगृहीतं यल्लघुव्यसनमेव वा ।
सन्धत्ते चोपकाराय तन्मित्रं वश्यमध्रुवम् ॥
एकार्थानर्थसम्बन्धमुपकार्यविकारि च ।
मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि ॥

वश्यमाह—**सर्वचित्रमहाभोगमित्यादि** । वश्यं मित्रं, सर्वचित्रमहाभोगं त्रिविधं सर्वभोगं चित्रभोगं महाभोगमिति त्रिविधम् । तत्र दण्डकोशभूमिभिरुपकारकं सर्वभोगं, दण्डकोशाभ्यां प्रभूतमुपकुर्वत् महाभोगं, रत्नसारफल्गुकुप्यद्रव्यवनादिनोपकारकं चित्रभोगम् । इदमर्थप्राप्तिलक्षणोपकारप्रयुक्तं त्रैविध्यम् । अनर्थपरिहारलक्षणोपकारनिमित्तं त्रैविध्यमुत्तरार्धेनोच्यते—एकतोभोगि उभयतोभोगि सर्वतोभोगीति च । एकतो यद् अमित्रप्रतिकारकं तदाद्यं, यद् अमित्रतदासारोभयप्रतिकारकं तद् द्वितीयं, यद् अमित्रासारप्रतिरोधकाटविकप्रतिकारकं तत् तृतीयमिति बोद्धव्यम् ॥

अथ नित्यं वश्यत्वहीनं भवति, वश्यं च नित्यत्वहीनम् । तत्राद्यमाह—**आदातृ** वेत्यादि । यद् विजिगीष्वनुपकारकमपि शत्रुषु लुण्टनाद्यपकारैरादानं दानं वा कुर्वदुपजीवति, दुर्गाटव्यपसरणशीलतया चात्मानं रक्षच्छत्रोरग्राह्यं भवति, तद् वश्यत्वरहितं नित्यं मित्रमित्यर्थः ॥

द्वितीयमाह—**अन्यत** इति । यत्, अन्यतः शत्रुणा विगृहीतं, लघुव्यसनमेव वा अल्पव्यसनयुक्तं वा सत्, उपकाराय, सन्धत्ते विजिगीषुणा सह सन्धिं करोति, तत् मित्रं, वश्यम् उपकारकत्वात्, अध्रुवम् अनित्यम् आत्मोपकारकालमात्रावस्थायिमैत्रत्वात् ॥

अयत्नकरणीयसैन्यसन्नाहत्वलक्षणं लघूत्थानत्वं, पितृपितामहक्रमानुवृत्तमैत्रबन्धत्वलक्षणं पितृपैतामहत्वं, प्रमाणप्रतापगरिष्ठसैन्ययुक्तत्वलक्षणं महत्त्वं च सुबोधत्वान्न लक्षणीयमिति मन्वानस्तान्यतिक्रम्याद्वैध्यं लक्षयति—**एकार्थानर्थसम्बन्धमिति** । समानसुखदुःखसम्बन्धम्, उपकारि, अविकारि च अव्यभिचारि च, मित्रम्, आपदि अद्वैध्यं द्वैध्यं भेदः तद्रहितत्वात्

मित्रभावाद् ध्रुवं मित्रं शत्रुसाधारणाच्चलम् ।
न कस्यचिदुदासीनं द्वयोरुभयभावि तत् ॥
विजिगीषोरमित्रं यन्मित्रमन्तर्धितां गतम् ।
उपकारे निविष्टं वाशक्तं वानुपकारि तत् ॥
प्रियं परस्य वा रक्ष्यं पूज्यसम्बन्धमेव वा ।
अनुगृह्णाति यन्मित्रं शत्रुसाधारणं हि तत् ॥
प्रकृष्टभौमं सन्तुष्टं बलवच्चालसं च यत् ।
उदासीनं भवत्येतद् व्यसनादवमानितम् ॥

तदाख्यम् । अत एव एतत् मित्रं, मित्रभावि मित्रभावनित्ययोगित्वान्मित्रभावीत्यप्याख्यायत इत्यर्थः ॥

मित्रभाविविपरीतम् उभयभाव्यप्यस्ति । तच्चोभयभावित्वं शत्रुविजिगीषूभयानुपकारकत्वात् तदुभयोपकारकत्वात् दुर्बलतया तदुभयसेवित्वाद् वा त्रिप्रकारं भवति । तत्र यदाद्यमुभयभावि तद् मित्रभावस्य शत्रुविजिगीषूभयातिरिक्तविषयत्वाभावेनासाधारणतया नित्यत्वात् शत्रुविजिगीषूभयसाधारणत्वेनानित्यत्वाच्च नित्यानित्योभयरूपम् । तदेतदाह— **मित्रभावाद् ध्रुवं मित्रमित्यादि** । मित्रभावात् शत्रुमित्रातिरिक्तागोचरत्वेनासाधारणादित्यार्थम् । न कस्यचिद्, उपकारकमिति शेषः । तदिदं शक्तत्वेऽप्यनभिनिवेशादुभयानुपकारकम् ॥

उपकाराभिनिविष्टमपि शक्तिविरहादुभयानुपकारकम् उभयभाव्याह— **विजिगीषोरमित्रमिति** । विजिगीषोर्भूम्यनन्तरत्वात् शत्रुभूतम्, अन्तर्धितां गतं मित्रं शत्रुविजिगीष्वोर्मध्यस्थो दुर्बलोऽन्तार्धिः तत्तां गतम् अत एव विधेयत्वान्मित्रशब्दितम्, उपकारे निविष्टं वा अशक्तं वा उभयोरुपकारकरणे साभिनिवेशं च शक्तिहीनं च, यद् अनुपकारि, तद् उभयभावीत्यनुवर्तते । अमित्रमिति क्लीबनिर्देश आर्षः ॥

उभयानुग्राहकमुभयतोभाव्याह — **प्रियमिति** । यत् मित्रं, परस्य शत्रोः, प्रियं, रक्ष्यं वा, पूज्यसम्बन्धमेव वा स्वपूजनीयगुर्वादिसम्बद्धं वा, अनुगृह्णाति, तत् शत्रुसाधारणं शत्रुमित्रोभयसमानम्, उभयतोभावीति यावत् ॥

अथ कीदृशं मित्रमुपकारकर्तव्यतादशायामुदासीनं स्यादित्याह — **प्रकृष्टभौममिति** । विप्रकृष्टभूमिस्थितं, सन्तुष्टम् अपूर्वलाभनिःस्पृहं स्थितार्थ-

अरेर्नेतुश्च यद् वृद्धिं दौर्बल्यादनुवर्तते ।
उभयस्याप्यविद्विष्टं विद्यादुभयभावि तत् ॥
कारणाकरणध्वस्तं कारणाकरणागतम् ।
यो मित्रं समपेक्षेत स मृत्युमुपगूहति ॥

क्षिप्रमल्पो लाभश्चिरान्महानिति वा । 'क्षिप्रमल्पो लाभः कार्यदेशकालसंवादकः श्रेयान्' इत्याचार्याः ।

नेति कौटल्यः । चिरादविनिपाती बीजसधर्मा महान् लाभः श्रेयान्, विपर्यये पूर्वः ॥

एवं दृष्ट्वा ध्रुवे लाभे लाभांशे च गुणोदयम् ।
स्वार्थसिद्धिपरो यायात् संहितः सामवायिकैः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे नवमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ मित्रसन्धिः हिरण्यसन्धिः,
आदितः सप्तशततमः ॥

परितृप्तं, बलवत् शौर्यगर्वादनुपजातद्वेषम्, अलसं, व्यसनादवमानितं च द्यूतादिव्यसनदोषादवज्ञातं च, एतत् ईदृशं मित्रम्, उदासीनं भवति ॥

दुर्बलत्वादुभयसेवकमुभयभाव्याह — अरेर्नेतुश्चेति । शत्रोर्विजिगीषोश्च, वृद्धिं, यत् मित्रं, दौर्बल्यात्, अनुवर्तते तामभिनन्दत् तावाश्रयतीत्यर्थः, कथम्भूतम्, उभयस्यापि शत्रुमित्रयोरपि, अविद्विष्टम् । तत्, उभयभावि उभयानुवर्त्युभयभावि, विद्यात् । तदेवं मित्रविशेषा निरूपिताः ॥

मित्रसामान्यविषयं विधिमाह — कारणाकरणध्वस्तमिति । कारणानुत्पादेऽपगतं, कारणाकरणागतं कारणानुत्पादे पुनरायातं, मित्रं, यः, समपेक्षेत स्वीकुर्यात्, सः, मृत्युम्, उपगूहति आलिङ्गति ॥

अथ मित्रलाभप्रसङ्गागतमित्रविशेषकथनानन्तरं लाभसामान्यगतं कालस्वरूपप्रयुक्तं विशेषं चिन्तयति—क्षिप्रमल्पो लाभ इत्यादि। सद्योभावी स्वल्पो लाभो वा श्रेयान्, चिरभावी प्रभूतो लाभो वा श्रेयानिति संशय इत्यर्थः । आचार्यमतमाह — क्षिप्रमल्पो लाभः श्रेयान्, कथम्भूतः, कार्यदेशकालसंवादकः अनेन कार्येणास्मिन् देशे अस्मिन् काले अयं लाभो भविष्यतीति समीक्षासंवादी । इत्याचार्याः ।

स्वमतमाह—नेति कौटल्य इत्यादि । चिरादपि भवन् निष्प्रतिबन्धभाविसिद्धितयावधारितो धान्यबीजसमानधर्मा महान् लाभः श्रेयान् । विपर्यये महतो लाभस्य विनिपातित्वसम्भावनायां, पूर्व आचार्योक्तः कल्प इत्यर्थः ॥

प्रान्ते श्लोकमाह—एवमित्यादि । लाभे मित्रहिरण्यभूमिरूपे । गुणोदयं गुणविशेषोत्पत्तिम् । शेषं सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे नवमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ मित्रसन्धिर्हिरण्यसन्धिश्च,
आदितः सप्तोत्तरशततमः ॥

——

११६. प्रक — भूमिसन्धिः ।

'त्वं चाहं च भूमिं लभावहे' इति भूमिसन्धिः ।

तयोर्यः प्रत्युपस्थितार्थः सम्पन्नां भूमिमवाप्नोति सोऽतिसन्धत्ते ।

तुल्ये सम्पन्नालाभे यो बलवन्तमाक्रम्य भूमिमवाप्नोति सोऽतिसन्धत्ते । भूमिलाभं शत्रुकर्शनं प्रतापं च हि प्राप्नोति । दुर्बलाद् भूमिलाभे सत्यं सौकर्यं भवति । दुर्बल एव च भूमिलाभः, तत्सामन्तश्च मित्रममित्रभावं गच्छति ।

तुल्ये बलीयस्त्वे यः स्थिरं शत्रुमुत्पाट्य भूमिमवाप्नोति सोऽतिसन्धत्ते । दुर्गावाप्तिर्हि स्वभूमिरक्षणममित्राटवीप्रतिषेधं च करोति ।

गताध्याये मित्रहिरण्यसन्ध्योर्निरूपितयोः क्रमप्राप्तः भूमिसन्धिरिह निरूप्यते — त्वं चाहं चेत्यादि । भूमिसन्धिरिति । स च समसन्धिः, भूमेरेव द्वाभ्यां लाभात् ।

अतिसन्धिमाह — तयोरिति । शत्रुविजिगीष्वोर्मध्ये, यः, प्रत्युपस्थितार्थः प्रत्युपस्थितः अचिरकरणीयतया सन्निहितः अर्थः सेतुबन्धादिकर्मव्ययरूपो गुणवद्भृत्यपूजादिरूपो वा यस्य स तथाभूतः, सम्पन्नां वक्ष्यमाणानित्यामित्रत्वादिभूमिसम्पद्युक्तां, भूमिम् अवाप्नोति, सः, अतिसन्धत्ते विशेषलाभं भजते ।

सम्पन्नभूमिलाभेऽपि विशेषमाह — तुल्ये सम्पन्नालाभ इति । सम्पन्नाया भूमेर्लाभे द्वयोः समाने, यः बलवन्तम्, आक्रम्य परिभूय, भूमिम् अवाप्नोति, सः अतिसन्धत्ते । अतिसन्धानस्वरूपमाह — भूमीत्यादि । बलवत्सकाशाद्धि भूमिं गृह्णन् न केवलभूमिभाग् भवति, किन्तु शत्रुकर्शनप्रतापफलावपि नान्तरीयकतया प्राप्नोतीत्यर्थः । दुर्बलाद् भूमिलाभे यथोक्तव्यतिरेकमाह — दुर्बलादित्यादि । अयमर्थः — दुर्बलाद् भूमिलाभः सत्यं सुखेन साध्यः । किन्त्वसौ दुर्बल एव निकृष्ट एव दुर्बलहिंसाधिगतत्वात् । किञ्चास्य दुर्बलस्य सामन्तः शत्रुः स्वस्य भूम्येकान्तरमित्रभूतः स्वस्मिन् दुर्बलसाधुर्हिंसिन्यविश्वस्तो दुर्बलोच्छेदद्वारेणात्मोच्छेदं शङ्कमानः शत्रूभूय दुर्बलस्य साहाय्यं दद्यादित्येवमनर्थानुबन्धश्च दुर्बलाद् भूमिलाभ इति ।

बलवत्सकाशाद् भूमिलाभे विशेषमाह — तुल्ये बलीयस्त्व इति । द्वयोः शत्र्वोर्बलवत्तायां समानायां, यः, स्थिरं दुर्गादिमत्त्वेन सुप्रतिष्ठितं,

चलामित्राद् भूमिलाभे शक्यसामन्ततो विशेषः। दुर्बलसामन्ता हि क्षिप्राप्यायनयोगक्षेमा भवति। विपरीता बलवत्सामन्ता कोशदण्डावच्छेदनी च भूमिर्भवति।

सम्पन्ना नित्यामित्रा मन्दगुणा वा भूमिरनित्यामित्रेति। 'सम्पन्ना नित्यामित्रा श्रेयसी भूमिः। सम्पन्ना हि कोशदण्डौ सम्पादयति। तौ चामित्रप्रतिघातकौ' इत्याचार्याः।

नेति कौटल्यः—नित्यामित्रालाभे भूयाञ्छत्रुलाभो भवति। नित्यश्च शत्रुरुपकृते चापकृते च शत्रुरेव भवति। अनित्यस्तु शत्रुरुप-

---

स्थितमिति पाठेऽप्ययमेवार्थः, शत्रुम्, उत्पाट्य उच्छिद्य, भूमिम् अवाप्नोति, सः अतिसन्धत्ते। तत्र हेतुमाह— दुर्गावाप्तिर्हीत्यादि। अयमर्थः— शत्रुसम्बन्धि दुर्गं तावदवाप्यते, तेन स्वभूमिरक्षणं शत्रुप्रतिघात आटविकप्रतिघातश्च निर्वर्तत इति।

चलामित्राद् भूमिलाभे विशेषमाह— चलामित्रादिति। अस्थिराद् दुर्गादिरहितादमित्राद्, भूमिलाभे, तुल्य इत्यनुवर्तते, शक्यसामन्ततो विशेषः दुर्बलसामन्तत्वतो विशेषः भूमेर्दुर्बलसामन्तत्वकृतो विशेषलाभः प्रबलसामन्ताया भूमेर्ग्राहकमपेक्ष्य दुर्बलसामन्ताया भूमेर्ग्राहको विशिष्यत इत्यर्थः। कुत इत्याह— दुर्बलसामन्ता हीति। तथाभूता हि, भूमिः, क्षिप्राप्यायनयोगक्षेमा अलब्धलाभो योगः लब्धपालनं क्षेमः तौ क्षिप्राप्यायनौ शीघ्रवर्धनौ यस्याः सा तथाभूता भवति। बलवत्सामन्ता प्रबलशत्रुका भूमिः, विपरीता चिराप्यायनयोगक्षेमा, कोशदण्डावच्छेदनी च कोशं दण्डं च अवच्छिनत्ति सामन्तबाधपरिहारार्थविनियोगवशात् क्षपयतीति तथाभूता च, भवति।

सम्पन्नभूम्यरियुक्तभूम्योः कतरस्याः श्रेष्ठत्वमिति विचारयति—सम्पन्नेत्यादि। भूमिसम्पद्युक्ता यद्यपि, तथापि नित्यामित्रा काचिद् भूमिः। सा वा श्रेयसी अल्पगुणयुक्ता कादाचित्कामित्रा भूमिर्वा श्रेयसीति विचारे, आचार्यमतमाह— सम्पन्ना नित्यामित्रा श्रेयसीत्यादि। तौ सम्पन्नभूमिसम्पादितौ कोशदण्डौ। नित्यामित्रत्वमनुपदं वक्ष्यते।

स्वमतमाह—नेति कौटल्य इति। नित्यामित्रालाभ इति। नित्यामित्राया लाभे, भूयान् बहुतरः, शत्रुलाभो भवति। नित्यश्च शत्रुः, उपकृते

कारादनपकाराद्वा शाम्यति। यस्या हि भूमेर्बहुदुर्गाश्चोरगणैर्म्लेच्छाटवीभिर्वा नित्याविरहिताः प्रत्यन्ताः, सा नित्यामित्रा। विपर्यये त्वनित्यामित्रेति।

अल्पा प्रत्यासन्ना महती व्यवहिता वा भूमिरिति। अल्पा प्रत्यासन्ना श्रेयसी। सुखा हि प्राप्तुं पालयितुमभिसारयितुं च भवति। विपरीता व्यवहिता।

व्यवहिताव्यवहितयोरपि दण्डधारणात्मधारणा वा भूमिरिति। आत्मधारणा श्रेयसी। सा हि स्वसमुत्थाभ्यां कोशदण्डाभ्यां धार्यते। विपरीता दण्डधारणा दण्डस्थानमिति।

च अपकृते च उपकारे अपकारे च कृते, शत्रुरेव भवति न तु शत्रुत्वं सहजं जातुचिद् जहाति। अतश्चामित्रवती भूमिर्नोपादेयेत्यर्थः। अनित्यशत्रुकाया भूमेरुपादेयत्वे कारणमाह — अनित्यस्त्वित्यादि। शाम्यति शान्तो भवति, न त्वपकरोतीत्यर्थः। नित्यामित्रानित्यामित्रत्वे लक्षयति — यस्या हीत्यादि। यस्याः भूमेः, प्रत्यन्ताः विषयान्ताः, बहुदुर्गाः वध्यापसरणस्थानबहुलाः, चोरगणैः म्लेच्छाटवीभिर्वा नित्याविरहिताः नित्यसंयुक्ताः, सा भूमिः, नित्यामित्रा। विपर्यये तु अनित्यामित्रा।

लभ्यभूमेः स्वभूम्यासन्नत्वमहत्त्वयोः किं श्रेय इति विचारयति — अल्पेत्यादि। अल्पा प्रत्यासन्ना श्रेयसीत्यत्र हेतुमाह — सुखा हीत्यादि। गन्तुं रक्षितुं विपदवसरेष्वपसरणस्थानीकर्तुं चानायासशक्येत्यर्थः। व्यवहिता विप्रकृष्टा, विपरीता प्राप्त्यादौ न सुखा।

विप्रकृष्टप्रत्यासन्नयोरपि विषये दण्डधारणा वा भूमिः श्रेयसी आत्मधारणा वेति विचारो भवतीत्याह — व्यवहिताव्यवहितयोरपीत्यादि। निर्णयमाह — आत्मधारणा श्रेयसीति। कुत इत्याह — सा हीत्यादि। आत्मोत्थिताभ्यां कोशदण्डाभ्यामात्मनो धारणं भरणं यस्याः सात्मधारणेत्यन्वितार्था सेत्यर्थः। विपरीतेत्यादि। दण्डधारणा, विपरीता स्वसमुत्थाभ्यां कोशदण्डाभ्यां न धार्यते, किन्तु परसमुत्थाभ्यामेव कोशदण्डाभ्यां धार्यते, अत एव दण्डस्य परसमुत्थस्य स्वरक्षणार्थं वसतः केवलस्थानभूतेत्येतावता दण्डधारणेत्युच्यत इत्यर्थः।

बालिशात् प्राज्ञाद् वा भूमिलाभ इति । बालिशाद् भूमिलाभः श्रेयान् । सुप्राप्यानुपाल्या हि भवत्यप्रत्यादेया च । विपरीता प्राज्ञादनुरक्तेति ।

पीडनीयोच्छेदनीययोरुच्छेदनीयाद् भूमिलाभः श्रेयान् । उच्छेदनीयो ह्यनपाश्रयो दुर्बलापाश्रयो वाभियुक्तः कोशदण्डावादायापसर्तुकामः प्रकृतिभिस्त्यज्यते । न पीडनीयो दुर्गमित्रप्रतिस्तब्ध इति ।

दुर्गप्रतिस्तब्धयोरपि स्थलनदीदुर्गीयाभ्यां स्थलदुर्गीयाद् भूमिलाभः श्रेयान् । स्थलीयं हि सुरोधावमर्दावस्कन्दमनिःस्राविशत्रु च । नदीदुर्गं तु द्विगुणक्लेशकरमुदकं च पातव्यं वृत्तिकरं चामित्रस्य ।

अरेर्मूर्खाद् वा भवन् भूमिलाभः श्रेयान् पण्डिताद् वा भवन्निति विमर्शे स मूर्खादेव भवन् श्रेयान्, यतो भूमिर्मूर्खात् सुखेन प्राप्तुं चानुपालयितुं च शक्या अनाशङ्कनीयप्रत्यादाना च, पण्डितात् तु भूमिरनुरक्तप्रकृतितया न सुखप्राप्या प्राप्तापि न सुखरक्ष्या रक्ष्यमाणापि नित्यशङ्कयमानप्रत्यादानेति विपरीतेत्याह — **बालिशात् प्राज्ञाद्वेत्यादि** ।

अरिर्हि कश्चित् शत्र्वादिद्वारेण पीडनीयः कश्चिच्च स्थानीयादुच्छेत्तव्यः । तयोर्मध्ये कतरस्माद् भूमिलाभः श्रेयानिति विचारे उच्छेत्तव्याद् भूमिलाभः श्रेयान्, कुतः, यस्मात् स दुर्गमित्रापाश्रयरहितः दुर्बलदुर्गमित्राश्रयो वा सन् कोशदण्डावादाय स्थानीयादपसर्तुमेव यतत इति तं प्रकृतयः परित्यजन्ति, पीडनीयस्तु अपसर्तुमिच्छन्नपि दुर्गमित्राभ्यां वारयित्वा स्थापितो भवतीत्यतस्तं प्रकृतयो न परित्यजन्तीत्याह — **पीडनीयोच्छेदनीययोरित्यादि** ।

दुर्गकृतरक्षयोर्द्वयोर्मध्ये स्थलदुर्गीय एकः नदीदुर्गीयोऽपरः । तयोः सकाशाद् भूमिलाभश्रेयस्त्वविचारे स्थलदुर्गीयाद् भूमिलाभः श्रेयान्, कस्मात्, स्थलभवं हि दुर्गं सुखेन रोद्धुमवमर्दयितुम् अवस्कन्दितुं च शक्यं शत्रुनिस्सरणसौकर्याप्रदायकं च सुखोच्छेद्यमिति ततो भूमिः सुखलभ्या । नदीदुर्गं तु द्विगुणक्लेशसाधनीयं पानार्हजलवत्तया जलाधीनधान्यफलवृक्षलतादिसम्पद्योगेन च शत्रोः सुखोपजीव्यं च दुरुच्छेदमिति ततो भूमिर्न सुखलभ्येत्याह — **दुर्गप्रतिस्तब्धयोरपीत्यादि** ।

नदीपर्वतदुर्गीयाभ्यां नदीदुर्गीयाद् भूमिलाभः श्रेयान् । नदीदुर्गं हि हस्तिस्तम्भसङ्क्रमसेतुबन्धनौभिः साध्यमनित्यगाम्भीर्यमवस्राव्युदकं च, पार्वतं तु स्वारक्षं दुरुपरोधि कृच्छ्रारोहणं भग्ने चैकस्मिन् न सर्ववधः, शिलावृक्षप्रमोक्षश्च महापकारिणाम् ।

निम्नस्थलयोधिभ्यो निम्नयोधिभ्यो भूलाभः श्रेयान् । निम्नयोधिनो ह्युपरुद्धदेशकालाः, स्थलयोधिनस्तु सर्वदेशकालयोधिनः ।

खनकाकाशयोधिभ्यः खनकेभ्यो भूमिलाभः श्रेयान् । खनका हि खातेन शस्त्रेण चोभयथा युध्यन्ते, शस्त्रेणैवाकाशयोधिनः ।

नदीदुर्गीयपर्वतदुर्गीयाभ्यां शत्रुभ्यां भूमिलाभश्रेयस्त्वविचारणायां नदीदुर्गीयाद् भूमिलाभः श्रेयान्, कुतः, नदीदुर्गं हि गजैर्दारुस्तम्भारब्धैः सङ्क्रमैः सेतुबन्धैर्नौभिश्च तार्यम् अस्थिरगाम्भीर्यं तटभेदापसृतजलं च सुखसाध्यं भवति' पार्वतं तु दुर्गं सुष्ठुशिलाबन्धादिकृतपरिरक्षं दुष्करोपरोधम् अशक्यारोहणं भवति । किञ्चास्मिन्नेकेनास्त्रेणैक एव हन्तुं शक्यो न बहवः, महापकारिणामुपरि च शिलावृक्षादेराधित्यकातः पातनेन प्रतीकारः सुकर इति तत् कृच्छ्रसाधनीयं भवतीत्याह — **नदीपर्वतदुर्गीयाभ्यामित्यादि** ।

निम्ने स्थित्वा नावाद्यारूढयोद्धारः केचित्, स्थलयोधिनः केचित् । तेभ्य उभयेभ्यो भूमिलाभश्रेयस्त्वचिन्तायां निम्नयोधिभ्यो भूमिलाभ एव श्रेयान्, कुतः, यस्मात् निम्नयोधिनो हि अवच्छिन्नदेशकालयोधित्वात् सुसाधाः, इतरे तु अनवच्छिन्नदेशकालयोधित्वाद् दुस्साधा इत्याह — **निम्नस्थलयोधिभ्य इत्यादि** ।

भूमिं खात्वा तत्र स्थिता ये युध्यन्ते ते खनकयोधिनः, अनावृतेऽवकाशे स्थित्वा युध्यमाना आकाशयोधिनः । तेभ्य उभयेभ्यो भूमिलाभश्रेयस्त्वसम्प्रधारणायां खनकयोधिभ्यो भूलाभः श्रेयान्, कस्मात्, ते हि खातशस्त्रोभयसापेक्षतयोपरुद्धदेशकालयोधिनः खातालाभावसरे सुखेन साध्या भवन्ति । आकाशयोधिनस्तु देशकालोपरोधाभावात् सदा सर्वत्र युध्यन्त इति दुस्साधा इत्याह — **खनकाकाशयोधिभ्य इत्यादि** ।

एवंविधेभ्यः पृथिवीं लभमानोऽर्थशास्त्रवित् ।
संहितेभ्यः परेभ्यश्च विशेषमधिगच्छति ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे दशमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ भूमिसन्धिः,
आदितोऽष्टशततमः ॥

अध्यायं श्लोकेनोपसंहरति — **एवंविधेभ्य** इति । 'यो बलवन्तमाक्रम्य भूमिमवाप्नोति सोऽतिसन्धत्ते' इत्यादिनोक्तप्रकारेभ्यो बलवदादिभ्यः खनकान्तेभ्यः, पृथिवीं लभमानः, अर्थशास्त्रवित्, संहितेभ्यः पणितेभ्यः सामवायिकेभ्यः, परेभ्यश्च शत्रुभ्यश्च, विशेषम् उत्कर्षम्, अधिगच्छति, अर्थाद् विजिगीषुः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे दशमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ भूमिसन्धिः,
आदितोऽष्टोत्तरशततमः ॥

---

११६. प्रक.—अनवसितसन्धिः।

'त्वं चाहं च शून्यं निवेशयावह' इत्यनवसितसन्धिः।

तयोर्यः प्रत्युपस्थितार्थो यथोक्तगुणां भूमिं निवेशयति सोऽतिसन्धत्ते।

तत्रापि स्थलमौदकं वेति। महतः स्थलादल्पमौदकं श्रेयः सातत्यादवस्थितत्वाच्च फलानाम्।

स्थलयोरपि प्रभूतपूर्वापरसस्यमल्पवर्षपाकमसक्तारम्भं श्रेयः।

औदकयोरपि धान्यवापमधान्यवापाच्छ्रेयः। तयोरल्पबहुत्वे

भूमेः पणितव्याया विशेषानभिधाय शून्यनिवेशनरूपे तदीयकर्मणि अनवसितसन्धय इह निरूप्यन्ते। शून्यनिवेशनं जनपदखनिद्रव्यवनहस्तिवनादिनिवेशनविशेषरूपतया वस्तुतः पर्यवस्यदपि सामान्यरूपेणैवेहोल्लिख्यमानमनध्यवसितविशेषरूपत्वादनवसितं कर्मेति तद्विषयाः सन्धयोऽनवसितसन्धय उच्यन्ते। अत एवास्माद् अवसितविषयस्य कर्मसन्धेर्वक्ष्यमाणस्य भेदो द्रष्टव्यः।

त्वं चाहं चेत्यादि। शून्यं निवेशयावहे जनपदादिनिवेशनेनाशून्यं कुर्वहे। अनवसितसन्धिरिति। समसन्धिश्चायमुभयोः समानत्वात्।

तत्रातिसन्धिमाह — तयोरित्यादि। संहितयोर्मध्ये, यः सन्निहितसामग्रीको जनपदनिवेशोक्तगुणसम्पन्नां भूमिं निवेशयति, सः अतिसन्धत्ते विशेषलाभं भजते, अतथाविधभूमिनिवेशकापेक्षयेत्यर्थः।

यथोक्तगुणायामपि विशेषं चिन्तयति—**तत्रापि स्थलमौदकं वेति।** स्थलं वृष्टिमात्रलभ्यजलम्, औदकं सदाजलसरोयुतं नदीयुक्तं च। विपुलात् स्थलाद् अल्पमौदकं प्रशस्ततरं, कस्मात्, सर्वकालोत्पाद्यफलोदयत्वात् सुनिश्चितफलोत्पत्तिकत्वाच्चेत्याह — **महतः स्थलादित्यादि।**

स्थलयोरपि मध्ये प्राज्यशारदिकग्रैष्मिकलक्षणपूर्वापरसस्यप्रसवम् अल्पवृष्टिनिष्पाद्यफलं दन्तुरत्वशर्करिलत्वादिरहिततया निरुपरोधकर्षणारम्भं स्थलं श्रेय इत्याह — **स्थलयोरपीत्यादि।**

औदकत्वेऽपि विशेषमवधारयति — **औदकयोरपीति।** तयोरपि मध्ये, धान्यवापं धान्यानि व्रीहिशाल्यादीन्युप्यन्तेऽत्रेति तथाभूतम्, अधान्यवापात् श्रेयः। **तयोरिति।** धान्यवापाधान्यवापयोरौदकयोः, अल्पबहुत्वे

धान्यकान्तादल्पान्महदधान्यकान्तं श्रेयः । महत्यवकाशे हि स्थाल्या-श्चानूप्याश्चौषधयो भवन्ति । दुर्गादीनि च कर्माणि प्राभूत्येन क्रियन्ते । कृत्रिमा हि भूमिगुणाः ।

खनिधान्यभोगयोः खनिभोगः कोशकरः, धान्यभोगः कोश-कोष्ठागारकरः । धान्यमूला हि दुर्गादीनां कर्मणामारम्भाः । महा-विषयविक्रयो वा खनिभोगः श्रेयान् ।

'द्रव्यहस्तिवनभोगयोर्द्रव्यवनभोगः सर्वकर्मणां योनिः प्रभूत-निधानक्षमश्च । विपरीतो हस्तिवनभोगः' इत्याचार्याः ।

नेति कौटल्यः । शक्यं द्रव्यवनमनेकमनेकस्यां भूमौ वापयितुं न हस्तिवनं, हस्तिप्रधानो हि परानीकवध इति ।

अल्पत्वे बहुत्वे च, विमृश्यमाने इति शेषः । धान्यकान्तात् धान्येन कमनी-याद् धान्यवापादित्यर्थः, अल्पाद्, महद् अधान्यकान्तं, श्रेयः । कस्मात्, हि यतः, महति अवकाशे, स्थाल्याः स्थलजाः, आनूप्याः जलप्रायदेशजाः षष्टि-कादयश्च, ओषधयः, भवन्ति । महत्त्वे गुणान्तरमप्याह — **दुर्गादीनि चे-त्यादि** । प्राभूत्येन प्राचुर्येण । धान्यकान्तत्वमपि तत्र सम्पादयितुं शक्यं भूमि-गुणानां क्रियासाध्यत्वादित्यभिप्रायेणाह — **कृत्रिमा हि भूमिगुणा इति** ।

खनिधान्यभोगयोरिति । विशेषो विमृश्यत इति शेषः । खनि-भोगः कोशकरः कोशमात्रहेतुः, धान्यभोगः कोशकोष्ठागारकरः कोशस्य कोष्ठागारस्य च धान्यनिधानस्थानभूतस्य कारकः । अतश्च धान्यभोगः श्रे-यानित्यर्थः । दुर्गसेतुवणिक्पथादिकर्मान्तरोपयोगी च धान्यभोग इत्यभिप्रा-येणाह — **धान्यमूला हीत्यादि** । धान्यभोगं खनिभोगविशेषेण विकल्प-यति — **महाविषयविक्रय इति** । महान्तः क्रेतृबहुत्वेन बहवः विषयविक्रयाः खन्युत्पन्नानां भोगविषयभूतानां लवणजातीयानां विक्रयाः यस्मिन् स तथा-भूतः, खनिभोगो वा श्रेयान् ।

द्रव्यहस्तिवनभोगयोरिति । तयोर्विशेषचिन्तायां, द्रव्यवनभोगः, सर्वकर्मणां योनिः साधकः, प्रभूतनिधानक्षमः प्रचुरसञ्चयार्हश्च । हास्तिवन-भोगः, विपरीतः अतथाभूतः । ततश्च स एव हस्तिवनभोगात् श्रेयानित्यर्थः । इत्याचार्याः ।

स्वमतमाह — **नेति कौटल्य इत्यादि** । द्रव्यवनमनेकासु भूमिष्वने-कप्रकारमुत्पादयितुं शक्यं, न तु हस्तिवनं हस्तिनां क्वचित् क्वचिदेवोत्पत्तेः ।

वारिस्थलपथभोगयोरनित्यो वारिपथभोगः, नित्यः स्थलपथभोग इति।

भिन्नमनुष्या श्रेणीमनुष्या वा भूमिरिति। भिन्नमनुष्या श्रेयसी। भिन्नमनुष्या भोग्या भवत्यनुपजाप्या चान्येषाम्। अनापत्सहा तु। विपरीता श्रेणीमनुष्या कोपे महादोषा।

तस्यां चातुर्वर्ण्याभिनिवेशे सर्वभोगसहत्वादवरवर्णप्राया श्रेयसी। बाहुल्याद् ध्रुवत्वाच्च कृष्याः कर्षणवती। कृष्याश्चान्येषां चारम्भाणां प्रयोजकत्वाद् गोरक्षकवती। पण्यनिचयर्णानुग्रहादाढ्यवणिग्वती।

मुख्ये च शत्रुसैन्यवधलक्षण उपकारे हस्ती प्रधानं साधनमित्यतो हस्तिवनभोग एव श्रेयान् द्रव्यवनभोगादित्यर्थः।

वारिस्थलपथभोगयोरिति। वारिपथभोगस्थलपथभोगयोः, अनित्ययोरित्यार्थम्, अनित्यः कादाचित्कः, वारिपथभोगः, श्रेयानिति शेषः। तयोरेव नित्ययोर्मध्ये श्रेयांसमाह — **नित्यः स्थलपथभोग इति।**

असंहतमनुष्यायाः संहतमनुष्यायाश्चेत्यनयोर्भूम्योर्मध्ये का श्रेयसीति विचारे पूर्वा श्रेयसीत्याह— **भिन्नमनुष्या श्रेणीमनुष्या वेत्यादि।** श्रेयस्त्वे कारणमाह — **भिन्नमनुष्येति।** सा, भोग्या स्वविधेया, अन्येषाम् अनुपजाप्या च अभेद्या च, भवति। सर्वेष्वसंहतेषु कः कमुपजपिष्यतीति भावः। अनापत्सहा तु किन्तु सा आपदं न सहते आपत्समये पर्यवस्थापकाभावेन क्लिश्यत इत्यर्थः। श्रेणीमनुष्या श्रेणी संहतत्वं प्राप्ता मनुष्या यस्यां सा तथाभूता भूमिः, विपरीता अविधेया अन्योपजाप्या आपत्सहा च। **कोपे महादोषेति।** सा चेत् कुपिता राजानमप्युच्छिन्द्यादित्यर्थः।

तस्यामिति। भूमौ, चातुर्वर्ण्याभिनिवेशे तद्विषयश्रेयस्त्वविचारे, सर्वभोगसहत्वात् कर्षणभारवहनादिसर्वकर्मविनियोगक्षमत्वात्, अवरवर्णप्राया अवरवर्णग्रहणस्योपलक्षणत्वात् शूद्रगोपालकादिबहुला, भूमिः श्रेयसी। तस्याश्च कर्षणवत्त्वे गोरक्षकवत्त्वे वणिग्वत्त्वे च प्राशस्त्यं सहेतुकं क्रमेणाह — **बाहुल्यादिति।** कृष्याः, बाहुल्यात् सार्वत्रिकत्वेन प्रचुरत्वाद्, ध्रुवत्वाच्च निश्चितफलोदयत्वाच्च, कर्षणवती भूमिः, श्रेयसी। कृष्याः कृषिव्यापारस्य अन्येषां भारवहनादिकर्मणां च गावो गोपालाश्च प्रयोजका इत्यतो गोरक्षकवती भूमि

भूमिगुणानामपाश्रयः श्रेयान् ।

दुर्गापाश्रया पुरुषापाश्रया वा भूमिरिति । पुरुषापाश्रया श्रेयसी । पुरुषवद्धि राज्यम् । अपुरुषा गौर्वन्ध्येव किं दुहीत ।

महाक्षयव्ययनिवेशां तु भूमिमवाप्तुकामः पूर्वमेव क्रेतारं पणेत । दुर्बलमराजबीजिनं निरुत्साहमपक्षमन्यायवृत्तिं व्यसनिनं दैवप्रमाणं यत्किञ्चनकारिणं वा ।

महाक्षयव्ययानिवेशायां हि भूमौ दुर्बलो राजबीजी निविष्टः सगन्धाभिः प्रकृतिभिः सह क्षयव्ययेनावसीदति ।

बलवानराजबीजी क्षयव्ययभयादसगन्धाभिः प्रकृतिभिस्त्यज्यते ।

श्रेयसीत्याह — कृष्या इत्यादि । पण्यनिचयर्णानुग्रहादिति । पण्यनिचयेन पणनीयधान्यादिसञ्चयेन ऋणेन वृद्ध्यर्थद्रव्यदानेन च अनुग्रहाद् वणिग्भ्यो धनिकेभ्यश्चोपकारलाभात्, आढ्यवणिग्वती धनिकवाणिजवती भूमिः, श्रेयसी ।

अनित्यामित्रत्वसम्पन्नत्वादिषु भूमेर्गुणेषु मध्ये कः श्रेयानित्याह — भूमिगुणानामिति । तेषां मध्ये, अपाश्रयः श्रेयान् रक्षा श्रेयसी ।

अपाश्रयेषु विशेषं चिन्तयति — दुर्गापाश्रयेत्यादि । पुरुषारक्षायाः श्रेयस्त्वे कारणमाह — पुरुषवद्धीत्यादि । पुरुषवत् बहुलपुरुषयोगि । किं दुहीत आरम्भकपुरुषाभावान्न किमपि फलं प्रसुवीत ।

भूमेर्निवेशने शत्रुविजिगीष्वोरतिसन्धिभेदमाह — महाक्षयव्ययनिवेशां त्विति । महता युग्यपुरुषाद्यपचयेन धनव्ययेन च साधनीयजनपदादिनिवेशनां, भूमिम्, अवाप्तुकामः, पूर्वमेव अवाप्तेः प्रागेव, क्रेतारं पणेत । कथम्भूतं, दुर्बलादीनामष्टानामन्यतमम् । ते हि महता यत्नेन क्षयव्ययादिना भूमिं निवेश्य पश्चादात्महस्तमेवातिक्षयव्ययावसन्नाः प्रापयेयुरिति तत्पणनोपदेशः । स चायं विजिगीषोर्दुर्बलादिप्रयत्नसम्पादितनिवेशाया भूमेर्भोगो महाक्षयव्ययस्वप्रयत्ननिवेशितभूमेः शत्रोर्भूमिभोगाद् विशेषलाभो भवतीत्यतिसन्धिर्वेदितव्यः ।

दुर्बलादयः पणिताः कथमवसीदन्ति, तत्राह— महाक्षयव्ययनिवेशायां हीत्यादि । राजबीजी राजवंश्यः । निविष्टः कृतनिवेशनः । सगन्धाभिः समानजातीयाभिः साह्यदायिनीभिः ।

बलवन्तमप्यराजबीजिनं सगन्धत्वाभावात् प्रकृतयः साहाय्यदानेन नानुगृह्णन्ति किन्तु क्षयव्ययभयात् परित्यजन्तीत्याह— बलवानित्यादि ।

निरुत्साहस्तु दण्डवानपि दण्डस्याप्रणेता सदण्डः क्षयव्ययेनावभज्यते।

कोशवानप्यपक्षः क्षयव्ययानुग्रहहीनत्वान्न कुतश्चित् प्राप्नोति।

अन्यायवृत्तिर्निविष्टमप्युत्थापयेत्, स कथमनिविष्टं निवेशयेत्।

तेन व्यसनी व्याख्यातः।

दैवप्रमाणो मानुषहीनो निरारम्भो विपन्नकर्मारम्भो वावसीदति।

यत्किञ्चनकारी न किञ्चिदासादयति। स चैषां पापिष्ठतमो भवति।

'यत्किञ्चिदारभमाणो हि विजिगीषोः कदाचिच्छिद्रमासादयेद्' इत्याचार्याः।

निरुत्साहं प्रत्याह — निरुत्साहस्त्विति। सः, दण्डवानपि बलवानपि, दण्डस्याप्रणेता दण्डं यथास्थानमविनियोक्ता, सदण्डः दण्डेन सहेत्यर्थः, क्षयव्ययेन अवभज्यते भग्नकार्यो भवति।

मित्ररहितः कोशवानपि क्षयव्ययोपकारालाभान्न कुतोऽपि सिद्धिमेतीत्याह — कोशवानपीत्यादि।

अन्यायवृत्तिः प्राक्कृतनिवेशमप्युद्वासयेदन्यायशीलत्वेनैव हेतुना। कथं तस्मादनिविष्टनवनिवेशप्रत्याशेत्याह — अन्यायवृत्तिरित्यादि।

तेन व्यसनी व्याख्यात इति। व्यसनिनि व्यसनित्वादेवानिविष्टनिवेशनमसम्भावनीयमित्यर्थः।

दैवप्रमाण इत्यादि। दैवप्रमाणो यद्भविष्यः। मानुषहीनः पुरुषकाररहितः।

यत्किञ्चनकारीत्यादि। 'इदमेवं कर्तव्यम् एवं कृते इदं सेत्स्यती'त्यादिविमर्शविकलं यत्किञ्चित् कुर्वाणो यत्किञ्चनकारी। एषां दुर्बलादीनां मध्ये।

यत्किञ्चनकारिण्यपि कमपि गुणमाचार्यमतेनाह — यत्किञ्चिदित्यादि। अयमभिप्रायः — यत्किञ्चिदारभमाणो हि शत्रुर्विजिगीषुणा 'मूर्खोऽयमि'त्यवज्ञायमानस्तस्यात्मानं प्रत्यप्रतिजागरचेष्टितस्य कदाचित् प्रहारस्थानमुपलभेतेति।

'यथा छिद्रं तथा विनाशमभ्यासादयेद्' इति कौटल्यः ।

तेषामलाभे यथा पार्ष्णिग्राहोपग्रहे वक्ष्यामस्तथा भूमिमवस्थापयेत् । इत्यभिहितसन्धिः ।

गुणवतीमादेयां वा भूमिं बलवता क्रयेण याचितः सन्धिमवस्थाप्य दद्यात् । इत्यनिभृतसन्धिः ।

समेन वा याचितः कारणमवेक्ष्य दद्यात्—'प्रत्यादेया मे भूमिर्वश्या वा, अनया प्रतिबद्धः परो मे वश्यो भविष्यति, भूमिविक्रयाद् वा मित्रहिरण्यलाभः कार्यसामर्थ्यकरो मे भविष्यति' इति ।

तेन हीनः क्रेता व्याख्यातः ।

स्वमतमाह— यथा छिद्रमिति । विनाशमभ्यासादयेदिति । आत्मच्छिद्रस्य विजिगीषुणा बहुशो लाभादिति भावः ।

उक्तदुर्बलाद्यलाभे पार्ष्णिग्राहचिन्तावक्ष्यमाणरीत्यातिसन्धिरेषितव्य इत्याह — तेषामलाभ इत्यादि । पार्ष्णिग्राहयोर्हि मिथोऽतिसन्धिः शङ्कितानर्थपरिहारादिलक्षणस्तत्रोक्तः । तथाविधं यंकमपि परापेक्षया विशेषलाभं पुरस्कृत्य भूमिं निवेशयेदित्यर्थः । इत्यभिहितसन्धिरिति । अभिहितो बद्धः भूमिदानादाननिर्वृत्तत्वादविचाल्यः सन्धिरित्यर्थः ।

अतथाभूतं सन्धिमाह — गुणवतीमिति । सम्पन्नत्वानित्यामित्रत्वादिगुणयुक्ताम्, अन्याशक्यभोगतायामाह — आदेयां वा क्रेतुरपेक्षया कालान्तरे पुनः प्रत्यादानयोग्यां वा, भूमिं, बलवता प्रबलेन सामन्तेन, क्रयेण याचितः 'मह्यं विक्रीणीष्वे'ति प्रार्थितः, सन्धिम् अवस्थाप्य 'समयेषु मामनुगृह्णाणे'त्येवं सामान्यतः सन्धिं स्थापयित्वा, दद्यात् विक्रीणीत । इत्यनिभृतसन्धिरिति । इत्ययम् अविश्वस्तसन्धिः, दुर्बलं प्रति प्रबलस्य समयलङ्घनसम्भवादिति भावः ।

समेन यथोक्तभूमिप्रार्थने विधिमाह — समेन वा याचित इत्यादि । यथोक्तां भूमिं समेन प्रार्थितः, तस्याः शक्यप्रत्यादानतां वा, आत्मोपभोग्यतां वा, तत्सम्बन्धात् परस्यात्मवशे वर्तिष्यमाणतां वा, तद्विक्रयवशान्मित्रलाभहिरण्यलाभयोः कार्यसाधनक्षमयोर्भविष्यत्तां वा कारणं विमृश्य तदवधारणे विक्रीणीयादित्यर्थः ।

समविधिं हीनेऽप्यतिदिशति — तेनेत्यादि ।

एवं मित्रं हिरण्यं च सजनामजनां च गाम् ।
लभमानोऽतिसन्धत्ते शास्त्रवित् सामवायिकान् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे एकादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ अनवसितसन्धिः,
आदितो नवशततमः ॥

एवमिति । उक्तेन प्रकारेण, मित्रं नित्यत्ववश्यत्वादिविशेषयुक्तं, हिरण्यं च प्रार्थितार्थत्वादिभेदभिन्नं, सजनाम् अजनाम्, एतच्च सम्पन्नत्वादेरुपलक्षणम् । गां च भूमिं च, लभमानः, शास्त्रवित् अर्थशास्त्रज्ञः, सामवायिकान् अतिसन्धत्ते सामवायिकान्तरापेक्षया विशेषलाभं प्राप्नोति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे एकादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ अनवसितसन्धिः,
आदितो नवोत्तरशततमः ॥

११६. प्रक. — कर्मसन्धिः ।

'त्वं चाहं च दुर्गं कारयावहे' इति कर्मसन्धिः ।

तयोर्यो दैवकृतमविषह्यमल्पव्ययारम्भं दुर्गं कारयति सोऽतिसन्धत्ते ।

तत्रापि स्थलनदीपर्वतदुर्गाणामुत्तरोत्तरं श्रेयः ।

सेतुबन्धयोरप्याहार्योदकात् सहोदकः श्रेयान् । सहोदकयोरपि प्रभूतवापस्थानः श्रेयान् ।

द्रव्यवनयोरपि यो महत् सारवद्द्रव्याटवीकं विषयान्ते नदीमातृकं द्रव्यवनं छेदयति, सोऽतिसन्धत्ते । नदीमातृकं हि स्वाजीवमपाश्रयश्चापदि भवति ।

अथ कर्मसन्धिं निरूपयिष्यंस्तल्लक्षणमाह — त्वं चाहं चेत्यादि । दुर्गग्रहणं सेतुबन्धादेरप्युपलक्षणम् । 'दुर्गाद्यन्यतममावां कारयावहे' इति संविदा क्रियमाणः सन्धिः कर्मसन्धिः ।

तत्र दुर्गसन्धावतिसन्धिमाह — तयोर्य इत्यादि । सहितयोर्मध्ये, यः, दैवकृतं स्वभावविषमस्थलम्, अत एव अविषह्यं शत्रुदुर्विषहम्, अल्पव्ययारम्भम् अल्पव्ययसाध्यनिष्पादं, दुर्गं कारयति, सः, अतिसन्धत्ते अर्थादुक्तविपरीतदुर्गकारकमन्यं लाभतोऽतिशेते ।

दैवकृतदुर्गभेदेष्वपि श्रेयस्त्वमवधारयति — तत्रापीत्यादि ।

सेतुबन्धतारतम्ये श्रेयस्त्वमाह — सेतुबन्धयोरपीत्यादि । तयोरपि, आहार्योदकात् वर्षासु प्रयत्नविधारणीयजलात्, सहोदकः सहजतोयः, श्रेयान् । सहोदकयोरपि मध्ये, प्रभूतवापस्थानः प्रचुरसस्यवापयोग्यप्रदेशोपेतः सहोदकः, श्रेयान् ।

द्रव्यवनविषयमतिसन्धिमाह — द्रव्यवनयोरपीति । तयोर्मध्ये, यः, महत् विस्तीर्णं, सारवद्द्रव्याटवीकं प्रभूतफलप्रसवयोग्यता सारः सारवती द्रव्याटवी द्रव्योत्पत्तिभूमिर्यस्मिंस्तत् तथाभूतं, विषयान्ते स्वीयजनपदप्रत्यन्ते, नदीमातृकं नदीपायनीयजलं, द्रव्यवनं छेदयति अद्रव्यच्छेदनेन सम्पादयति, सः, अतिसन्धत्ते अनदीमातृकद्रव्यवनच्छेदकापेक्षया विशेषलाभं प्राप्नोति । कुतः, हि यतः, नदीमातृकं, स्वाजीवं सुखोपजीव्यम्, आपदि दुर्भिक्षे, अपाश्रयश्च रक्षास्थानं च, भवति ।

हस्तिवनयोरपि यो बहुशूरमृगं दुर्बलप्रतिवेशमनन्तावक्लेशि विषयान्ते हस्तिवनं बध्नाति, सोऽतिसन्धत्ते ।

तत्रापि 'बहुकुण्ठाल्पशूरयोरल्पशूरं श्रेयः । शूरेषु हि युद्धम् । अल्पाः शूरा बहूनशूरान् भञ्जन्ति, ते भग्नाः स्वसैन्यावघातिनो भवन्ति' इत्याचार्याः ।

नेति कौटल्यः । कुण्ठा बहवः श्रेयांसः, स्कन्धविनियोगादनेकं कर्म कुर्वाणाः स्वेषामपाश्रया युद्धे, परेषां दुर्धर्षा विभीषणाश्च । बहुषु हि कुण्ठेषु विनयकर्मणा शक्यं शौर्यमाधातुं, न त्वेवाल्पेषु शूरेषु बहुत्वमिति ।

खन्योरपि यः प्रभूतसारामदुर्गमार्गामल्पव्ययारम्भां खनिं खानयति, सोऽतिसन्धत्ते ।

हस्तिवनविषयमतिसन्धिमाह—हस्तिवनयोरपीति । तयोरपि मध्ये, यः, बहुशूरमृगं, दुर्बलप्रतिवेशं दुर्बलाः नियतनिवासस्थानापेक्षया निहीनवाससौकर्याः प्रतिवेशा वनैकदेशा यस्मिंस्तत् तथाभूतम्, अनन्तावक्लेशि अनन्तैः अवक्लेशैः प्रवेशनिर्गमादिविषयैरुपेतं, हस्तिवनं, विषयान्ते प्रत्यन्ते, बध्नाति निवेशयति, सः, अतिसन्धत्ते, अर्थादुक्तविपरीतहस्तिवननिवेशिनम् ।

यथोक्तगुणेऽपि हस्तिवने विशेषावधारणमाचार्यमतेनाह — तत्रापीति । बहुकुण्ठाल्पशूरयोः बहुशूराल्पशूरयोर्हस्तिवनयोर्मध्ये, अल्पशूरं श्रेयः। कुतः, हि यतः, शूरेषु युद्धं शूरेष्वेव हस्तिष्वायत्तं युद्धं, कुण्ठास्तु युद्धानुपयोगिन इत्यर्थः । शूराशूरैरुपकारापकारौ दर्शयति—अल्पाः शूरा इत्यादि । ते अशूराः । स्वसैन्यावघातिनः अकुतोमुखपलायनावसरे स्वीयमपि सैन्यमवमृद्नन्तीति भावः ।

स्वमतमाह—नेति कौटल्य इत्यादि । स्कन्धविनियोगात् सैन्यसमुदाये विनियोगात् । कर्म उपकरणनयनानयनादिकम् । स्वेषाम् अपाश्रयाः स्वीयानामुपकारकाः । परेषां दुर्धर्षा विभीषणाश्च स्वबहुत्वमात्रेण दृष्टेन शत्रूणां भीतिजनकाः अत एव धर्षयितुमशक्याश्च । यश्च शौर्यगुणोऽल्पेषु श्रैष्ठ्यहेतुरुक्तः स कुण्ठेष्वपि बहुषु हस्तिशिक्षाकर्मणोत्पादयितुं शक्यः न तु स्वभावशूरेष्वल्पेषु बहुत्वमापादयितुं शक्यमित्याह — बहुषु हीत्यादि । इतिशब्दः बहुकुण्ठश्रेयस्त्वं प्रति 'स्कन्धविनियोगादि'त्यादिनोक्तस्यार्थस्य हेतुतां द्योतयति।

खन्योरपि मध्ये प्रचुरसारवस्तुत्वाकृच्छ्रगम्यमार्गत्वाल्पव्ययसाध्यत्वै-

तत्रापि 'महासारमल्पसारं वा प्रभूतमिति। महासारमल्पं श्रेयः। वज्रमणिमुक्ताप्रवालहेमरूप्यधातुर्हि प्रभूतमल्पसारमत्यर्घेण ग्रसते' इत्याचार्याः।

नेति कौटल्यः। चिरादल्पो महासारस्य क्रेता विद्यते। प्रभूतः सातत्यादल्पसारस्य।

एतेन वणिक्पथो व्याख्यातः।

तत्रापि 'वारिस्थलपथयोर्वारिपथः श्रेयान्, अल्पव्ययव्यायामः प्रभूतपण्योदयश्च' इत्याचार्याः।

नेति कौटल्यः। संरुद्धगतिरसार्वकालिकः प्रकृष्टभययोनिर्निष्प्रतिकारश्च वारिपथः। विपरीतः स्थलपथः।

युक्तां खनिं खानयन् अतथाभूतखनिखानकापेक्षया विशेषलाभं भजत इत्याह — खन्योरपीत्यादि।

खनावपि महार्घं वज्रमण्यादिकं सारवस्तु परिमितं लभ्यमानं वा श्रेयः, अल्पार्घमसारवस्तु वा प्रचुरं लभ्यमानं श्रेय इति विमर्शे, वज्रमण्यादेर्महासारस्याल्पस्यापि मूल्यतः प्रभूताल्पसारातिशायित्वादाद्यमेव श्रेय इत्याचार्याणां मतमाह — तत्रापि महासारमित्यादि।

आचार्यमतं न युक्तं, यतो महासारस्य वज्रमण्यादेः क्रेता बहोरपि कालादल्प एव लभ्यते, अल्पसारस्य तु लवणादेर्नित्यावर्जनीयोपकारत्वात् क्रेतारो बहवश्च नित्यं च लभ्यन्त इत्याह— नेति कौटल्यश्चिरादित्यादि। एवञ्च प्रभूतमल्पसारं श्रेय इति स्वमतमुक्तं भवति।

उक्तेन प्रकारेण वणिक्पथोऽपि विशेषलाभमवेक्ष्य निवेशनीय इत्याह — एतेनेत्यादि।

वणिक्पथोऽपि तावद् द्विविधो वारिपथः स्थलपथ इति। तत्र वारिपथः श्रेयान्, कुतः, अल्पेन धनव्ययेन पुरुषपरिश्रमेण च साध्यत्वात्, स्थलपथापेक्षया पण्यनयनानयनसौकर्यातिशयेन बहुतरलाभहेतुत्वाच्चेत्याचार्यमतमाह — तत्रापि वारिस्थलपथयोरित्यादि।

स्वमतमाह— नेति कौटल्यः संरुद्धगतिरित्यादि। विपदि सर्वतोनिरुद्धगमनः, वृष्ट्यादिबाधकालेष्वगम्यः स्थलपथाभ्यधिकव्ययपायहेतुरशक्य-

वारिपथे तु कूलसंयानपथयोः कूलपथः पण्यपट्टणबाहुल्या-च्छ्रेयान्। नदीपथो वा सातत्याद् विषह्याबाधत्वाच्च।

स्थलपथेऽपि। 'हैमवतो दक्षिणापथाच्छ्रेयान् हस्त्यश्वगन्धद-न्ताजिनरूप्यसुवर्णपण्याः सारवत्तराः' इत्याचार्याः।

नेति कौटल्यः। कम्बलाजिनाश्वपण्यवर्जाः शङ्खवज्रमणिमुक्ता-सुवर्णपण्याश्च प्रभूततरा दक्षिणापथे।

दक्षिणापथेऽपि बहुखनिः सारपण्यः प्रसिद्धगतिरल्पव्ययायामो वा वणिक्पथः श्रेयान्। प्रभूतविषयो वा फल्गुपण्यः।

तेन पूर्वः पश्चिमश्च वणिक्पथो व्याख्यातः।

प्रतिक्रियश्च जलपथ इति स न श्रेयान्, उक्तविपरीतगुणत्वात् तु स्थलपथः श्रेयानित्यर्थः।

वारिपथोऽपि द्विप्रकारः अनुतीरगमनमार्गो जलगमनमार्ग इति। तत्राद्यः श्रेयान् पण्यपुटभेदनबहुत्वादित्याह — **वारिपथे** त्वित्यादि। तत्र विकल्पेनापवादमाह — **नदीपथो** वेति। नदीवारिपथो वा, श्रेयान्, कुतः, सातत्यात् सन्ततगतित्वात्, विषह्याबाधत्वाच्च अनुत्कटाबाधत्वाच्च।

स्थलपथेऽपि विशेषमाचार्यमतेनाह—**स्थलपथेऽपी**ति। तत्रापि, हैमवतः उत्तरापथः, दक्षिणापथात् श्रेयान्। कुत इत्याह — **हस्त्यश्वे**त्यादि। हस्त्यादिषु गन्धः कस्तूरी। हस्त्यादयः सप्त पण्यपदार्थाः, सारवत्तराः अतिशयेनार्घवन्तः, तत्र प्रचुरा इति वाक्यशेषः।

तत् खण्डयति — **नेति कौटल्य** इत्यादि। कम्बलाजिनाश्ववर्जमन्ये हस्त्यादयः, शङ्खवज्रमणिमुक्तास्वर्णरूपाः पण्यपदार्थाश्च उत्तरापथापेक्षया दक्षिणापथे प्रचुरतराः। ततश्च पण्यभेदेनान्योन्यापेक्षं श्रेयस्त्वमुभयोरविशिष्टमित्यभिप्रायः।

दक्षिणापथेऽपि विशेषमाह — **दक्षिणापथेऽपी**ति। तत्रापि, बहुखनिः, प्रसिद्धगतिः निरपायसिद्धगतागतः, अल्पव्यायामः अल्पपरिश्रमः, एवम्भूतः सारपण्यो वणिक्पथो वा श्रेयान्। प्रभूतविषयो वा फल्गुपण्यः असारपण्यत्वेऽपि प्रचुरक्रेतृको वणिक्पथो वा श्रेयान्।

पूर्वपश्चिमवणिक्पथयोरपि विषये श्रेयस्त्वमित्थं द्रष्टव्यमित्याह— **तेने**त्यादि।

तत्रापि चक्रपादपथयोश्चक्रपथो विपुलारम्भत्वाच्छ्रेयान् । देशकालसम्भावनो वा खरोष्ट्रपथः ।

आभ्यामंसपथो व्याख्यातः ॥

परकर्मोदयो नेतुः क्षयो वृद्धिर्विपर्यये ।
तुल्ये कर्मपथे स्थानं ज्ञेयं स्वं विजिगीषुणा ॥

अल्पागमातिव्ययता क्षयो वृद्धिर्विपर्यये ।
समायव्ययता स्थानं कर्मसु ज्ञेयमात्मनः ॥

तस्मादल्पव्ययारम्भं दुर्गादिषु महोदयम् ।
कर्म लब्ध्वा विशिष्टः स्यादित्युक्ताः कर्मसन्धयः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे द्वादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ कर्मसन्धिः,
आदितो दशशततमः ॥

वणिक्पथे विशेषान्तरमाह — तत्रापीति । वणिक्पथेऽपि, चक्रपादपथयोः चक्रपथश्चक्रयुक्तमनुष्यवाह्यक्षुद्रशकटगम्यो मार्गः, पादपथो मनुष्यपादचारप्राप्यो मार्गः तयोर्मध्ये, चक्रपथः विपुलारम्भत्वात् पादपथापेक्षया प्रचुरपण्यव्यवहारत्वाद्धेतोः, श्रेयान् । विकल्पमाह — देशकालसम्भावनो वा खरोष्ट्रपथ इति । विप्रकृष्टदेशं भूरिपण्यापेक्षं च पण्यप्रियकालमनुसृत्य खरपथ उष्ट्रपथश्च वा श्रेयस्त्वेन ग्राह्य इत्यर्थः ।

इममेव विधिमंसपथेऽतिदिशति—आभ्यामित्यादि । अंसपथः युग्यबलीवर्दादिनीयमानपण्यो मार्गः ॥

कर्मफलभूतानां क्षयवृद्धिस्थानानां लक्षणमाह— परकर्मोदय इति । परस्य शत्रोः कर्मोदयः कर्मजो लाभः, नेतुः विजिगीषोः क्षयः, ज्ञेय इत्यपकृष्य सम्बध्यते । विपर्यये स्वकर्मोदये, वृद्धिः, ज्ञेया । कर्मपथे तुल्ये शत्रुसमफले सति, स्वं स्थानं क्षयवृद्धिव्यतिरेकेण स्वभावावस्थानं, ज्ञेयं, विजिगीषुणा ॥

लक्षणान्तरमाह—अल्पागमातिव्ययतेति । आत्मनः कर्मसु आयाधिकव्यययोगित्वं, क्षयः क्षयपदार्थः । विपर्यये बह्वायाल्पव्ययत्वे वृद्धिः । समायव्ययता स्थानं ज्ञेयम् ॥

तस्मादिति। इत्थं क्षयवृद्धिस्थानज्ञानात्, दुर्गादिषु दुर्गसेत्वादिषु, अल्पव्ययारम्भं, महोदयं महाफलं, कर्म, लब्ध्वा आसाद्य, विशिष्टः परस्मादभ्यधिकः, स्यात्, विजिगीषुः। इति एवं, कर्मसन्धयः उक्ताः॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे द्वादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ कर्मसन्धिः,
आदितो दशोत्तरशततमः॥

११७. प्रक. पार्ष्णिग्राहचिन्ता ।

संहत्यारिविजिगीष्वोरमित्रयोः पराभियोगिनोः पार्ष्णिं गृह्णतोर्यः शक्तिसम्पन्नस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । शक्तिसम्पन्नो ह्यमित्रमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्, न हीनशक्तिरलब्धलाभ इति ।

शक्तिसाम्ये यो विपुलारम्भस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । विपुलारम्भो ह्यमित्रमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्, नाल्पारम्भः सक्तचक्र इति ।

आरम्भसाम्ये यः सर्वसन्दोहेन प्रयातस्य पार्ष्णिं गृह्णाति,

पार्ष्णिग्राहचिन्तेति सूत्रम् । पार्ष्णिग्राहः पृष्ठस्थः शत्रुः तदवस्थापन्नस्य राज्ञः चिन्ता अनुष्ठानविचारः क्रियत इति सूत्रार्थः । सामवायिकादीनामतिसन्धिरुक्तः । पार्ष्णिग्राहस्येदानीमभिधीयते ।

संहत्येति । अमित्रयोः स्वशत्रुभूतयोः, पराभियोगिनोः पराभियोगव्यापृतयोः, अरिविजिगीष्वोः, पार्ष्णिं यथोक्तारिसम्बन्धिनं यथोक्तविजिगीषुसम्बन्धिनं च पार्ष्णिं, संहत्य गृह्णतोः यौ द्वौ सम्भूय गृह्णीतस्तयोर्मध्ये इत्यर्थः, यः शक्तिसम्पन्नस्य पार्ष्णिं गृह्णाति, सः अतिसन्धत्ते हीनशक्तिपार्ष्णिग्राह्यपेक्षया लाभविशेषं प्राप्नोति । तत्र हेतुमाह—शक्तिसम्पन्नो हीत्यादि । अयमर्थः—शक्तिमान् हि स्वामित्रोच्छेदे सिद्धे प्राप्तोपचयो भूत्वा पार्ष्णिग्राहस्याप्युच्छेदं कुर्यादिति तदमित्रोच्छेदप्रतिबन्धाचरणं पार्ष्णिग्राहस्य स्वात्मत्राणाय कल्पेत । हीनशक्तिस्तु स्वामित्रोच्छेदासमर्थत्वादप्राप्तलाभोऽशङ्कनीय इति तत्पार्ष्णिग्राहिणो न कश्चिद् विशेषलाभ इति ।

शक्तिसाम्य इत्यादि । समशक्तिकयोरपि ग्राह्यपार्ष्ण्योर्मध्ये, यः विपुलारम्भस्य भक्तोपकरणादिसर्वविधयात्रासाधनसम्पन्नस्य, पार्ष्णिं गृह्णाति, सः अतिसन्धत्ते अल्पारम्भपार्ष्णिग्राह्यपेक्षया लाभविशेषं स्वात्मत्राणलक्षणं प्राप्नोति । तत्र कारणमाह—विपुलारम्भो हीति । हि यतः, विपुलारम्भः, अमित्रमुच्छिद्य शत्रूच्छेदेन प्राप्तवृद्धिर्भूत्वा, पार्ष्णिग्राहम् उच्छिन्द्यात् । नाल्पारम्भः परिमितसैन्योद्योगस्तु पार्ष्णिग्राहं नोच्छिन्द्यात्, कुतः, सक्तचक्र इति विक्षिप्तसैन्य इति कृत्वा सज्जनीयसैन्यत्वाद्धेतोरित्यर्थः ।

तुल्यारम्भविषयं विशेषमाह— आरम्भसाम्य इति । समानारम्भयोर्मध्य इत्यर्थः, यः सर्वसन्दोहेन प्रयातस्य सर्वसैन्यसमूहनेन स्वं मूलबल-

सोऽतिसन्धत्ते । शून्यमूलो ह्यस्य सुकरो भवति, नैकदेशबलप्रयातः कृतपार्ष्णिप्रतिविधान इति ।

बलोपादानसाम्ये यश्चलामित्रं प्रयातस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । चलामित्रं प्रयातो हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहमुच्छिन्द्यात्, न स्थितामित्रं प्रयातः । असौ हि दुर्गप्रतिहतः । पार्ष्णिग्राहे च प्रतिनिवृत्तस्थितेनामित्रेणावगृह्यते ।

तेन पूर्वे व्याख्याताः ।

मप्युपादाय यातव्यमभिगतस्य, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते एकदेशबलप्रयातपार्ष्णिग्राह्यपेक्षया लाभविशेषं प्राप्नोति । हेतुमाह— हि यतः, शून्यमूलः अकृतरक्षमूलस्थानो ग्राह्यपार्ष्णिः, अस्य पार्ष्णिग्राहस्य, सुकरः सुखसाध्यः, भवति । नैकदेशबलप्रयातः, स तु सुकरो न भवति, कुतः, कृतपार्ष्णिप्रतिविधान इति सः बलैकदेशस्थापनेन सम्पादितपार्ष्णिग्राहप्रतिविधिरितिकृत्वा ।

समानं बलमुपात्तवतोर्ग्राह्यपार्ष्ण्योः पार्ष्णिग्रहणेऽतिसन्धिमाह — **बलोपादानसाम्य** इति । तत्र, यः, चलामित्रम् अकृतदुर्गं, शत्रुं प्रयातस्य पार्ष्णिं गृह्णाति सः अतिसन्धत्ते । कुतः, हि यतः, चलामित्रं प्रयातः, सुखेन अक्लेशेन, अवाप्तसिद्धिः लब्धशत्रुजयः, भूत्वेति शेषः, पार्ष्णिग्राहम् उच्छिन्द्यात् । अतश्च तत्पार्ष्णिग्रहणे सत्यात्मपरित्राणं भवतीत्येष विशेषलाभ इति भावः । दुर्गादिसुप्रतिष्ठितं स्थितामित्रं प्रयातस्तु सुखेन सिद्धिं नावाप्नुयात्, न च पार्ष्णिग्राहमुच्छिन्द्यादिति न तत्पार्ष्णिग्राहिणो विशेषलाभः कश्चिदित्यभिप्रायेणाह — **न स्थितामित्रं प्रयात** इति । स्थितामित्रं प्रयातः केन कारणेनावाप्तसिद्धिर्न भवतीत्यत्राह — **असाविति** । हि यतः, असौ, दुर्गप्रतिहतः परदुर्गेण कुण्ठितवीर्यो भवति । न केवलं विशेषलाभाभावः, प्रत्युतानर्थोऽपि स्थितामित्राभियायिपार्ष्णिग्राहिणः सम्भाव्यत इत्याह— **पार्ष्णिग्राहे चेति** । स्थितामित्राभियायिपार्ष्णिग्रहणे च, क्रियमाण इति शेषः, प्रतिनिवृत्तस्थितेन स्थितामित्राद् दुर्गप्रतिहतिवशात् प्रतिनिवृत्य स्थितेन अमित्रेण, अवगृह्यते अर्थात् तत्पार्ष्णिग्राही ।

तेनेति । तेन स्थितामित्राभियायिपार्ष्णिग्राहिण उक्तेन विधिना, पूर्वे हीनशक्तिपार्ष्णिग्राही अल्पारम्भपार्ष्णिग्राही एकदेशबलप्रयातपार्ष्णिग्राही

शत्रुसाम्ये यो धार्मिकाभियोगिनः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते। धार्मिकाभियोगी हि स्वेषां च द्वेष्यो भवति। अधार्मिकाभियोगी सम्प्रियः।

तेन मूलहरतादात्विककदर्याभियोगिनां पार्ष्णिग्रहणं व्याख्यातम्।

मित्राभियोगिनोः पार्ष्णिग्रहणे त एव हेतवः।

मित्रममित्रं चाभियुञ्जानयोर्यो मित्राभियोगिनः पार्ष्णिं

चेत्येते, व्याख्याता उक्तविधानाः, तेऽपि हीनशक्त्यादिभिः शत्रोः प्रतिनिवृत्तस्थितैरवगृह्यन्त इत्यर्थः।

शत्रुसाम्य इति। समानयोः शत्र्वोर्मध्ये, यः धार्मिकाभियोगिनः धार्मिकं शत्रुमभियुञ्जानस्य, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते विशेषलाभं भजते। कुतः, हि यतः, धार्मिकाभियोगी, स्वेषां, चकारात् परेषां च, द्वेष्यो भवति। अतश्च सर्वद्वेष्यत्वाद् दुर्लभसिद्धिः पार्ष्णिग्राहेण सुसाधो भवतीत्येष एव तस्य विशेषलाभ इति भावः। अधार्मिकाभियोगी, संप्रियः स्वेषां परेषां च सम्यक् प्रेमविषयः, ततश्च स निश्चितजयः पार्ष्णिग्राहस्यासाध्यो भवतीति भावः।

तेनेति। उक्तेन विधिना, मूलहरतादात्विककदर्याभियोगिनां मूलहरः पितृपैतामहार्थान्यायभक्षकः तादात्विकस्तदातदोत्पद्यमानार्थभक्षकः कदर्यो भृत्यात्मपीडयार्थोपचायकः मूलहराद्यभियोगिनां त्रयाणां पार्ष्णिग्रहणं, व्याख्यातं व्याख्यातप्रायलाभविशेषं, द्रष्टव्यमिति शेषः। तद् यथा — मूलहरतादात्विकाभियोगिनोर्मध्ये मूलहराभियोगिनो यः पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते, मूलहराभियोगी हि सुखेन मूलहरमर्थकृच्छ्रिणमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्। तादात्विककदर्याभियोगिनोश्च मध्ये कदर्याभियोगिनो यः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते, कदर्याभियोगी हि कदर्यमभृत्योपकारकं सुखेनोच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यादिति।

य एतेऽतिसन्धिहेतव उक्ताः, त एव मित्राभियोगिनोः पार्ष्णिग्रहणेऽपि योज्या इत्याह — **मित्राभियोगिनोरित्यादि**।

मित्रममित्रं चाभियुञ्जानयोरित्यादि। अयमर्थः — मित्रामित्राभियोगिनोर्द्वयोर्मध्ये मित्राभियोगिनः पार्ष्णिं गृह्णन् विशेषलाभं मित्राभियोगप्रति-

गृह्णाति, सोऽतिसन्धत्ते। मित्राभियोगी हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहमुच्छिन्द्यात्। सुकरो हि मित्रेण सन्धिर्नामित्रेणेति।

मित्रममित्रं चोद्धरतोर्योऽमित्रोद्धारिणः पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते। वृद्धमित्रो ह्यमित्रोद्धारी पार्ष्णिग्राहमुच्छिन्द्यात्, नेतरः स्वपक्षोपघाती।

तयोरलब्धलाभापगमने यस्यामित्रो महतो लाभाद् वियुक्तः क्षयव्ययाधिको वा, स पार्ष्णिग्राहोऽतिसन्धत्ते। लब्धलाभापगमने यस्यामित्रो लाभेन शक्त्या हीनः, स पार्ष्णिग्राहोऽतिसन्धत्ते। यस्य वा यातव्यः शत्रोर्विग्रहापकारसमर्थः स्यात्।

पार्ष्णिग्राहयोरपि यः शक्यारम्भबलोपादानाधिकः स्थितशत्रुः

बन्धाचरणद्वारकात्मपरित्राणलक्षणं प्राप्नोति। कुतः, यतो मित्राभियोगी पार्ष्णिग्राहेणोपेक्षितश्चेत् स सुखात् मित्रेण सह सन्धिक्रियया प्राप्तवृद्धिर्भूत्वा पार्ष्णिग्राहस्योच्छेदं कुर्याद्, अमित्राभियोगी तूपेक्षितोऽपि अमित्रेण सह सन्धेरसुकरतयानवाप्तसिद्धिर्भवन् न पार्ष्णिग्राहमुच्छेत्तुं प्रभवेदिति।

मित्रामित्रोद्धारिणोः पार्ष्णिग्रहणे विशेषमाह— **मित्रममित्रं चोद्धरतोरिति**। तयोर्मध्ये, यः, अमित्रोद्धारिणः, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते। कुतः, हि यतः, वृद्धमित्रः अनुपहतस्वपक्षः, अमित्रोद्धारी, पार्ष्णिग्राहम्, उच्छिन्द्यात्। इतरः मित्रोद्धारी, स्वपक्षोपघाती स्वमित्रोपघातप्राप्तपरिक्षयतयेत्यर्थः, पार्ष्णिग्राहं, नोच्छिन्द्यात् नोच्छेत्तुं शक्नुयात्।

विशेषान्तरमाह — **तयोरिति**। मित्रामित्रोद्धारिणोः, अलब्धलाभापगमने कमपि लाभमनवाप्य प्रत्यागमने सति, यस्य पार्ष्णिग्राहस्य, अमित्रः, महतो लाभाद्, वियुक्तः अपेतः, क्षयव्ययाधिको वा युग्यपुरुषापचयेन धनव्ययेन च परस्मादभ्यधिको वा भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते। लब्धलाभापगमने लाभमवाप्य प्रत्यागमने सति, यस्य अमित्रः, लाभेन शक्त्या हीनः परापेक्षया हीनलाभो हीनशक्तिश्च भवति, स पार्ष्णिग्राहः, अतिसन्धत्ते। प्रकारान्तरमाह— **यस्य वेत्यादि**। यातव्यः अरिः, यस्य पार्ष्णिग्राहस्य, शत्रोः अर्थाद् विजिगीषोः, विग्रहापकारसमर्थो भवति, स वा पार्ष्णिग्राहोऽतिसन्धत्ते इति सम्बन्धः।

अतिसन्ध्यन्तरमाह—**पार्ष्णिग्राहयोरपीति**। तयोरपि गुणान्तरस-

पार्श्वस्थायी वा सोऽतिसन्धत्ते । पार्श्वस्थायी हि यातव्याभिसारो मूलबाधकश्च भवति । मूलाबाधक एव पश्चात्स्थायी ।

पार्ष्णिग्राहास्त्रयो ज्ञेयाः शत्रोश्चेष्टानिरोधकाः ।
सामन्ताः पृष्ठतोवर्गः प्रतिवेशौ च पार्श्वयोः ॥
अरेर्नेतुश्च मध्यस्थो दुर्बलोऽन्तर्धिरुच्यते ।
प्रतिघाते बलवतो दुर्गाटव्यपसारवान् ॥

मध्यमं त्वरिविजिगीष्वोर्लिप्समानयोर्मध्यमस्य पार्ष्णिं गृह्णतो

मानयोर्मध्ये, यः, शक्यारम्भबलोपादानाधिकः साध्यकार्यारम्भस्य सैन्यस्योपादाने अधिकः परस्मादुत्कृष्टः परसैन्याभ्यधिकप्रमाणतथाविधसैन्ययुक्तो भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते । यः स्थितशत्रुः गृहीतपार्ष्णौ चलशत्रौ सति स्वयं दुर्गादिप्रतिष्ठितः शत्रुर्भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते । यो वा पार्श्वस्थायी यातव्यपार्श्वस्थितिशीलः, सः पार्ष्णिग्राहः, अतिसन्धत्ते । तत्राद्ययोः परप्रधर्षकत्वं विशेषलाभः प्रतीत एव । अन्त्यस्य तु विशेषलाभं विशदयितुमाह—**पार्श्वस्थायी** हीति । स हि, यातव्याभिसारः यातव्यसङ्गतः, मूलबाधकश्च मूलं विजिगीषोः स्थानीयं तद्बाधकश्च भवति । एवञ्च यातव्यसख्यबन्धपूर्वकविजिगीषुमूलबाधनसौकर्यमेव पार्श्वस्थायिनो विशेषलाभ इत्युक्तं भवति । पश्चात्स्थायी तु न तथेत्याह — **मूलाबाधक एवे**त्यादि ।

त एते शत्रोर्व्यापारप्रतिबन्धकाः पार्ष्णिग्राहाः अभियोक्तुर्विषयानन्तराः पश्चाद्भागभवाः पार्श्वप्रतिनिविष्टा इति त्रिरूपा इत्याह — **पार्ष्णिग्राहास्त्रयो ज्ञेया** इत्यादि ॥

अन्तर्धिर्नाम कश्चिद् मध्यमविशेषोऽस्ति । स तु अकिञ्चित्करत्वात् पार्ष्णिग्राहावस्थां नार्हतीत्यभिप्रायं तल्लक्षणकथनभङ्ग्याविष्करोति — **अरेर्नेतुश्च मध्यस्थ** इति । शत्रुविजिगीष्वोर्मध्यगतः, दुर्बलः तदुपकारापकाराशक्तः, अन्तर्धिरुच्यते अन्तर्धिरिति संज्ञायते । स कथंस्वभावः, बलवतः प्रतिघाते, प्रसक्ते इति शेषः, दुर्गाटव्यपसारवान् दुर्गाटवीरूपबहुनिलयनस्थानयुक्तः । एवञ्च तिरोधानयोगात् संज्ञान्वर्थत्वं बोद्धव्यम् ॥

मध्यमपार्ष्णिं गृह्णतोऽतिसन्धिमाह — **मध्यमं त्वि**ति । तं पूर्वोक्तलक्षणम्, अरिविजिगीष्वोर्लिप्समानयोः सतोः, मध्यमस्य पार्ष्णिम् अर्थात्

लब्धलाभापगमने यो मध्यमं मित्राद् वियोजयति, अमित्रं च मित्रमाप्नोति, सोऽतिसन्धत्ते । सन्धेयश्च शत्रुरुपकुर्वाणो, न मित्रं मित्रभावादुत्क्रान्तम् ।

तेनोदासीनलिप्सा व्याख्याता ।

'पार्ष्णिग्रहणाभियानयोस्तु मन्त्रयुद्धादभ्युच्चयः । व्यायामयुद्धे हि क्षयव्ययाभ्याम् उभयोरवृद्धिः । जित्वापि हि क्षीणदण्डकोशः पराजितो भवति' इत्याचार्याः ।

नेति कौटल्यः । सुमहतापि क्षयव्ययेन शत्रुविनाशोऽभ्युपगन्तव्यः ।

स्वलिप्सुसाह्यव्यापृतस्य मध्यमस्य सम्बन्धिनं पार्ष्णिं, गृह्णतः, लब्धलाभापगमने लाभं प्राप्य प्रत्यागमने, यः, मध्यमं मित्राद् वियोजयति वियुक्तं करोति, अमित्रं च मित्रम् आप्नोति शत्रुं च सन्धाय मित्रीकरोति, सः, अतिसन्धत्ते । शत्रुर्नाम कथं सन्धातुं योग्य इत्याशङ्कां परिहर्तुमाह — *सन्धेयश्चेत्यादि । शत्रुरप्युपकुर्वाणः सन्धातुं योग्यो भवति, न तु मित्रमपि मित्रभावादपेतमनुपकुर्वाणमपकुर्वाणं वेत्यर्थः ।

मध्यमलिप्सोक्तं न्यायमुदासीनलिप्सायामतिदिशति — तेनोदासीनेत्यादि ।

अथ पार्ष्णिग्राहेणाभियात्रा चानुष्ठातव्ये युद्धे विशेषमाचार्यमतेनाह — पार्ष्णिग्रहणाभियानयोस्त्विति । पार्ष्णिग्रहणेऽभियाने चाध्यवसितयोः, मन्त्रयुद्धादभ्युच्चयः, युद्धं हि सामान्यतो द्विविधं — युद्धरङ्गं प्रविश्य शस्त्रादिप्रयोगेण शत्रुहिंसनमित्येकं व्यायामयुद्धाख्यं, युद्धरङ्गमप्रविश्यैव सत्रिरसदतीक्ष्णादिगूढपुरुषप्रयोगेण शत्रुहिंसनमिति द्वितीयं मन्त्रयुद्धाख्यं, तत्र मन्त्रयुद्धानुष्ठानाद् वृद्धिर्भवतीत्यर्थः । व्यायामयुद्धानुष्ठाने योद्ध्रभियोद्धव्ययोर्द्वयोरपि युग्यपुरुषापचयधनव्ययाभ्यामवृद्धिः, जयप्राप्तस्यापि क्षीणदण्डकोशतया पराजितप्रायत्वं च भवतीत्याह — व्यायामयुद्धे हीत्यादि ।

स्वमतमाह — नेति कौटल्य इत्यादि । एवञ्च शत्रुविनाशरूपमहाफलसिद्धिहेतुत्वाद् व्यायामयुद्धस्याप्युपादेयत्वमविशिष्टमित्यभिप्रायः ।

---

*सन्धेयश्चेत्यादिवाक्यस्यार्थोऽनूदितो माघकविना —

"उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥" (शिशुपाल० स०२.)

तुल्ये क्षयव्यये यः पुरस्ताद् दूष्यबलं घातयित्वा निश्शल्यः पश्चाद् वश्यबलो युध्येत, सोऽतिसन्धत्ते ।

द्वयोरपि पुरस्ताद्दूष्यबलघातिनोर्यो बहुलतरं शक्तिमत्तरमत्यन्तदूष्यं च घातयेत्, सोऽतिसन्धत्ते ।

तेनामित्राटवीबलघातो व्याख्यातः ॥

पार्ष्णिग्राहोऽभियोक्ता वा यातव्यो वा यदा भवेत् ।
विजिगीषुस्तदा तत्र नैत्रमेतत् समाचरेत् ॥
पार्ष्णिग्राहो भवेन्नेता शत्रोर्मित्राभियोगिनः ।
विग्राह्य पूर्वमाक्रन्दं पार्ष्णिग्राहाभिसारिणा ॥

व्यायामयुद्धेऽपि विशेषमाह— **तुल्ये क्षयव्यये** इति । योद्धृप्रतियोद्ध्रोः क्षयव्यये समानेऽपि, यः पुरस्ताद्, दूष्यबलं राज्योपघातकबलं, घातयित्वा राज्योपघातकबलं स्वव्यूहाग्रनिवेशनेन प्रतिबलकर्तृकवधगोचरतां पूर्वं नीत्वेत्यर्थः, अत एव निश्शल्यः, पश्चाद् वश्यबलः त्रिविधवश्यसैन्ययुक्तः, युध्येत, सः अतिसन्धत्ते विशेषलाभं भजते, अपरिहार्ये स्वबलक्षये दूष्यबलक्षयाधिक्यघटनपूर्वं वश्यबलक्षयाल्पत्वापादनमिह विशेषलाभः ।

पुरस्ताद्दूष्यबलघातयितृत्वे द्वयोः समाने यः परकीयाद् दूष्यबलात् संख्यातिशयेन शक्त्यतिशयेन दूष्यतातिशयेन च युक्तं दूष्यबलं घातयेत्, सोऽतिसन्धत्त इत्याह — **द्वयोरपीत्यादि** ।

दूष्यबलघातनवदमित्रबलघातनमाटविकबलघातनं च पूर्वं कृत्वा पश्चाद् वश्यबलो यो युध्येत, सोऽप्यतिसन्धत्त इतीममर्थमतिदेशभङ्ग्याह — **तेने**त्यादि ॥

विधिशेषं श्लोकैराह— **पार्ष्णिग्राह** इत्यादि । विजिगीषुः पार्ष्णिग्राहाभियोक्तृयातव्यावस्थासु नेतृकर्म वक्ष्यमाणमनुतिष्ठेदिति प्रथमश्लोकार्थः ॥

तत्र पार्ष्णिग्राहावस्थायां नैत्रमाह — **पार्ष्णिग्राहो भवे**दिति । नेता पार्ष्णिग्राहावस्थापन्नो विजिगीषुः, मित्राभियोगिनः शत्रोः स्वमित्रमभियुञ्जानस्य स्वामित्रस्य, पार्ष्णिग्राहो भवेत् पार्ष्णिग्रहणमनुतिष्ठेत् । किं कृत्वा, आक्रन्दं शत्रोः पश्चान्मित्रं, पार्ष्णिग्राहाभिसारिणा पार्ष्णिग्राहासारेण अर्थात् स्वमित्रेण सह, पूर्वं विग्राह्य विग्रहार्थं योजयित्वा ॥

आक्रन्देनाभियुञ्जानः पार्ष्णिग्राहं निवारयेत्।
तथाक्रन्दाभिसारेण पार्ष्णिग्राहाभिसारिणम्॥
अरिमित्रेण मित्रं च पुरस्तादवघट्टयेत्।
मित्रमित्रमरेश्चापि मित्रमित्रेण वारयेत्॥
मित्रेण ग्राहयेत् पार्ष्णिमभियुक्तोऽभियोगिनः।
मित्रमित्रेण चाक्रन्दं पार्ष्णिग्राहान्निवारयेत्॥
एवं मण्डलमात्मार्थं विजिगीषुर्निवेशयेत्।
पृष्ठतश्च पुरस्ताच्च मित्रप्रकृतिसम्पदा॥
कृत्स्ने च मण्डले नित्यं दूतान् गूढांश्च वासयेत्।
मित्रभूतः सपत्नानां हत्वा हत्वा च संवृतः॥

अभियोक्त्रवस्थायां नैत्रमाह — आक्रन्देनेति। अभियुञ्जानः अभियोक्त्रवस्थापन्नः, पार्ष्णिग्राहं स्वपृष्ठशत्रुम्, आक्रन्देन स्वपृष्ठमित्रेण, निवारयेत्। तथा पार्ष्णिग्राहाभिसारिणं पार्ष्णिग्राहासारम्, आक्रन्दाभिसारेण आक्रन्दासारेण, निवारयेत्॥

एवं पृष्ठतोऽनुष्ठानमुक्त्वा पुरस्तादनुष्ठानमाह — अरिमित्रेणेति। अभियुञ्जान इति वर्तते। सः, पुरस्तात् मित्रं स्वीयम्, अरिमित्रेण प्रत्यवस्थितेन, अवघट्टयेच्च प्रतिघातयेच्च। अरेः मित्रमित्रं चापि, मित्रमित्रेण स्वकीयेन, वारयेत्॥

अभियुक्तावस्थायामनुष्ठानमाह — मित्रेणेति। अभियुक्तः, अभियोगिनः अभियुञ्जानस्य, पार्ष्णिं, मित्रेण स्वस्य मित्रेण प्रयोज्यकर्त्रा, ग्राहयेत्। आक्रन्दम् अभियोगिनः पृष्ठमित्रं पार्ष्णिग्राहबाधनप्रवृत्तमित्यर्थः, मित्रमित्रेण अर्थात् पार्ष्णिग्राहासारेण प्रयोज्यकर्त्रा, पार्ष्णिग्राहात्, निवारयेत्॥

एवमिति। अनेन प्रकारेण, विजिगीषुः, मित्रप्रकृतिसम्पदा मित्रप्रकृतेर्या गुणसमृद्धिः पूर्वोक्ता तया, युक्तमिति शेषः, मण्डलं राजपरम्पराम्, आत्मार्थम् आत्मसाह्यार्थं, पृष्ठतश्च, पुरस्ताच्च, निवेशयेत् स्थापयेत्॥

कृत्स्ने च मण्डल इति। सर्वस्मिन् आत्मार्थनिवेशिते मण्डले, दूतान् गूढान् वासयेच्च, मण्डलप्रवृत्तिच्छलविज्ञानार्थं विजिगीषुरित्यार्थम्। किञ्च, सपत्नानां शत्रूणां, मित्रभूतः मित्रतुल्यो मित्रभावं बहिराभिनयन्, हत्वा हत्वा, अर्थात् सपत्नान्, संवृतः गूढाकारेङ्गितः, भवेत्॥

असंवृतस्य कार्याणि प्राप्तान्यपि विशेषतः ।
निस्संशयं विपद्यन्ते भिन्नप्लव इवोदधौ ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
त्रयोदशोऽध्यायः पार्ष्णिग्राहचिन्ता,
आदितः एकादशशततमः ॥

असंवृतवृत्तेर्दोषमाह — **असंवृतस्येति** । संवरणरहितस्य, कार्याणि क्रियाफलानि, विशेषतः प्राप्तान्यपि अतिशयेनोपस्थितान्यपि, निस्संशयं विपद्यन्ते नश्यन्ति । **भिन्नप्लव इवोदधाविति** । समुद्रे भिन्नतरणसाधनः पुरुष इव च असंवृतो विजिगीषुर्भवतीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
त्रयोदशोऽध्यायः पार्ष्णिग्राहचिन्ता,
आदित एकादशोत्तरशततमः ॥

---

११८. प्रक. हीनशक्तिपूरणम्।

सामवायिकैरेवमभियुक्तो विजिगीषुर्यस्तेषां प्रधानस्तं ब्रूयात्— 'त्वया मे सन्धिः, इदं हिरण्यमहं च मित्रं, द्विगुणा ते वृद्धिः, नार्हस्यात्मक्षयेण मित्रमुखानमित्रान् वर्धयितुम्, एते हि वृद्धास्त्वामेव परिभविष्यन्ति'।

भेदं वा ब्रूयात् — 'अनपकारो यथाहमेतैः सम्भूयाभियुक्तः तथा त्वामप्येते संहितबलाः स्वस्था व्यसने वाभियोक्ष्यन्ते, बलं हि चित्तं विकरोति, तदेषां विघातय' इति।

हीनशक्तिपूरणमिति सूत्रम्। अपचितानां शक्तीनां वर्धनमभिधीयत इति सूत्रार्थः। यातव्यावस्थापन्नस्यैकेनाभियुज्यमानतायामनुष्ठानप्रकारो 'मित्रेण ग्राहयेत् पार्ष्णिम्' इत्यादिना पूर्वमुक्तः। तस्य बहुभिरभियुज्यमानतायामनुष्ठानप्रकारः सम्प्रत्यभिधीयते।

सामवायिकैरित्यादि। अयमर्थः — यथैकेन तथा सम्भूयाभियोगिभिर्बहुभिः अभियुक्तो विजिगीषुरभियोगं प्रतिविधातुमशक्तः स्वशक्तिं वर्धयितुकामः सामवायिकानां प्रधानं ब्रूयात्— 'त्वया मे सन्धिः' इति। एतच्च प्रधानस्य धर्मविक्षित्वे। तस्य लुब्धत्वे तु 'इदं ते हिरण्यं ददामि अहं च ते मित्रविशेषो भवामि विपत्समये त्वया रक्ष्यमाणः। सेषा तेऽभियोक्तृदीयमानहिरण्यापेक्षया हिरण्यद्वैगुण्याद् आपद्गतमित्रलाभाच्च गुणद्वयवती वृद्धिः' इति ब्रूयात्। इदं वचनमनभ्युपगच्छन्तं पुनर्ब्रूयात् — 'आत्मनो योग्यपुरुषापचयधनव्ययाभ्युपगमेन शत्रून् वाङ्मात्रमित्रताभिनयवतो वृद्ध्या योजयितुं नार्हसि। एते हि सामवायिकास्त्वत्साह्येन मामुच्छिद्य प्राप्तवृद्धयो भूत्वा त्वामेवावज्ञास्यन्ति' इति।

सान्त्वप्रयोगमीदृशमनङ्गीकुर्वाणे तस्मिन् भेदं प्रयुञ्जीतेत्याह — भेदं वा ब्रूयादिति। किमिति ब्रूयात्, अनपकारः अपराधरहितः, यथा अहम्, एतैः, सम्भूय अभियुक्तः तथा त्वामपि एते स्वस्थाः संहितबलाः मदभियोगसंरम्भोत्तरणानन्तरं सज्जितबलाः, भूत्वेति शेषः, व्यसने वा त्वद्व्यसनावसरं प्रतीक्ष्य वा, अभियोक्ष्यन्ते। कुतः, हि यतः, बलम् उपचितमिति शेषः, चित्तं विकरोति दर्पयति। तत् बलम्, एषां, विघातय विघटय। इति।

भिन्नेषु प्रधानमुपगृह्य हीनेषु विक्रमयेत् । हीनाननुग्राह्य वा प्रधाने । यथा वा श्रेयोऽभिमन्येत, तथा । वैरं वा परैर्ग्राहयित्वा विसंवादयेत् ।

फलभूयस्त्वेन वा प्रधानमुपजाप्य सन्धिं कारयेत् । अथोभयवेतनाः फलभूयस्त्वं दर्शयन्तः सामवायिकान् 'अतिसंहिताः स्थ' इत्युद्दूषयेयुः । दुष्टेषु सन्धिं दूषयेत् । अथोभयवेतना भूयो भेदमेषां कुर्युः — 'एवं तद् यदस्माभिर्दर्शितम्' इति । भिन्नेष्वन्यतमोपग्रहेण वा चेष्टेत ।

भिन्नेष्विति । उक्तभेदवचनप्राप्तप्रधानविघटनेषु, हीनेषु, प्रधानम्, उपगृह्य स्वीकृत्य, विक्रमयेत् विक्रमं प्रयुञ्जीत । **हीनान् अनुग्राह्य वा प्रधान** इति । उक्तसामादिप्रयोगेण सामवायिकान् हीनान् स्ववशं नीत्वा वा प्रधाने विक्रमयेत् । हीनप्रधानविक्रमणयोश्चायं विकल्पोऽन्यतरश्रेयस्त्वनिर्धारणपूर्वमनुष्ठेय इत्याह — **यथा वा श्रेयोऽभिमन्येत तथेति** । विक्रमणस्यायुक्तत्वानुसन्धाने त्वाह — **वैरं** वेत्यादि । एकैकस्यान्यैर्विरोधमुत्पाद्य वा सामवायिकान् विघटयेत् ।

फलभूयस्त्वेन वेति । बहुतरधनदानप्रतिश्रवेण वा, प्रधानम्, उपजाप्य भेदयित्वा, सन्धिं कारयेत्, अर्थात् प्रधानमुखेनान्यैः सह । **अथेति** । सन्धिकरणानन्तरम्, उभयवेतनाः विजिगीषुपक्ष्याः सामवायिकाप्तभावाभिनयिनः, फलभूयस्त्वं दर्शयन्तः प्रधानस्यान्यापेक्षया बहुतरधनलाभपणनमुपपादयन्तः, सामवायिकान्, 'अतिसंहिताः स्थ' प्रधानेन यूयं वञ्चिता भवथ', इति, उक्त्वेति शेषः, उद्दूषयेयुः प्रधानकारितात् सन्धेर्विश्लेषयेयुः । **दुष्टेषु** एवं सन्धिविश्लिष्टेषु समवायिषु, सन्धिं दूषयेत् समवायिविसंवाददुष्ट इत्युक्त्वा व्यभिचरेद् विजिगीषुः, प्रधानाय न किमपि धनं दद्यादित्यर्थः । अथ सन्धिदूषणानन्तरम्, उभयवेतनाः, एषां भेदं समवायिनां प्रधानाद् भेदनं, भूयः कुर्युः, पूर्वकृतभेददार्ढ्यार्थम् । कथमित्याह —**एवं तदिति** । यदस्माभिर्दर्शितं प्रधानस्य फलभूयस्त्वं यत् पूर्वमवदाम, तद्, एवम् अनेन प्रकारेण कृतसन्धिदूषणलक्षणेन व्यक्तमिति शेषः । अयं भावः— स्वाभीप्सितभूयःफलालाभात् प्रधानेन पुनरपि युष्मत्संमवायमासाद्य चेष्टितुकामेनेदं सन्धिदूषणमुत्पादितमिति । **भिन्नेष्विति** । उक्तोपायवशाद् भेदं प्राप्तेषु सामवायिकेषु मध्ये

प्रधानाभावे सामवायिकानामुत्साहयितारं स्थिरकर्माणमनुरक्तप्रकृतिं लोभाद् भयाद् वा सङ्घातमुपगतं विजिगीषोर्भीतं राज्यप्रतिसम्बन्धं मित्रं चलामित्रं वा पूर्वानुत्तराभावे साधयेत् ।

उत्साहयितारमात्मनिसर्गेण, स्थिरकर्माणं सान्त्वप्रणिपातेन, अनुरक्तप्रकृतिं कन्यादानयापनाभ्यां, लुब्धमंशद्वैगुण्येन, भीतमेभ्यः

अन्यतमोपग्रहेण वा चेष्टेत अन्यतमं पक्षं स्वानुकूलीकृत्य तत्सहायो वा तदन्यं पक्षमभियुञ्जीत ।

सोऽयं सामवायिकेषु प्रधानसत्त्वेऽनुष्ठानक्रमः । प्रधानाभावे तमाह— **प्रधानाभाव** इति । प्रधानस्य कस्यचिदभावे सति, सामवायिकानां मध्ये, उत्साहयितारं, स्थिरकर्माणं शत्रूच्छेदपर्यन्तानुवर्तिसमुद्यमम्, अनुरक्तप्रकृतिं, लोभात्, सङ्घातं समवायम्, उपगतं, भयाद् वा समवायप्रकोपभयाद् वा, सङ्घातमुपगतं, विजिगीषोः भीत्वा वा सङ्घातमुपगतं, राज्यप्रतिसम्बन्धं राज्यसम्बन्धिनम्, मित्रम् आत्ममित्रमेव सामवायिकसङ्गतं, चलामित्रं वा, साधयेत् स्ववशं नयेत् । तत्र क्रममाह— **पूर्वानुत्तराभावे** इति । एषु नवसु मध्ये उत्तरोत्तराभावे पूर्वपूर्वान् साधयेत् । यथा— उत्साहयितृस्थिरकर्मणोः स्थिरकर्माभावे उत्साहयितारं साधयेत् स्थिरकर्मसत्त्वे तमेव साधयेत् । स्थिरकर्मा ह्यनुच्छेद्य यातव्यं न विरमति, उत्साहयिता तु यातव्यसाधनमात्रेण विरमतीत्युत्साहयितृसाधनाद् अधिकप्रयोजनं स्थिरकर्मसाधनं भवतीति । एवमन्यदप्यूहनीयम् । 'पूर्वान्यतराभावे' इति तु अपपाठो द्रष्टव्यः ।

तेषां साधनप्रकारमाह— **उत्साहयितारमिति** । तम्, आत्मनिसर्गेण 'अयमहं सामात्यः सपुत्रः सधनस्त्वय्यायत्तः, यथेच्छसि तथा मां करणीये नियोजय, मा मामुच्छेत्सीरि'त्युक्त्वात्मसमर्पणेन, साधयेदिति वर्तते । उत्साहयिता हि शौर्यप्रधानत्वादित्थमभिधीयमानः सुसाधो भवतीति । स्थिरकर्माणं, सान्त्वप्रणिपातेन जितोऽस्मि भवता सर्वगुणोत्कृष्टेन रक्षणीय इत्यनुनयपुरस्सरेण प्रणामेन, साधयेत् । स ह्येवमुच्यमानो मानोन्नतत्वात् साध्यो भवतीति । अनुरक्तप्रकृतिं, कन्यादानयापनाभ्यां कन्याया आदानयापनाभ्याम् आदानं स्वीकरणं यापनं प्रस्थापनमर्थाद् दानं ताभ्यामित्यर्थः, साधयेत् । स हि 'त्वत्सम्बन्धाभिलाषिणं त्वदनुरक्तं मां माभियुङ्क्ष्वे'त्येवं न्याय्यमभिधीयमानः प्रकृतिविरागशङ्की साध्यो भवतीति । लुब्धं धनगृध्नुम्,

कोशदण्डानुग्रहेण, स्वतो भीतं विश्वासयेत् प्रतिभूप्रदानेन, राज्य-प्रतिसम्बन्धमेकीभावोपगमनेन, मित्रमुभयतः प्रियहिताभ्यामुपकार-त्यागेन वा, चलामित्रमवधृतमनपकारोपकाराभ्याम् ।

यो वा यथायोगं भजेत, तं तथा साधयेत् । सामदानभेदद-ण्डैर्वा यथापत्सु व्याख्यास्यामः ।

व्यसनोपघातत्वरितो वा कोशदण्डाभ्यां देशे काले कार्ये वाव-धृतं सन्धिमुपेयात् । कृतसन्धिर्हीनमात्मानं प्रतिकुर्वीत ।

अंशद्वैगुण्येन परपरिपणितार्थद्विगुणार्थदानेन, साधयेत । एभ्यो भीतं साम-वायिकेभ्यो भीत्वा तत्सङ्गतं, कोशदण्डानुग्रहेण धनसैन्यदानेन, साधयेत् । स हि 'मा परेभ्यो भैषीः, अहं ते कोशदण्डाभ्यां साहाय्यं करोमी'त्युक्त्या साध्यो भवतीति । स्वतो भीतम् आत्मनः सकाशाद् भीतं, प्रतिभूप्रदानेन विश्वासयेत् 'अहं न ते किञ्चिदपकुर्याम् अस्मिन्नर्थेऽयं चासौ च प्रतिभूः' इत्युक्त्वा साधयेत् । राज्यप्रतिसम्बन्धम् , एकीभावोपगमनेन 'त्वं चाहं चैकी-भावमुपगतौ, मम परिभवस्तवापि खलु परिभवः, न युक्तं ते परेष्वनुप्रविश्य मामभियोक्तुमि'ति कथनेन साधयेत् । मित्रम्, उभयतः प्रियहिताभ्यां 'समान-सुखदुःखौ खल्वावाम्' इत्याद्युभयप्रियहितवचनेन, उपकारत्यागेन वा 'यस्त्वया मह्यं देयः करो व्यवस्थितः तमद्यप्रभृति न मे दातुमर्हसि' इत्युक्त्वा कलृप्त-करमोक्षणेन वा, साधयेत । चलामित्रम् , अनपकारोपकाराभ्याम् अवधृतम् 'अपकारं ते न करिष्यामि उपकारं च करिष्यामि' इत्यनपकारोपकारप्रतिश्र-वाभ्याम् अवधृतिमन्तं विश्वासितं, कृत्वेति शेषः, साधयेत् ।

यो वेति । यः सामवायिकः, यथा येन प्रकारेण, अयोगं समवायिभ्यो विश्लेषं, भजेत, तं, तथा तेन प्रकारेण साधयेत् । सामेत्यादि । सामदान-भेददण्डैर्वा उपायैः, साधयेत् परं स्वायत्तीकुर्यात् । कथं, यथा आपत्सु व्याख्यास्यामः अभियास्यत्कर्माधिकरणे आपत्प्रकरणे वक्ष्यामस्तथा ।

व्यसनोपघातत्वरितो वेत्यादि । अथवा आत्मनो व्यसनमुपहन्तुं कालविलम्बमक्षममाणः, अमुष्मिन् देशे काले कार्ये वा कोशदण्डाभ्यां साहा-य्यमनुष्ठेयमित्येवं शपथादिना निश्चितं सन्धिं सामवायिकैः सह विदध्यात् । कृतसन्धिश्चैवमात्मानं हीनशक्तिं शक्त्याप्याययेत् ।

पक्षे हीनो बन्धुमित्रपक्षं कुर्वीत, दुर्गमविषह्यं वा । दुर्गमित्रप्रति-स्तब्धो हि स्वेषां परेषां च पूज्यो भवति ।

मन्त्रशक्तिहीनः प्राज्ञपुरुषोपचयं विद्यावृद्धसंयोगं वा कुर्वीत । तथाहि सद्यः श्रेयः प्राप्नोति ।

प्रभावहीनः प्रकृतियोगक्षेमसिद्धौ यतेत । जनपदः सर्वकर्मणां योनिः, ततः प्रभावः ।

तस्य स्थानमात्मनश्च आपदि दुर्गम् ।

सेतुबन्धः सस्यानां योनिः । नित्यानुषक्तो हि वर्षगुणलाभः सेतुवापेषु ।

शक्त्युपचयस्य पक्षमूलत्वात् पक्षमाह — पक्ष इति । पक्षः सहाय-स्तद्विषये, हीनः, बन्धुमित्रपक्षं बन्धुमित्रलक्षणं पक्षं, कुर्वीत । अविषह्यं परै-रलङ्घ्यं, दुर्गं वा, कुर्वीत । तत्र हेतुमाह — हि यतः, दुर्गमित्रप्रतिस्तब्धः दुर्ग-मित्राभ्यां प्रतिबद्धः, स्वेषां स्वपक्ष्याणां, परेषां परपक्ष्याणां च, पूज्यो भवति ।

मन्त्रप्रभूत्साहशक्तिषु मध्ये मन्त्रशक्तिपूरणप्रकारमाह — **मन्त्रशक्ति-हीन** इति । मन्त्रशक्तिः प्रज्ञाबलं तद्धीनः, प्राज्ञपुरुषोपचयं कुर्वीत प्राज्ञान् पुरुषांस्तत्तदधिकारस्थानेषु बाहुल्येन नियुञ्जीत । विद्यावृद्धसंयोगं वा कुर्वीत राज्यतन्त्रनिष्णातेभ्यो वा नीतिं शृणुयादित्यर्थः । तथाहि तेन प्रकारेण करणे हि, सद्यः श्रेयः प्राप्नोति ।

प्रभुशक्तिपूरणमाह — **प्रभावहीन** इति । प्रभावः कोशदण्डोत्पत्तिः तद्धीनः, प्रकृतियोगक्षेमसिद्धौ यतेत । प्रकृतिषु मध्ये जनपदः प्राधान्येन चिन्तनीययोगक्षेम इत्यभिप्रायेणाह — **जनपद** इति । सः, सर्वकर्मणां दुर्गा-दीनां सर्वेषां कर्मणां, योनिः कारणम् । अतश्च स प्रधान इत्यर्थः । ततः प्रभावः सर्वकर्मभ्यः कोशदण्डोत्पत्तिः । तथाच प्रभावकामो दुर्गादिकर्मणां योगक्षेमसिद्धौ यतेतेति भावः ।

तेषु दुर्गस्य प्रयोजनमाह — **तस्येति** । दुर्गं, तस्य प्रभावस्य, स्थानं निवासः, आत्मनश्च आपदि स्थानं रक्षादेशः, भवति ।

सेतुबन्धस्य प्रयोजनमाह — **सेतुबन्ध** इति । सः, सस्यानां योनिः । कुतः, हि यतः, सेतुवापेषु सेतुबन्धावरुद्धजलपायनपोष्येषु व्रैहेयशालेयादि-क्षेत्रेषु, वर्षगुणलाभः वृष्टिसाध्यसस्यफलाधिगमः, नित्यानुषक्तः नित्यानुवृत्तः भवति

वणिक्पथः परातिसन्धानस्य योनिः, वणिक्पथेन हि दण्डगूढपुरुषातिनयनं शस्त्रावरणयानवाहनक्रयश्च क्रियते । प्रवेशो निर्नयनं च ।

खनिः सङ्ग्रामोपकरणानां योनिः ।

द्रव्यवनं दुर्गकर्मणां, यानरथयोश्च ।

हस्तिवनं हस्तिनाम् ।

गजाश्वखरोष्ट्राणां च व्रजः ।

तेषामलाभे बन्धुमित्रकुलेभ्यः समार्जनम् ।

उत्साहहीनः श्रेणीप्रवीरपुरुषाणां चोरगणाटविकम्लेच्छजातीनां परापकारिणां गूढपुरुषाणां च यथालाभमुपचयं कुर्वीत ।

वणिक्पथस्याह — **वणिक्पथ** इति । सः, परातिसन्धानस्य शत्रुवञ्चनस्य, योनिः । तदुपपादयति — **वणिक्पथेन** हीति । तेन, दण्डगूढपुरुषातिनयनं सैन्यानां गूढपुरुषाणां च सत्रितीक्ष्णादीनां शत्रुविषयप्रापणं, शस्त्रावरणयानवाहनक्रयश्च शस्त्रादिविषयः क्रयविक्रयव्यवहारश्च, क्रियते । प्रवेशो निर्नयनं च परदेशपण्यस्य स्वदेशे प्रवेशनं स्वदेशपण्यस्य परदेशनयनं च, क्रियते ।

खनेराह— **खनिरिति** । सा, सङ्ग्रामोपकरणानां खड्गादीनां, योनिः तन्निर्माणापेक्षितलोहाद्युत्पादनद्वारेण कारणम् ।

द्रव्यवनस्याह— **द्रव्यवनमिति** । सारदार्वादिवनं, दुर्गकर्मणां गोपुराट्टालकादीनां, यानरथयोश्च, योनिरिति वर्तते ।

हस्तिवनं हस्तिनामिति । योनिरित्यनुवर्तते ।

गवाश्वखरोष्ट्राणां चेति । तेषां, व्रजः गोष्ठः, योनिरित्येव ।

तेषामिति । उक्तानाम्, अलाभे स्वीयत्वेनाप्राप्तौ, बन्धुमित्रकुलेभ्यः, समार्जनं सङ्ग्रहणं, कर्तव्यमिति शेषः ।

उत्साहशक्तिपूरणमाह—**उत्साहहीन** इति । सः, श्रेणीप्रवीरपुरुषाणां श्रेण्यन्तर्गतपुरुषाणां शूरपुरुषाणां च, चोरगणाटविकम्लेच्छजातीना चोरगणानाम् अटवीभवानां म्लेच्छजातीनां च, परापकारिणां शत्र्वपकरणशीलानां, गूढपुरुषाणां च सत्रिप्रभृतीनां च, यथालाभं लाभानुसारेण, उपचयम् उत्साहशक्तिपूरणं, कुर्वीत ।

परमिश्रः प्रतीकारमाबलीयसं वा परेषु प्रयुञ्जीत ॥
एवं पक्षेण मन्त्रेण द्रव्येण च बलेन च ।
सम्पन्नः प्रतिनिर्गच्छेत् परावग्रहमात्मनः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
चतुर्दशोऽध्यायः हीनशक्तिपूरणम्,
आदितो द्वादशशतः ॥

शक्तेरुपचेतुमशक्यतायामाह — **परमिश्र** इति । परेण शत्रुणा सन्धिकरणेन संगतः सन्, परमित्र इति पाठे सन्धिना मित्रीकृतशत्रुः सन्नित्यर्थः, प्रतीकारम् आबलीयसं वा आबलीयसाधिकरणे वक्ष्यमाणं प्रतिविधिं वा, परेषु प्रयुञ्जीत ॥

एवमिति । उक्तेन प्रकारेण, पक्षेण बन्धुमित्रलक्षणेन, मन्त्रेण विद्यावृद्धसंयोगादिना, द्रव्येण च दुर्गसेतुबन्धवणिक्पथाद्युत्पन्नेन, बलेन च श्रेणीप्रवीरपुरुषचोरगणादिरूपेण, सम्पन्नः पूरितशक्तिः विजिगीषुः, आत्मनः, परावग्रहं प्रतिनिर्गच्छेत् शत्र्वभियोगं प्रतिकुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
चतुर्दशोऽध्यायः हीनशक्तिपूरणम्,
आदितो द्वादशोत्तरशततमः ॥

११९,१२०. प्रक. बलवता विगृह्योपरोधहेतवः दण्डोपनतवृत्तं च ।

दुर्बलो राजा बलवताभियुक्तः तद्विशिष्टबलमाश्रयेत, यमितरो मन्त्रशक्त्या नातिसन्दध्यात् ।

तुल्यबलमन्त्रशक्तीनाम् आयत्तसम्पदो वृद्धसंयोगाद् वा विशेषः ।

विशिष्टबलाभावे समबलैस्तुल्यबलसङ्घैर्वा बलवतः सम्भूय तिष्ठेत्, यावन्न मन्त्रप्रभावशक्तिभ्यामतिसन्दध्यात् ।

तुल्यमन्त्रप्रभावशक्तीनां विपुलारम्भतो विशेषः ।

बलवता विगृह्योपरोधहेतव इति सूत्रम् । प्रबलेन शत्रुणा सह विग्रहं कृत्वा उपरोधस्य दुर्गप्रवेशस्य हेतवः कारणानि अभिधीयन्त इति सूत्रार्थः । हीनस्य प्रबलेन शत्रुणा सह सन्धिं कृत्वा शक्तिपूरणं पूर्वमुक्तम् । प्रबलश्चेत् सन्धिं नोपगच्छेत् तदा हीनस्यानुष्ठानप्रकार इदानीमभिधीयते ।

दुर्बलो राजेति । सः, बलवता अभियुक्तः, तद्विशिष्टबलम् अभियोक्त्रपेक्षयोत्कृष्टबलं राजानम्, आश्रयेत । यम्; इतरः अभियोक्ता, मन्त्रशक्त्या, नातिसन्दध्यात् न वञ्चयेत्, तं तद्विशिष्टबलमिति सम्बन्धः ।

तुल्यबलमन्त्रशक्तीनां बहूनां सत्त्वे मन्त्रशक्तियुक्तामात्यादिमन्तमाश्रयेत, मन्त्रशक्तियुक्तामात्यादिमतां बहुत्वे च वृद्धसंयोगवन्तमाश्रयेतेत्यभिप्रायकमाह — तुल्यबलमन्त्रशक्तीनामित्यादि । आयत्तसम्पदो विशेषः आयत्ता अमात्यादयस्तेषां सम्पत् मन्त्रशक्तियोगः तन्निमित्त आश्रयणीयविशेषावसाय इत्यर्थः ।

विशिष्टबलाभाव इति । अभियोक्त्रपेक्षया विशिष्टबलस्यालाभे, बलवतः प्रबलस्याभियोक्तुः, समबलैः तुल्यशक्तिभिः, तुल्यबलसंख्यैर्वा समपरिमाणसैन्यैर्वा बहुभिः सहायैः, सम्भूय तिष्ठेत् शत्रुं प्रतियुध्येत, कियन्तं कालं तिष्ठेत्, यावत्, मन्त्रप्रभावशक्तिभ्यां, नातिसन्दध्यात् न भेदयेत्, अर्थात् स्वसहायान् शत्रुः ।

तुल्यमन्त्रप्रभावशक्तीनामिति । तेषां बहुत्वे, विपुलारम्भतो विशेषः विपुलारम्भत्वलक्षणो व्यतिरेको यस्मिन्नस्ति तमाश्रयेदित्यर्थः । भक्तोपकरणादिसर्वविधयात्रासाधनसम्पन्नो विपुलारम्भ इति प्रागवोचाम ।

समबलाभावे हीनबलैः शुचिभिरुत्साहिभिः प्रत्यनीकभूतैर्बलवतः सम्भूय तिष्ठेत्, यावन्न मन्त्रप्रभावोत्साहशक्तिभिरतिसन्दध्यात् । तुल्योत्साहशक्तीनां स्वयुद्धभूमिलाभाद् विशेषः । तुल्यभूमीनां स्वयुद्धकाललाभाद् विशेषः । तुल्यदेशकालानां युग्यशस्त्रावरणतो विशेषः ।

सहायाभावे दुर्गमाश्रयेत, यत्रामित्रः प्रभूतसैन्योऽपि भक्तयवसेन्धनोदकोपरोधं न कुर्यात्, स्वयं च क्षयव्ययाभ्यां युज्येत ।

तुल्यदुर्गाणां निचयापसारतो विशेषः । निचयापसारसम्पन्नं हि मनुष्यदुर्गमिच्छेदिति कौटल्यः ।

समबलाभावे आह — **समबलाभाव** इति । समबलानामलाभे, बलवतः प्रबलाच्छत्रोः, हीनबलैः, शुचिभिः, उत्साहिभिः, प्रत्यनीकभूतैः परशत्रुभूतैः, बहुभिः सहायैः, सम्भूय तिष्ठेत् शत्रुं प्रार्थयेत । कियन्तं कालं, यावत्, मन्त्रप्रभावोत्साहशक्तिभिः, नातिसन्दध्यात् न भेदयेत्, अर्थात् सहायान् । **तुल्योत्साहशक्तीनामिति** । तेषां बहूनां मध्ये, स्वयुद्धभूमिलाभाद् विशेषः यस्याश्रयणे स्वस्य युद्धयोग्यदेशलाभो भवति तमाश्रयेदित्यर्थः । **तुल्यभूमीनामिति** । तुल्यतथाविधदेशानां बहूनां मध्ये, स्वयुद्धकाललाभाद् विशेषः यस्मिन्नाश्रिते स्वस्य युद्धयोग्यकाललाभो भवति तमाश्रयेदित्यर्थः । **तुल्यदेशकालानामिति** । तथाभूतानां बहूनां सम्भवे, युग्यशस्त्रावरणतो विशेषः गवाश्वोष्ट्रायुधावरणरूपोपकरणसमृद्धिर्यस्यास्ति तमाश्रयेदित्यर्थः ।

सहायाभावे इति । आश्रयणीयस्य कस्याप्यलाभे, दुर्गम्, आश्रयेत । तत् कीदृशं, यत्र यस्मिन्, स्थितस्येति शेषः, प्रभूतसैन्योऽपि, अमित्रः अभियोक्ता, भक्तयवसेन्धनोदकोपरोधं यथापेक्षितभोज्ययवसादिप्रवेशोपघातं, न कुर्यात् । स्वयं च क्षयव्ययाभ्यां युज्येत युग्यपुरुषापचयधनव्ययौ च स्वयं प्राप्नुयादित्यर्थः ।

तुल्यदुर्गाणामिति । यथोक्तगुणानां दुर्गाणां बहूनां सम्भवे, निचयापसारतो विशेषः निचयः स्नेहलवणादेर्नित्योपयोज्यस्य सञ्चयः अपसारो दुर्गनिर्गमनमार्गः ताभ्यां विशेषः । निचयापसारवन्तं दुर्गमाश्रयेतेत्यर्थः । **निचयेत्यादि** । मनुष्यदुर्गं मनुष्याश्रयणीयं दुर्गम् । इति कौटल्य इत्युक्त्यान्येषामाचार्याणां मतमनीदृशमिति सूचयति ।

तदेभिः कारणैराश्रयेत—

'पार्ष्णिग्राहमासारं मध्यममुदासीनं वा प्रतिपादयिष्यामि । सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमेनास्य राज्यं हारयिष्यामि घातयिष्यामि वा । कृत्यपक्षोपग्रहेण वास्य दुर्गे राष्ट्रे स्कन्धावारे वा कोपं समुत्थापयिष्यामि । शस्त्राग्निरसप्रणिधानैरौपनिषदिकैर्वा यथेष्टमासन्नं हनिष्यामि । स्वयमधिष्ठितेन वा योगप्रणिधानेन क्षयव्ययमेनमुपनेष्यामि । क्षयव्ययप्रवासोपतप्ते वास्य मित्रवर्गे सैन्ये वा क्रमेणोपजापं प्राप्स्यामि । वीवधासारप्रसारवधेन वास्य स्कन्धावारावग्रहं करिष्यामि । दण्डोपनयेन वास्य रन्ध्रमुत्थाप्य सर्वसन्दोहेन प्रहरिष्यामि । प्रतिहतोत्साहेन वा यथेष्टं सन्धिमवाप्स्यामि । मयि प्रतिबन्धस्य वा सर्वतः कोपाः समुत्थास्यन्ति । निरासारं वास्य मूलं

तच्च दुर्गं वक्ष्यमाणेषु फलेष्वन्यतममभिसन्धायाश्रयणीयमित्याह— तदेभिरित्यादि । तानि कारणानि 'पार्ष्णिग्राहमि'त्यादिना 'न निर्गमिष्यतीति' इत्यन्तेन महावाक्येन दर्शयति । तदवान्तरवाक्यानि तु षोडश । तेषु च प्रत्येकम् इतिशब्दः सम्बन्धनीयः । तदयमर्थः— पार्ष्णिग्राहं सुहृद्बलं मध्यमम् उदासीनं वा प्रागुक्तलक्षणम् अभियोक्तुः प्रत्यभियोगाय नेष्यामीति चेन्मन्येत तदा दुर्गमाश्रित्य तिष्ठेत् । सामन्तेन आटविकेन अभियोक्तृकुलीनेन वावरुद्धेन राज्यमभियोक्तुर्हारयिष्यामि दाहविलोपाद्युपघातयुक्तं वा कारयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा अभियोक्तुः कृत्यपक्षम् उपायैः स्वायत्तीकृत्य तदीये दुर्गे राष्ट्रे सेनानिवेशे वा बाह्याभ्यन्तरं प्रकृतिकोपमुत्पादयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा शस्त्राग्निरसप्रणिधानेनाबलीयसोक्तेन, औपनिषदिकोक्तैर्वा योगैर्यथेच्छं सन्निकृष्टं हनिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा विस्रब्धघातिपुरुषप्रयोगेण स्वयं कृतेन युग्यपुरुषापचयं धनव्ययं चाभियोक्तारं नेष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा क्षयव्ययप्रवासैरुपतापं प्राप्तेऽभियोक्तुर्मित्रवर्गे सैन्ये वा क्रमेण भेदं प्रयोक्तुं लप्स्ये इति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवाभियोक्तुः स्वदेशागतभक्तोपकरणानां सुहृद्बलस्य यवसेन्धनादेश्च निरोधेन तत्सेनानिवेशपीडामुत्पादयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा

मित्राटवीदण्डैरुद्घातयिष्यामि । महतो वा देशस्य योगक्षेममिहस्थः पालयिष्यामि । स्वविक्षिप्तं मित्रविक्षिप्तं वा मे सैन्यमिहस्थस्यैकस्थमविषह्यं भविष्यति । निम्नखातरात्रियुद्धविशारदं वा मे सैन्यं पथ्याबाधमुक्तमासन्ने कर्मणि करिष्यति । विरुद्धदेशकालमिहागतो वा स्वयमेव क्षयव्ययाभ्यां न भविष्यति । महाक्षयव्ययाभिगम्योऽयं देशो दुर्गाटव्यपसारबाहुल्यात्, परेषां व्याधिप्रायः सैन्यव्यायामानाम् अलब्धभौमश्च, तमापद्गतः प्रवेक्ष्यति । प्रविष्टो वा न निर्गमिष्यति' इति ।

कारणाभावे बलसमुच्छ्रये वा परस्य दुर्गमुन्मुच्यापगच्छेत् ।

स्वसैन्यान् कांश्चिद् अभियोक्तुः स्कन्धावारं गूढं नीत्वा तत्र प्रहारस्थानमुत्पाद्य पश्चात् सर्वसैन्यसमुदयेन गत्वा प्रहरिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा कथञ्चिदभियोक्तुरुत्साहं प्रतिहत्य यथेष्टं सन्धिमवाप्स्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा मद्विषयाभियोगव्यासक्तमभियोक्तारं प्रति सर्वतः सामन्तप्रकोपा उद्भविष्यन्तीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा निरुद्धसुहृद्बलमभियोक्तुः स्थानीयं मित्रसैन्यैराटविकसैन्यैश्चोपहतं करिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा महतो देशस्य योगक्षेमम् इहस्थः पालयितुं शक्ष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा स्वकार्यार्थे मित्रकार्यार्थे चान्यत्र प्रेषितं मम सैन्यमत्रैकीभूय मया सङ्गतं शत्रोरलङ्घनीयं भविष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा निम्नयुद्धे खातयुद्धे रात्रियुद्धे च निपुणं मे सैन्यं पथिगमनश्रममिह दुर्गेऽपनीय कर्म काले प्राप्ते करिष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवाभियोक्ता स्वसैन्याननुकूले देशे काले चेहागतो विनैवास्मद्यत्नं स्वयमेव क्षयव्ययाननुभूय नङ्क्ष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा दुर्गबहुलत्वादटवीप्रायत्वादपसारस्थानबहुलत्वाच्च महान्तं क्षयं व्ययं चानुभवतैवाभिगन्तव्योऽयं देशः, परेषां विदेशागतानां व्याधिजनकः, सैन्यव्यायामयोग्यभूमिरहितश्च, तं परः प्रविशन्नेव विपदं लप्स्यते, कथञ्चित् प्रविष्टो वा न ततः स्वस्तिमान् निर्गमिष्यतीति चेन्मन्येत, तदा दुर्गमाश्रित्य तिष्ठेदिति । एवं तावत् षोडशकारणान्युक्तानि ।

यथोक्तकारणाभावे यत् कर्तव्यं तदाचार्यमतेनाह — **कारणाभाव** इति । यथोक्तकारणविरहे, परस्य शत्रोः, बलसमुच्छ्रये वा सैन्यप्राबल्ये वा

अग्निपतङ्गवदमित्रे वा प्रविशेत् । अन्यतरासिद्धिर्हि त्यक्तात्मनो भवतीत्याचार्याः ।

नेति कौटल्यः । सन्धेयतामात्मनः परस्य चोपलभ्य सन्दधीत । विपर्यये विक्रमेण सिद्धिमपसारं वा लिप्सेत ।

सन्धेयस्य वा दूतं प्रेषयेत् । तेन वा प्रेषितमर्थमानाभ्यां

सति, दुर्गम्, उन्मुच्य त्यक्त्वा, अपगच्छेत् अपसरेत् । **अग्निपतङ्गवदमित्रे वा प्रविशेदिति** । यथा हि शलभोऽग्नौ प्रविशति, तथात्मजीवितनिराशः शत्रौ प्रविशेत्, शत्रुमध्यं प्रविश्य यावच्छक्ति पराक्रमेतेत्यर्थः । न चायं महाबलशत्रुप्रत्यभियोगः प्रत्यभियोक्तुरेकान्तपराजयफलः, किन्तु पाक्षिकं शत्रुजयमप्युपनयति, यथाग्निप्रवेशः शलभस्यैकान्ततो न नाशहेतुः किन्तु अग्निमपि पक्षे निर्वाणं करोति तद्वदित्यभिप्रायेणाह — **अन्यतरसिद्धिर्हीत्यादि** । अन्यतरस्य शत्रुजयात्मविनाशयोरेकतरस्य सिद्धिः ।

आत्मनः परित्राणोपाये सुलभे पाक्षिकमपि नाशमभ्युपगम्य प्रवृत्तेरयुक्तत्वात् तदिदमाचार्यमतं मुख्यतया नोपादेयमित्याह — **नेति कौटल्य इति** । किं तर्हि कारणाभावादावनुष्ठेयमित्याह — **सन्धेयतामात्मनः परस्य चेति** । आत्मनः सन्धेयतां निरपराधत्वलक्षणां परस्य सन्धेयतां धर्मविजयित्वलक्षणां च, यद्वा द्वयोरपि तप्ततत्त्वरूपां सन्धानयोग्यतामित्यर्थः । उपलभ्य, सन्दधीत । विपर्यये सन्धेयत्वाभावे, विक्रमेण सिद्धिम् अग्निपतङ्गवच्छत्रौ प्रवेशनेनान्यतरसिद्धिं, लिप्सेत । सन्धिमिति पाठे तप्तत्वरूपा सन्धानयोग्यता शत्रोर्यथा जायेत तथा विक्रमप्रयोगेण सन्धिं लिप्सेतेत्यर्थः । अपसारं वा लिप्सेत, सन्धेरशक्यत्वे । इत्थं 'बलवता विगृह्योपरोधहेतवः' इतीदं प्रकरणं व्याख्यातम् ।

अथ दण्डोपनतवृत्तमुच्यते — **दण्डोपनतवृत्तमिति सूत्रम्** । दण्डोपनतस्य दण्डेनाधःकृतस्य वृत्तमनुष्ठानमभिधीयत इति सूत्रार्थः । सन्धेयतामित्यादिना सन्धिः कर्तव्यत्वेनोक्तः । तस्य प्रकारान्तराणां ज्यायसा सह कथमप्यसम्भवेऽन्ततस्तस्मिन्नात्मार्पणेन वा सन्धिः कर्तव्य इत्येतदधुनाभिधीयते ।

सन्धेयस्य वेति । वाशब्दः सन्ध्यन्तरासम्भवरूपे पक्षान्तरे । सन्धेयस्य ज्यायसो धर्मविजयिन इति शेषः । दूतं प्रेषयेत् । अथवा, तेन वा

सत्कृत्य ब्रूयात् — इदं राज्ञः पण्यागारम्, इदं देवीकुमाराणां देवीकुमारवचनाद्, इदं राज्यमहं च त्वदर्पणः इति ।

लब्धसंश्रयः समयाचारिकवद् भर्तरि वर्तेत । दुर्गादीनि च कर्माण्यावाहविवाहपुत्राभिषेकाश्वपण्यहस्तिग्रहणसत्रयात्राविहारगमनानि चानुज्ञातः कुर्वीत । स्वभूम्यवस्थितप्रकृतिसन्धिमुपघातमपसृतेषु वा सर्वमनुज्ञातः कुर्वीत । दुष्टपौरजानपदो वा न्यायवृत्तिरन्यां भूमिं याचेत । दूष्यवदुपांशुदण्डेन वा प्रतिकुर्वीत । उचितां वा मित्राद् भूमिं दीय-

---

सन्धेयेन वा, प्रेषितं दूतम्, अर्थमानाभ्यां धनदानपूजनाभ्यां, सत्कृत्य उपचर्य, ब्रूयात् । किमिति, इदं राज्ञः पण्यागारं सन्धेयाय राज्ञेऽर्पणीयं प्राभृतम्, इदं देवीकुमाराणां देवीकुमारवचनाद् इदं प्राभृतं सन्धेयस्य देव्यै कुमारेभ्यश्चास्मद्देवीवचनादस्मत्कुमारवचनाच्चार्पणीयम्, इदं राज्यम् अहं च त्वदर्पणः त्वयि अर्पणं यस्य स त्वदर्पण इत्येतत् पदं राज्येऽपि सम्बन्धनीयं, मयेदं राज्यं तुभ्यमर्पितम् आत्मा च तुभ्यमर्पित इत्यर्थः । इति एवं, ब्रूयादित्यनेन सम्बन्धः ।

लब्धसंश्रय इति । दूतप्रेषणादिनावाप्ताश्रयः, समयाचारिकवत् समयः सेवकधर्मनियमस्तस्याचारः समयाचारस्तद्युक्तः समयाचारिकः सेवकः तद्वद्, भर्तरि ज्यायसि संहिते, वर्तेत । वर्तनप्रकारमेवाह — **दुर्गादीनि च कर्माणी**ति । तानि, आवाहविवाहपुत्राभिषेकादीनि च आवाहः कन्यास्वीकरणं विवाहः कन्यादानं पुत्राभिषेकः यौवराज्याभिषेचनम् अश्वपण्यम् अश्वक्रयः हस्तिग्रहणं गजबन्धनं सत्रं यागः यात्रा पराभियानं विहारगमनम् उद्यानादिक्रीडागमनम् इत्येतान्यष्टौ च, अनुज्ञातः स्वाम्यनुमतः, कुर्वीत । **स्वभूम्यवस्थितप्रकृतिसन्धिमि**ति । स्वभूमौ अवस्थिताभिः प्रकृतिभिः स्वामात्यादिभिः सन्धिम्, अपसृतेषु स्वस्मादपसृत्य परस्मात् प्रत्यागतेषु, उपघातं वा, सर्वम् अनुज्ञातः कुर्वीत । **दुष्टपौरजानपदो** वेति । दुष्टा अन्याय्यवृत्तयः पौरा जानपदाश्च यस्य स तथाभूतो वा, न्यायवृत्तिः न्याय्याचारः, न्यायवृत्तिमिति पाठे भूमेस्तद् विशेषणम् । अन्यां भूमिं याचेत अर्थात् स्वभूमिं वंशपरम्परागतामपि परित्यज्य । दूष्यैस्तुल्यम्, अयाचमान एव वान्यां भूमिं दूष्याहेणोपांशुदण्डेन स्वभूमिगतान् दुष्टान् प्रवासयेदित्याह — **दूष्यवदि**त्यादि । अदुष्ट-

मानां न प्रतिगृह्णीयात् । मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमम-दृश्यमाने भर्तरि पश्येत् । यथाशक्ति चोपकुर्यात् । दैवतस्वस्तिवाचनेषु तत्परा आशिषो वाचयेत् । सर्वत्रात्मनिसर्गं गुणं ब्रूयात् ॥

संयुक्तबलवत्सेवी विरुद्धः शङ्कितादिभिः ।
वर्तेत दण्डोपनतो भर्तर्येवमवस्थितः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे पञ्चदशोऽध्यायः
बलवता विगृह्योपरोधहेतवः दण्डोपनतवृत्तम् ,
आदितस्त्रयोदशशततमः ॥

जानपदामपि भूमिं स्वमित्रादाच्छिद्य स्वामिना दीयमानां न गृह्णीयादित्याह — **उचितां** वेत्यादि । आत्मनो मन्त्रिणं पुरोहितं सेनापतिं युवराजं वा भर्तुः सन्निधौ न पश्येदित्याह — **मन्त्रिपुरोहिते**त्यादि । एतच्च स्वामिसन्निधावात्मनानुष्ठीयमानं भृत्यसमुदाचारमात्मभृत्या मा द्राक्षुरित्येतदर्थमुक्तम् । **यथाशक्ति चोपकुर्या**दिति । स्वशक्त्यनुसारेण यत्किञ्चित् स्वामिने प्राभृतमुपहरेद् दर्शनावसरेषु । **दैवतस्वस्तिवाचने**ष्विति । देवताराधनेषु मङ्गलाह्निकेषु च, तत्पराः भर्तृगोचराः, आशिषः वाचयेत् । **सर्वत्रे**ति । सर्वेषु जनेषु, आत्मनिसर्गं भर्तर्यात्मार्पणं ब्रूयात्, गुणं ब्रूयात् स्वामिगुणांश्च कीर्तयेत् ॥

संयुक्तेत्यादि । एवम् उक्तरीत्या, भर्तरि अवस्थितः, दण्डोपनतः, संयुक्तबलवत्सेवी संयुक्ताः स्वामिसम्बद्धा ये बलवन्तोऽमात्यादयस्तत्सेवी तदनुकूलवृत्तिः, शङ्कितादिभिर्विरुद्धः स्वाम्यसंयुक्तत्वेन ये शङ्किताः आदिग्रहणात स्वामिद्विष्टाश्च ये तैर्विरुद्धश्च, वर्तेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे पञ्चदशोऽध्यायः
बलवता विगृह्योपरोधहेतवो दण्डोपनतवृत्तं च,
आदितस्त्रयोदशोत्तरशततमः ॥

---

१२१. प्रक. दण्डोपनायिवृत्तम् ।

अनुज्ञातस्तद्धिरण्योद्वेगकरं बलवान् विजिगीषमाणो, यतः स्वभूमिः स्वर्तुवृत्तिश्च स्वसैन्यानाम् अदुर्गापसारः शत्रुरपार्ष्णिरनासारश्च, ततो यायात् । विपर्यये कृतप्रतीकारो यायात् ।

सामदानाभ्यां दुर्बलानुपनमयेद्, भेददण्डाभ्यां बलवतः ।

दण्डोपनायिवृत्तमिति सूत्रम् । दण्डेन बलेन शत्रुम् आत्मनः समीपं नयति उपनमयतीति दण्डोपनायी अर्थाद् दण्डोपनामी तदवस्थापन्नस्य विजिगीषोर्वृत्तमुच्यत इति सूत्रार्थः । उपनतवृत्ते निरूपिते उपनमयितृवृत्तस्य निरूपणं प्राप्तावसरमिति सङ्गतिः ।

प्रथममुपनमनस्य हेतुभूतमभियानमाह — **अनुज्ञात** इति । अनुज्ञा अभ्युपगमः ततः पञ्चम्यर्थे तसिः ल्यब्लोपे च पञ्चमी अभ्युपगमं 'सन्धौ त्वया पणितं हिरण्यं ददामी'त्येवमात्मकं विधायेत्यर्थः । प्रथमान्तं वानुज्ञात इति बलवतो विशेषणं 'सन्धौ त्वया पणितं हिरण्यं ददामी'त्यभ्युपगमेन सम्भावित इति तदार्थः । तद्धिरण्योद्वेगकरं तेन हिरण्येन सन्धिपणितेनादत्तेन हेतुनोद्वेगोत्पादकं, यातव्यं, विजिगीषमाणः विजेतुमिच्छन् , बलवान् , ततो यायात् तत्र देशेऽभिगच्छेत् , कुत्र, यतः यत्र गन्तव्ये, स्वसैन्यानां, स्वभूमिः स्वकीया भूमिर्गमनमार्गतया लभ्यते, सा स्वर्तुवृत्तिश्च स्वानुकूलकालयुक्ता स्वयोग्यभक्तोपकरणसम्पन्ना च, शत्रुः, अदुर्गापसारः दुर्गं पार्वतादि अपसारोऽपसरणमार्गः तदुभयरहितः भवति, अपार्ष्णिरनासारश्च आद्यं विजिगीषोर्विशेषणं द्वितीयं शत्रोर्विशेषणं स्वयं पार्ष्णिग्राहरहितः शत्रुस्तु सुहृद्बलरहित इत्यर्थः, यद्वा अपार्ष्णिरित्यपि शत्रोरेव विशेषणं पार्ष्णिशब्देन पार्ष्णिग्राहणरूपप्रतीकारलक्षणात् तद्रहित इत्यर्थः । **विपर्यये कृतप्रतीकारो यायादिति** । उक्तस्वभूम्याद्यभावे शत्रोः सदुर्गापसारत्वादौ च सति तत्तत् प्रतिविधाय गच्छेत् ।

यातव्योपनमनोपायानां विषयनियममाह —**सामदानाभ्यामित्यादि** । एवञ्च दण्डोपनायिवृत्तमिति संज्ञापदे दण्डग्रहणमुपायमात्रोपलक्षणं दण्डस्य प्रायिकत्वज्ञापनार्थं कृतमिति द्रष्टव्यम् ।

नियोगविकल्पसमुच्चयैश्चोपायानामनन्तरैकान्तराः प्रकृतीः साधयेत् ।

ग्रामारण्योपजीविव्रजवणिक्पथानुपालनमुज्झितापसृतापकारिणां चार्पणमिति सान्त्वमाचरेत् । भूमिद्रव्यकन्यादानमभयस्य चेति दानमाचरेत् ।

सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमोपग्रहेण कोशदण्डभूमिदाययाचनमिति भेदमाचरेत् । प्रकाशकूटतूष्णींयुद्धदुर्गलम्भोपायैरमित्रप्रग्रहणमिति दण्डमाचरेत् ।

उपायानुष्ठाननियममाह — **नियोगविकल्पसमुच्चयैश्चेति** । अयमेवोपायोऽस्मिन् पुरुषविशेषेऽनुष्ठेयो नान्य इत्यवधारणं नियोगः अयं वासौ वेति विकल्पः अयं चासौ चेति समुच्चयः । एवमुपायानां नियोगाद्यनुष्ठानैः, अनन्तरैकान्तराः प्रकृतीः अमित्रप्रकृतीः मित्रप्रकृतीश्च, साधयेत् उपनमयेत् ।

दुर्बले सामदानाचरणमाह — **ग्रामारण्येत्यादि** । ग्रामारण्योपजीविनो व्रजस्य गोमहिषादेः वणिक्पथस्य च वारिपथस्थलपथरूपस्य यातव्यसम्बन्धिनः अनुपालनं प्रतिरोधकादितो रक्षणम्, उज्झितापसृतापकारिणामर्पणं च उज्झितानां परचक्रादिभयत्यक्तानाम् अपसृतानां स्वयं प्रनष्टानां दासादीनाम् अपकारिणाम् अपकृत्य गतानां दूष्यादीनां च दुर्बलसम्बन्धिनाम् अन्विष्योपलभ्य प्रदानम्, इति एवंरूपं, सान्त्वं साम, आचरेद् दुर्बलेषु प्रयुञ्जीत । **भूमिद्रव्यकन्यादानमिति** । भूमिदानं द्रव्यदानं कन्यादानं च, अभयस्य च अर्थाद् दानं शत्रुभ्यो भयप्रसङ्गे, इति एवंरूपं, दानम् आचरेत् दानोपायमनुतिष्ठेत् ।

बलवद्विषये भेददण्डयोराचरणमाह — **सामन्तेत्यादि** । सामन्ताटविकौ प्रसिद्धौ तत्कुलीनः यातव्यज्ञातिः, अवरुद्धः यातव्यपुत्रादिर्नियन्त्रितः, इत्येषाम्, अन्यतमोपग्रहेण एकतमस्य स्वायत्तीकरणेन, कोशादियाचनं हिरण्यस्य सैन्यस्य भूमेः दायस्य च याचनम्, इति एवम्प्रकारं, भेदम् आचरेत् । **प्रकाशेत्यादि** । प्रकाशयुद्धं निर्दिष्टदेशकालं युद्धम् अनिर्दिष्टदेशकालं कूटयुद्धं योगगूढोपजापैर्घातनं तूष्णींयुद्धमिति त्रिकं परिपणितापरिपणितापसृतसन्धिप्रकरणलक्षितं दुर्गलम्भोपायो रसदानादिकं वक्ष्यमाणम्, इत्येतैः; अमित्रप्रग्रहणं शत्रुनियन्त्रणम्, इति एवंरूपं, दण्डम् आचरेत् ।

एवमुत्साहवतो दण्डोपकारिणः स्थापयेत्, स्वप्रभाववतः कोशोपकारिणः, प्रज्ञावतो भूम्युपकारिणः ।

तेषां पण्यपत्तनग्रामखनिसञ्जातेन रत्नसारफल्गुकुप्येन द्रव्यहस्तिवनव्रजसमुत्थेन यानवाहनेन वा यद् बहुश उपकरोति तच्चित्रभोगं, यद् दण्डेन कोशेन वा महदुपकरोति तन्महाभोगं, यद् दण्डकोशभूमीरुपकरोति तत् सर्वभोगम् ।

यदमित्रमेकतः प्रतिकरोति तदेकतोभोगि । यदमित्रमासारं चापकरोति तदुभयतोभोगि । यदमित्रासारप्रतिवेशाटविकान् सर्वतः प्रतिकरोति तत् सर्वतोभोगि ।

सामादिभिरुपनमितानां विनियोगमाह — एवमुत्साहवत इत्यादि । एभिः प्रकारैर्नमितेषु मध्ये उत्साहशक्तियुक्तान्, दण्डोपकारिणः निजसैन्योपकारकान्, स्थापयेत् नियोजयेत् । स्वप्रभाववतः कोशसम्पन्नान्, कोशोपकारिणः कोशदानेनोपकर्तॄन्, स्थापयेत् । प्रज्ञावतः मन्त्रशक्तियुक्तान्, भूम्युपकारिणः भूमिविषये कार्ये तत्सारासारत्वावधारणादौ उपकर्तॄन्, स्थापयेत् ।

एवं सामाद्युपायैरुपनमय्य मित्रीकृतानामुपयोगविशेषं तन्निमित्तं संज्ञाभेदं चाह—तेषामिति । दण्डोपनमितानां मध्ये, पण्यपत्तनग्रामखनिसञ्जातेन पणनीयद्रव्यक्रयविक्रयस्थानाद् ग्रामात् सुवर्णाद्युत्पत्तिस्थानाच्च सञ्जातेन, रत्नसारफल्गुकुप्येन रत्नेन मणिमुक्तादिना सारेण चन्दनादिना फल्गुना शङ्खादिना कुप्येन वस्त्रादिना च, द्रव्यहस्तिवनव्रजसमुत्थेन द्रव्यवनाद् हस्तिवनाद् व्रजाच्च सञ्जातेन, यानवाहनेन वा रथादियानैर्गजादिवाहनैश्च वा, यत् मित्रं, बहुशः बाहुल्येन, उपकरोति, तत् मित्रं, चित्रभोगं चित्रा नानाप्रकारा भोगा उपयोगा येनेति व्युत्पत्त्या तदाख्यं भवति । यद् दण्डेन कोशेन वा प्रभूतमुपकारं विधत्ते, तद् महाभोगाख्यमिति, यद् दण्डकोशभूमीर्दत्त्वोपकरोति तत् सर्वभोगमिति च वाक्यद्वयेनाह — यद् दण्डेनेत्यादिना यद् दण्डकोशेत्यादिना च ।

अर्थप्राप्त्युपकारिणो मित्रभेदानभिधायानर्थनिवारणोपकारिण आह—यदिति । यत् मित्रम्, अमित्रम् एकतः एकमेव शत्रुमित्यर्थः प्रतिकरोति, तद् एकतोभोगि तत्संज्ञम् । यत्, अमित्रम्, आसारं च अमित्रस्य मित्रं च, अपकरोति वारयति, तद् मित्रम्, उभयतोभोगि । यद्, अमित्रासारप्रतिवेशाटविकान् अमित्रं शत्रुम् आसारं शत्रुमित्रं प्रतिवेशं पार्श्वस्थं शत्रुम् आटविकम्

पार्ष्णिग्राहश्चाटविकः शत्रुमुख्यः शत्रुर्वा भूमिदानसाध्यः कश्चिदासाद्येत, निर्गुणया भूम्यैनमुपग्राहयेत्, अप्रतिसम्बद्धया दुर्गस्थं, निरुपजीव्ययाटविकं, प्रत्यादेयया तत्कुलीनं, शत्रोरुपच्छिन्नया शत्रोरुपरुद्धं, नित्यामित्रया श्रेणीबलं, बलवत्सामन्तया संहतबलम्, उभाभ्यां युद्धे प्रतिलोमम्, अलब्धव्यायामयोत्साहिनं, शून्ययारिपक्षीयं, कर्शितयापवाहितं, महाक्षयव्ययनिवेशया गतप्रत्यागतम्, अनुपाश्रयया प्रत्यपसृतं, परेणानधिवास्यया स्वयमेव भर्तारमुपग्राहयेत् ।

अटवीपतिं चैत्येतान्, सर्वतः प्रतिकरोति, तत् मित्रं, सर्वतोभोगि तत्संज्ञम् ।

अथ दानोपायप्रयोगे कीदृशी भूमिः कस्मै दातव्येत्याह — **पार्ष्णिग्राहश्चेति** । सः, आटविकः अटवीपतिः, शत्रुमुख्यः शत्रोरमात्यप्रभृतिः, शत्रुर्वा, भूमिदानसाध्यः कश्चिद्, आसाद्येत, चेदिति शेषः, निर्गुणया भूम्या, एनम् उपग्राहयेत् स्वायत्तीकुर्यात् । कथम्भूतं कथम्भूतया, दुर्गस्थम्, अप्रतिसम्बद्धया दुर्गसम्बन्धरहितया दुर्गाद् बहिर्देशान्तरव्यवहितया भूम्या, उपग्राहयेत् । निरुपजीव्यया उपजीवनयोग्यधान्यवापादिरहितया भूम्या, आटविकम्, उपग्राहयेत् । प्रत्यादेयया कार्यान्तेऽपहर्तुमर्हया, तत्कुलीनम् उपग्राहयेत् । शत्रोरुपच्छिन्नया शत्रुसकाशप्रसभाहृतया, शत्रोरुपरुद्धं शत्रुणा नियन्त्रितं तत्पुत्रादिम्, उपग्राहयेत् । नित्यामित्रया चोराटविकादिनित्योपद्रवयुक्तया, श्रेणीबलं जनगणात्मकं नायकरहितं सैन्यविशेषम्, उपग्राहयेत् । बलवत्सामन्तया प्रबलप्रत्यमित्रया, संहतबलं जनसङ्घात्मकं सनायकं सैन्यविशेषम्, उपग्राहयेत् । उभाभ्यां नित्यामित्रया बलवत्सामन्तया चेति द्वाभ्यां भूमिभ्यां, युद्धे प्रतिलोमं कूटकारिणम्, उपग्राहयेत् । अलब्धव्यायामया व्यायामायोग्यया भूम्या, उत्साहिनम् उत्साहशीलम्, उपग्राहयेत् । शून्यया अलभ्यफलया, अरिपक्षीयम्, उपग्राहयेत् । कर्शितया परचक्राटविकाद्युपद्रुतया, अपवाहितं युद्धोपतप्तं, कृतसन्धिभ्रंशितमिति माधवयज्वा, उपग्राहयेत् । महाक्षयव्ययनिवेशया महता पुरुषापचयेन धनव्ययेन च साध्यो निवेशो यस्यां तया, गतप्रत्यागतम्, उपग्राहयेत् । अनुपाश्रयया दुर्गहीनया, प्रत्यपसृतं शत्रुभीत्या स्वदेशादपसृतम्, उपग्राहयेत् । परेणानधिवास्यया स्वभर्तृव्यतिरिक्तेनाधिष्ठातुमशक्यया भूम्या, स्वयमेव भर्तारं यस्तस्या भूतपूर्वो भर्ता तमेवेत्यर्थः, उपग्राहयेत् ।

तेषां महोपकारं निर्विकारं चानुवर्तयेत् । प्रतिलोममुपांशुना साधयेत् । उपकारिणमुपकारशक्त्या तोषयेत् । प्रयासतश्चार्थमानौ कुर्यात् । व्यसनेषु चानुग्रहम् । स्वयमागतानां यथेष्टदर्शनं प्रतिविधानं च कुर्यात् । परिभवोपघातकुत्सातिवादांश्चैषु न प्रयुञ्जीत । दत्त्वा चाभयं पितेवानुगृह्णीयात् । यश्चास्यापकुर्यात् तद्दोषमभिविख्याप्य प्रकाशमेनं घातयेत् । परोद्वेगकारणाद् वा दाण्डकर्मिकवच्चेष्टेत । न च हतस्य भूमिद्रव्यपुत्रदारानभिमन्येत । कुल्यानप्यस्य स्वेषु पात्रेषु स्थापयेत् । कर्मणि मृतस्य पुत्रं राज्ये स्थापयेत् ।

अथ दण्डोपनतेषु तद्वृत्तिभेदेन दण्डोपनायिनः समाचरणभेदानाह—तेषामिति । दण्डोपनतानां मध्ये, महोपकारं, निर्विकारं च, अनुवर्तयेत् उपकारवृत्तेर्निर्विकारवृत्तेश्च विच्छेदो यथा न भवेत् तथा तं नयेत् । प्रतिलोमं प्रतिकूलाचारम्, उपांशुना उपांशुदण्डेन, साधयेत् प्रकाशवधेऽन्ये दण्डोपनता उद्विग्नाः स्युरिति । उपकारिणमुपकारशक्त्या स्वशक्त्यानुगुण्येनोपकर्तारं, तोषयेत् प्रीणयेत् । प्रयासतश्च प्रयासानुगुण्येन च, अर्थमानौ धनदानं सत्कारं च, तेषां कुर्यात् । अर्थमाने इत्यपपाठः । व्यसनेषु च बन्धुविपत्त्यादिशोकेषु च, अनुग्रहं परिसान्त्वनादिरूपं, कुर्यात् । स्वयमागतानाम् अनाहूतागतानां, यथेष्टदर्शनं यथेच्छं दर्शनं, कुर्यात् अनुरागार्थम् । प्रतिविधानं च कुर्यात् तेभ्यः शङ्क्यमानादपायादात्मनो रक्षार्थं संविधानं च कुर्यात् । परिभवेत्यादि । परिभवोऽनादरः उपघातो दोषवचनं कुत्सा निन्दा अतिवादोऽतिस्तुतिः इत्येतांश्च, एषु दण्डोपनतेषु विषये, न प्रयुञ्जीत । दत्त्वा चाभयं भयस्थानप्राप्तौ पितेव अनुगृह्णीयात् । यश्च दण्डोपनतः, अस्य विजिगीषोः, अपकुर्यात्, तद्दोषं तदपराधम्, अभिविख्याप्य, एनम् अपराधिनं, प्रकाशं घातयेत् । परोद्वेगकारणाद् वा तत्प्रकाशवधेनान्येषां दण्डोपनतानामुद्वेगः स्यादिति शङ्कारूपकारणसत्त्वे वा, दाण्डकर्मिकवत् दाण्डकर्मिकप्रकरणोक्तविधानतुल्यं, चेष्टेत उपांशुदण्डं प्रयुञ्जीतेत्यर्थः । न चेति । हतस्य, भूमिद्रव्यपुत्रदारान्, न च अभिमन्येत स्वत्वाभिमानविषयान् न कुर्यात्, स्वयं नापहरेदित्यर्थः । किं तर्हि कुर्यात्, अस्य हतस्य कुल्यानपि अपिशब्दात् पुत्रादीनपि, स्वेषु पात्रेषु स्वस्वोचितेषु राजादिस्थानेषु, स्थापयेत् । कर्मणि उपनाय्यर्थे युद्धे, मृतस्य, पुत्रं, राज्ये पितृसम्बन्धिनि, स्थापयेत् ।

एवमस्य दण्डोपनताः पुत्रपौत्राननुवर्तन्ते ।

यस्तूपनतान् हत्वा बद्ध्वा वा भूमिद्रव्यपुत्रदारानभिमन्येत, तस्योद्विग्नं मण्डलम् अभावायोत्तिष्ठते । ये चास्यामात्याः स्वभूमिष्वायत्तास्ते चास्योद्विग्ना मण्डलमाश्रयन्ते । स्वयं वा राज्यं, प्राणान् वास्याभिमन्यन्ते ॥

स्वभूमिषु च राजानस्तस्मात् साम्नानुपालिताः ।
भवन्त्यनुगुणा राज्ञः पुत्रपौत्रानुवर्तिनः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
षोडशोऽध्यायः दण्डोपनायिवृत्तम्,
आदितश्चतुर्दशशततमः ॥

उपदिष्टवर्त्मनानुष्ठाने दण्डोपनताः विजिगीषुं न केवलं तत्पुत्रपौत्रानप्यनुसरन्तीत्याह — एवमस्येत्यादि ।

उपदिष्टविपरीतानुष्ठायिनो दण्डोपनायिनो दोषमाह — यस्त्वित्यादि । यस्तु, विजिगीषुः, उपनतान्, दण्डप्रणतान्, हत्वा, बद्ध्वा वा बन्धनागारं नीत्वा वा, भूमिद्रव्यपुत्रदारान् उपनतसम्बन्धिनः, अभिमन्येत आत्मसात् कुर्यात्, तस्य उद्विग्नं तं प्रति कुपितं सत्, मण्डलं द्वादशराजकम्, अभावाय तस्य नाशाय, उत्तिष्ठते उद्युङ्क्ते । ये च अस्य विजिगीषोः, अमात्याः, स्वभूमिषु, आयत्ताः व्यापृताः, ते च अस्योद्विग्नाः, मण्डलम् उत्तिष्ठमानं राजमण्डलम्, आश्रयन्ते विजिगीषोरपकारार्थम् । स्वयं वा, अस्य राज्यम्, अभिमन्यन्ते ममकारविषयं कुर्वन्ति, एनं बद्ध्वेत्यार्थम् । अस्य प्राणान् वाभिमन्यन्ते आत्मसात्कुर्वन्ति हरन्तीत्यर्थः ॥

अध्यायप्रान्ते श्लोकमाह — स्वभूमिषु चेति । तस्मात् पूर्वोक्तात् कारणात्, स्वभूमिषु च राजानः स्वीयास्वनन्यदत्तासु भूमिषु राज्यं भुञ्जन्तः चकाराद् विजिगीषुदत्तराज्यभुजश्च राजानः, साम्ना अनुपालिताः विजिगीषुणा रक्षिताः, राज्ञः विजिगीषोः, अनुगुणाः, पुत्रपौत्रानुवर्तिनः पुत्रान् पौत्रांश्च सानुरागमनुसरन्तीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
षोडशोऽध्यायः दण्डोपनायिवृत्तम्,
आदितश्चतुर्दशोत्तरशततमः ॥

१२२,१२३. प्रक. सन्धिकर्म, सन्धिमोक्षश्च ।

शमः सन्धिः समाधिरित्येकोऽर्थः । राज्ञां विश्वासोपगमः शमः सन्धिः समाधिरिति ।

'सत्यं शपथो वा चलः सन्धिः । प्रतिभूः प्रतिग्रहो वा स्थावरः' इत्याचार्याः ।

नेति कौटल्यः । सत्यं शपथो वा परत्रेह च स्थावरः सन्धिः, इहार्थ एव प्रतिभूः प्रतिग्रहो वा बलापेक्षः ।

सन्धिकर्मेति सूत्रम् । सन्धेः कर्म विश्वासार्थं सत्यशपथादिना दृढीकरणं सन्धिकर्म, तदुच्यत इत्यर्थः । पणबन्धः सन्धिः पूर्वमुक्तः । स कृतोऽपि अदृढीकृतोऽकृत एवेति तस्य दृढीकरणमधुनोच्यते ।

शम इत्यादि । शमः सन्धिः समाधिरित्येतैः शब्दैरेक एवार्थोऽभिधीयत इत्यर्थः । कोऽसावर्थ इत्याह—राज्ञां विश्वासोपगम इत्यादि । सन्धिकारिणां, विश्वासोपगमः विश्वासः पणबन्धविषयो निश्चय उपगम्यतेऽनेनेति विश्वासोपगमः सत्यशपथप्रतिभूप्रतिग्रहान्यतमरूपोऽर्थः, शमः सन्धिः समाधिरित्युच्यते ।

सत्यादिचतुष्टये चलस्थावरविभागमाचार्यमतेनाह—सत्यमिति । सत्यम् 'इदमेवमेव नान्यथा भविष्यती'ति वचनमात्रं कार्तयुगैर्जनैर्बहुलमादृतं, शपथो वा पितृपादसुवर्णादिस्पर्शपूर्वमर्थवचनं च, चलः अस्थायी अनतिविश्वास्य इत्यर्थः । सन्धिः सन्धिशब्दः संश्लेषे तद्धेतौ च वर्तते । प्रतिभूः अव्यतिक्रमप्रातिभाव्यवाही, प्रतिग्रहो वा वचनविश्वासार्थमर्पितः पुत्रादिश्च, प्रतिभूकृतः प्रतिग्रहकृतश्च सन्धिरित्यर्थः, स्थावरः स्थायी अत्यन्तविश्वसनीय इत्यर्थः । इत्याचार्याः, मन्यन्त इति शेषः ।

आचार्यमतप्रतिलोमं स्वमतमाह—नेति कौटल्य इत्यादि । ययोश्चलत्वमुक्तं तौ सत्यशपथौ प्रत्युत स्थावरौ, यतो व्यतिक्रान्तौ परलोके नरकपातमिह लोके शिष्टासंव्यवहार्यतां च प्रयोजयत इत्यभिप्रायः । इहार्थ एवेत्यादि । इहार्थ एव इहलोकप्रयोजनक एव । अयं भावः — ययोः स्थावरत्वमुक्तं तौ प्रतिभूप्रतिग्रहौ प्रत्युत चलौ, यतो व्यतिक्रान्ताविहलोके केवलमसंव्यवहार्यत्वलक्षणमनर्थं जनयतो न तु परलोके कञ्चित् । किञ्च तौ बलापेक्षौ — प्रतिभूर्हि यदि बलवांस्तदा विश्वसनीयो भवति प्रतिग्रहश्च तदाधातृप्रेमपात्रं चेद् विश्वसनीयो नान्यथेति ।

'संहिताः स्मः' इति सत्यसन्धाः पूर्वे राजानः सत्येन सन्दधिरे।

तस्यातिक्रमे शपथेन अग्न्युदकसीताप्राकारलोष्टहस्तिस्कन्धाश्वपृष्ठरथोपस्थशस्त्ररत्नबीजगन्धरससुवर्णहिरण्यान्यालेभिरे — हन्युरेतानि त्यजेयुश्चैनं यः शपथमतिक्रामेद् इति।

शपथातिक्रमे महतां तपस्विनां मुख्यानां वा प्रातिभाव्यबन्धः प्रतिभूः। तस्मिन् यः परावग्रहसमर्थान् प्रतिभुवो गृह्णाति, सोऽतिसन्धत्ते। विपरीतोऽतिसन्धीयते।

बन्धुमुख्यप्रग्रहः प्रतिग्रहः। तस्मिन् यो दूष्यामात्यं दूष्यापत्यं वा ददाति सोऽतिसन्धत्ते। विपरीतोऽतिसन्धीयते। प्रतिग्रहग्रहणविश्वस्तस्य हि परः छिद्रेषु निरपेक्षः प्रहरति।

सत्यादिषु पूर्वपूर्वातिलङ्घनाद् गुणदोषकृतादुत्तरोत्तरस्यापेक्षणीयत्वप्राप्तिं कथयंस्तेषां लक्षणमाह — संहिताः स्म इतीत्यादि। सत्यसन्धाः पूर्वे अवितथप्रतिज्ञा नलादयः।

तस्यातिक्रम इति। सत्यस्यावितथार्थवचनलक्षणस्यातिलङ्घने, अग्न्यादीनि आलेभिरे अग्न्यादीनि चतुर्दश पस्पृशुः। तानि च अग्निः, उदकं, सीता लाङ्गलपद्धतिस्तया भूमिर्लक्ष्यते, प्राकारलोष्टः, हस्तिस्कन्धः, अश्वपृष्ठं, रथोपस्थं, शस्त्रं, रत्नं, बीजं शाल्यादिधान्यबीजं, गन्धश्चन्दनादिः, रसः, सुवर्णं हेम, हिरण्यं नाणकः, इत्येवं चतुर्दश। हन्युरेतानीत्यादि। अग्न्याद्यालम्भनपूर्वशपथकर्तारं शपथातिक्रमेऽग्न्यादीनि नानुगृह्णीयुरिति विश्वासादित्यर्थः।

शपथातिक्रम इति। शपथस्य अग्न्याद्यालम्भनपूर्वार्थवचनलक्षणस्य कालदोषात् पुरुषदोषाच्च अतिक्रमे जायमाने, महतां तपस्विनां, मुख्यानां वा ग्रामादिप्रधानानां वा, प्रातिभाव्यबन्धः प्रतिभूत्वेन नियमनं प्रतिभूः प्रतिभूसंज्ञं विश्वासस्थानम्। तस्मिन्निति। प्रातिभाव्यबन्धे, यः, परावग्रहसमर्थान् परेषां प्रतिज्ञातार्थत्यागिनां निग्रहणे शक्तान्, प्रतिभुवः, गृह्णाति, सः, अतिसन्धत्ते वञ्चयति परम्, विपरीतः परावग्रहासमर्थप्रतिभूग्राही, अतिसन्धीयते वञ्च्यते, परेण।

बन्धुमुख्यप्रग्रह इति। बन्धुमुख्यानां परकीयानां प्रग्रहः परवचनविश्वासार्थमाधित्वेन ग्रहणं, प्रतिग्रहः। तस्मिन्निति। प्रतिग्रहे, यः, दूष्यामात्यं दूष्यममात्यं, दूष्यापत्यं वा दूष्यमपत्यं वा, ददाति आधीकरोति, सः

अपत्यसमाधौ तु । कन्यापुत्रदाने ददत् तु कन्यामतिसन्धत्ते । कन्या ह्यदायादा परेषामेवार्थाय क्लेशाय च । विपरीतः पुत्रः ।

पुत्रयोरपि जात्यं प्राज्ञं शूरं कृतास्त्रमेकपुत्रं वा ददाति, सोऽतिसन्धीयते । विपरीतोऽतिसन्धत्ते । जात्यादजात्यो हि लुप्तदायादसन्तानत्वादाधातुं श्रेयान् । प्राज्ञादप्राज्ञो मन्त्रशक्तिलोपात् । शूरादशूर उत्साहशक्तिलोपात् । कृतास्त्रादकृतास्त्रः प्रहर्तव्यसम्पल्लोपात् । एकपुत्रादनेकपुत्रो निरपेक्षत्वात् ।

अतिसन्धत्ते अर्थादाधिग्राहिणम् । विपरीतः दीयमानतथाविधाधिग्राही, अतिसन्धीयते । अतिसन्धानप्रकारमाह—प्रतिग्रहग्रहणविश्वस्तस्य हीति । 'परस्मात् प्रतिग्रहो मया गृहीत' इति विस्रम्भेण स्थितस्य हि विजिगीषोः, छिद्रेषु, परः शत्रुः, निरपेक्षः स्वदत्तप्रतिग्रहनिरादरः, प्रहरति ।

अपत्यसमाधौ त्विति । अपत्यप्रतिग्रहविषये विशेष उच्यत इति शेषः । कन्यापुत्रदान इति । कन्यायाः पुत्रस्य च दानप्रसङ्गे, कन्यां ददत्, अतिसन्धत्ते । कुत इत्याह—कन्या हीति । सा हि, अदायादा अदायहरा, परेषामेव, अर्थाय प्रयोजनाय परोपभोग्यत्वात्, क्लेशाय च धनव्ययादिद्वारेण पितुर्दुःखाय च, भवति । पुत्रः, विपरीतः दायादः पितुः स्वार्थाय क्लेशशान्तये च कल्पत इत्यर्थः ।

सन्ध्यर्थं परस्परपुत्राधाने विशेषमाह—पुत्रयोरपीति । पुत्रद्वयमध्ये, जात्यं समानजातीयं, प्राज्ञं, शूरं, कृतास्त्रम् अस्त्रविद्याशिक्षितम्, एकपुत्रं वा ददाति यः सः अतिसन्धीयते । विपरीतः अजात्याप्राज्ञादिपुत्रदायी, अतिसन्धत्ते । अजात्याद्याधानस्य श्रेयस्त्वं समर्थयते — जात्यादिति । समानजातीयात्, अजात्यो हि, लुप्तदायादसन्तानत्वात् राज्यहरसन्तानरहितत्वाद्धेतोः, आधातुं श्रेयान् आधीयमान आधातुः श्रेयस्कर इत्यर्थः । प्राज्ञादप्राज्ञ इत्यादि । वाक्यत्रयं स्पष्टार्थम् । तत्र प्रहर्तव्यसम्पल्लोपादित्यस्य प्रहरणसाधनगुणसमृद्धिविरहादित्यर्थः । एकपुत्रादिति । एकेन पुत्रेण युक्तो यः पुत्रमाधत्ते, तदपेक्षया, अनेकपुत्रः अनेकैः पुत्रैर्युक्तो यस्तदन्यतमं पुत्रमाधत्ते सः, श्रेयान् अतिसन्धाता भवतीत्यर्थः । कुतः, निरपेक्षत्वात् पुत्रान्तरसत्त्वेनाधीयमानपुत्रनिरादरत्वादित्यर्थः । अथवा एकपुत्रादित्यादेरयमर्थः — एकपुत्रादिति । एक एव पुत्र एकपुत्रः तस्मात् तदपेक्षया, अनेकपुत्रः एकपुत्रभिन्नः

जात्यप्राज्ञयोर्जात्यमप्राज्ञमैश्वर्यप्रकृतिरनुवर्तते । प्राज्ञमजात्यं मन्त्राधिकारः । मन्त्राधिकारेऽपि वृद्धसंयोगाज्जात्यकः प्राज्ञमतिसन्धत्ते ।

प्राज्ञशूरयोः प्राज्ञमशूरं मतिकर्मणां योगोऽनुवर्तते । शूरमप्राज्ञं विक्रमाधिकारः । विक्रमाधिकारेऽपि हस्तिनमिव लुब्धकः प्राज्ञः शूरमतिसन्धत्ते ।

शूरकृतास्त्रयोः शूरमकृतास्त्रं विक्रमव्यवसायोऽनुवर्तते । कृतास्त्रमशूरं लक्षलम्भाधिकारः । लक्षलम्भाधिकारेऽपि स्थैर्यप्रतिपत्त्यसंमोषैः शूरः कृतास्त्रमतिसन्धत्ते ।

अर्थाद् बहुपुत्रान्यतमः, आधातुं श्रेयान् आधीयमान आधातुः श्रेयस्करः, कुतः निरपेक्षत्वात् स्वपित्रा पुत्रान्तरयुक्तेनोपेक्ष्यमाणत्वादिति ।

अथ जात्यादिषूत्तरोत्तरापेक्षया पूर्वपूर्वस्यातिशयं समर्थयते— **जात्यप्राज्ञयोरिति** । तयोर्मध्ये, जात्यम् , अप्राज्ञम् , ऐश्वर्यप्रकृतिः राज्यस्वामित्वम् , अनुवर्तते । अतश्च राज्यदायहरत्वं तस्य गुणः । प्राज्ञम् अजात्यं, मन्त्राधिकारः मन्त्रशक्तिः, अनुवर्तते । अतश्च मन्त्रशक्तियुक्तत्वं तस्य गुणः । एवमुभयोः पृथग्गुणसत्त्वे विशेषमाह — **मन्त्राधिकारेऽपीति** । प्राज्ञस्य मन्त्रशक्तियोगे सत्यपि, जात्यकः जन्मसिद्धराज्यस्वामिभावः, वृद्धसंयोगाद् विद्यावृद्धसंयोगं प्राप्य, प्राज्ञम् , अतिसन्धत्ते अतिशेते । जात्यो वृद्धोपासनया प्राज्ञगुणं मन्त्राधिकाररूपमर्जयितुं शक्नोति प्राज्ञस्तु जात्यगुणं राज्यार्हत्वलक्षणं नार्जयितुं शक्नोतीत्यभिप्रायः ।

प्राज्ञशूरयोर्गुणकथनपूर्वं विशेषमाह — **प्राज्ञशूरयोरित्यादि** । मतिकर्मणां योगः बुद्धिमत्कर्मसम्बन्धः । विक्रमाधिकारः पराक्रमोद्योगः । हस्तिनमिव लुब्धक इति बुद्धियोगमाहात्म्यस्य दृष्टान्तप्रदर्शनम् ।

शूरकृतास्त्रयोर्गुणमाह — **शूरकृतास्त्रयोरिति** । तयोर्मध्ये, शूरम् अकृतास्त्रम् अशिक्षितास्त्रं, विक्रमव्यवसायः पराक्रमोद्योगः, अनुवर्तते । कृतास्त्रम्, अशूरं , लक्षलम्भाधिकारः अस्त्रस्य यथालक्ष्यप्रापणशक्तिः, अनुवर्तते । विशेषमाह — **लक्षलम्भाधिकारेऽपीति** । तत्सत्त्वेऽपि, स्थैर्यप्रतिपत्त्यसंमोषैः स्थैर्यं निष्कम्पत्वं प्रतिपत्तिः सङ्कटे सद्यःक्रियानुष्ठानम् असंमोषः असंमोहः आत्मरक्षणावधानम् इत्येतैर्गुणैः, शूरः, कृतास्त्रम् , अतिसन्धत्ते अतिशेते ।

बह्वेकपुत्रयोर्बहुपुत्र एकं दत्त्वा शेषवृत्तिस्तब्धः सन्धिमतिक्रामति नेतरः ।

पुत्रसर्वस्वदाने सन्धिश्चेत् पुत्रफलतो विशेषः । समफलयोः शक्तप्रजननतो विशेषः । शक्तप्रजननयोरप्युपस्थितप्रजननतो विशेषः ।

शक्तिमत्येकपुत्रे तु लुप्तपुत्रोत्पत्तिरात्मानमादध्यात्, न चैकपुत्रमिति ।

बह्वेकपुत्रयोरित्यादि । बहुपुत्रैकपुत्रयोर्मध्ये, बहुपुत्रः, एकम् अन्यतमं पुत्रं, दत्त्वा सन्ध्यर्थम् आधाय, शेषवृत्तिस्तब्धः अवशिष्टपुत्रसद्भावदृप्तः सन्, शेषप्रतिस्तब्ध इत्यपि पाठः । सन्धिम् अतिक्रामति लङ्घयति, इतरः एकपुत्रः, नातिक्रामति । अतो बहुपुत्र एकपुत्रमतिशेत इत्यभिप्रायः । पूर्वम् 'एकपुत्रादनेकपुत्रो निरपेक्षत्वाद्' इत्याधेयस्याधेयान्तरापेक्षया विशेष उक्तः । इह तु आधेयगतविशेषद्वारक एवाधातुराधात्रन्तरापेक्षया विशेष उच्यते मन्दबुद्धिप्रबोधनार्थम् ।

उभयोरेकपुत्रत्वे विशेषमाह — पुत्रसर्वस्वदान इति । पुत्रसर्वस्वमेकः पुत्रः तस्य दाने, सन्धिश्चेत्, पुत्रफलतो विशेषः पुत्रस्य फलं पुत्रवत्ता तत्कृतो विशेषः । अयमाशयः— स चेदेकः पुत्रः पुत्रवान् भवेत् तं दद्यात् कदाचित् सन्ध्यतिक्रमेण तदपायेऽपि तत्पुत्रस्य राज्यैश्वर्यभोगयोग्यस्य स्थितत्वेन दातुरत्यन्तहान्यभावात् । अपुत्रैकपुत्रदातुस्तु हानिरेवेति । सपुत्रैकपुत्रत्वे द्वयोः समाने गर्भोत्पादनशक्तियुक्तस्य पुत्रस्य तच्छक्तिहीनपुत्रापेक्षया गुणातिशय इत्याह — समफलयोरित्यादि । शक्तप्रजननतः शक्तं स्वशक्तिविषयभूतं प्रजननं गर्भोत्पादनं यस्य स शक्तप्रजननः ततः तस्येत्यर्थः । शक्तप्रजननयोरिति । उभयोरपि एकपुत्रयोः गर्भोत्पादनशक्तिमतोः सतोः, उपस्थितप्रजननतो विशेषः आसन्नगर्भोत्पादनस्य गुणातिशयः, अतश्च स न देय इत्यर्थः ।

शक्तिमत्येकपुत्रे त्विति । पुत्रोत्पादनशक्ते राज्यभारवहनशक्ते वा एकस्मिन्नेव पुत्रे विद्यमाने, लुप्तपुत्रोत्पत्तिः स्वयं पुत्रोत्पादनशक्तिहीनः, आत्मानम्, आदध्यात् आधीकुर्यात् । न चैकपुत्रं न त्वेकं पुत्रमादध्यात् । इतिशब्दः सन्धिकर्मप्रकरणसमाप्तिद्योतकः ।

अभ्युच्चीयमानः समाधिमोक्षं कारयेत् ।

कुमारासन्नाः सत्रिणः कारुशिल्पिव्यञ्जनाः कर्माणि कुर्वाणाः सुरुङ्गया रात्रावुपखानयित्वा कुमारमपहरेयुः । नटनर्तकगायनवाद-कवाग्जीवनकुशीलवप्लवकसौभिका वा पूर्वप्रणिहिताः परमुपतिष्ठेरन् । ते कुमारं परम्परयोपतिष्ठेरन् । तेषामनियतकालप्रवेशस्थाननिर्गमनानि स्थापयेत् । ततस्तद्व्यञ्जनो वा रात्रौ प्रतिष्ठेत ।

सन्धिमोक्ष इति सूत्रम् । सन्ध्यर्थमाहितः पुत्रादिरिह सन्धिरित्युपचर्यते तस्य मोक्षः मोचनोपाय उच्यत इति सूत्रार्थः । सन्धेर्दृढीकरणमुक्तं, मोचनमिदानीमभिधीयत इति सङ्गतिः ।

अभ्युच्चीयमान इति । सन्धिवशादुपचितशक्तिसिद्धिः, समाधिमोक्षं शत्रुविजिगीषुभ्यां सम्भूयोभयसंवादेन विश्वासार्थमाहितः समाधिः तस्य मोक्षं, कारयेद् अनुतिष्ठेत् ।

मोक्षोपायमाह — **कुमारे**त्यादि । कुमारासन्नाः आहितस्य कुमारस्य आसन्नाः, सत्रिणः गूढपुरुषाः, कारुशिल्पिव्यञ्जनाः कारवस्तक्षायस्कारादयः शिल्पिनः स्वर्णकारादयः तद्वेषाः, भूत्वेति शेषः, कर्माणि शकटभूषणादीनि, कुर्वाणाः, सुरुङ्गया भूम्यन्तस्तिर्यक्खातवर्त्मना, रात्रौ उपखानयित्वा सुरुङ्गाप्रवेशद्वारं कुमारगृहसमीपे कारयित्वा, कुमारम्, अपहरेयुः । अन्यमपहरणोपायमाह — **नटनर्तके**त्यादि । नटादयोऽष्टौ वा तत्र नटोऽभिनयविचक्षणः नर्तको गात्रविक्षेपमात्रकर्ता गायनो गीतज्ञः वादको वाद्यनिपुणः वाग्जीवनः कथोपजीवी कुशीलवः श्लोकपाठकः प्लवकः खड्गाग्रनर्तकः सौभिकः आकाशयानिकः, पूर्वप्रणिहिताः प्रागेव विजिगीषुणा प्रणिहिताः, परं शत्रुम्, उपतिष्ठेरन् आश्रयेयुः । ते तथा परमाश्रित्य तिष्ठन्तः, कुमारम् आधिभूतं, परम्परया क्रमेण, उपतिष्ठेरन् स्वविद्यया राजामात्यादिप्रीत्युत्पादनद्वारेण उपसमागच्छेयुः । तेषां नटादीनां तथोपतिष्ठमानानाम्, अनियतकालप्रवेशस्थाननिर्गमनानि यथेप्सिते काले स्ववासगृहे प्रवेशम् अवस्थानं ततो निष्क्रमणं च, स्थापयेद् राजानुज्ञया व्यवस्थापयेत्, अर्थात् कुमारः । ततः, तद्व्यञ्जनो वा नटाद्यन्यतमवेषधारी च भूत्वा, रात्रौ प्रतिष्ठेत नटादिभिः सह निर्गत्य स्वदेशं प्रयायात् ।

तेन रूपाजीवाभार्याव्यञ्जनाश्च व्याख्याताः ।

तेषां वा तूर्यभाण्डफेलां गृहीत्वा निर्गच्छेत् ।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारकैर्वा द्रव्यवस्त्रभाण्डफेलाशयनासनसम्भोगैर्निर्ह्रियेत ।

परिचारकच्छद्मना वा किञ्चिदरूपवेलायामादाय निर्गच्छेत् । सुरङ्गामुखेन वा निशोपहारेण । तोयाशये वा वारुणं योगमातिष्ठेत् ।

वैदेहकव्यञ्जना वा पक्वान्नफलव्यवहारेणारक्षिषु रसमवचारयेयुः ।

नटाद्यन्यतमव्यञ्जनतया निर्गमकथनेन रूपाजीवाव्यञ्जनतया भार्याव्यञ्जनतया च निर्गमनं व्याख्यातप्रायमित्याह—**तेन रूपाजीवेत्यादि ।**

उपायान्तरमाह — **तेषां वेति ।** नटनर्तकादीनां वा, तूर्यभाण्डफेलां तूर्यफेलां वादित्रपेटीं भाण्डफेलाम् आभरणपेटीं च, गृहीत्वा निर्गच्छेद्, अर्थात् तत्कलाप्रदर्शनसमाप्तौ ।

अन्यमुपायमाह — **सूदारालिकेत्यादि ।** सूदादयोऽष्टौ तत्र सूदः सूपकारः आरालिको भक्ष्यकारः स्नापको मज्जनादिकारयिता संवाहकोऽङ्गमर्दकः आस्तरकः शयनचिन्तकः कल्पको नापितः प्रसाधकोऽलङ्कर्ता उदकपरिचारकः उदकदानाधिकृतः एतैर्वा कर्तृभिः, द्रव्यवस्त्रादिसंभोगैः द्रव्यं निहतच्छागादि वस्त्रं प्रसिद्धं भाण्डफेला भूषणपेटी शयनं शयनीयम् आसनम् इत्येतेषां सम्भोगैः सम्भुक्तैर्द्रव्यादिभिर्बहिर्निर्ह्रियमाणैः सहेत्यर्थः, निर्ह्रियेत बहिर्नीयेत, कुमारः ।

उपायान्तरमाह — **परिचारकच्छद्मना वेति ।** परिचारकव्याजेन वा, किञ्चिद् द्रव्यं परिचारकग्रहणोचितम्, अरूपवेलायाम् अग्राह्यरूपायां सान्धकारायां वेलायाम्, आदाय स्वयं गृहीत्वा, निर्गच्छेत् । प्रकारान्तरमाह — **सुरङ्गामुखेन वा निशोपहारेणेति ।** रात्रौ भूतबलिदानापदेशेन द्रष्टृजनसान्निध्यं परिहृत्य सुरङ्गाद्वारेण निर्गच्छेत् । प्रकारान्तरमाह — **तोयाशये वेत्यादि ।** नदनदीसरोरूपे महति जलाशये वा, वारुणं योगम् आतिष्ठेद् 'उदकवस्तिना जरायुणा वा शिरोवगूढनास' इत्यादिना दुर्गलम्भोपाये वक्ष्यमाणम् उदकान्तस्सञ्चरणलक्षणमुपायमाश्रित्य निर्गच्छेदित्यर्थः ।

वैदेहकव्यञ्जना वेति । वणिग्वेषा वा, आरक्षिषु पक्वान्नफलव्यव-

दैवतोपहारश्राद्धप्रहवणनिमित्तमारक्षिषु मदनयोगयुक्तमन्नपानरसं वा प्रयुज्यापगच्छेत् । आरक्षकप्रोत्साहनेन वा ।

नागरककुशीलवचिकित्सकापूपिकव्यञ्जना वा रात्रौ समृद्धगृहाण्यादीपयेयुः । (आरक्षिणां ?) वैदेहकव्यञ्जना वा पण्यसंस्थामादीपयेयुः ।

अन्यद्वा शरीरं निक्षिप्य स्वगृहमादीपयेदनुपातभयात् । ततः सन्धिच्छेदखातसुरङ्गाभिरपगच्छेत् ।

काचकुम्भभाण्डभारव्यञ्जनो वा रात्रौ प्रतिष्ठेत । मुण्डजटिलानां

हारेण आरक्षिपुरुषेषु पक्वान्नफलविक्रयवृत्त्या युक्ताः, रसं विषं विषयुक्तमन्नादिकम्, अवचारयेयुः आरक्षिपुरुषान् खादयेयुः । तेषु मोहमुपगतेषु कुमारो निर्गच्छेदित्यभिप्रायः ।

दैवतोपहारश्राद्धप्रहवणनिमित्तमिति । दैवतोपहारनिमित्तं श्राद्धनिमित्तं प्रहवणनिमित्तं प्रहवणं तुष्टिभोजनं तन्निमित्तं च अर्थाद् देवतोपहाराद्युपयुक्तशेषम्, अन्नपानरसं वा, मदनयोगयुक्तम् आरक्षिषु प्रयुज्य मदकरद्रव्ययुक्तं कृत्वा रक्षिपुरुषान् खादयित्वा, अपगच्छेत् कुमारः । **आरक्षकप्रोत्साहनेन वेति** । अथवा रक्षिपुरुषान् धनदानेन प्रभूतधनदानप्रतिज्ञया वा सन्तोष्य वापगच्छेदित्यर्थः ।

नागरककुशीलवेत्यादि । नगररक्षिप्रभृतयो ये रात्र्यभ्यनुज्ञातपुरसञ्चारास्तद्वेषा वा, रात्रौ धनिकगृहाण्यग्निनादीपयेयुः । **वैदेहकव्यञ्जना वेति** । तद्वेषा वा, पण्यसंस्थाम् आपणशालाम्, आदीपयेयुः । तन्निमित्ते जनव्याकुलीभावे वर्तमाने कुमारो निर्गच्छेदित्यर्थः ।

उपायान्तरमाह — **अन्यद्वेति** । अन्यत् शरीरं शवं वा, निक्षिप्य स्वगृहे निवेश्य, स्वगृहम् आदीपयेत् कुमारः । किमर्थमन्यशवनिक्षेपस्तत्राह — अनुपातभयात् स्वान्वेषणभयं परिहर्तुम् । दृष्टे हि शवे 'कुमारो दग्ध' इति बुद्ध्या तदन्वेषणाय यत्नं रक्षिणो न कुर्युरिति । एवमादीपितात् स्वगृहात् कथं कुमारो निर्गच्छेत् तत्राह — **तत इति** । आदीपनानन्तरं, सन्धिच्छेदखातसुरङ्गाभिः सन्धिच्छेदेन भित्तिरन्ध्रकरणेन खातसुरङ्गाभिः पुष्करिणीप्रणालीभिश्च, अपगच्छेत् ।

कांचकुम्भभाण्डभारव्यञ्जनो वेति । काचभारस्तृणकाष्ठादिवाही कुम्भभारो जलवाहकः भाण्डभारः अश्वाद्युपकरणवाही तदन्यतमवेषो वा, रात्रौ

प्रवासनान्यनुप्रविष्टो वा रात्रौ तद्व्यञ्जनः प्रतिष्ठेत । विरूपव्याधिकरणारण्यचरच्छद्मनामन्यतमेन वा । प्रेतव्यञ्जनो वा गूढैर्निर्ह्रियेत । प्रेतं वा स्त्रीवेषेणानुगच्छेत् ।

वनचरव्यञ्जनाश्चैनमन्यतो यान्तमन्यतोऽपदिशेयुः, ततोऽन्यतो गच्छेत् । चक्रचराणां वा शकटवाटैरपगच्छेत् ।

आसन्ने चानुपाते सत्रं वा गृह्णीयात् । सत्राभावे हिरण्यं रसविद्धं वा भक्षजातमुभयतः पन्थानमुत्सृजेत् । ततोऽन्यतोऽपगच्छेत् ।

गृहीतो वा सामादिभिरनुपातमतिसन्दध्यात् । रसविद्धेन वा पथ्यदानेन ।

प्रतिष्ठेत । मुण्डजटिलप्रवासानिति । मुण्डजटिलानां विजिगीषुप्रणिहितानां प्रवासान् अर्थात् तान् प्रवसतः, 'मुण्डजटिलानां प्रवासनानि' इत्यपि पाठः । अनुप्रविष्टो वा, रात्रौ, तद्व्यञ्जनः मुण्डजटिलवेषः, प्रतिष्ठेत, तैः सह । विरूपव्याधिकरणेत्यादि । विरूपकरणम् औपनिषदिकोक्तयोगेन स्वाभाविकरूपविलक्षणरूपकरणं व्याधिकरणं व्याधितव्यञ्जनकरणम् अरण्यचरच्छद्म पुलिन्दादिवेषः इत्येतेषाम्, अन्यतमेन वा, प्रतिष्ठेतेति वर्तते । प्रेतव्यञ्जनो वेति । तद्वेषो वा, गूढैः गूढपुरुषैः, निर्ह्रियेत अपनीयेत । प्रेतं वेति । शवं वा कश्चिन्नीयमानं, स्त्रीवेषेण, युक्त इति शेषः, अनुगच्छेत् ।

अन्वेषकानुपातभयपरिहारार्थमाह — वनचरव्यञ्जनाश्चेति । वनचरवेषा गूढपुरुषाः, अन्वेषकैः पृष्टा इति शेषः, एनं कुमारं गतम्, अन्यतो यान्तम्, अन्यतोऽपदिशेयुः अन्येन वनमार्गेण गतं कथयेयुः । ततोऽन्यतो गच्छेदिति । कुमारस्तु वनचरव्यञ्जनापदिष्टान्मार्गादन्येन मार्गेण गच्छेत्, एवं हि गच्छन्नन्वेष्टृभिरग्राह्यो भवतीति । चक्रचराणां वेति । शकटचारिणां वा, शकटवाटैः शकटसङ्घातैः सह, अपगच्छेत् ।

आसन्ने चानुपात इत्यादि । स्वान्वेष्टृजने निकटागते तु, सत्रं वा गृह्णीयात् वनं वा आश्रयेत् वनसंकटदेशे निलीयेत । सत्राभावे, हिरण्यं, रसविद्धं विषयुक्तं, भक्षजातं वा, उभयतः पन्थानं पथ्युभयपार्श्वयोः, उत्सृजेत् विकिरेत् । तदुत्सर्गफलमाह — ततोऽन्यतोऽपगच्छेदिति । यत्रान्वेष्टृजन उत्सृष्टहिरण्याद्यादानव्यग्रश्चरति ततोऽन्येन पार्श्वेनापसरेदित्यर्थः ।

अन्वेष्टृगृहीतस्य प्रतिपत्तिमाह—गृहीतो वेति । ग्रहणं प्राप्तः, सामादिभिः सान्त्ववचनदानादिभिरुपायैः, अनुपातम् अन्वेष्टृजनम्, अतिसन्दध्याद्

वारुणयोगाग्निदाहेषु वा शरीरमन्यदाधाय शत्रुमभियुञ्जीत— पुत्रो मे त्वया हत इति ॥

उपात्तच्छन्नशस्त्रो वा रात्रौ विक्रम्य रक्षिषु ।
शीघ्रपातैरपसरेद् गूढप्रणिहितैः सह ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
सप्तदशोऽध्यायः सन्धिकर्म सन्धिमोक्षः,
आदितः पञ्चदशशततमः ॥

वञ्चयित्वापगच्छेत् । रसविद्धेन वा पथ्यदानेन विषयुक्तेन पाथेयदानेन वा, अतिसन्दध्यात् मूर्छयित्वा मारयित्वा वापगच्छेत् । पथ्यदनेनेति पाठे पथ्यशनेनेत्यर्थः । पाथेयेनेत्येव माधवपाठः ।

ग्रहणभयनिलीनस्य कुमारस्यापसरणोपायमाह — **वारुणयोगाग्निदाहेषु वेति** । पूर्वोक्तेषु वारुणयोगेषु अग्निदाहेषु च, शरीरमन्यदाधाय, प्रयुक्तेष्विति शेषः, शत्रुम् अभियुञ्जीत, विजिगीषुः । अभियोगनिमित्तमाह — **पुत्रो मे त्वया हत इतीति** । अपदिशन्निति शेषः । अभियोगवशाच्च 'कुमारो मृत' इति मत्वा तदन्वेषणविमुखतां गते शत्रौ कुमारः सुखमपसरेदित्यभिप्रायः ॥

पूर्वोक्तसर्वोपायासम्भवे कुमारः किं कुर्यात् तत्राह — **उपात्तच्छन्नशस्त्रो वेत्यादि** । गूढधृतं शस्त्रं गृहीत्वा रात्रौ रक्षिपुरुषान् हत्वा शीघ्रगामिभिरश्वादियानैः पूर्वसंकेतितगूढपुरुषसहितोऽपगच्छेदित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
सप्तदशोऽध्यायः सन्धिकर्म सन्धिमोक्षः,
आदितः पञ्चदशोत्तरशततमः ॥

१२४-१२६. प्रक. मध्यमचरितोदासीनचरितमण्डलचरितानि ।

मध्यमस्यात्मा तृतीया पञ्चमी च प्रकृती प्रकृतयः। द्वितीया च चतुर्थी षष्ठी च विकृतयः। तच्चेदुभयं मध्यमोऽनुगृह्णीयात्, विजिगीषुर्मध्यमानुलोमः स्यात् । न चेदनुगृह्णीयात् प्रकृत्यनुलोमः स्यात् ।

मध्यमश्चेद् विजिगीषोर्मित्रं मित्रभावि लिप्सेत, मित्रस्यात्मनश्च मित्राण्युत्थाप्य मध्यमाच्च मित्राणि भेदयित्वा मित्रं त्रायेत । मण्डलं वा प्रोत्साहयेत्— अतिप्रवृद्धोऽयं मध्यमः सर्वेषां नो विनाशाय अभ्युत्थितः सम्भूयास्य यात्रां विहनामेति । तच्चेन्मण्डलमनुगृह्णीयात्

मध्यमचरितमिति सूत्रम् । विजिगीषोर्मध्यमं प्रति अनुष्ठानमुच्यत इति सूत्रार्थः । अरिमित्रविषयस्यानुष्ठानस्य कथनानन्तरं मध्यमविषयस्य कथनसङ्गतिः ।

मध्यमस्य प्रकृतिविकृतीराह — मध्यमस्येति । तस्य, आत्मा, तृतीया पञ्चमी च प्रकृती मित्रं मित्रमित्रं चेति द्वे प्रकृती च, प्रकृतयः आत्मादयस्तिस्रः प्रकृतय इत्युच्यन्ते प्रकृष्टकरणात् । अरिररिमित्रमरिमित्रमित्रं चेत्येतास्तिस्रो विकृतय इत्याह— द्वितीयेत्यादि । विकृतित्वं च विरुद्धकरणाद् बोद्धव्यम् । प्रकृतित्रिकं विकृतित्रिकं चेत्येतस्य त्रिकद्वयस्य यदि मध्यमस्तुल्यहितवृत्तिः स्यात् तदा विजिगीषुर्मध्यमं प्रति अनुकूलवृत्तिः स्यादित्याह — तच्चेदुभयमित्यादि । न चेदनुगृह्णीयादिति । तच्चेत् त्रिकद्वयं मध्यमो नानुगृह्णीयात्, प्रकृत्यनुलोमः प्रकृतेरात्ममित्रमित्रमित्रात्मकस्य स्वप्रकृतिमात्रस्यानुकूलः, स्यात् ।

यदि मध्यमो विजिगीषोः "एकार्थानर्थसम्बन्धमुपकार्यविकारि च । मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि ॥" इत्युक्तलक्षणं मित्रभावि मित्रं निग्रहीतुमिच्छेत्, तदा विजिगीषुः स्वमित्रस्य स्वस्य च मित्राण्युत्थाप्य मध्यमाच्च तदीयमित्राणि भेदयित्वा स्वीयं मित्रं रक्षेदित्याह—मध्यमश्चेदित्यादि । तथाविधमध्यममपकर्तुमुपायान्तरमाह — मण्डलं वा प्रोत्साहयेदिति । राजमण्डलं वा समुद्योजयेत्, अर्थान्मध्यमापकारे । किमुक्त्वा प्रोत्साहयेदित्याह — अतिप्रवृद्धोऽयं मध्यम इत्यादि । इतिशब्दानन्तरम् उक्त्वेति शेषः । तच्चेदिति । तद् मण्डलं तथा प्रोत्साहितम्, अनुगृह्णीयाच्चेत् आत्मसाहाय्यमनुतिष्ठेद् यदि, मध्यमावग्रहेण मध्यमस्य कर्शनेन, आत्मानम्, उप-

मध्यमावग्रहेणात्मानमुपबृंहयेत् । न चेदनुगृह्णीयात्, कोशदण्डाभ्यां मित्रमनुगृह्य ये मध्यमद्वेषिणो राजानः परस्परानुगृहीता वा बहवस्तिष्ठेयुः एकसिद्धा वा बहवः सिध्येयुः परस्परात् वा शङ्किता नोत्तिष्ठेरन्, तेषां प्रधानमेकमासन्नं वा सामदानाभ्यां लभेत । द्विगुणो द्वितीयं त्रिगुणस्तृतीयम् । एवमभ्युच्चितो मध्यममवगृह्णीयात् ।

देशकालातिपत्तौ वा सन्धाय मध्यमेन मित्रस्य साचिव्यं कुर्यात् । दूष्येषु वा कर्मसन्धिम् ।

कर्शनीयं वास्य मित्रं मध्यमो लिप्सेत, प्रतिस्तम्भयेदेनम्—

बृंहयेत् वर्धयेत् । न चेदनुगृह्णीयादित्यादि । अयमर्थः—मण्डलं चेदात्मानं नानुगृह्णीयात्, तदा विजिगीषुः, धनदानसैन्यदानाभ्यां स्वमित्रं मध्यमलिप्सितम्, अनुगृह्य, ये मध्यमद्वेषिणो राजानः परस्परसहकृता बहवो मध्यममपकर्तुं सज्जाः स्युः, ये वा मध्यमद्वेषिणो बहवस्तेष्वेवान्यतमेऽनुकूलितेऽनुकूलिता भवेयुः, ये वा मध्यमद्वेषिणो बहवः संहत्य समुत्थातुकामा अप्यन्योन्यभेदभयान्नोत्थिताः स्युः, तेषामन्यतमं प्रधानं स्वदेशासन्नं वा साम्ना दानेन च स्वायत्तं कुर्यात् । तथाविधं सहायं लभमानश्च द्वितीयं लभमानो द्विगुणबलो भवेत् तृतीयं लभमानस्त्रिगुणबलः । अनेन च प्रकारेणोपचितशक्तिर्मध्यमं कर्शयेदिति ।

देशकालातिपत्तौ वेति । मध्यमद्वेषिसाहाय्यसम्पादनात् प्रागेव मध्यमः स्वमित्रमुच्छिन्द्यादिति शङ्कायां, सन्धाय मध्यमेन स्वयं मध्यमेन सह सन्धिं कृत्वा, मित्रस्य साचिव्यं मध्यमसन्धिसङ्घटनलक्षणं साहाय्यं, कुर्यात् । असन्धित्सौ मध्यमे त्वाह — दूष्येषु वा कर्मसन्धिमिति । मध्यमस्य ये दूष्याः राष्ट्रमुख्यास्तैः सह कर्मसन्धिं कुर्यात् 'यूयं देशदाहविलोपादिकमारभध्वम् अहमग्रे योत्स्ये' इत्येवं कर्मसंविदा सन्धिं कुर्यादित्यर्थः ।

इत्थं मध्यमेन मित्रभाविमित्रे लिप्सिते विजिगीषोर्विधानमुक्त्वा कर्शनीये मित्रे लिप्सिते विधिमाह — कर्शनीयं वेत्यादि । अस्य विजिगीषोर्मित्रं भूम्येकान्तरं, कर्शनीयं स्वविरुद्धवृत्तित्वात् कोशदण्डादिक्षपणेन कृशतां नेतव्यं, मध्यमो लिप्सेत, चेदिति शेषः, एनं कर्शनीयं, प्रतिस्तम्भयेत् प्रतिस्तब्धं निर्भयं कुर्यात्, किमित्युक्त्वा, अहं त्वा त्रायेय मध्यमाद् रक्षेयमि-

अहं त्वा त्रायेय, इत्या कर्शनात् । कर्शितमेनं त्रायेत ।

उच्छेदनीयं वास्य मित्रं मध्यमो लिप्सेत, कर्शितमेनं त्रायेत मध्यमवृद्धिभयात् ।

उच्छिन्नं वा भूम्यनुग्रहेण हस्ते कुर्यादन्यत्रापसारभयात् ।

कर्शनीयोच्छेदनीययोश्चेन्मित्राणि मध्यमस्य साचिव्यकराणि स्युः, पुरुषान्तरेण सन्धीयेत । विजिगीषोर्वा तयोर्मित्राण्यवग्रहसमर्थानि स्युः, सन्धिमुपेयात् ।

अमित्रं वास्य मध्यमो लिप्सेत, सन्धिमुपेयात् । एवं स्वार्थश्च कृतो भवति मध्यमस्य प्रियं च ।

स्युक्त्वा । कियन्तं कालमीदृशमभयवचनमित्याह — आ कर्शनादिति । मध्यमसकाशाद् यावत् कर्शनं प्राप्तो भवति तावदित्यर्थः । कर्शितमेनं त्रायेत 'साधु कर्शितोऽयमि'ति निश्चितमेनं रक्षेत् ।

विजिगीषोरुच्छेदनीये मित्रे मध्यमेन लिप्सिते विधिमाह— उच्छेदनीयं वास्य मित्रमित्यादि । विजिगीषुस्तं कर्शनप्राप्तिपर्यन्तमुपेक्ष्य पश्चाद् मध्यमाद् रक्षेत् अन्यथा उच्छेदपर्यन्तमुपेक्षायां मध्यमस्य वृद्धिः स्यादिति भयादित्यर्थः ।

अथ विजिगीषुणा कृतेऽपि त्राणयत्ने बलवत्तरेण मध्यमेन यद्युच्छिन्नः स्यादुच्छेदनीयः, तदा विजिगीषुः किं कुर्यादित्याह— उच्छिन्नं वेति । तं, भूम्यनुग्रहेण स्वीयभूमिप्रदानेन, हस्ते कुर्यात् स्ववशे कुर्यात्, किमर्थम्, अन्यत्रापसारभयात् शत्रुपक्षप्रवेशभयं परिहर्तुम् ।

कर्शनीयोच्छेदनीययोरिति । तथाभूतयोः स्वमित्रयोः, मित्राणि, मध्यमस्य साचिव्यकराणि साहाय्यदायीनि, स्युश्चेत्, पुरुषान्तरेण सन्धीयेत सेनापतिकुमारान्यतरोपस्थापनेन सन्धीयेत, अर्थान्मध्यमो विजिगीषुणा । 'सेनापतिकुमाराभ्यामुपस्थातव्यमित्ययम् । पुरुषान्तरसन्धिः स्यान्नात्मनेत्यात्मरक्षणम् ॥' इत्युक्तलक्षणेन सन्धिना मध्यमस्य सार्धं स्वयमपि विजिगीषुः कुर्यादित्यभिप्रायः । विजिगीषोर्वा तयोरित्यादि । कर्शनीयोच्छेदनीययोर्मित्राणि चेद् विजिगीषोरवग्रहणे शक्तानि भवेयुः, तदा विजिगीषुर्मध्यमेन सह सन्धिं कुर्यादित्यर्थः । इत्थं विजिगीषोः स्वमित्राभियोक्तरि मध्यमे वृत्तिर्व्याख्याता ।

विजिगीषोस्तदमित्राभियोक्तरि मध्यमे वृत्तिमाह — अमित्रं वास्येत्यादि । विजिगीषोरमित्रमभियुञ्जाने मध्यमे तेन सह विजिगीषुः सन्धिं

मध्यमश्चेत् स्वमित्रं मित्रभावि लिप्सेत, पुरुषान्तरेण सन्दध्यात् । सापेक्षं वा 'नार्हसि मित्रमुच्छेत्तुम्' इति वारयेत् । उपेक्षेत वा— मण्डलमस्य कुप्यतु स्वपक्षवधादिति ।

अमित्रमात्मनो वा मध्यमो लिप्सेत, कोशदण्डाभ्यामेनमदृश्यमानोऽनुगृह्णीयात् ।

उदासीनं वा मध्यमो लिप्सेत— 'उदासीनाद् भिद्यताम्' इति मध्यमोदासीनयोर्यो मण्डलस्याभिमतस्तमाश्रयेत ।

कुर्यात् । किमर्थमित्याह —**एवमिति** । इत्थंकरणे, स्वार्थश्च स्वामित्रानिग्रहलक्षणः, कृतो भवति, मध्यमस्य प्रियं च, कृतं भवति ।

अथ मध्यमे तन्मित्रमभियुञ्जाने विजिगीषोर्वृत्तिमाह —**मध्यमश्चेदि**त्यादि । मध्यमः मित्रभावि अधिकरणशेषवक्ष्यमाणं स्वमित्रं लिप्सेत चेत्, पुरुषान्तरेण सन्दध्यात् विजिगीषुः सेनापत्यादिप्रेषणेन मध्यमस्य साहाय्यमनुतिष्ठेदित्यर्थः । **सापेक्षं वेति** । मित्रे किञ्चिदपेक्षायुक्तम् आत्मनि सानुरोधं वा मध्यमं, 'नार्हसि मित्रमुच्छेत्तुम्' इत्युक्त्वा, वारयेत् आत्मासत्वाविष्करणार्थम् । निरपेक्षविषय आह —**उपेक्षेत वे**त्यादि । राजमण्डलमेवास्मै मध्यमाय स्वमित्रवधोद्यतायान्यायवृत्तये कोपिष्यतीति बुद्ध्योपेक्षां मध्यमे कुर्यात् ।

मध्यमे तदमित्रमभियुञ्जाने वृत्तिमाह— **अमित्रमि**त्यादि । यदि मध्यमस्तच्छत्रुमभियुञ्जीत, तदा विजिगीषुस्तच्छत्रोर्गूढं साहाय्यं कुर्यात् ।

उदासीनं मध्यमे लिप्समाने वृत्तिमाह— **उदासीनं वे**त्यादि । तं चेद् मध्यमोऽभियुञ्जीत, तदा विजिगीषुः 'उदासीनाद् मध्यमोऽत्यन्तं भेदं प्राप्नोतु' इत्येतदर्थं मध्यमोदासीनयोरन्यतरं मण्डलस्य प्रीतिविषयभूतमाश्रित्य तस्मै साहाय्यं दद्यादित्यर्थः । इह लिप्सेतेत्येतदुत्तरम् 'अस्मै साहाय्यं दद्याद्' इत्यधिकपाठो माधवयज्वटीकापर्यालोचनया प्रतीयते । तदा तु मध्यमाय साह्यं कुर्यादित्यर्थो वक्तव्यः, न चायं विधिरैकान्तिक इत्यभिप्रायकं चोत्तरवाक्यं योज्यम् । इत्थं मध्यमचरितं व्याख्यातम् । अथ क्रमप्राप्तमुदासीनचरितमभिधीयते ।

उदासीनचरितमिति सूत्रम् । उदासीनं प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः ।

मध्यमचरितेनोदासीनचरितं व्याख्यातम् । उदासीनश्चेद् मध्यमं लिप्सेत, यतः शत्रुमतिसन्दध्यान्मित्रस्योपकारं कुर्यात्, मध्यममुदासीनं वा दण्डोपकारिणं लभेत, ततः परिणमेत ।

एवमुपगृह्यात्मानमरिप्रकृतिं कर्शयेत् । मित्रप्रकृतिं चोपगृह्णीयात् ।

सत्यप्यमित्रभावे तस्यानात्मवान् नित्यापकारी शत्रुः शत्रुसहितः पार्ष्णिग्राहो वा व्यसनी यातव्यो व्यसने वा नेतुरभियोक्तेत्यरिभाविनः ।

मध्यमोक्तमुदासीनेऽतिदिशति — **मध्यमचरितेनेत्यादि** । मध्यमस्य याः प्रकृतय उक्ता आत्मा तृतीया पञ्चमी चेति प्रकृतयः, याश्च विकृतयो द्वितीया चतुर्थी षष्ठी च ता उदासीनस्यापि समानाः । या च मध्यमे विजिगीषोर्वृत्तिरुक्ता सोदासीनेऽपि समानेत्यर्थः । तत्र विशेषमाह — **उदासीनश्चेदिति** । उदासीनो यदि मध्यममभियुञ्जीत, तदा यस्मिन् पक्षे मध्यमस्योदासीनस्य वा प्रविष्टः स्वशत्र्वतिसन्धानं स्वमित्रोपकारं च कुर्यात्, मध्यममुदासीनं वा सैन्यदानोपकारिणं लभेत, तं पक्षं परिणमेत प्रविशेदित्यर्थः । इह 'कुर्यादि'त्येतदुत्तरम् 'उदासीनं वा दण्डोपकारिणम्' इत्येव मूलादर्शेषु पाठः उपलभ्यते । किन्तु भाषास्वरसात् 'मध्यममुदासीनं वा दण्डोपकारिणम्' इति पाठः साधुतरोऽनुमितः । एवमुदासीनचरितमुक्तम् ।

अथ मण्डलचरितमुच्यते— **मण्डलचरितमिति सूत्रम्** । मण्डलमरिमित्रात्मकं, तस्मिन् विजिगीषोर्वृत्तिरभिधीयत इति सूत्रार्थः ।

एवमिति । यथोक्तया मध्यमोदासीनवृत्त्या, आत्मानम्, उपगृह्य उपचितशक्तिं कृत्वा, अरिप्रकृतिं सामन्तं, कर्शयेत् क्षीणशक्तिं कुर्यात् । मित्रप्रकृतिं भूम्येकान्तरम्, उपगृह्णीयात् सामदानादिना स्वायत्तं कुर्यात् ।

तत्र सामन्ता अरिशब्दितास्तावत् त्रिप्रकाराः — अरिभाविनो मित्रभाविनो भृत्यभाविन इति । तान् क्रमेण वक्ष्यन् प्रथमम् अरिभाविन आह— **सत्यप्यमित्रभावे तस्येत्यादि** । विजिगीषुं प्रति भूम्यनन्तरत्वेनामित्रत्वे तुल्येऽपि अनात्मवत्त्वादिभिरष्टभिर्विशेषैररिभाविनोऽष्टरूपा भवन्तीत्यर्थः । तत्र अनात्मवान् अवश्येन्द्रियः । नित्यापकारी सदापकारशीलः । शत्रुः निष्कारणं द्विषन् द्विष्यमाणश्च । शत्रुसहितः शत्रुसहायः । पार्ष्णिग्राहः पृष्ठकोपोत्पादकः ।

एकार्थाभिप्रयातः पृथगर्थाभिप्रयातः सम्भूययात्रिकः संहितप्रयाणिकः स्वार्थाभिप्रयातः सामुत्थायिकः कोशदण्डयोरन्यतरस्य क्रेता विक्रेता द्वैधीभाविक इति मित्रभाविनः ।

सामन्तो बलवतः प्रतिघातोऽन्तर्धिः प्रतिवेशो वा बलवतः पार्ष्णिग्राहो वा स्वयमुपनतः प्रतापोपनतो वा दण्डोपनत इति भृत्यभाविनः सामन्ताः ।

तैर्भूम्येकान्तरा व्याख्याताः ।

व्यसनी बन्धुमरणादिदुःखी । यातव्यः अभियोक्तव्यः । व्यसने वा नेतुरभियोक्ता विजिगीषोर्व्यसनमुपलभ्याभियोगकर्ता च ।

मित्रभाविन आह —एकार्थाभिप्रयात इति । यमर्थमुद्दिश्य विजिगीषुः प्रयातः तमेवार्थं साधयितुं भिन्नदिक्कं प्रयातः, पृथगर्थाभिप्रयातः विजिगीषौ भूम्युद्देशेन प्रयाते हिरण्योद्देशेन प्रयातः, सम्भूययात्रिकः विजिगीषुणा समवेत्य प्रयातः, संहितप्रयाणिकः विजिगीषुणा सह सन्धिं कृत्वा 'त्वमितो याहि अहमन्यतो यास्यामी'ति परिभाष्य प्रयातः, स्वार्थाभिप्रयातः विजिगीषुकार्यसाधनाय प्रयातः, सामुत्थायिकः सम्भूय शून्यनिवेशनादिकर्मानुष्ठानसंविदा प्रवृत्तः, कोशदण्डयोरन्यतरस्य क्रेता विक्रेता कोशेन दण्डस्य दण्डेन कोशस्य वा क्रयकर्ता विक्रयकर्ता च, द्वैधीभाविकः द्वैधीभावगुणोपयोगी कृतसन्धिः पार्ष्णिग्राहादिरित्यर्थः, इति, अष्टाविति शेषः, मित्रभाविनः ।

भृत्यभाविन आह —सामन्त इति । बलवतो राज्ञः, प्रतिघातः प्रतिहन्ता 'प्रतिघातो बलवतो दुर्गाटव्यपसारवानि'त्युक्तलक्षणः, अन्तर्धिः 'अरेर्नेतुश्च मध्यस्थो दुर्बलो भूम्यनन्तरः' इत्युक्तरूपः, प्रतिवेशो वा पार्श्वयोर्भूम्यनन्तरो वा, इत्येवं त्रिरूप इति शेषः, सामन्तो भूम्यनन्तरो दुर्बलः, बलवतः पार्ष्णिग्राहो वा बलवतः पार्ष्णिं यो दुर्बलो गृह्णाति स वा यातव्यसाहाय्यकारी स्थानीयबाधक इत्युभयरूपः, स्वयमुपनतः स्वयमेवोपगम्याश्रयी प्रतापोपनतो वा प्रतापप्रणतो वेति द्विरूपो दण्डोपनतः, इत्येते भृत्यभाविनः सामन्ताः ।

तैरिति । तैः 'सत्यप्यमित्रभावे तस्ये'त्यादिना त्रिरूपतया व्याख्यातैरमित्रैः, भूम्येकान्तराः व्याख्याताः मित्राण्यपि व्याख्यातप्रायाणि । अमित्रेष्विव मित्रेष्वपि अरिभावित्वमित्रभावित्वभृत्यभावित्वरूपा भेदा भवन्तीत्यर्थः ।

तेषां शत्रुविरोधे यन्मित्रमेकार्थतां व्रजेत्।
शक्त्या तदनुगृह्णीयाद् विषहेत यया परम्॥
प्रसाध्य शत्रुं यन्मित्रं वृद्धं गच्छेदवश्यताम्।
सामन्तैकान्तराभ्यां तत् प्रकृतिभ्यां विरोधयेत्॥
तत्कुलीनावरुद्धाभ्यां भूमिं वा तस्य हारयेत्।
यथा वानुग्रहापेक्षं वश्यं तिष्ठेत् तथा चरेत्॥
नोपकुर्यादमित्रं वा गच्छेद् यदतिकर्शितम्।
तदहीनमवृद्धं च स्थापयेन्मित्रमर्थवित्॥
अर्थयुक्त्या चलं मित्रं सन्धिं यदुपगच्छति।
तस्यापगमने हेतुं विहन्यान्न चलेद् यथा॥

मित्रेष्ववस्थाविशेषे वृत्तिविशेषानाह — तेषामिति। तेषां भूम्येकान्तराणां मित्राणां, शत्रुविरोधे शत्र्वभियोगे प्राप्ते, यत् मित्रम्, एकार्थतां शत्रुणा समानार्थत्वं सन्धिमित्यर्थः, व्रजेत्, तत्, शक्त्या कोशदण्डादिकया, अनुगृह्णीयात् उपचितं कुर्यात्। कीदृश्या शक्त्या, यया स्वीकृतया परं शत्रुं विषहेत अभिभवेत्॥

प्रसाध्येति। यत् मित्रं, शत्रुं प्रसाध्य जित्वा, वृद्धं सत्, अवश्यताम् अविधेयत्वं, गच्छेत्, तत् मित्रं, सामन्तैकान्तराभ्यां प्रकृतिभ्याम् अरिप्रकृतिमित्रप्रकृतिभ्यां, विरोधयेत्॥

तत्कुलीनेत्यादि। अथवा, तत्कुलीनावरुद्धाभ्यां तस्यावश्यस्य मित्रस्य कुलीनेन ज्ञातिना अवरुद्धेन पुत्रादिना च, तस्य भूमिं हारयेत्। अथवा, अनुग्रहापेक्षं वश्यं यथा तिष्ठेत् स्वसाहाय्यार्थि स्वविधेयं च यथा मित्रं तिष्ठेत्, तथा चरेद् अनुतिष्ठेत्॥

यत् मित्रं प्राप्तातिकर्शनं सत् स्वस्योपकारं न कुर्यात् शत्रुणा वा संसर्गं गच्छेत्, तत् मित्रं हानिरहितं वृद्धिरहितं च स्थापयेत् स्वार्थसाधनपण्डितो विजिगीषुरित्याह — नोपकुर्यादित्यादि॥

चलमित्रविषयेऽनुष्ठेयमाह— अर्थेत्यादि। यच्चलं मित्रं प्रयोजनयोगेन सन्धिमात्मना सह गच्छति, तत् पुनर्यथा न चलेत् तथा तस्यापगमनकारणं भूयोर्थलिप्सारूपं स्वयं तद्दानेन विहन्यात्॥

अरिसाधारणं यद्वा तिष्ठेत् तदरितः शठम् ।
भेदयेद् भिन्नमुच्छिन्द्यात् ततः शत्रुमनन्तरम् ॥

उदासीनं च यत् तिष्ठेत् सामन्तैस्तद् विरोधयेत् ।
ततो विग्रहसन्तप्तमुपकारे निवेशयेत् ॥

अमित्रं विजिगीषुं च यत् सञ्चरति दुर्बलम् ।
तद् बलेनानुगृह्णीयाद् यथा स्यान्न पराङ्मुखम् ॥

अपनीय ततोऽन्यस्यां भूमौ वा सन्निवेशयेत् ।
निवेश्य पूर्वं तत्रान्यं दण्डानुग्रहहेतुना ॥

अपकुर्यात् समर्थं वा नोपकुर्याद् यदापदि ।
उच्छिन्द्यादेव तन्मित्रं विश्वस्याङ्कमुपस्थितम् ॥

अरिविजिगीष्वोः समानं शठं यत् मित्रं, तत् शत्रुसकाशात् भेदयेत् भिन्नं चोच्छिन्द्यात्, तदुच्छेदानन्तरं च शत्रुमुच्छिन्द्यादित्याह— **अरिसाधारणमित्यादि** ॥

यद् अरिविजिगीष्वोरुदासीनं तिष्ठति, तत् मित्रं, सामन्तैः विरोधयेत्, सामन्तारब्धविग्रहोपजातसन्तापं च कृत्वा स्वकर्तव्योपकारसापेक्षतां नयेदित्याह —**उदासीनं चेत्यादि** ॥

यत् मित्रं दुर्बलं स्वबलाधानार्थं शत्रुविजिगीषू उभावप्याश्रयति, तत् स्वबलदानेन तथानुगृह्णीयात् यथा शत्रुणा न तत् संसृज्येतेत्याह — **अमित्रं विजिगीषुं चेत्यादि** ॥

उक्तस्योभयमुखप्रेक्षिणो दुर्बलस्यानुग्रहणेऽन्यं प्रकारमाह — **अपनीयेति** । पूर्वोक्तं मित्रं, ततोऽपनीय तदीयभूमेरपगमय्य, अन्यस्यां भूमौ वा शत्रुसाद्यानिरपेक्षायां स्वभूमौ वा, सन्निवेशयेत् स्थापयेत् । तदीयभूमौ कर्तव्यमाह—तत्र तदीयभूमौ, दण्डानुग्रहहेतुना सैन्येनानुग्रहकरणार्थम्, अन्यं तत्समर्थं, पूर्वं मित्रापनयनात् प्रागेव, निवेश्य स्थापयित्वा ॥

यत् मित्रं विजिगीषोरपकारं कुर्यात् समर्थं वा सद् उपकारम् आपदि न कुर्यात्, तत् मित्रम् उपायैरात्मनि विश्वासयुक्तं कृत्वा स्वोत्सङ्गगतं विजिगीषुरुच्छिन्द्यात् न तूपेक्षेतेत्याह — **अपकुर्यादित्यादि** ॥

मित्रव्यसनतो वारिरुत्तिष्ठेद् योऽनवग्रहः।
मित्रेणैव भवेत् साध्यश्छादितव्यसनेन सः॥

अमित्रव्यसनान्मित्रमुत्थितं यद् विरज्यति।
अरिव्यसनसिद्ध्या तच्छत्रुणैव प्रसिध्यति॥

वृद्धिं क्षयं च स्थानं च कर्शनोच्छेदनं तथा।
सर्वोपायान् समादध्यादेतान् यश्चार्थशास्त्रवित्॥

एवमन्योन्यसञ्चारं षाड्गुण्यं योऽनुपश्यति।
स बुद्धिनिगलैर्बद्धैरिष्टं क्रीडति पार्थिवैः॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे अष्टादशोऽध्यायः
मध्यमचरितमुदासीनचरितं मण्डलचरितम्,
आदितः षोडशशततमः॥

एतावता कौटलीयस्यार्थशास्त्रस्य षाड्गुण्यं
सप्तममधिकरणं समाप्तम्॥

योऽरिर्विजिगीषोर्मित्रव्यसनवशात् प्रतिबन्धं विनैव वृद्धिं प्राप्नुयात्, सः मित्रेणैव स्वप्रयत्नप्रशमितव्यसनेन स्वप्रयत्नाप्रकाशितव्यसनेन वा साधनीय इत्याह — मित्रव्यसनतो वारिरित्यादि॥

यत् मित्रम् अमित्रस्य बलादिव्यसनाद् वृद्धिं प्राप्तं सद् विजिगीषुविरक्तं भवति, तत् मित्रं विजिगीषुररिव्यसननिवर्तनपूर्वमरिणैवोद्योजितेन साधयेदित्याह — अमित्रव्यसनान्मित्रमित्यादि। अरिव्यसनसिद्ध्या अरिव्यसनस्यापोहेनेत्यर्थः॥

वृद्धिमिति। योऽर्थशास्त्रवित् स तु, वृद्धिं क्षयं स्थानं च, तथा कर्शनोच्छेदनं कर्शनमुच्छेदनं च, एतान् सर्वोपायान् सर्वांश्च सामदानादीनुपायान्, समादध्यात् सम्यक् तत्तद्विषयसम्प्रधारणपूर्वं प्रयुञ्जीत॥

यथाप्रपञ्चितार्थसम्यक्प्रयोगप्रयोजनाख्यानेनाधिकरणमुपसंहरति — एवमिति। प्रपञ्चितैः प्रकारैः, यः, अन्योन्यसञ्चारं परस्परोपश्लिष्टं, षाड्गुण्यम्, अनुपश्यति अनुसन्धत्ते, सः, बुद्धिनिगलैः बुद्धिभिरेव बन्धन-

शृङ्खलाभिः, बद्धैः स्वायत्ततां नीतैः, पार्थिवैः क्रीडासाधनैः, इष्टं यथाकामं क्रीडति ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभांजने ।
षाड्गुण्याख्याधिकरणं सप्तमं समपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितल्याग्रहारा-
भिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्री-
मूलाख्यायां षाड्गुण्ये सप्तमाधिकरणे अष्टादशोऽध्यायः
मध्यमचरितोदासीनचरितमण्डलचरितानि,
आदितः षोडशोत्तरशततमः ॥
षाड्गुण्यं सप्तममधिकरणं
समाप्तम् ॥

द्वितीयसम्पुटः समाप्तः ।
शुभं भूयात् ।